| उक्तलक्षणहेतु° | त्वादुक्षणि-कहेतु° | १० | ९ |
| कार्योत्पत्ति° | कायोत्पत्ति° | ११ | १४ |
| द्वितीयादि° | द्विभयादि° | ११ | २० |
| प्रयोजकत्वेन | प्रयोजनकत्वेन | १३ | २२ |
| °काध्यक्ष° | °काध्वक्ष° | १७ | ७ |
| °वसत्त्वनिश्च-योऽनुभवान्न | °वसत्श्चयोऽनु-भवान्ननिव | १९ | २९ |
| °णातिरिक्ता° | °णानतिरिक्ता° | २१ | १७ |
| °णप्र° | °णाप्र° | २१ | १७ |

| शुद्धम्, | अशुद्धम्, | पत्रं-पङ्क्तिः | |
|---|---|---|---|
| तज्ज्ञाने न | तज्ज्ञानेन | २२ | १० |
| °वस्तुनि व्यव° | °वस्तु व्यव° | २३ | २० |
| °योग्युपलम्भकसा° | °योग्यसा° | २४ | १८ |
| तदुपलम्भकसा° | तदुपल-म्भसा° | २४ | २० |
| प्रतियोग्यं-शेभ्रमा° | प्रतियोग्य-भ्रमा° | २४ | २१ |
| °सामग्री | °साग्री | २५ | ८ |
| °पीत्यर्थः, | °पीत्यार्थः, | २५ | १९ |
| °मनस्कारा- | °नमस्कारा- | २६ | २० |
| दोषान्तरमु° | दोषान्तमु° | ३२ | १ |
| °भावप्र° | °भावे प्र° | ३४ | ६ |
| °गिज्ञानत्वेन | °गिक्षानत्वेन | ३४ | ८ |
| °वादतिरिक्त° | °वादिरिक्त° | ३६ | १ |
| °विषयतया | °विषतया | ३६ | २० |
| °यता भावा° | °यताभावा° | ३६ | २२ |
| °सामान्या-भावस्य | °सामान्यस्य | ३७ | १३ |
| °कारक- | °कारव- | ३७ | २२ |
| पर्यायतया सा° | पर्यायता सा° | ३८ | २५ |
| °ज्ञानाना-स्कन्दि- | °ज्ञानानार-स्कन्दि- | ३८ | २८ |
| °हारप्रसङ्गः, | °हारः प्रसङ्गः, | ३९ | २९ |

| शुद्धम्, | अशुद्धम्, | पत्रं- | पङ्क्तिः |
|---|---|---|---|
| °भयस्वरू° | °भयत्वरू° | ४० | १६ |
| °तया वृत्तौ | °तावृत्तौ | ४० | २३ |
| °सम्बन्धसा° | °सम्बन्धासा° | ४१ | १० |
| कारणस्य | करणस्य | ४३ | २ |
| घटपटा- | घटपदा- | ४३ | १५ |
| °निरूपितत्वेन | °निरूपित्वेन | ४४ | २६ |
| स्यात् | स्तात् | ४७ | १ |
| कारणानन्तरं | कारणान्तरं | ४९ | १२ |
| °विशेषस्यैव | °विशेष्यस्यैव | ५० | २० |
| °युक्तः, वह्नि | °युक्तवह्नि° | ५२ | २ |
| काशीयो | काशेयो | ५२ | ३ |
| न च लोहो° | न च न च लोहो° | ५२ | ४ |
| मतमुत्थाप्य | मतमनुत्थाप्य | ५५ | १४ |
| °न्नेन समं | °न्नेन, समं | ५५ | २७ |
| °नुमानेन | °नुमाने न | ५७ | १० |
| °तानव° | °ताव° | ५७ | १३ |
| °तानव° | °ताव° | ५७ | १४ |
| °तानव° | °ताव° | ५७ | १६ |
| प्रकारः प्र° | प्रकारप्र° | ५८ | ८ |
| संयोगसंसर्गस्य | संयोगसर्गस्य | ५८ | १० |
| संसर्गत्वे सं° | संसर्गत्वसं° | ५८ | १७ |
| °प्येकस्यैवा° | °प्येकस्यैकस्यैव° | ५९ | ७ |
| °कत्वप्र° | °कप्र° | ६० | ६ |
| नाभ्युपैषि, | नाभ्युपैमि, | ६० | २५ |
| °लोक-मन° | °लोक-नमन° | ६२ | ४ |
| संवृतिसदे° | संवृति सदे° | ६२ | १८ |
| °त्रेतिशब्द | त्रेति शब्द | ६५ | १९ |
| बोधरूपं | बाधरूपं | ६७ | ९ |
| °स्य विरुद्धस्वभावौ | °स्य स्वभावौ | ६७ | २० |
| तथाभाव° | तथा भाव° | ७३ | ८ |
| तथाभाव° | तथा भाव° | ७३ | ११ |
| व्यभिचारग्रह° | व्यभि-चारग्रह° | ७५ | ३ |
| °स्योपादान° | °स्यापादान° | ७५ | २३ |
| °समनन्तर° | °समन्तर° | ७६ | १६ |
| अभिज्ञान° | अभिज्ञाव° | ७६ | २२ |
| भावे ना° | भावेना° | ७६ | २७ |
| धूमज्ञानस्या° | धूमज्ञनास्या° | ७८ | ६ |
| प्रत्युक्त° | प्रयुक्त° | ७८ | १३ |
| °योस्त° | °योरत° | ७९ | ५ |
| °वे नि° | °वेऽनि° | ८० | ३ |
| °कारयोरपि | °कारयोरिव | ८१ | १६ |
| °व्यतिरिक्त° | °व्यक्तिरिक्त° | ८४ | १६ |
| °नुपपत्तिः° | नुपपत्ति- | ८८ | ९ |
| सहकारि° | सहकार° | ८८ | १४ |
| वस्तुनो | वस्तुतो | ८८ | २७ |
| °रार्पकत्वे | °रार्थकत्वे | ८९ | २७ |
| °स्य प्र° | °स्याप्र° | ९१ | १४ |
| °स्य प° | °स्याप° | ९१ | २७ |
| केवल- | कवल- | ९४ | ४ |
| तज्जनन° | तत्तज्जनन° | ९४ | २२ |
| मृदाद्यनन्वयि | मृदाद्यन्वयि | ९६ | २० |
| °ज्ञेऽपी° | °ज्ञोऽपी° | ९७ | ४ |
| विशेषः | विरोधः | ९७ | २० |

| शुद्धम्, | अशुद्धम्, | पत्रं | पङ्क्तिः |
| --- | --- | --- | --- |
| संसारास्था° | संसारस्था° | ९९ | २० |
| यन्न्याया° | यं न्याया° | १०२ | २६ |
| सत्त्वेऽपि | स्वप्नेऽपि | १०३ | १४ |
| क्षणभेदे न | क्षणभेदेन | १०३ | १५ |
| क्षणयोर्भेदे, | क्षणयोर्भेदः, | १०३ | २२ |
| °भ्रमात् | °भ्रमात्, | १०५ | २ |
| °मतख° | °मख° | १०६ | १ |
| यद् योगा° | यद् यागा° | १०६ | ९ |
| संज्ञाऽपि ते | संज्ञाऽपिते | १९६ | १९ |
| सैवैका | सैवेंका | १०९ | २ |
| बाह्यार्थो° | बाह्यार्थं० | ११३ | ४ |
| °द्व्यणुकगतो- | °द्व्यणुकमतो- | ११५ | २१ |
| °ता | °ता, | ११६ | १३ |
| °घटाभावप्र° | °घटप्र° | ११७ | ३ |
| °नुपलम्भे | °नुपलम्भो | ११८ | २ |
| °धानदशायां | °धानशायां | ११८ | १५ |
| °न्द्रियसन्निकर्ष° | न्द्रियवि° | ११९ | ६ |
| °गपोद्धार° | °गपोद्वार° | १२३ | २५ |
| °माननि° | °मानानि° | १२४ | २४ |
| °अयोगात्, | आयोगात्, | १२६ | २४ |
| एकापलापे° | एकापलाहपे° | १२८ | २५ |
| °सम्भवात् | °सम्भवात्, | १२९ | २३ |
| °सामर्थ्ये वा | °सामर्थे वा | १३० | १३ |
| °पत्तेरा° | °पत्तेः, आ° | १३३ | १८ |
| °दनाद्यद्यर्थ° | °दनाद्यर्थ° | १३५ | १२ |
| °ऽसाम्प्रत° | साम्प्रत° | १४० | २ |
| °मात्रवादिनो° | मात्रावादिनो | १४४ | २३ |
| आपद्यते, | आपाद्यते | १४५ | १४ |
| ननु | न तु | १४८ | १० |
| दोषाः सर्वे | दोषा सर्वे | १४९ | १० |
| तथा न० | तथाऽन° | १५१ | २२ |
| तथा न° | तथाऽन° | १५१ | २५ |
| °हितमिति | °हित इति | १५६ | २२ |
| °न्तरभवि° | °त्तरं भवि° | १५६ | २८ |
| भावे न | भावेन | १५७ | १५ |
| सममन्वय° | समन्वय° | १५९ | १५ |
| इति । य | इति य | १५९ | २२ |
| तज्जातीय° | तज्जानीय° | १६० | ३ |
| °पादकं° | °पदकं | १६१ | १० |
| °करणायालं | कारणायालं | १६३ | १८ |
| °करणा° | °कारणा° | १६३ | १९ |
| °स्वभावभाव° | °स्वभाव-स्वभाव° | १६५ | २८ |
| जन्मानन्तर° | जन्मान्तर° | १६८ | १७ |
| अर्थक्रिया ज° | अर्थक्रिया-ज° | १६८ | २२ |
| कृत्यभावात् | कृताभावात् | १६९ | २७ |
| °वर्त्तितास° | वर्तिता स° | १७२ | १ |
| कुण्डलभावं | कुण्डलं भावं | १७३ | १८ |
| °दभवनात्, | °दभावनात्, | १७४ | ६ |
| तैलादि गोरस° | तैलादि-गोरस० | १७४ | २४ |
| °भिता(?)तु° | °भिमता-तु° | १७५ | १३ |
| °योगिमत्यपि | योगिवत्यपि | १७६ | १३ |
| °धिनोरसत्त्वाद् | °धिनोः सत्त्वाद् | १७६ | १३ |

| शुद्धम्, | अशुद्धम्, | पत्रं-पङ्क्तिः | |
|---|---|---|---|
| असतोऽनि° | असतो नि° | १७७ | ८ |
| °तद° | °सद° | १७८ | १० |
| यावद्धट° | यावद् घट° | १७८ | २१ |
| °निरूपकतानि° | °निरूपता नि° | १७९ | १८ |
| °निरूपकता° | °निरूपता° | १७९ | २९ |
| °नुयायि, | °नुयाति, | १८० | १० |
| स- | स | १८२ | ९ |
| रूपत्वेन, | रूपस्वेन | १८२ | १६ |
| °भावादिहेतु° | °भावादि हेतु° | १८३ | २१ |
| तथात्वा° | तथा स्वा° | १८४ | १० |
| एवं च | एव च | १८४ | १२ |
| °रूपादि° | °रूदादि° | १८५ | १६ |
| °दवयविनि | °दवयनिति | १८५ | १९ |
| °वत्कपाला-रब्ध° | °वत् कपाल-रब्ध° | १८६ | २ |
| °रूपस्या° | °रूपपस्या° | १८६ | १२ |
| °वयववर्त्तिनो | °वयवर्तिनो | १८७ | १९ |
| °वयवरूपा° | °वयवयरूपा° | १८७ | २२ |
| तदस्त्विति | तदास्त्विति | १८९ | १ |
| निर्विगानं | निविगानं | १९० | २५ |
| गतनील° | गतानील° | १९१ | २ |
| °प्रत्यक्षस्थले | °प्रत्यक्षस्थस्थले | १९१ | १२ |
| °देशव्या-पिनी | °देशव्यपिनी | १९१ | १४ |
| रूपपद्यते, | रूपपद्यते, | १९१ | २६ |

| शुद्धम्, | अशुद्धम्, | पत्रं-पङ्क्तिः | |
|---|---|---|---|
| °भागावच्छे- | °भागवच्छे- | १९१ | २८ |
| तद्देशेन चित्रा- | तद्देशेनाचित्रा- | १९२ | ३ |
| नयाधीन° | नयधिन° | १९२ | ४ |
| क्षयेक्षणात् | क्षये क्षणात् | १९२ | १३ |
| °सारूप्य-ग्रहो° | °सारूप्यग्रहा° | १९४ | १७ |
| स्वरूपसत | स्वरूप सत | १९४ | १८ |
| °मेऽनन्त- | °मेऽन्न- | १९६ | ७ |
| °कत्वा-नालो° | °कत्वालो° | १९७ | १३ |
| भावोऽपि, | °भावेऽपि, | १९८ | १० |
| अनन्तराभि° | अनन्ताभि° | २०० | २२ |
| वितण्डाकथा° | वितण्डकथा° | २०० | २७ |
| °भाव- | भावः | २०१ | १४ |
| वस्तुसती | वस्तु सती | २०२ | २ |
| °कर्मणा- | °कर्मणा | २०२ | ७ |
| तथाभूत° | तथा भूत° | २०३ | ५ |
| येन | ये न | २०३ | १३ |
| नान्योऽनु-भाव्यो | नान्योनुभावो | २०३ | २७ |
| स्वीकर्त्तुमुचि-तमित्यभि- | स्वीकर्त्तुमित्यभि- | २०४ | २७ |
| वादे शू° | वादेः शू° | २०५ | १२ |
| °त्यत्र बीज° | °त्यत बीज° | २०७ | १४ |

॥ इति शुद्धिपत्रम् ॥

स्व. शासनसम्राट्ना-पट्टालंकार-व्याकरणवाचस्पति-कविरत्न-
शास्त्रविशारद-सातलाखश्लोकप्रमाण संस्कृतसाहित्यना सर्जक



पूज्य आचार्यश्रीमद् विजयलावण्यसूरीश्वरजी महाराज।

॥ अर्हम् ॥

स्याद्वादपञ्चाननो निखिलावनिवनिकायां विलसतितराम् ।

चतुश्चत्वारिंशदधिकचतुर्दशशतमितसूत्रसूत्रणसूत्रधार-याकिनीमहत्तराधर्मसूनु-विरहाङ्काङ्कित-सुगृहीतनामधेय-सूरिपुरन्दर-श्रीहरिभद्राचार्येण भगवता निर्मितः

# शास्त्रवार्तासमुच्चयः ।

तदुपरि-

तपोगणगगनाङ्गणगगनमणि-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न' इति पदालङ्कृतेन श्रीविजयलावण्यसूरिणा विरचिता

## स्याद्वादवाटिका टीका-

### अथ चतुर्थः स्तबकः ।

ये स्याद्वादमुपासतेऽत्र कृतिनो धन्या भवे तेऽखिले,
ये त्वेकान्तमतप्रचाररचनां कुर्वन्ति दुष्कर्मठाः ॥
तेषां तत्त्वविबोधनाय विमलं स्याद्वादवादं कृती
धन्यः कोऽपि प्रकाशयत्यनुगतं मोक्षप्रथाभासुरम् ॥ १ ॥

वार्तान्तरमुपदर्शयति—

**मन्यतेऽन्ये जगत् सर्वं, क्लेशकर्मनिबन्धम् ।**
**क्षणक्षयि महाप्राज्ञा, ज्ञानमात्रं तथा परे ॥ १ ॥ २३८ ॥**

**मन्यन्त** इति–अभ्युपगच्छन्तीत्यर्थः, **अन्ये** सत्कार्यवादिभ्यो भिन्ना बुद्धतनयाः सौत्रान्तिकाः, **सर्वं जगत्** चराचरमखिलमेव विश्वं, **क्लेशकर्मनिबन्धनं** रागादिकर्मनिमित्तं, तथा **क्षणक्षयि** प्रतिक्षणनश्वरम्; तथा **महाप्राज्ञाः** तेभ्योऽप्यतिशयितप्रज्ञावन्तः, अपरे योगाचाराः साकारविज्ञानमात्रवादिनः, **ज्ञानमात्रं** क्षणिकविज्ञानमात्रम्, 'जगत् मन्यन्ते' इति सम्बध्यते ॥ १ ॥ २३८ ॥

तत्र सौत्रान्तिकमतमुपदर्शयति—

**तयाहुः क्षणिकं सर्वं नाशहेतोरयोगतः ।**
**अर्थक्रियासमर्थत्वात् परिणामात् क्षयेक्षणात् ॥ २ ॥ २३९ ॥**

**तयाहुरिति**–ते आहुरित्यस्य सन्धाविदं रूपम्। **त आहुरिति** हरिभद्रसूरिसम्मतः पाठः, **ते** सौत्रान्तिकाः सौगतविशेषाः, **आहुः** प्रतिजानते; किं प्रतिजानते? इत्यपेक्षायामाह–**क्षणिकं सर्वमिति**–चराचरं विश्वं क्षणविनश्वरं, स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरण स्वाधिकरणक्षणध्वंसाधिकरणक्षणवृत्तिध्वंसप्रतियोगीति यावत्। जगति निरुक्तक्षणिकत्वसाधने हेतुचतुष्टयं प्रवर्त्तते, तत्र–**'नाशहेतोरयोगतः'** इति प्रथमो हेतुः १, **'अर्थक्रियासमर्थत्वाद्'** इति द्वितीयो हेतुः २, **'परिणामाद्'** इति तृतीयो हेतुः ३, **'क्षयेक्षणाद्'** इति तुरीयः ४। नाशहेतोरयोगात् स्थायित्वासिद्धौ क्षणिकत्वसिद्धिर्यथा–नाशहेतुभिर्नश्वरस्वभावो भावो नश्येत्? अनश्वरस्वभावो वा? इति, प्रथमविकल्पे यदि द्वितीयक्षणे न नश्येत् तर्हि नश्वरस्वभावतैवास्य हीयेतेति नश्वरस्वभावान्यथानुपपत्त्या नाशहेतुसमवधानं विनाऽपि नश्येदेवेति तदर्थं नाशहेतुसमवधानप्रयासो विफल एव; द्वितीयविकल्पे यदि स भावो नाशहेतुभिर्नश्येत् तर्हि अनश्वरस्वभावत्वमेव तस्य न स्यादिति तत्स्वभावपराकरणस्य कर्त्तुमशक्यत्वान्नाशहेतुसमवधानस्य वैफल्यम्; स्वहेतुभिः कार्यं कियत्कालस्थायिस्वभावमेव जन्यत इति कियत्कालं स्थित्वा नाशहेतुभिर्नश्यतीत्यपि न समीचीनं, यत्क्षणेऽसौ नश्यति तत्पूर्वक्षणेऽप्ययं कियत्कालस्वभाव इति तदनन्तरक्षणे नाशे कियत्कालस्थायित्वस्वभाव एव न स्यादिति स्वभावपरिवर्त्तनं न केनापि कर्त्तुं शक्यमिति यथोदयकाले तादृक्स्वभावः स तथाऽन्तकालेऽपीति तावन्तं कालं स्थास्यत्येवेति कदापि न नश्येदिति तादृशस्वभावः स हेतुभिर्न जनित इत्येवास्थेयं, तथा च नित्यत्वाभावे कियत्कालस्थायित्वस्य चाभावे नाशहेतूनामकिञ्चित्करत्वादयोगतः क्षणिकत्वं सिध्यतीति १। अर्थ-

क्रियासमर्थत्वलक्षणो द्वितीयहेतुरपि स्थायिनो भावान्निवर्त्तमानः क्षणिक एव विश्राम्यति, तथाहि–अर्थक्रियाकारित्वं क्रम-यौगपद्याभ्यां व्याप्तं, यः करोति स क्रमेण करोति युगपद् वा, प्रकारान्तराभावात्; एवं च स्थायीभावः क्रमेण कार्यं कुर्यात्? अक्रमेण वा?, तत्र तावत् क्रमकारित्वं न सम्भवति, समर्थस्य विलम्बायोगाद्, यत्कार्यं प्रति यत् समर्थं तत्कार्यं प्रथमक्षण एव तत् कुर्यात्; समर्थस्यापि सहकार्यपेक्षा समस्त्येवेति यत्कार्यं प्रति यदा सहकारिसमवधानं तदा तत्कार्यं करोतीति प्रथमं यत्कार्यानुगुणसहकारिसमवधानं नास्ति तत्कार्यस्य तदा न करणं, किन्तु सहकारिसमवधाने सति कालान्तरे इत्येवं क्रमकारित्वं स्थिरस्यापि सम्भवतीत्यपि वक्तुं न शक्यम्, सहकारित्वस्यैव दुर्वचत्वात्; तथाहि–किमिदं सहकारित्वम्?, अतिशयाधायकत्वम्? एककार्यप्रतिनियतत्वं वा?, आद्ये–सहकारी न विवक्षितकार्यजनकः, किन्तु यस्य कारणस्य सहकारी तत्कारणातिशयजनक इत्यतिशयाधानेनैव तदुपक्षयः, अतिशयश्च यदि कारणाद् भिन्नस्तदा तज्जननेऽपि कारणं न सहकारिणोपकृतमित्यनुपकृतं तत् पूर्ववदेवावतिष्ठत इति सहकार्यसमवधानकाल इव तत्समवधानकालेऽपि कार्यं न कुर्यादेव; सहकारिजनितस्य चातिशयस्य कारणादभेदे तदुत्पत्तौ तदात्मकं कारणमप्युत्पन्नमित्यनतिशयकारणस्वभावात् सातिशयकारणस्वभावस्य भिन्नत्वेन स्थिररूपताहानिः; एककार्यप्रतिनियतत्वं सहकारित्वमिति द्वितीयपक्षे–तथाभूतसहकारिसमवधानेऽपि नान्यरूपेण विवक्षितकारणस्य कारणत्वं, किन्तु यदसाधारणरूपेण कारणत्वं तदेव सहकार्यसमवधान-तत्समवधानकालयोरिति तदकारकावस्थात्यागाभावात् सहकारिसमवधानकालेऽपि ततः कार्यानुत्पत्तिरेव स्यात्; इतरहेतुसन्निधान एव कार्यं जनयतीति हेतोः स्वभाव इति चेत्? तर्हि इतरहेतुसन्निधानमपि हेतुस्वभावानुप्रविष्टमिति जन्मानन्तरमेव स्वभावानुप्रविष्टत्वादितरहेतून् मेलयेदिति जन्मानन्तरं सहकारिसमवधानस्यापि सद्भावाद् यावत् कार्यं तस्य तदखिलमपि तदैव स्यादतोऽपि न क्रमेण कार्यकरणम्; स्थायी भावोऽक्रमेण कार्यं करोतीति द्वितीयविकल्पे–एकदैव सर्वकार्योत्पत्तिरिति तदनन्तरमर्थक्रियाकारित्वलक्षणसत्त्वाभावान्न स्थिरस्य कारणस्य भाव इति २। **परिणामादिति** तृतीयहेतौ–परिणामस्यान्यथाभावरूपस्य पूर्वरूपपरित्यागं विनाऽभावात् पूर्वपरित्यागेनोत्तररूपग्रहणलक्षणपरिणामस्यानुभवसिद्धत्वात् क्षणिकत्वसिद्धिः ३। **क्षयेक्षणादिति** तुरीयहेतावप्यन्ते क्षयदर्शनात् तदन्यथानुपपत्त्या तत्पूर्वमपि क्षय इत्येवं तत्पूर्वपूर्वक्षणे क्षयसिद्ध्या द्वितीयक्षणेऽपि क्षयसिद्धौ क्षणिकत्वसिद्धिः; यदि क्षणक्षयित्वं भावस्य न स्यादन्ते क्षयदर्शनमेव न

स्यादित्येवं प्रत्यक्षानुपपत्तिस्तुरीयहेतौ क्षणक्षयित्वसाधकतायां मूलम्, नाशहेत्वयोगस्य प्रथमहेतोः क्षणिकत्वसाधकतायां तु नश्वरस्वभावानुपपत्तिर्मूलमिति विशेषः ॥ २ ॥ २३९ ॥

ज्ञानमात्रस्वरूपमेव जगत्, तद्व्यतिरिक्तं बाह्यवस्तु नास्तीति योगाचारमतप्रयोगमुपदर्शयति—

**ज्ञानमात्रं च यल्लोके, ज्ञानमेवानुभूयते ।**
**नार्थस्तद्व्यतिरेकेण, ततोऽसौ नैव विद्यते ॥ ३ ॥ २४० ॥**

**ज्ञानमात्रं** चेति—जगदिति शेषः, चकारः क्षणिकत्वसमुच्चायकः, तथा च क्षणिकं यज्ज्ञानमात्रं तदेव जगदित्यर्थः; अस्यां प्रतिज्ञायां हेतुमाह—**यदिति**—यस्मादित्यर्थः। **लोके** आबालगोपालसाधारणजनमात्रे, **ज्ञानमेवानुभूयते** केवलं ज्ञानमनुभवविषयो भवति; नन्वर्थोऽप्ययं घटोऽयं पट इत्येवमनुभूयत एवेत्यसिद्धोऽयं ज्ञानमात्रानुभव इत्यत आह—**नार्थस्तद्व्यतिरेकेणे**ति—घट-पटादिर्बाह्योऽर्थो ज्ञानात्मतामन्तरेण नानुभूयते, जडरूपतया पराभ्युपगतस्य बाह्यस्यानुभवविषयत्वाभावात्, यत्र ज्ञानविषयत्वं तत्र ज्ञानतादात्म्यमिति व्याप्तेर्घटादौ ज्ञानाभेदरूपव्यापकस्याभावे तद्व्याप्यस्य ज्ञानविषयत्वस्याप्यभावात्, **ततः** तस्मात् कारणात्, **असौ** सांवृतिको बाह्योऽर्थः, **नैव विद्यते** पारमार्थिको न भवति ॥ ३ ॥ २४० ॥

अत्र स्याद्वादिनां समाधानवार्तामाह—

**अत्राप्यभिदधत्यन्ये, स्मरणादेरसम्भवात् ।**
**बाह्यार्थवेदनाच्चैव, सर्वमेतदपार्थकम् ॥ ४ ॥ २४१ ॥**

**अत्रापी**ति—अनन्तरोदितसौत्रान्तिक-योगाचारमतद्वयेऽपीत्यर्थः, **अन्ये** क्षणिकैकान्तवादिभिन्नाः स्याद्वादिनः, **अभिदधति** उत्तरयन्ति; किमित्यपेक्षायामाह—**स्मरणादेरसंभवात्** सौत्रान्तिकाभ्युपगते सर्वस्य क्षणिकत्वे ज्ञानव्यतिरिक्तस्य स्थिरस्यानुभवस्मरणोभयाश्रयस्यात्मद्रव्यस्यानभ्युपगमात्, "नान्यदृष्टं स्मरत्यन्यः०" [ कुसुमाञ्जलि० ] इति वचनादनुभव-स्मरणयोः सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावेनानुभवितुर्ज्ञानस्य क्षणिकस्य पूर्वमेव विनष्टत्वात् तद्भिन्ने ज्ञानान्तरे स्मरणासम्भवात्, योऽहं घटमद्राक्षं सोऽहं तं स्मरामीत्यनुभवितृस्मर्त्रैक्यावगाह्यनुसन्धानप्रत्ययोऽपि न भवेत्, स एवायं घट इत्यादि पूर्वोत्तरकाल-

वृत्तिघटाद्यभेदावगाहिप्रत्यभिज्ञाया अप्यभावप्रसङ्गात् सौत्रान्तिकमतं न युक्तमित्याशयः । **बाह्यार्थवेदनाच्चैव** ज्ञानमन्तरनुभूयते घटपटादिरभूयते बहिरनुर्थो इत्येवं ज्ञानसंवेदनभिन्नबाह्यार्थसंवेदनाच्च, तथाभूतबाह्यार्थवेदनं च न केनचित् प्रमाणेन बाधितमिति तत्सिद्धो बाह्योऽर्थः पारमार्थिक एव प्रमात्मकज्ञानविषयत्वात्, न तु संवृतिसन्, तथा च बाह्यार्थप्रमान्यथानुपपत्त्या बाह्यार्थसिद्धौ ज्ञानमात्राऽसिद्धेरिति भावः; **सर्वमेतत्** संक्षेपेणानन्तरमेवोपदर्शितं सौगतमतद्वयम्, **अपार्थकम्**, निरर्थकम् ॥ ४ ॥ २४१ ॥

सौत्रान्तिकमते स्मरणासम्भवं भावयति—

## अनुभूतार्थविषयं, स्मरणं लौकिकं यतः ।
## कालान्तरे तथाऽनित्ये, मुख्यमेतन्न युज्यते ॥ ५ ॥ २४२ ॥

**अनुभूतार्थविषयमि**ति-पूर्वानुभवविषयविषयकमित्यर्थः, एतच्च विषयतासम्बन्धेन स्मरणं प्रति विषयतासम्बन्धेनानुभवः कारणमिति स्मरणस्य विषयनियमार्थमवश्याभ्युपगन्तव्यं, विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावमाश्रित्य अन्यपुरुषीयानुभवादन्यपुरुषीयस्मरणवारणाय तत्तत्पुरुषीयत्वमपि कार्यतावच्छेदकतया कारणतावच्छेदकतया चाश्रीयते, **लौकिकम्** आगोपालाङ्गनाप्रसिद्धम्, अतस्तदपलापो न कर्तुं शक्यः, **यतः** यस्मात्, **कालान्तरे** आगामिनि काले, अनुभवव्यवहितोत्तरकाले इति यावत्, **तथा** प्रतिनियतरूपेण, यद्रूपेण यस्यानुभवस्तस्य तद्रूपेण स्मरणमिति, अनुभवनिरूपितप्रकारतावन्निष्ठप्रकारताकत्वेनेति यावत्, एतच्च प्रकारतासम्बन्धेन स्मरणं प्रति प्रकारतासम्बन्धेनानुभवः कारणमित्यनुभव-स्मरणयोः समानप्रकारकत्वनियमरक्षार्थमवश्याभ्युपगन्तव्यं कार्यकारणभावमाश्रित्योपपद्यते, आत्मनिष्ठप्रत्यासत्त्या कार्य-कारणभावे तु तन्निष्ठप्रकारतानिरूपितविशेष्यताकस्मरणं प्रति तन्निष्ठप्रकारतानिरूपितविशेष्यताकानुभवः कारणमिति, **अनित्ये** निरन्वयनश्वरेऽनुभवितरि, **मुख्यम्** अभ्रान्तमेव, **एतत्** स्वसंवेदनसिद्धं स्मरणम्, **नोपपद्यते** न युज्यते, विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे तत्पुरुषीयत्वनिवेशेन सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावे तयोरैकाधिकरण्यानुरोधेनानुभवस्मरणकालानुगामिन एकस्यात्मन आवश्यकतया निरन्वयनश्वरानुभवितुरुभयकालवृत्तित्वाभावात्, क्षणिकपक्षे चान्यश्चानुभविताऽन्यश्च स्मर्ता, न चैतत् सम्भवति, अतिप्रसङ्गभयेनान्येनानुभवेऽन्यस्य स्मरणकल्पनासम्भवात्, तथात्वे योऽहमन्वभवं सोऽहं स्मरामीत्युल्लेखानुपपत्तेः ॥ ५ ॥ २४२ ॥

क्षणिकैकान्तप्रवणे सौत्रान्तिकमते प्रत्यभिज्ञाऽपि न युज्यते इत्याह—

**सोऽन्तेवासी गुरुः सोऽयं, प्रत्यभिज्ञाप्यसङ्गता ।**
**दृष्टकौतुकमुद्वेगः, प्रवृत्तिः प्राप्तिरेव वा ॥ ६ ॥ २४३ ॥**

**सोऽन्तेवासीति**—यद्यप्यन्याऽपि प्रत्यभिज्ञा क्षणिकैकान्तेऽसङ्गतैव, तथापि सुगतसुतैर्गुरुशिष्यभावोऽवश्यमभ्युपेयोऽन्यथाऽध्ययनाध्यापनाद्यसम्भवे क्षणिकत्वादिव्यवस्थापकशास्त्रप्रणयनमेवापार्थकं स्यात्, विनयादिगुणसम्पन्नमेवाध्ययनादियोग्यमवधार्यान्तेवासित्वेनाभ्युपगन्तव्यम्, गुरुरप्यध्यापनाद्यनुगुणगुणगणसम्पन्नतयाऽवधृत एव भवति, तथा च तयोः स्थैर्यमावश्यकमिति मत्वा तद्विषयकप्रत्यभिज्ञानुपपत्तिरेव दोषत्वेनाधीता, यश्चाध्ययनानुगुणोपदेशग्रहणानुष्ठानादियोग्यतया पूर्वमनुभूतः स एवायमन्तेवासीति पूर्वापराभेदावगाहिनीत्यर्थः, बहुश्रुतत्वादिगुणविशिष्टतया यः पूर्वमवधारितः '**सोऽयं गुरुः**' इति पूर्वापराभेदावगाहिनी, **प्रत्यभिज्ञाऽपि** प्रत्यभिज्ञाज्ञानमपि, **असङ्गता** एकान्तक्षणिकत्वपक्षे न सङ्गता, तत्ताविशिष्टस्य पूर्वमेव विनष्टत्वेन वर्तमानकाल एवेदन्ताविशिष्टस्योत्पन्नत्वे तयोरभेदानुपपत्तेः । न च प्रत्यभिज्ञा न प्रमाणं सैवेयं गुर्जरीत्यादौ विषयबाधदर्शनादिति वाच्यम्, बाधितविषयाया एकस्याः प्रत्यभिज्ञाया अप्रामाण्ये प्रत्यभिज्ञानत्वेन तत्सजातीयतया सर्वस्याः प्रत्यभिज्ञाया अप्रामाण्याभ्युपगमे दुष्टहेतुजनितस्यानुमानस्याप्रामाण्येऽनुमानत्वेन तत्सजातीयानां सदनुमानानामप्यप्रामाण्यप्रसङ्गात्, बाधितविषयकत्वेनाप्रमात्मकद्विचन्द्रादिप्रत्यक्षसजातीयत्वेन सत्प्रत्यक्षस्याप्यप्रामाण्यापत्तेश्च; न च "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना" इति वचनात् प्रत्यभिज्ञानात्मकप्रत्यक्षे पूर्वकालसम्बन्धिताया असंनिहितत्वात् परामर्शानुपपत्तिः, एकद्व्यादिसङ्ख्येयग्रहणक्रमेणान्त्यसङ्ख्येयग्रहणकाले शतमिति प्रतीतेः क्रमगृहीतसङ्ख्येयाध्यवसायतत्संस्कारवशादुपपत्तिवत् प्रत्यभिज्ञाप्रत्यक्षस्यापि पूर्वानुभवजनितपूर्वकालसम्बन्धितासंस्कारवशादसंनिहिताया अपि पूर्वकालसम्बन्धितायाः परामर्शोपपत्तेः; न च विरुद्धयोर्नील-पीतयोरेकत्रावगाहि ज्ञानं यथा भ्रमस्तथा वर्तमानत्वावर्तमानत्वयोरेकत्र परिच्छेदकं प्रत्यभिज्ञानमपि भ्रमः, अत एव प्रत्यभिज्ञानस्यानवरतोत्तरोपजायमानविषयसन्निधानप्रयुक्तसौसादृश्यलक्षणदोषजन्यत्वमिति वाच्यम्, एकत्र नानाकालसम्बन्धस्याविरुद्धत्वात्, अन्यथा नीलसंवेदनस्यापि स्थूलाकारावभासिनः सविकल्पकस्य ज्ञानाणुपुञ्जात्मकस्य प्रतिपरमाणु दिक्षट्कयोगाद् भेदापत्तेः,

"षड्केन युगपद् योगात्, परमाणोः षडंशता ।
दिग्देशावृत्तितच्छायावृत्तिभ्यां तस्य सांशता ॥"

इति वचनात्, प्रत्येकं ज्ञानाणूनामप्युक्तदिशा सावयवतापत्त्या तदवयवानामपि दिक्षट्कयोगाद् भेदापत्तितोऽनवस्थापत्तेः; न च 'यत् सत् तत् क्षणिकम्' इति व्याप्तेरर्थक्रियाकारित्वलक्षणसत्त्वहेतुकक्षणिकत्वानुमानेन प्रत्यभिज्ञायाः स्थैर्यावगाहिन्या बाध इति वाच्यम्, निश्चितप्रमाणवाक्यत्वेन प्रत्यभिज्ञयैव क्षणिकत्वानुमानस्य बाधात्; एवं तत्तदङ्कुरादिकार्यजनकतावच्छेदकतया तत्तद्बीजगतकुर्वत्त्वसिद्धावेव सहकारिमध्यमध्यासीनकुर्वद्रूपात्मकबीजादङ्कुरोत्पत्तिः, ततो भिन्नादकुर्वद्रूपात् कुशूलस्थबीजान्नाङ्कुरोत्पत्तिरित्येवं क्षणिकत्वपक्षे कुर्वद्रूपत्वसिद्धावभ्युपगतायामन्वय-व्यतिरेकग्रहविषयतावच्छेदकतया गृहीतं वह्नित्वादिकं विहाय वह्न्यादेर्धूमकुर्वद्रूपात्मकवह्नित्वादिना हेतुत्ववद् विजातीयधूमत्वादिना धूमादेः कार्यत्वसंभावनयोपस्थितधूमत्वावच्छेदेन धूमे वह्निकार्यत्वाग्रहात् 'क्वचिद् वह्निं विनाऽपि धूमो भविष्यति' इति व्यभिचारशङ्कानिवर्तकस्य 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यात्' इति तर्कस्य वह्नित्वेन धूमत्वेन वह्नि-धूमयोः कार्यकारणभावग्रहमूलकस्याभावेन वह्नि-धूमयोर्व्याप्तिग्रहाभावाद्धूमहेतुकवह्न्यनुमानस्य प्रसिद्धस्याप्युच्छेदेन क्षणिकत्वानुमानस्यैवानवताराच्च; न च रूपवान् घट इति प्रत्यक्षे रूपे वर्तमानत्वं यथा भासते तथा प्रत्यभिज्ञाने धर्मिविशेषणतया भासमाने पूर्वत्वे वर्तमानत्वस्य भानाद् वर्तमानत्वं च तत्र नास्तीति वर्तमानत्वाभाववति वर्तमानत्वावगाहित्वात् तस्य भ्रमत्वमिति वाच्यम्, संनिहित एव विशेषणे विद्यमानतायाः संसर्गादिना भानादिति दिक् । **दृष्टकौतुकमुद्वेग** इति हरिभद्रसूरिसम्मतः पाठः, तस्य–लोकसिद्धमिदं दृष्टकौतुकं मया अपूर्वत्वाभावान्न भूयोऽवलोकनीयमित्यसङ्गतं, यत् पूर्वं कौतुकं ततोऽन्यदेवेदं कौतुकं, न दृष्टं प्राक्, अतोऽवलोकनीयमेवेदम्, **उद्वेगः** कौतुकदर्शनार्थमत्युत्कटेच्छा, सोऽप्यसङ्गतः, यद्दर्शनमत्यानन्दजनकं पूर्वमभूत् तदेव पुनर्दृष्टिगोचरं कथं मे स्यादितीष्टत्वप्रतिसन्धाने सत्येव उद्वेग उपजायते, यथा मित्रगुर्वादिकं समीपदेशमुपगतमुपश्रुत्य तद्दर्शनविषयिणी प्रबलेच्छा भवति, यदा तु येन सह सख्यमासीद् गुरुशिष्यभावसम्बन्धश्च तस्मादन्य एव समागतः, अहमप्यन्य एवेति तदेच्छैव निरुक्तस्वरूपा नोपजायेतेत्यर्थः । **दृष्टकौतुकयुद्वेग** इति उपाध्यायसम्मतः पाठः, तदर्थ उपाध्यायैरित्थं प्रकटितः "दृष्टकौतुकेऽर्थे, उद्वेगः–सिद्धत्वज्ञानकृतेच्छाविच्छेदरूपः, असङ्गतः स्यात्, क्षणिकतद्व्यक्त्यन्तरदर्शनस्यासिद्धत्वात्"-

अयमभिप्रायः–अप्राप्ते वस्तुनि तत्प्राप्त्यर्थं तद्विषयिणीच्छोपजायते, न प्राप्ते वस्तुनि, तथा च स्थैर्यपक्षे स्थिरस्य कौतुकार्थस्य दर्शनं पूर्वमेव वृत्तमिति भवति सिद्धत्वज्ञानकृततदिच्छाविच्छेदरूप उद्वेगः, क्षणिकत्वपक्षे तु यस्य कौतुकार्थस्य दर्शनं वृत्तं तद्भिन्नमेव क्षणिककौतुकार्थव्यक्त्यन्तरं, तस्य दर्शनं तु पूर्वं न वृत्तं तस्यासिद्धत्वत इच्छा स्यादेवेति तदुच्छेदलक्षण उद्वेगो न सम्भवतीति, **प्रवृत्तिः** न सङ्गतेत्यन्वयः, या व्यक्तिरिष्टसाधनतया ज्ञायते तस्यां प्रवृत्तिर्भवति, विषयता-सम्बन्धेन प्रवृत्ताविष्टसाधनताप्रकारकज्ञानस्य विशेष्यतासम्बन्धेन हेतुत्वात्, स्थैर्यपक्षे यद्व्यक्तिविशेष्यकमिष्टसाधनत्वप्रकारकं तद्व्यक्तेरुत्तरकाले सत्त्वेन तत्र विषयतया प्रवृत्तिः सम्भवति, क्षणिकत्वपक्षे तु इष्टसाधनत्वप्रकारकज्ञाननिरूपित-विशेष्यतावत्या व्यक्तेर्नष्टत्वाद् व्यक्त्यन्तरस्य चेष्टसाधनत्वप्रकारकज्ञाननिरूपित-विशेष्यत्वाभावात् कारणविरहेण कार्यीभूतप्रवृत्त्यसम्भवात्, यस्य चेष्टसाधनत्व-प्रकारकज्ञानजन्येच्छा तज्जन्या च प्रवृत्तिस्तस्यैव प्राप्तिर्भवति, स्थैर्यपक्षे सा सम्भवति, इच्छाविषयीभूतव्यक्तेः प्राप्तिकाले सत्त्वात्, क्षणिकपक्षे त्विच्छाविषय-व्यक्तेर्नष्टत्वाद् व्यक्त्यन्तरस्य चेच्छाविषयत्वाभावात् प्राप्तिर्न संभवतीत्याह–**प्राप्तिरेव** वेति न संगतेत्यन्वयः, वाकारश्चकारार्थकः, **प्राप्तिरेव चेति** हरिभद्र-सूरिसम्मतः पाठः, "प्राप्तिरेव च इच्छाविषयव्यक्तेः" इत्युपाध्यायव्याख्यादर्शनात् तस्यापि स एव सम्मतः, तत्र च समुच्चयार्थकश्चकारोऽस्त्येवेति ॥ ६ ॥ २४३ ॥

तथा क्षणिकपक्षे स्वकृतशीलाद्यनुष्ठानकर्मफलोपभोगोऽपि न संगत इत्याह—

**स्वकृतस्योपभोगस्तु, दूरोत्सारित एव हि ।**
**शीलानुष्ठानहेतुर्यः, स नश्यति तदैव यत् ॥ ७ ॥ २४४ ॥**

**स्वकृतस्येति**–आत्मोपात्तस्य, शुभाशुभकर्मण इत्यर्थः, तु पुनः, **उपभोगः** विपाकानुभवः, **दूरोत्सारित एव** सुतरां न स्यादेव, शुभाशुभकर्तुः क्षणिक-ज्ञानस्वरूपस्य पूर्वमेव निरन्वयविनाशात्, उपभोक्तुः क्षणिकज्ञानस्य ततोऽत्यन्तं भिन्नस्य तत्कर्मकर्तृत्वाभावात्, अतिप्रसङ्गभयादन्यकृतकर्मफलभोक्तृत्वस्यान्यस्मिन्न-भ्युपगन्तुमशक्यत्वात्, हि निश्चितम्, प्रवृत्तिं प्रति ज्ञानं कारणमिति यन्नेष्टसाधनं तत्रापीष्टसाधनत्वभ्रमेण तज्जन्येच्छया प्रवृत्तेः संभवेऽपि कर्मविपाकानुभवे स्वकृत-कर्मणः स्वरूपसत एव कारणत्वेन स्वरूपसतः स्वकृतकर्मणोऽभावे तद्विपाकानुभव-स्योपपादयितुमशक्यत्वादिति; कुतो न क्षणिकपक्षे स्वकृतकर्मफलोपभोग इत्यपेक्षा-यामाह–**शीलानुष्ठानहेतुरिति**–**यत्** यस्मात् कारणात्, यः शीलानुष्ठानहेतु-

क्षणः, स क्षणः, तदैव स्वोत्पत्त्यनन्तरसमय एव, **नश्यति** निरन्वयविनाशभाग् भवति ॥ ७ ॥ २४४ ॥

पराभिप्रायमुपदर्शयति—

**संतानापेक्षयास्माकं, व्यवहारोऽखिलो मतः ।**
**स चैक एव तस्मिंश्च, सति कस्मान्न युज्यते ? ॥ ८ ॥ २४५ ॥**

**सन्तानापेक्षये**ति–भूतभवद्भविष्यत्क्षणप्रवाहलक्षणसन्तानापेक्षयेत्यर्थः, **अस्माकं** क्षणक्षयवादिनां बौद्धानां, **व्यवहारोऽखिलः** ऐहिक आमुष्मिकश्च व्यवहारः, **मतः** इष्टः, **स च** स सन्तानः पुनः, **एक एव** न नाना, **तस्मिन् सति** एकस्मिंश्च सति सन्तानेऽनुभव-स्मरणयोस्तत्कर्मकर्तृत्व-तत्कर्मफलोपभोक्तृत्वयोः सामानाधिकरण्यसम्भवात्, **कस्मान्न युज्यते ?** कस्मात् कारणान्न घटते, अपि तु घटत एव स्मृत्यादिः ॥ ८ ॥ २४५ ॥

आमुष्मिकमधिकृत्य पर एवाह—

**यस्मिन्नेव तु संताने, आहिता कर्मवासना ।**
**फलं तत्रैव संधत्ते, कर्पासे रक्तता यथा ॥ ९ ॥ २४६ ॥**

**यस्मिन्नेवे**ति, **सन्ताने** निरुक्तप्रवाहरूपे, **तुः** आधानयोग्यतां विशेषयति, **कर्मवासना** शुभाशुभकर्मवासना, **आहिता** जनिता, **फलं** शुभाशुभफलं, **तत्रैव** तस्मिन्नेव सन्ताने, नान्यस्मिन्, **संधत्ते** जनयति, अत्र निदर्शनं–**कर्पासरक्तता यथा** कर्पासे लाक्षारक्षाद्याहिता रक्तता कर्पास एव स्वफलं रक्तबुद्ध्यादिकं यथा जनयति तथा ॥ ९ ॥ २४६ ॥

अत्रोत्तरमुद्भावयति—

**एतदप्युक्तिमात्रं यन्न हेतु फलभावतः ।**
**संतानोऽन्यः स चायुक्त, एवासत्कार्यवादिनः ॥ १० ॥ २४७ ॥**

**एतदपी**ति–सन्तानैक्यमादायैहिकामुष्मिकव्यवहारोपपानलक्षणसमाधानमपीत्यर्थः, **उक्तिमात्रं** युक्तिरिक्तं वाङ्मात्रम्, **यत्** यस्मात् कारणात्, **न** नैव, **हेतुफलभावतः** पूर्वापरक्षणहेतुहेतुमद्भावात्, **अन्यः** भिन्नः, **संतानो**ऽस्ति, भवतु हेतुफलभावव्यतिरिक्तो न सन्तानो, नापि अनुभवस्मरणाद्यधिकरणं स्थिरमात्मद्रव्यं, तथापि स्वप्रयोज्यतासम्बन्धेन तदनुभवादेस्तत्स्मरणादिकं प्रति

कारणत्वात् स्मरणकुर्वद्रूपाद्यात्मकज्ञाने स्वप्रयोज्यतासम्बन्धेन तदनुभवादेस्तत्र स्वकुर्वद्रूपत्वादिसम्बन्धेन स्मरणादेश्च सत्त्वात् तथाविधकार्यकारणभावबलात् क्षणिकपक्षेऽपि तदनुभवादितस्तत्स्मरणादेर्नानुपपत्तिः, स एवायं मकारस्तदेवेद-मौषधं सैवेयं दीपकलिकेत्यादिप्रत्यभिज्ञाया यथा तज्जातीयाभेदविषयकत्वेन प्रामाण्यं तथा स एवायं घट इत्यादिप्रत्यभिज्ञाया अपि तज्जातीयाभेदविषयकत्वेन प्रामाण्यं सुसङ्गतम्, प्रकारतासम्बन्धेन प्रवृत्त्यादिकं प्रति प्रकारतासम्बन्धेनेच्छादिकं कारण-मितीच्छाविषयव्यक्तिप्रवृत्तिविषयव्यक्त्योर्भेदेऽप्यनतद्व्यावृत्तिलक्षणस्य प्रकारस्यैक-त्वकार्यकारणभावबलादिच्छादितः प्रवृत्त्यादेरप्युपपत्तिरित्यत आह–**स चेति**–त्वादुक्षणिकहेतुहेतुमद्भावश्चेत्यर्थः, **असत्कार्यवादिनः** उत्पत्तेः पूर्वं सर्वथाऽसदेव कार्यमित्यभ्युपगच्छतो बौद्धस्य मते, **अयुक्त एव** न युज्यत एव ॥ १० ॥ २४७ ॥

असत्कार्यवादे हेतुहेतुमद्भावस्यायुक्तत्वमेव भावयति—

**नाभावो भावतां याति, शशशृङ्गे तथाऽगतेः ।**
**भावो नाभावमेतीह, तदुत्पत्त्यादिदोषतः ॥ ११ ॥ २४८ ॥**

**नाभाव** इति–नञो यातीत्यनेनान्वयः, अभावः–तुच्छः, **भावताम्** अतुच्छताम्, **न याति** न प्रतिपद्यते, अत्र अन्यत्र तथाऽदर्शनमेव हेतुरित्याह–**शशशृङ्ग** इति, उपलक्षणं चैतत् खरविषाणाद्यलीकमात्रस्य, **तथा** भावत्वेन, **अगतेः** परिच्छेदाभावात्, तथा **भावः** अतुच्छः, **अभावं** तुच्छस्वरूपम्, **नैति** न प्राप्नोति, **इह** जगति, कुत इत्याह–**तदुत्पत्त्यादिदोषतः** अभावोत्पत्त्यादि-प्रसङ्गात् ॥ १ ॥ २४८ ॥

अभावोत्पत्त्यादिदोषप्रसङ्गमेव भावयति—

**सतोऽसत्त्वे तदुत्पादस्ततो नाशोऽपि तस्य यत् ।**
**तन्नष्टस्य पुनर्भावः, सदा नाशे न तत्स्थितिः ॥ १२ ॥ २४९ ॥**

**सत** इति–क्षणिकभावस्येत्यर्थः, **असत्त्वे** द्वितीयादिक्षणेऽभावे सति, **तदु-त्पादः** असत्त्वस्याभावस्वरूपस्योत्पादः कादाचित्कत्वात्, **ततः** उत्पादात्, **नाशोऽपि** ध्वंसोपि, **तस्य** असत्त्वस्य, यदुत्पद्यते तत् कृतकं, यच्च कृतकं तन्न-श्यतीति व्याप्तेः कृतकत्वेन हेतुना तत्र नाशप्रतियोगित्वसिद्धेरवश्यम्भावात्, **यत्** यस्मात् कारणादेवं, **तत्** तस्मात्, असत्त्वनाशादिति यावत्, **नष्टस्य** असत्त्वो-त्पादसमये नष्टस्य सतः, **पुनर्भावः** पुनरपि सत्त्वम्, तदसत्त्वनाशाधिकरणक्षण-

त्वस्य तदधिकरणक्षणत्वव्याप्यत्वादिति हृदयम्, **सदा नाशे** भावस्य द्वितीयक्षणेऽसत्त्वरूपस्य नाशस्य न नाश इत्यभ्युपगमे सति नाशस्य नाशाभावादसत्त्वनाशाधिकरणक्षणत्वं नोत्तरकाल इति न तत उत्तरकाले भावस्य सत्त्वमिति यदि तदा सर्वदा विद्यमाने नाशलक्षणासत्त्वे, **न तत्स्थितिः** भावस्य स्थितिर्न स्यात्, प्रथमक्षणेऽपि सदातनत्वान्यथानुपपत्त्याऽसत्त्वस्यैव विरोधिनो विद्यमानत्वेन तदानीमपि नावतिष्ठेत ॥ १२ ॥ २४९ ॥

पराभिप्रायमुपदर्शयति—

**स क्षणस्थितिधर्मा चेद्, द्वितीयादिक्षणास्थितौ ।**
**युज्यते ह्येतदप्यस्य, तथा चोक्तानतिक्रमः ॥ १३ ॥ २५० ॥**

**स** इति—भावनाश इत्यर्थः, **क्षणस्थितिधर्मा** क्षणमात्रस्थायिस्वभावः, तथा च भाव एव, भावस्यैव क्षणस्थितिधर्मकत्वात्, इति परोक्तेरभिप्रायमित्थं व्यावर्णयाञ्चकुरुपाध्यायाः-"द्विविधो ह्यस्माकं विनाशः-सांव्यवहार्यः, तात्त्विकश्च; आद्यो भावनिवृत्तिरूपः, द्वितीयश्च भावरूपः, तत्र कार्यकाले कारणनिवृत्तिकल्प आद्यमेव नाशमवलम्बते, वस्तुव्यवस्थापकस्त्वाद्य एव, एतेन "कार्योत्पत्तिकाल एव कारणविनाशाभ्युपगमे कारणोत्पादरूपत्वात् तस्य सहभावेन कार्यकारणव्यवस्थोत्सीदेत्, कारणोत्पादात् कारणविनाशस्य भिन्नत्वाभ्युपगमे च कृतकत्वस्वभावत्वमनित्यत्वस्य न भवेत्; व्यतिरिक्ते च नाशे समुत्पन्ने न भावस्य निवृत्तिरिति कथं क्षणिकत्वम्'? इत्यध्ययनाविद्धकर्णोद्द्योतकरादीनामपि मतं परास्तम्" इति, अत्र पराभिप्राये आह—**चेद्**िति—एवं यदि त्वं मन्यसे इत्यर्थः, **एतदपि** क्षणस्थितिधर्मकत्वमपि, **हि** निश्चितम्, **अस्य** असत्त्वरूपस्य, **द्विभयादिक्षणास्थितौ** यस्मिन् क्षणे उत्पत्तिस्तदुत्तरक्षणावृत्तित्वे सति, **युज्यते** घटते, **तथा च** एवमभ्युपगमे च, **उक्तदोषानतिक्रमः** प्रागुक्तदोषापरिहारः ॥ १३ ॥ २५० ॥

इदमेवोपपाद्य दर्शयति—

**क्षणस्थितौ तदैवास्य, नास्थितिर्युक्त्यसङ्गतेः ।**
**न पश्चादपि सा नेति, सतोऽसत्त्वं व्यवस्थितम् ॥ १४ ॥ २५१ ॥**

**क्षणस्थिताविति**—क्षणस्थितिधर्मकत्वेनाभ्युपगतस्वभावस्य क्षणस्थितिधर्मकत्वस्य क्षणस्थितिरूपस्यैवाभ्युपगमे इत्यर्थः, **तदैव** द्वितीयादौ क्षण एव, **अस्य** भावस्य, **अस्थितिः** स्थित्यभावः, **न** नैव सम्भवति, निषेधे हेतुः—**युक्त्यसङ्गतेः**

प्रथमक्षणद्वितीयक्षणादीनां सर्वेषां क्षणत्वेन प्रथमक्षणे भवतो भावस्य क्षणस्थिति-धर्मकत्वाद् यथा प्रथमक्षणे स्थितिस्तथा द्वितीयादिक्षणेऽपि स्थितिरागतैव, तथा च द्वितीयादिक्षणस्थितिमति तस्मिन् द्वितीयादिक्षणास्थितिः क्षणस्थिति-क्षणा-स्थित्योर्विरोधाद् न संभवतीत्येवं युक्त्याऽसङ्गतेः, स्थित्यस्थित्योर्विरोधाद् द्विती-यादिक्षणेऽपि भावस्य स्थितिरिष्टैवेत्यभ्युपगन्तुं न शक्यत इत्याह–**न पश्चादपि सेति**–द्वितीयादिक्षणेऽपि भावस्यास्थितिर्नेत्यर्थः, **इति न** द्वितीयादिक्षणे भावस्या-स्थितेरनुभवाद् द्वितीयादिक्षणेऽस्थितिर्नैत्येवं नाभ्युपगन्तुं शक्यते, क्षणिकत्वभङ्ग-प्रसङ्गादपि द्वितीयादिक्षणेऽस्थित्यभावो नाभ्युपगन्तुं शक्यते; न च द्वितीयादिक्षणे या भावस्य स्थितिः सा तस्य निवृत्तिरूपा संव्यवहार्यैव, यतो भवति द्वितीयादिक्षणे भावो निवर्तत इति व्यवहारः, तात्त्विकी तु भावस्य क्षणस्थितिराद्यक्षणस्थिति-रूपेति न दोष इति वाच्यम्, अभावस्याधिकरणस्वरूपत्वेन भावस्य द्वितीयादि-क्षणे निवृत्तेर्द्वितीयादिक्षणरूपत्वेन द्वितीयादिक्षणास्थितेस्तद्रूपाया आगतत्वात्, तथा च **सतोऽसत्त्वं** द्वितीयादिक्षणेषु सतो घटादेरसत्त्वं, **व्यवस्थितम्** सिद्धम्, तथा च "सतोऽसत्त्वे" इत्याद्युक्तदोषानतिक्रम एव ॥ १४ ॥ २५१ ॥

अत्रैवाक्षेपपरिहारायाह—

**न तद् भवति चेत् किं न, सदा सत्त्वं तदेव यत् ।**
**न भवत्येतदेवास्य, भवनं सूरयो विदुः ॥ १५ ॥ २५२ ॥**

**न तद् भवतीति**–असत्त्वं तुच्छत्वान्न भवतीत्यर्थः, **चेत्** यद्येवं क्षणिकवादिनो-ऽभिप्रायः, **किं न सदा सत्त्वम्** एवं सति भावस्यासत्त्वलक्षणनाशाभावात् सर्वदा सत्त्वं किं न स्यात्, पर आह–**तदेव यत् न भवतीति**–सत्त्वमेव यस्मात् कारणाद् द्वितीयादिक्षणेषु न भवति ? अतो भावस्य न सर्वदा सत्त्वमित्यर्थः, उत्तरयति–**एतदेवेति**–द्वितीयादिक्षणेषु भावस्याभवनमेवेत्यर्थः, **अस्य** असत्त्वस्य, **भवनं** द्वितीयादिक्षणकालीनत्वेन भवनम्, **सूरयः** पण्डिताः, **विदुः** जानन्ति, अत्रेत्थमालोचितवन्त उपाध्यायाः–"तथाहि–नेदं भावाभवनं काल्पनिकं, तथात्वे भावस्यापि काल्पनिकत्वापत्तेः, यतो लाक्षणिको विरोधो नील-पीतादेः परैरभ्युप-गम्यते, वस्तुस्वरूपव्यवस्थापकं च लक्षणं, यन्निमित्तो विरोधो लाक्षणिक उच्यते, भावप्रच्युतिश्च लक्षणम्, यतो नीलस्य विरोधो नीलस्य प्रच्युत्या, तद्विरोधे च पीतादीनामपि तत्प्रच्युतिव्याप्तानां तेन विरोधः, तथा च 'प्रमाणं नीलपरिच्छेदकत्वेन प्रवृत्तं नीलप्रच्युतिं तद्व्याप्तांश्च पीतादीन् व्यवच्छिन्ददेव

स्वपरिच्छेद्यं नीलं परिच्छिनत्ति' इत्यभ्युपगमः, स च भावाभवनस्य शशविषाणप्रख्यत्वे भावविरुद्धत्वस्य पीतादिव्यापकत्वस्य चाभावान्नोपपद्यत इति, न च तदभवने तद्ग्रहणमात्रमेव, न तु तदतिरिक्तग्रहणमिति न तदभवनमेव तदसत्त्वभवनमिति वाच्यम्, सद्व्यवहारनिषेधा-ऽसद्व्यवहारप्रवृत्त्योस्तद्ग्रहण-तदभावग्रहणनिमित्तत्वादिति दिग्'' इति ॥ १५ ॥ २५२ ॥

एतदेव स्पष्टयति—

**कादाचित्कमदो यस्मादुत्पादाद्यस्य तद् ध्रुवम् ।**
**तुच्छत्वान्नेत्यतुच्छस्याप्यतुच्छत्वात् कथं नु यत् ॥१६॥२५३॥**

**कादाचित्कमिति**- किञ्चित्कालासत्त्वे सति किञ्चित्कालसत्त्वं कादाचित्कत्वं, तच्च भावकालेऽसत्त्वादसत्त्वस्य समस्तीति कादाचित्कमित्यर्थः, **अदः** एतदसत्त्वम्, **यस्मात्** कारणात्, **तत्** तस्मात्, **अस्य** असत्त्वस्य, **उत्पादादि** आदिपदाद् विनाशादिपरिग्रहः, **ध्रुवं** नियतम्, 'यद् यत् कादाचित्कं तत् तदुत्पादादिमत्' इति व्याप्तेरुत्पादादिमत्त्वव्याप्यकादाचित्कत्ववत्त्वादसत्त्वमुत्पादादिमदिति यावत्, पराभिप्रायमाह–**तुच्छत्वादिति** सकलधर्मानाश्रयत्वलक्षणालीकत्वादित्यर्थः, **नेति**–असत्त्वस्योत्पादादि न भवतीत्यर्थः, उत्तरयति–**अतुच्छस्यापीति**–अनलीकस्यापि वास्तविकस्यापीति यावत्, **अतुच्छत्वात्** कारणात्, **कथं नु** कस्मात् खलु, **'यत्** यस्मादेवम्' इत्युपाध्यायव्याख्यानदर्शनात् तत्सम्मतः **'यत्'** इति पाठः, हरिभद्रसूरिभिस्तु **यदिति** प्रतीकमुपादाय तद्व्याख्यानं न कृतं, किन्तु **'तत्'** इति प्रतीकमुपादाय **'उत्पादादि'** इति व्याख्यातत्वात् **'तत्'** इति तत्सम्मतः पाठः, 'तदुत्पादादि' इति तु उपाध्यायव्याख्यानं तु तदिति पूरणेनेति बोध्यम्, तथा च सत्त्वं नोत्पादादिमत् अतुच्छत्वादित्येवं प्रयोगसम्भवेऽप्यतुच्छत्वहेतोरप्रयोजनकत्वेन न साध्यसाधकत्वं, तथा असत्त्वं नोत्पादादिमत् तुच्छत्वादिति प्रयोगेऽपि तुच्छत्वहेतोरप्रयोजकत्वान्नोत्पादादिविरहसाधकत्वमिति ॥ १६ ॥ २५३ ॥

पर आह—

**तदा भूतेरियं तुल्या, तन्निवृत्तेर्न तस्य किम् ।**
**तुच्छताप्तेर्न भावोऽस्तु, नासत् सत् सदसत् कथम् ? ॥१७॥२५४॥**

**तदा भूतेरिति**–प्रथमक्षणेऽतुच्छस्य भावस्योत्पत्तिलक्षणभवनदर्शनेनोत्पादादि स्वीकरणीयं न्यायोपेतान्यवस्तुवदित्यर्थः, उत्तरयति–**इयं तुल्येति**–अनुभवगोचर-

चरा तदा भूतिः सत्त्वलक्षणानन्तरमसत्त्वस्य तुच्छस्यापि भवनलक्षणा न्याय्यत्वेन समानेति साऽप्यभ्युपेयेत्यर्थः, पर आह-**तन्निवृत्तेरि**ति-तस्यैव भावस्यातुच्छस्य भावभवनानन्तरक्षणे निवृत्तेर्न तुल्या तदा भूतिस्तुच्छस्यासत्त्वस्य, अतुच्छस्य प्रथमक्षणे भवने तदोत्पादानुभवः प्रमाणं समस्ति, तुच्छस्य तूत्पादाभ्युपगमे उत्पन्नस्य निवृत्तिरवश्यं स्यात्, न च तुच्छस्य निवृत्तिः सम्भवति, तथा सति विनष्टस्य नाशानधिकरणकाले नाशनिवृत्त्यधिकरणे सत्त्वमापद्येतेत्येवं तुच्छस्य तु निवृत्त्यनुपपत्तेरुत्पादानुभवो न प्रमाणमिति हृदयम्, अत्रोत्तरं-**न तस्य किमि**ति-नञः पराभिप्रायनिषेधपरत्वं किमर्थनिषेधपरत्वं चेत्यत उभयत्र संबन्धः, निवृत्तिरिति विभक्तिविपरिणामेन सम्बध्यते, तस्य तुच्छस्य किं न निवृत्तिः ? तुच्छरूपनिवृत्तिः स्यादेवेत्यर्थः; निवृत्त्या तुच्छत्वमवाप्यते, तुच्छस्य तु तुच्छत्वमवाप्तमेवेति नाप्तस्य पुनरवाप्तिः, अप्राप्तस्यैवाप्तेरित्याशयेन पर आह-**तुच्छताप्तेरि**ति-तुच्छेन हि तुच्छताऽवाप्तैव, अन्यथा प्रवृत्तिनिमित्ताभावात् तुच्छपदप्रयोग एव तत्र न भवेत्, यदेव तुच्छात्मकं तत्रैव हि तुच्छपदप्रयोगः, तुच्छस्य निवृत्तावपि तुच्छे न किञ्चिदाप्यमस्ति, तुच्छनिवृत्तेरपि तुच्छत्वादतो न तुच्छस्य निवृत्तिरित्यर्थः, अत्रोत्तरं-**ने**ति-तुच्छेन तुच्छताऽऽप्तैवेति न तन्निवृत्तिरिति यदुक्तं भवता तन्न समीचीनं, यतः-**भावोऽस्तु** तुच्छता भावस्वरूपैवास्तु, एवं सति तन्निवृत्तेरुपपत्तेः, पर आह-**नासत् सदि**ति-कथं चासत्-तुच्छमसत्त्वं, सद्-भावस्वरूपं भवति, तथा च भावोऽस्तु तुच्छतेति भवदुक्तिर्न सङ्गतार्थेति, अत्रोत्तरं-**सदसत् कथमि**ति-यदि स्वभावपरावर्तनासंभवादसत् तुच्छत्वं सद् भावस्वरूपं न भवति तदा सन्नपि भावो द्वितीयक्षणेऽसत्स्वरूपः कथं स्यादिति भावस्य कुतः क्षणिकत्वमिति ॥१७॥२५४॥

स्वकारणबलादेवासद्भवनस्वभावं सत्त्वं जातमिति पर आह—

**स्वहेतोरेव तज्जातं, तत्स्वभावं यतो ननु ।**
**तदनन्तरभावित्वादितरत्राप्यदः समम् ॥ १८ ॥ २५५ ॥**

**स्वहेतोरेवे**ति-स्वकारणादेवेत्यर्थः, **तत्** सत्त्वं, **जातम्** उत्पन्नम्, **तत्स्वभावम्** असद्भवनस्वभावम्, **यतः** यस्मात् स्वहेतोरसद्भवनस्वभावस्यैव सत्त्वस्योत्पन्नत्वात्, तस्मादसद् भवतीति न दोषः, उत्तरयति-**नन्वि**ति-यद्येवं तदेत्यर्थः, **तदनन्तरभावित्वात्** सत्त्वोत्पत्त्यधिकरणक्षणाव्यवहितोत्तरक्षणजायमानत्वात्, **इतरत्रापि** असत्त्वेऽपि, **अदः** एतत् 'स्वहेतोरेवासद् सद्भवनस्वभावं जातम्' इति कल्पनम्, **समं** 'स्वहेतोः सदसद्भवनस्वभावं जातम्' इति कल्पनेन सह समानयोगक्षेमम् ॥ १८ ॥ २५५ ॥

पर आह—

**नाहेतोरस्य भवनं, न तुच्छे तत्स्वभावता ।**
**ततः कथं नु तद्भाव इति युक्त्या कथं समम् ॥ १९ ॥ २५६ ॥**

**नाहेतोरि**ति–नञो भवनमित्यनेनान्वयः, **अहेतोः** अकारणस्य, **अस्य** असत्त्वस्य, **न भवनं** नोत्पत्तिः, तथा **तुच्छे** असत्त्वे, **न तत्स्वभावता** सद्भवनस्वभावता न, स्वभावसामान्यशून्यत्वेन तुच्छत्वाभ्युपगमात्, असत्त्वस्य यत्किञ्चित्स्वभाववत्त्वे तुच्छत्वमेव न स्यात्, **ततः** तुच्छस्यासत्त्वस्य सद्भवनस्वभावत्वाभावात्, **कथं नु** कस्मात् खलु, **तद्भावः** असतः सद्भावः, नैवासत्त्वस्य सद्भाव इति यावत्, **इति** एवं **युक्त्या** न्यायेन, **कथं समं** स्वहेतोः सदसद्भवनस्वभावजातत्वकल्पनेन सह स्वहेतोरसत्त्वं सद्भवनस्वभावं जातमिति कल्पनं **कथं तुल्यं** न कथञ्चिदित्यर्थः ॥ १९ ॥ २५६ ॥

अत्रोत्तरमाह—

**स एव भावस्तद्धेतुस्तस्यैव हि तदाऽस्थितेः ।**
**स्वनिवृत्तिः स्वभावोऽस्य भावस्येव ततो न किम्? ॥ २० ॥ २५७ ॥**

**स एव भाव** इति–यस्य भावस्याग्रिमक्षणेऽसत्त्वं स एव भाव इत्यर्थः, **तद्धेतुः** असत्त्वहेतुः, **हि** यतः, **तस्यैव** तस्य भावस्यैव, **तदा** स्वजननानन्तरक्षणे, **अस्थितेः** अभवनात्, यद् यस्य नियमेन पूर्ववर्ति तत् तस्य कारणं, यद् यस्य नियमेनोत्तरभावि तत् तस्य कार्यमित्येवं कार्यकारणभावाङ्गं नियतपूर्वोत्तरभावित्वं 'तस्यैव तदाऽस्थितेः' इत्यनेन प्रतिपादितम्, तथा च भावस्योत्तरक्षणेऽसत्त्वरूपकार्यस्य दर्शनेन तत्कुर्वद्रूपात्मकस्यानुमानमपि निराबाधमेव, अङ्कुरात्मकोत्तरक्षणभाविकार्येण तत्क्षणकुर्वद्रूपबीजानुमानेऽपि हेतुफलभावाङ्गस्य नियतानन्तरभावित्वस्यैव बीजत्वात्, न च कार्यसामान्ये सत्कुर्वद्रूपत्वेन हेतुत्वमित्यसत्त्वस्य सदनात्मकत्वेन तत्कुर्वद्रूपत्वस्य कारणतावच्छेदकत्वाभावेन नासत्त्वकार्येण कुर्वद्रूपात्मकभावक्षणानुमानसम्भव इति वाच्यम्, तथा कार्यकारणभावे मानाभावात्, कुर्वद्रूपत्वापेक्षया सत्कुर्वद्रूपत्वस्य गुरुत्वेन कारणतानवच्छेदकत्वाच्च, यदि चाभावस्य भावीकरणमेव कारणव्यापारोऽन्यथा कारणव्यापारणमकिञ्चित्करं स्यादिति सम्प्रदायः, तदा यथा पूर्वमसतः कारणव्यापारात् सद्भावो भवति तथा प्रथमक्षणे सतो भावस्य द्वितीयक्षणेऽसत्त्वमपि दृश्यते, तच्च प्रथमक्षणे सतो भावस्य कार्यमिति

तद्दर्शनबलाद् भावस्याभावीकरणमपि हेतुव्यापारतयाऽवश्यं स्वीकर्तव्यमिति, तथा **स्वनिवृत्तिः स्वभावः** धर्मः, **अस्य** असत्त्वस्य, **भावस्येव** यथा भावस्य स्वहेतुसामर्थ्यात् स्वनिवृत्तिस्तथा, यत एवं **ततो न किं** ततो न किं युक्त्या भावस्य स्वहेतुबलाज्जातत्वादिकल्पनेन समं स्वहेतोरेवासत्त्वस्य जातत्वादिकल्पनं? न्यायस्य तुल्यत्वादभ्युपगमविचाराधिकाराच्च ॥ २० ॥ २५७ ॥

अत्रैवोपचयमाह—

**ज्ञेयत्ववत् स्वभावोऽपि, न चायुक्तोऽस्य तद्विधः ।**
**तदभावे न तज्ज्ञानं, तन्निवृत्तेर्गतिः कथम्? ॥ २१ ॥ २५८ ॥**

**ज्ञेयत्ववदिति**–यथा ज्ञेयत्वं भावस्येवासत्त्वस्यापि स्वभावस्तथेत्यर्थः, **अस्य** असत्त्वस्य, **तद्विधः** सद्भवनलक्षणः, **स्वभावोऽपि, न च** नैव, **अयुक्तः** असङ्गतः, किन्तु युक्त एव, न च सर्वथा निःस्वभावत्वं तुच्छत्वं येनासत्त्वस्योक्तस्वभावशालित्वे तन्न भवेत्, किन्तु भावस्वभावत्वाभाव एव तुच्छत्वं, तच्चोक्तस्वभाववत्त्वेऽप्यसत्त्वस्य सम्भवेदेव, यत एव भावस्वभावत्वाभाव एव तुच्छत्वं तत एव शशविषाणादावखण्डेऽप्यनादिवासनाप्रभवविकल्पगोचरतया ज्ञेयत्वमसत्ख्यातिवादिभिः सौगतैरुररीकृतम्, असत्त्वे ज्ञेयत्वमपि नास्त्येवेति ज्ञेयवदिति निदर्शनमसङ्गतमित्यत्राह–**तदभाव** इति–असत्त्वे, ज्ञेयत्वाभावे इत्यर्थः, **न तज्ज्ञानं** प्रथमक्षणोत्पन्नो भावो द्वितीयक्षणेऽसन्नित्येवमसत्त्वज्ञानं न स्यात्, ततः किमित्यत आह–**तन्निवृत्तेरिति**–सत्त्वनिवृत्तेरित्यर्थः, **गतिः** परिच्छेदः, **कथं** न कथञ्चित्, तथा च भावस्य द्वितीयक्षणेऽसत्त्वासिद्धौ सत्त्वस्यैव प्राप्तेः क्षणभङ्गवादो भज्येतेत्यर्थः ॥ २१ ॥ २५८ ॥

पराभिप्रायमाशङ्क्य परिहरति—

**तत् तद्विधस्वभावं यत्, प्रत्यक्षेण तथैव हि ।**
**गृह्यते तद्गतिस्तेन, नैतत् क्वचिदनिश्चयात् ॥ २२ ॥ २५९ ॥**

**तत् तद्विधस्वभावमिति**–सत्त्वानुविद्धं वस्तु निवृत्तिरूपधर्मकमित्यर्थः, **यत्** यस्मात् तस्मात् **प्रत्यक्षेण** निवृत्तिस्वभावसत्त्वानुविद्धवस्तुग्राहिणा निर्विकल्पेन, **तथैव** स्वधर्मवदेव, **हि** यतः, **गृह्यते** परिच्छिद्यते, यस्मादेवं, **तेन** कारणेन, **तद्गतिः** सत्त्वनिवृत्तिपरिच्छेदः, यद्यप्येवमपि तद्धर्मभूतनिवृत्तेर्भ्रमविषयतयाऽपि ज्ञेयत्वस्वभाववत् कार्यत्वस्वभावोऽविरुद्ध एव, तथाऽपि वस्तुगति-

मनुरुध्य समाधत्ते—नैतदिति—सत्त्वनिवृत्तिः प्रत्यक्षेणैव गृह्यत इति यदुक्तं परेण तदेतन्न समीचीनमित्यर्थः, कुत इत्यपेक्षायामाह—क्वचिदनिश्चयादिति—भावो द्वितीयक्षणे निवर्तत इत्यादिप्रतीत्यभावेन क्वाप्यनिश्चयादित्यर्थः, यद्वा **क्वचित्** सभागसन्ततौ, **अनिश्चयात्** सत्त्वनिवृत्तिनिश्चयाभावात्, "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" इति वचनात् स्वानुरूपयद्विषयकनिश्चयजनकत्वं निर्विकल्पकस्य तद्विषय एव तस्य प्रामाण्यमिति निश्चय एव हि निर्विकल्पकाध्यक्षकल्पकः, यथा नीलादिनिश्चयान्नीलनिर्विकल्पकाध्वक्षकल्पनम्, स्वानुरूपयद्विषयकविकल्पोत्पादनमन्तरेणापि तद्विषये निर्विकल्पकस्य प्रामाण्यकल्पने दान·हिंसाविरतिचेतसां स्वर्गप्रापणशक्तेरप्यध्यक्षत एवावसितेर्न तत्र विप्रतिपत्तिः स्यादिति तद्व्युदासार्थमनुमानप्रवर्तनं शास्त्रविरचनं वा वैयर्थ्यमनुभवेत् ॥ २२ ॥ २५९ ॥

पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**समारोपादसौ नेति, गृहीतं तत्त्वतस्तु तत् ।**
**यथाभावग्रहात् तस्यातिप्रसङ्गाददोऽप्यसत् ॥ २३ ॥ २६० ॥**

**समारोपादिति**—सभागसन्ततौ तत्तुल्यसत्त्वाध्यारोपात्, यद्यपि द्वितीयक्षणो भावः पूर्वक्षणभावाद् भिन्नस्तथाऽपि सादृश्यदोषेण पूर्वभावाभिन्नत्वेनैवावसायात्, **असौ** सत्त्वनिवृत्तिनिश्चयः, **न** नैव, भ्रान्त्यात्मकस्य पूर्वभावसत्त्वज्ञानस्य निर्णयात्मकस्य प्रतिबन्धकस्य सद्भावान्न सत्त्वनिवृत्तिनिश्चय इति यावत्, यथा शुक्ति-रजतयोर्वस्तुतो भेदेऽपि शुक्तौ चाकचक्यदोषेण रजतसमारोपान्न निश्चयः, **तत्त्वतस्तु** परमार्थतः पुनः, **तत्** असत्त्वम्, **गृहीतं** प्रत्यक्षेण परिच्छिन्नम्, **तस्य** प्रत्यक्षस्य, **यथाभावग्रहात्** प्रतिनियतधर्मकस्वलक्षणग्राहित्वात्, प्रत्यक्षं हि स्वविषयजन्यं भवति, विषयश्च तस्य प्रतिनियतधर्मकः स्वलक्षण इति तद्बलेनैव प्रत्यक्षस्योत्पत्तेः, अन्यधर्मानुकरणे तस्य भ्रान्तत्वापत्तेः, अभ्रान्तं प्रत्यक्षमिति तल्लक्षणकत्वानुपपत्तेः, वस्तुधर्माननुकरणे चानुत्पत्तेरेवेति, अत्र वस्तुनो निवृत्तिधर्मकत्वसिद्धावध्यक्षस्य निवृत्तिधर्मकवस्तुग्राहित्वसिद्धिः, अध्यक्षस्य निवृत्तिधर्मकवस्तुग्राहित्वसिद्धौ च वस्तुनो निवृत्तिधर्मकत्वसिद्धिः, प्रत्यक्षेण वस्तुनो निवृत्तिधर्मकत्वसिद्धिमन्तरेणाप्यनुमानेन वस्तुनो निवृत्तिधर्मकत्वं सिध्यतीति न वाच्यम्, अनुमानेऽपि प्रत्यक्षस्य मूलत्वात् प्रत्यक्षेण निवृत्तिधर्मकत्वासिद्धावनुमानेन तत्सिद्ध्यसम्भवादिति स्फुट एवान्योन्याश्रयः, तथाप्युत्कटदोषान्तरमाह—**अतिप्रसङ्गादिति, अदोऽपि** एतदपि, **असत्** अयुक्तम्, अकिञ्चित्करमिति यावत् ॥ २३ ॥ २६० ॥

अतिप्रसङ्गमेव भावयति—

**गृहीतं सर्वमेतेन, तत्त्वतोऽनिश्चयः पुनः ।**
**मितग्रहसमारोपादिति तत्त्वव्यवस्थितेः ॥ २४ ॥ २६१ ॥**

गृहीतमिति–विषयीकृतमित्यर्थः, **सर्वं** त्रैलोक्यम्, **एतेन** अध्यक्षेण, **तत्त्वतः** परमार्थतः, तथा च निर्विकल्पकाध्यक्षेण सर्वग्रहणं न भवतोऽभिमतमिति तदपि भवदुक्तयुक्त्या सिद्ध्येदित्यतिप्रसङ्गः, यदि प्रत्यक्षेण सर्वं गृहीतं कथं तर्हि न सर्वविषयकनिश्चय इत्यपेक्षायामाह–**अनिश्चयः पुनरि**ति–सर्वविषयकनिश्चयाभावः पुनरित्यर्थः, **मितग्रहसमारोपात्** यावद् यत्र निश्चीयते तावत एव तत्रारोपात्, **इति** एवम्, **तत्त्वव्यवस्थितेः** स्वलक्षणाध्यक्षस्वरूपोपपत्तेः, इन्द्रियसन्निकृष्टस्यैव प्रत्यक्षविषयत्वं भवति, यदेव पुरोवर्ति स्वलक्षणमिन्द्रियसन्निकृष्टं तद्विषयकत्वमेव निर्विकल्पकस्य, तथा च त्रैलोक्यस्येन्द्रियासन्निकर्षात् तद्ग्रहणापादनं कथमिति चेत्? न–स्वलक्षणस्यैव त्रैलोक्यात्मकत्वापादनात्, तथा च क्षणक्षयस्वर्गप्रापणशक्त्याद्यात्मकत्वं दानादिचित्तस्वलक्षणस्येति तन्निर्विकल्पके क्षणक्षयादिविषयकत्वमिन्द्रियसन्निकर्षात्, तथा त्रैलोक्यात्मकस्य स्वलक्षणस्येन्द्रियसन्निकृष्टत्वे तदात्मकं त्रैलोक्यमपीन्द्रियसन्निकृष्टमितीन्द्रियसंनिकर्षात् त्रैलोक्यग्रहणापादनसंभवात्, मितग्रहसमारोपस्येतरनिश्चयप्रतिबन्धकत्वकल्पनापेक्षया यस्योत्तरकालं निश्चयो न भवति, तस्य निर्विकल्पकेन ग्रहणमेव नाभूदिति कल्पन एव लाघवमिति नाध्यक्षेण सर्वं गृहीतमिति चेत्? तर्हि तुल्यसत्त्वाध्यारोपस्य सत्त्वनिवृत्तिलक्षणासत्त्वनिश्चयप्रतिबन्धकत्वकल्पनापेक्षया लाघवान्निर्विकल्पकेनासत्त्वग्रहणाभाव एव कल्प्यताम्, तथा च निर्विकल्पकप्रत्यक्षेण न स्वलक्षणभावस्य निवृत्तिधर्मकत्वसिद्धिः । अत्र प्रकारान्तरेणापि व्याख्यानं कृतवन्त उपाध्यायाः, सोपस्कारं तद् यथा–"यद्वा परमार्थतोऽसदृशानामपि भावानां समारोपबलेन तादृशविकल्पोत्पादकदर्शनहेतुत्वे स्वयमनीलादिस्वभावानामपि भावानां नीलादिविकल्पोत्पादकदर्शनहेतुत्वसंभवान्निर्धर्मकमेवास्तु स्वलक्षणम्, तथा च **सर्वं** धर्माभावान्निरवशेषमित्यर्थः, **एतेन तत्त्वतो गृहीत**मित्यस्य प्रागुक्त एवार्थः, **तत्त्वतो निश्चय** इति नञः प्रश्लेषरहित एव पाठः, **निश्चयः** मितनिश्चयः, **पुनर्मितग्रहसमारोपात्** नियतवासनाप्रबोधात्, इति व्याख्येयम्, वासनाप्रबोधनियमेऽप्यनुभवस्यैव नियामकत्वात्; अनुभवस्य निर्धर्मकस्वलक्षणरूपनिरवशेषमात्रग्राहकत्वे वासनाप्रबोधनियमनियामकत्वासम्भवान्नाध्यक्षेण निरवशेषं

गृहीतमिति चेत्? तर्हि अत्यन्तासति विषये कथं वासनास्वीकारः?, अत्यन्तासतो निर्विकल्पकप्रत्यक्षात्मकानुभवविषयत्वाभावात्; समनन्तरा-ऽसमनन्तरविकल्प-विभागार्थं वासनाभेदस्वीकारान्नायं दोषः, वासनाभेदाभावे समनन्तरा-ऽसमनन्तर-विकल्पविभागो न भवेदिति तदन्यथानुपपत्तिरेव तत्र नियामक इति चेत्?, समनन्तरा-ऽसमनन्तरविभागोऽपि किमर्थम्?; समनन्तरविकल्पात् संवादोऽनु-भवस्य भवति, असमनन्तरविकल्पाद् विसंवादोऽनुभवस्येत्येवं परम्परया संवादा-ऽसंवादनियमार्थं समनन्तरा-ऽसमनन्तरविकल्पविभागस्याऽऽवश्यकतया तदर्थं वासनाभेदस्वीकारोऽप्यावश्यक इति चेत्?, तर्हि यद्विषयकानुभवस्य संवादि-प्रवृत्तिजनकत्वं तद्विषये तस्य संवादः, यद्विषयकानुभवस्य विसंवादिप्रवृत्तिजनकत्वं तद्विषये तस्य विसंवाद इत्येवं साक्षादेव संवादा ऽसंवादाभ्युपगमोऽस्तु किमी-दृशकुसृष्टिकल्पनयेति दिग्'' इति ॥ २४ ॥ २६२ ॥

एतत्पुष्ट्यर्थं युक्त्यन्तरं समुच्चिनोति—

**एकत्र निश्चयोऽन्यत्र, निरंशानुभवादपि ।**
**न तथा पाटवाभावादित्यपूर्वमिदं तमः ॥ २५ ॥ २६२ ॥**

एकत्रेति-सत्त्वासत्त्वयोर्मध्ये सत्त्वे इत्यर्थः, **निश्चयः**, निश्चयात्मको विकल्पः, सत्त्वविषयेऽनुभवस्य निश्चयजननानुकूलपाटवात्, **अन्यत्र** असत्त्वे पुनः, **निरंशा-नुभवादपि** निरंशत्वेनाविशिष्टादपि निर्विकल्पप्रत्यक्षलक्षणनिमित्तात्, **न** नैव, **तथा** निश्चयः, **पाटवाभावात्** तद्विषयेऽधिकृतानुभवस्य मान्द्यात्, **इति** एवं प्रकारम्, **इदं** निरुक्तकल्पनम्, **अपूर्वं तमः** महत्तममज्ञानम्, निरंशे एकस्मिन्न-नुभवे सत्त्वविषये पाटवम्, असत्त्वे न पाटवमिति विभागाभावात्, विभागश्च तदा भवेद् यदि सत्त्वविषयकत्वमसत्त्वविषयकत्वं तस्यैकस्य स्यात्, तथाभ्युपगमे च सांशत्वमेव स्यादिति निरंशत्वव्याघातः; सत्त्वनिश्चयजननी शक्तिरेव पाटवम्, असत्त्वनिश्चयहेतुशक्त्यभावश्चापाटवम्, न तु तत्र विषयावच्छेदोऽपि निविशते, येन निरंशत्वविरोधः स्यादिति चेत्? न–तद्विषयकत्वेनैवानुभवस्य तद्विषयकनिश्चय-जननी शक्तिः, तद्विषयान्तरविषयकनिश्चयहेतुशक्त्यभाव इत्येवं तच्छक्तिनियमात्, तद्विषयकत्वमन्तरेणापि तन्निश्चयजननशक्तितस्तद्विषयकनिश्चयजनकत्वाभ्युपगमे नीलादिस्वभावविषयाभावेऽपि नीलादिनिश्चयजननशक्तितो निरंशानुभवान्नीलादि-निश्चयस्य संभवेन नीलादिस्वभावेऽप्यनाश्वासप्रसङ्गात्; असत्त्वनिश्चयजननशक्तिर-नुभवे नास्तीति वक्तुमशक्यम्, तथा सति विसभागसन्ततावसत्त्वनिश्चयोऽनुभवान्नानिव

भवेत्, दृश्यते च विसभागसन्ततावसत्त्वनिश्चयोऽनुभवादिति तत्रासत्त्वनिश्चयजननशक्तिकल्पनस्यावश्यकत्वे सर्वत्रानुभवे मितनिश्चयशक्तिसंभवादिति दिक् ॥ २५ ॥ २६२ ॥

प्रस्तुतमेव समर्थयति—

**स्वभावक्षणतो ह्यूर्ध्वं, तुच्छता तन्निवृत्तितः ।**
**नासावेकक्षणग्राहि-ज्ञानात् सम्यग् विभाव्यते ॥ २६ ॥ २६३ ॥**

**स्वभावक्षणत** इति-स्वसत्ताक्षणादित्यर्थः, हि निश्चितम्, **ऊर्ध्वं** द्वितीयक्षणे, **तुच्छता** तदसत्त्वरूपा, कुत इत्यपेक्षायामाह-**तन्निवृत्तित** इति-भावनिवृत्त्यभ्युपगमादित्यर्थः, यस्मादेवं तस्मात् **असौ** तुच्छता, **एकक्षणग्राहिज्ञानात्** एकक्षणमात्रग्राहिज्ञानात् सन्मात्रग्राहिज्ञानादिति यावत्, **सम्यग्** न्यायतः, **न विभाव्यते** न निश्चीयते, भावसत्ताक्षणे तुच्छताया असत्त्वेन तदननुभवात् ॥२६॥२६३॥

यदि नामेवं ततः किमित्याह—

**तस्यां च नागृहीतायां, तत् तथेति विनिश्चयः ।**
**न हीन्द्रियमतीतादि-ग्राहकं सद्भिरिष्यते ॥ २७ ॥ २६४ ॥**

**तस्यां चेति**-द्वितीयादिक्षणास्थितिरूपायां तुच्छतायां चेत्यर्थः, **अगृहीतायाम्** अनुभवेनाविषयीक्रियमाणायां सत्याम्, **तद्** वस्तु, **तथा** क्षणस्थितिधर्मकम्, **इति** एवंप्रकारेण, **न विनिश्चयः** निश्चयो न संभवति, क्षणस्थितिधर्मकत्वेन वस्तुविनिश्चयस्य द्वितीयादिक्षणास्थितिग्रहसापेक्षत्वात्, द्वितीयादिक्षणास्थितिग्रहोऽपीन्द्रियेणैव भविष्यतीति न चेत्याह-**न हीन्द्रियमिति**-इन्द्रियं चक्षुरादि, **अतीतादिग्राहकम्** अतीतानागतपरिच्छेदकम्, **सद्भिः** पण्डितैः, **न च** नैव, **इष्यते** अभ्युपगम्यते, न च वर्तमानक्षणग्रहे पूर्वापरयोरदर्शनादेवाभावग्रह इति शङ्कनीयम्, दृश्यादर्शनस्यैवाभावग्राहकत्वात्, पूर्वापरयोरदृश्यत्वेन तत्कालीनास्थितेरप्यदृश्यतया तद्दर्शनस्य तदभावग्राहकत्वासम्भवात् ॥ २७ ॥ २६४ ॥

प्रस्तुतोपचयमाह—

**अन्तेऽपि दर्शनं नास्य, कपालादिगतेः क्वचित् ।**
**न तदेव घटाभावो, भावत्वेन प्रतीतितः ॥ २८ ॥ २६५ ॥**

**अन्तेऽपीति**-विसभागसन्तत्युत्पत्तावपीत्यर्थः, **अस्य** घटासत्त्वस्य, **न**

**क्वचिद् दर्शनं** कुत्रापि दर्शनं नैव, तत्र हेतुः—**कपालादिगतेरिति**—विसभागसन्तत्युत्पत्तिकालेऽपि कपालादेरेव परिच्छेदादित्यर्थः, कपालाद्येव घटाभावोऽस्त्वित्यत्राह—**न तदेवेति**—कपालाद्येव नेत्यर्थः, **घटाभावः** घटासत्त्वम्, तत्र हेतुः—**भावत्वेन प्रतीतित** इति—कपालादेः सत्त्वेनानुभवात्, घटासत्त्वं चासत् न सत्त्वेनानुभूयते ततो न घटासत्त्वं कपालादिरूपमिति ॥ २८ ॥ २६५ ॥

कपालादेर्घटाद्यसत्त्वरूपत्वाभावेऽपि तद्दर्शनेन घटाद्यसत्त्वमनुमास्यत इत्यत आह—

**न तद्गतेर्गतिस्तस्य, प्रतिबन्धविवेकतः ।**
**तस्यैवाभवनत्वे तु, भावाविच्छेदतोऽन्वयः ॥ २९ ॥ २६६ ॥**

**न तद्गतेरिति** । **तद्गतेः** कपालादिदर्शनात्, **तस्य** घटासत्त्वस्य, **गतिः** ज्ञानं, **न** नैव, तत्र हेतुः—**प्रतिबन्धविवेकत** इति—घटाद्यसत्त्वस्य कपालादेश्च व्याप्तिलक्षणप्रतिबन्धस्याभावादित्यर्थः, सौगतमते व्याप्तिश्च तादात्म्य-तदुत्पत्तिभ्यां भवति, कपालादेश्च घटाद्यसत्त्वेन सह न तादात्म्यं, नापि घटाद्यसत्त्वेन कपालाद्युत्पद्यत इति प्रतिबन्धनियामकयोस्तयोरभावान्न व्याप्तिः, पक्षान्तराङ्गीकरणे दोषमाह—**तस्यैवेति**, इत्येवमुत्तरार्द्धमवतारितवन्तः श्रीहरिभद्रसूरयः, तदवतरणमेव परिष्कृत्योपाध्याया इत्थमवतारयन्ति—"अस्तु तर्हि अनायत्या घटाभावतादात्म्यमेव कपालादौ, अधिकरणानतिरिक्ताभावस्य शशविषाणाप्रख्यत्वात्, एकस्यैवाखण्डतया प्रतीयमानस्य नाशस्य सांवृतिकत्वादिति पक्षाङ्गीकारे परस्याह—**तस्यैवेति**" इति, **तस्यैव** कपालादेरेव, एवकारेण कपालाद्यतिरिक्तस्य घटाभवनस्य व्यवच्छेदः, **अभवनत्वे तु** घटाभावत्वेऽभ्युपगम्यमाने, तुनाऽभ्युपगमः सूच्यत इत्युपाध्यायाः, **भावाविच्छेदतः** यद्यन्यस्योत्पादतोऽन्यस्य नाशो व्यवह्रियेत तदा तन्त्वाद्युत्पादतोऽपि घटनाशव्यवहारः स्यादतो नाशस्य प्रतियोगिना समं तादात्म्यमेषितव्यम्, तथा च कपालरूपघटनाशे स्वीक्रियमाणे घटस्य तादात्म्यसम्बन्धः, घटस्य कपालतया परिणमने घट एव कपालीभूत इत्यर्थात् प्रतीयमानया भावतोऽविच्छिन्नया, **अन्वयः** घटस्य द्वितीयक्षणेऽप्यन्वयः सिद्धः, यदि घटस्यासत्त्वं घटासत्त्वमित्येवं सखण्डं न घटासत्त्वं, येन सम्बन्धे षष्ठीविभक्तिप्रवृत्तेः सम्बन्धः कश्चिद् वक्तव्यो भवेत्, किन्तु शशविषाणं यथाऽखण्डमेवालीकं तथा तत्प्रख्यं घटासत्त्वमखण्डमेवेत्येवं स्वीकारः, तदा घटस्य द्वितीयक्षणे स्यादप्यनन्वयः, न चेत्थं परस्याभ्युपगम इति ॥ २९ ॥ २६६ ॥

उपसंहरति—

**तस्मादवश्यमेष्टव्यं, तदूर्ध्वं तुच्छमेव तत् ।**
**ज्ञेयं सज्ज्ञायते ह्येतदपरेणापि युक्तिमत् ॥ ३० ॥ २६७ ॥**

**तस्मादि**ति–यस्मादेवं तस्मात्, उक्तयुक्तेरिति यावत्, **अवश्यं** नियमेन, **एष्टव्यम्** अङ्गीकर्तव्यम्, **तदूर्ध्वं** क्षणस्थितिधर्मणः सत्त्वादग्रिमक्षणे, **तद्** घटासत्त्वम्, **तुच्छमेव** भावविलक्षणमेव, हि निश्चितम्, **एतत्** असत्त्वम्, **अपरेणापि** ज्ञानान्तरेणापि अग्रिमज्ञानेनापीति यावत्, **ज्ञेयं सत्** ज्ञेयस्वभावं सत्, **ज्ञायते** परिच्छिद्यते, **युक्तिमत्** न्याय्यं तावदेतत्, विषयस्यासत्त्वस्य सत्त्वे तज्ज्ञानस्य संभवात्, विषयस्य तुच्छत्वं तज्ज्ञानाप्रामाण्यप्रयोजकम्, तेन सन्मात्रविषयत्वलक्षणं प्रामाण्यं तज्ज्ञानेन भवति तत्प्रयोजकस्य विषयेऽतुच्छत्वस्याभावात्, भ्रमभिन्नत्वलक्षणं प्रामाण्यं तु तज्ज्ञानेऽपि सत्त्वात् । तदेवमसत्त्वस्योत्पादादि व्यवस्थापितम् ॥ ३० ॥ २६७ ॥

यथा सत्त्वस्योत्पादादि तथाऽसत्त्वस्यापीति तयोरैक्यं स्यादित्यनिष्टापत्तिपरिजिहीर्षयाऽऽह—

**नोत्पत्त्यादेस्तयोरैक्यं, तुच्छेतरविशेषतः ।**
**निवृत्तिभेदतश्चैव, बुद्धिभेदाच्च भाव्यताम् ॥ ३१ ॥ २६८ ॥**

**नोत्पत्त्यादे**रिति–उत्पत्त्यादेः कारणान्नेत्यर्थः, **तयोः** सत्त्वासत्त्वयोः, **ऐक्यम्** तुल्यत्वम्, निषेधे हेतुमाह–**तुच्छेतरविशेषत** इति–असत्त्वं तुच्छस्वभावं सत्त्वं चातुच्छस्वभावमित्येवं विशेषादित्यर्थः, तथा **निवृत्तिभेदतश्चैव** सत्त्वस्य निवृत्तिस्तुच्छा, असत्त्वस्य निवृत्तिस्त्वतुच्छेत्येवं निवृत्तिभेदात्मकविशेषात्, तथा **बुद्धिभेदाच्च** सत्त्वस्यास्तीत्येवं बुद्धिः, असत्त्वस्य च नास्तीत्येवं बुद्धिभेदात्मकविशेषाच्च, **भाव्यताम्** न तयोरैक्यमिति विमृश्यताम्, नीलपीतादीनामपि विरुद्धधर्माध्यासादेव भेदोऽन्यथा भावत्वेन तेषामप्यैक्यं स्यात्, विरुद्धधर्माध्यासश्च सत्त्वासत्त्वयोरपीति ॥ ३१ ॥ ६२८ ॥

एतेन यदपाकृतं तदुपन्यस्यति—

**एतेनैतत् प्रतिक्षिप्तं, यदुक्तं न्यायमानिना ।**
**न तत्र किञ्चिद् भवति, न भवत्येव केवलम् ॥ ३२ ॥ २६९ ॥**

**एतेनेति**-अनन्तरोपदर्शितेन परपक्षगतानिष्टप्रसङ्गदोषेणेत्यर्थः, **एतद्** अनन्तरमभिधास्यमानम्, **प्रतिक्षिप्तम्** अपाकृतम्, किमेतत् प्रतिक्षिप्तमित्यपेक्षायामाह-**यदुक्तमिति**-यत् कथितमित्यर्थः, केनोक्तमित्याकाङ्क्षायामाह-**न्यायमानिनेति**-अन्याय्यमेव न्याय्यं मन्यत इति न्यायमानी तर्कावलिप्तस्तेन धर्मकीर्तिनेत्यर्थः, तदुक्तमेव सार्धकारिकायुगलेनाह-'**न तत्रेति**-नञो भवतीत्यनेनान्वयः, **तत्र** क्षणिके वस्तुनि, उत्पत्तिक्षणादग्रिमक्षणे, **किञ्चित्** किमपि वस्तुशब्दवाच्यम्, **न भवति** नोत्पद्यते, द्वितीयक्षणे किं तत्? इत्यपेक्षायामाह-**न भवत्येव केवलमिति**-किन्तु प्राक्क्षणे भवनशीलं तदेव न भवति, अन्यथा नाशायोगात्, तद्भवनस्य सद्भावात् ॥ ३२ ॥ २६९ ॥

न च द्वितीयक्षणे यद् घटाभवनं तद् घटस्वभावं तद्भिन्नं वा? उभयथाऽपि घटाप्रच्युतिः, घटस्वभावतदभवनकाले घटस्यापि सत्त्वात्, अन्यथा घटस्वभावत्वमेव तस्य न स्यात्, घटस्वभावभिन्नेन च तदभवनेन घटस्वरूपे न किञ्चित् क्षुण्णमिति घटस्वरूपं तदवस्थमेव स्यादित्यादिदोषनिपातः कथं वारणीयः? इत्यत आह—

**भावे ह्येष विकल्पः स्याद्, विधेर्वस्त्वनुरोधतः ।**
**न भावो भवतीत्युक्तमभावो भवतीत्यपि ॥ ३३ ॥ २७० ॥**

**भावे हीति**-हि यतः, **भावे** वस्तुनो भावे, **एष विकल्पः** तत्त्वाऽन्यत्वयोरनिष्टप्रसङ्गादिरूपो विकल्पः, **स्यात्** भवेत, किं कारणं? **विधेः** शब्दादिना विधिव्यवहारस्य, **वस्त्वनुरोधतः** वस्त्ववलम्बनेनैव प्रवृत्तेः, अवस्तुनि शब्दादिना विधिव्यवहारस्याभावात्, यद्यवस्तु व्यवहारो न भवति कथं तर्हि शशविषाणादिकममानकं घटाभावो भवतीत्यादिव्यवहारः? अत्रोत्तरम्-**न भावो भवतीत्युक्तं** तात्पर्यतो भावो न भवतीत्युक्तम्, **अभावो भवतीत्यपि** अभावो भवतीति यदुच्यते तेनापि न भावो भवतीत्येवोक्तम्, अन्यथा शशविषाणघटाभावादेर्भवतीत्यादिविधिव्यवहारविषयत्वे तुच्छत्वमेव तस्य न स्याद्, विधिव्यवहारविषयत्वशून्यत्वस्य तुच्छत्वरूपत्वात् । ननु गोशृङ्गादेर्योग्यत्वेन यदि शशशृङ्गं स्यात् तदा तदपि योग्यमेव स्यात् तज्जातीयत्वात्, तथा च सम्भाव्यमाना तदुपलब्धिर्योग्योपलब्धिरेवेति तदभावलक्षणयोग्यानुपलब्ध्या शशशृङ्गाभावग्रहात् तत्र कालसम्बन्धार्थकभवनविधानं शशशृङ्गाभावो भवतीत्येवंस्वरूपमवि-

रुद्धम्, शशमस्तकप्रदेशे शृङ्गभवनस्थले शृङ्गाकारमृन्मयशृङ्गारोपणदोषतश्चक्षुषा शशशृङ्गमिति भ्रमात्मकतदुपलब्धिर्भवति, ततो भ्रमात्मकतदुपलब्धिसामग्रीदोष-घटितेत्येवमपि योग्यताशरीरे यथा प्रतियोगिव्याप्येतरत्वं निवेश्यते तथा दोषेतर-त्वमपि निवेश्यते, तथा च दोषेतरप्रतियोगिव्याप्येतरयावत्प्रतियोग्युपलम्भक-सामग्री योग्यता, सा च दोषासमवधानकालेऽपि समस्तीति तस्यां सत्यां शशशृङ्गा-भावग्रहसम्भवात्, यदि च योग्यताशरीरे दोषेतरत्वं न निवेश्यते, तथा च प्रति-योगिव्याप्येतरयावत्प्रतियोग्युपलम्भकसामग्री शशशृङ्गाभावस्य दोषघटिता, तस्यां सत्यां शशशृङ्गोपलम्भ एवेति तदुपलब्ध्यभावरूपकारणाभावान्न शशशृङ्गाभाव-ग्रहः, दोषघटितसामग्र्यभावे तु प्रतियोगिव्याप्येतरयावत्प्रतियोग्युपलम्भकसामग्री-लक्षणयोग्यताभावादेव न शशशृङ्गाभावग्रह इति स्यात् तदा ह्रदादौ वह्न्यादि-भ्रमलक्षणोपलम्भेऽपि दोषः कारणमिति तद्घटितसामग्रीसत्त्वे ह्रदादौ वह्न्यादि-भ्रमात्मकोपलम्भ एवेति तदभावलक्षणानुपलब्धिकारणाभावान्न ह्रदादौ वह्न्याद्य-भावप्रत्यक्षम्, वह्न्यादिभ्रमजनकदोषासत्त्वे च तद्घटितसामग्रीलक्षणयोग्यताऽभावा-देव न वह्न्याद्यभावप्रत्यक्षमित्येवं ह्रदादौ वह्न्याद्यभावप्रत्यक्षमपि न स्यात्; न च प्रतियोग्यंशे भ्रमाजनकदोषेतरत्वं योग्यतायां निवेशनीयं, तथा च ह्रदादौ वह्न्यादि-भ्रमजनकदोषो ह्रदरूपधर्म्यंशे भ्रमजनको न तु वह्निरूपप्रतियोग्यंशे भ्रमजनक इति प्रतियोग्यंशे भ्रमाजनकदोष एव सः, तदसत्त्वेऽपि तदितरप्रतियोगिव्याप्येतर-यावद्वह्न्याद्यात्मकप्रतियोग्यसामग्रीयोग्यतासत्त्वाद् वह्न्याद्यभावप्रत्यक्षमुपपद्यते, शशशृङ्गाभावप्रत्यक्षं तु न सम्भवति, यतः शशशृङ्गाभावस्य प्रतियोगि शशशृङ्गं तदुपलम्भसामग्रीघटकस्तु दोषः शशशृङ्गरूपप्रतियोग्यंश एव भ्रमजनकः, तद-भावे शशशृङ्गभ्रमात्मकतदुपलम्भस्यैवासम्भवादिति प्रतियोग्यभ्रमाजनकदोषेतरः संभवतीति तद्घटितसामग्र्येव योग्यता, तस्यां सत्यां शशिशृङ्गोपलम्भ एवेति तद-भावलक्षणप्रतियोग्यनुपलब्धिरूपकारणाभावान्न शशशृङ्गाभावग्रहः, तथाभूत-दोषासमवधानकाले तु तद्घटितसामग्रीलक्षणयोग्यताभावादेव न शशशृङ्गाभावग्रह इत्येवमुभयथाऽपि शशशृङ्गाभावग्रहो न संभवतीति वाच्यं, ह्रदे वह्निभ्रमजनक-दोषकाले वह्निविशिष्टह्रदत्वाभावप्रत्यक्षापत्तेः, निरुक्तदोषस्य प्रतियोग्यंशे भ्रम-जनकतया प्रतियोग्यंशे भ्रमाजनकदोषेतरत्वेन तद्घटितप्रतियोग्युपलम्भकसामग्र्या निरुक्तसामग्रीरूपतया योग्यतात्वेन तदानीं योग्यतासद्भावात्, तत्र तदनुपलम्भ-विघटकदोषेतरत्वनिवेशे च 'अत्र पीतशङ्खो नास्ति' इत्यादाविव तत्र तद्वत्ताभ्रम-

जनकदोषातिरिक्तप्रतियोगिनि प्रतियोगितावच्छेदकवैशिष्ट्यांशे भ्रमजनकस्य दोषस्य सत्त्वेऽपि तत्र तदनुपलम्भस्याबाधात्, एतेन

"दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति साऽनुपलम्भने" ॥ १ ॥

[ कुसु० स्त० ३, का० ३ ]

इत्युदयनोक्तमपास्तम् । अत्रोदयनाचार्यग्रन्थसन्दर्भश्चेत्थम्—

"अपि च

"दुष्टोपलम्भसाग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति साऽनुपलम्भने ॥ १ ॥

केन च शशशृङ्गं प्रतिषिध्यते, सर्वथाऽनुपलब्धस्य योग्यत्वासिद्धेः, तदितरसामग्रीसाकल्यं हि तत्, ननूक्तमाभासोपलब्धं हि तत्, अत एवाशक्यनिषेधमित्युक्तम्, अनुपलम्भकाले आभासोपलम्भसामग्र्या अभावात्, तत्काले चानुपलम्भाभावादिति, कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः? शशे अधिकरणे शृङ्गाभावोऽस्तीति" इति । वर्द्धमानप्रकाशश्चात्रैवम् "किञ्चानुपलब्धिमात्रान्निषेधनिश्चयेऽतीन्द्रियोच्छेदाद् योग्यानुपलम्भात् स वाच्यः, योग्यता च प्रतियोगितद्व्याप्येतरतत्प्रमापकसाकल्यरूपाऽलीके नास्तीति दोषसचिवतज्ज्ञानसामग्रीरूपा सा वाच्या, तस्यां च सत्यां नालीकस्यानुपलम्भः, उपलम्भस्यैव सत्त्वात्, अनुपलम्भदशायां च तज्ज्ञानसामग्रीरूपा योग्यतैव नास्तीत्याह—अपि चेति, केन चेति? न केनापीत्यार्थः, सर्वथेति-प्रमाणत इति शेषः, न चाभासोपलब्धस्यापि नेदं रजतमिति निषेधादुपलब्धमात्रस्य निषेधो न तु प्रमितस्यैवेत्यत आह—तदितरेति, रजतादेः प्रामाणिकत्वेन योग्यस्यैवानुपलम्भान्निषेधो न त्वाभासोपलब्धस्येत्यर्थः, तथैव किं न स्यादित्याह-नन्विति, आभाससामग्रीकालेऽनुपलम्भाभावात्, अनुपलम्भकाले च तद्रूपयोग्यताया असत्त्वादित्याह—अत एवेति, नन्वेवं घटादावपि दोषस्योपलम्भकारणत्वात् तदभावोऽपि न गृह्येत, प्रमापकसाकल्यस्य च विवक्षितत्वे गुणस्यैव प्रमापकस्याभावात् तत्साकल्यासिद्धेः, अत्राहुः—प्रत्यक्षप्रमायामिन्द्रियार्थसन्निकर्षस्य गुणत्वात् तस्य च तद्व्याप्यत्वादेव, तदन्यगुणस्य च तत्राकारणत्वात्, घटादौ गुणान्यप्रमाकारणत्वेन योग्यता, शशशृङ्गे च न दोषान्यज्ञानकारणत्वेन योग्यता, दोषान्यप्रमापकस्याभावादित्यन्ये, शश इति, ननु गवि शशशृङ्गं नास्तीति

प्रतीतिबलात् प्रतियोग्यवृत्तिधर्मेण शशीयत्वेनावच्छिन्नः शृङ्गाभावः प्रतीयते, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्, मैवम्-प्रतियोगितावच्छेदकधर्मविशिष्टप्रतियोगिज्ञानस्याभावधीहेतुतया तादृशप्रतीतेरसिद्धेः, अन्यथा प्रतियोगिनिर्विकल्पकादपि व्यतिरेकप्रतीत्यापत्तेः'' इति । न च गामानय गां नय गां बधानेत्यादिवृद्धव्यवहारादावापोद्वापाभ्यां यथा गवादिपदस्य गवाद्यर्थे शक्तिर्निर्णीयते, गौर्वाहीक इत्यादिव्यवहारतो गोसादृश्याद्यर्थे लक्षणा च गृह्यते, तथा शशशृङ्गादौ तादृशव्यवहारादेरभावान्न शशशृङ्गादिपदस्य क्वचिदपि शक्तिलक्षणान्यतरवृत्तिनिर्णयो न वा ततः कस्यचिदर्थस्योपस्थितिर्न वा योग्यताज्ञानादिकमिति शाब्दकारणानामभावात् ततः शाब्दानुत्पत्त्या तादृशशाब्दव्यवहारासङ्गतिरिति वाच्यं, स्थलान्तरे शाब्दकारणतया सिद्धपदवृत्त्याद्यभावेऽपि दोषविशेषमहिम्ना शब्दादपि तद्बोधसम्भवात्, वेदान्तवाक्यान्निर्दोषत्वमहिम्ना पदवृत्त्यादिकं विनैव वेदान्तिनो निर्गुणब्रह्मबोधवत्, तदाह श्रीहर्षः—

"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।
अबाधात् तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥
असंसर्गाग्रहस्यापि मन्ता शंसत्यबाधिते ।
अत्यन्तासदसंसर्गाग्रहं संसर्गलग्नकम्'' ॥ [ खण्ड० प० १, ११-१२ ]

इति, न चैवं शशशृङ्गाद्यलीकोपलम्भकस्य सामग्र्यादिकल्पने गौरवम्, शशशृङ्गानुपलम्भनिमित्तकशशशृङ्गाभावग्रहानुरोधितदुपलम्भकसामग्र्यादिकल्पनगौरवस्य प्रामाणिकत्वात्, अन्यथा प्रातीतिकपदार्थमात्रविलयापत्तेरिति चेत्? अत्राहुरुपाध्यायाः-"न- दोषेतरतदुपलम्भकहेतोरेवाभावात्, आलोक-नमस्कारादेर्भावस्यैवोपलम्भकत्वात्, शब्दस्थलेऽपि शशशृङ्गमुख्यविशेष्यके नास्तित्वप्रकारकशाब्दविकल्प एव तत्तदानुपूर्व्याः सामर्थ्यकल्पनात्, न हि शशशृङ्गं नास्तीत्यत्र शशशृङ्गाभावोऽस्तीति कस्यचिद् विकल्पः, किन्तु 'शशशृङ्गमस्तित्वाभाववत्' इत्येव, न च व्यवहारप्रातिकूल्येन कल्पना युक्तिमतीति'' इति ॥ ३३ ॥ २७० ॥

स्याद्वादिसमर्थितेऽपि स्वमते तत्र गजनीलिकामवलम्बमानः परस्य प्रसङ्गदोषं परिहरन्नाह—

**एतेनाहेतुकत्वेऽपि, ह्यभूत्वा नाशभावतः ।**
**सत्त्वानाशित्वदोषस्य, प्रत्याख्यातं प्रसञ्जनम् ॥ ३४ ॥ २७१ ॥**

एतेनेति–अस्योत्तरपद्यगतेन 'प्रतिक्षिप्तम्' इत्यनेनान्वयः, नाशस्य विधिव्यवहाराविषयत्वलक्षणनिःस्वभावत्वप्रतिपादनेनेत्यर्थः, **अहेतुकत्वेऽपि** नाशस्याहेतुकत्वे स्वीक्रियमाणेऽपि, हि निश्चितम्, **अभूत्वा नाशभावतः** नाशो हि प्रथमक्षणेऽभूत्वा द्वितीयक्षणे भवतीत्येवं प्रथममभवनरूपेणोत्पद्य द्वितीयक्षणे भावरूपतया नाशोत्पत्तितः, अस्य 'प्रत्याख्यातम्' इत्यनेनान्वयः, **सत्त्वानाशित्वदोषस्य** सत्त्वोन्मज्जनरूपानिष्टस्य, यथा बीजादङ्कुरमङ्कुराच्च बीजमित्येवं प्राप्तस्य, **प्रसञ्जनम्** आपादनम्, **प्रत्याख्यातं** निराकृतम् ॥ ३४ ॥ २७१ ॥

एतद् बौद्धप्रधानधर्मकीर्तिनाऽभिहितं, तच्च प्रकरणकारेणात्रैव स्तबके "सतोऽसत्त्वे" इत्यादिकारिकया दूषितमेव, तथाऽप्येतेन प्रतिक्षिप्तमिति योजयन्नाह—

**प्रतिक्षिप्तं च यत् सत्त्वानाशित्वागोऽनिवारितम् ।**
**तुच्छरूपा तदाऽसत्ता, भावाप्तेर्नाशितोदिता ॥ ३५ ॥ २७२ ॥**

**प्रतिक्षिप्तं चेति**–अनन्तरोपदर्शितधर्मकीर्त्युक्तं निराकृतमित्यर्थः, **यत्** यस्मात् कारणात्, **सत्त्वानाशित्वाऽऽगः** सत्त्वस्य–भावस्य, अनाशित्वम्–उन्मज्जनं, तल्लक्षणापराधः, **अनिवारितं** नातो निवारितं, तदवस्थ एवेति यावत्, कथमित्यपेक्षायामाह–**तुच्छरूपेति**–निःस्वभावात्मिकेत्यर्थः, **तदा** द्वितीयक्षणे, **असत्ता** नाशात्मता, तस्याः, **नाशिता** निवृत्तिः, **भावाप्तेः** सत्तारूपप्रवेशात्, **उदिता** प्राक् प्रसञ्जिता ॥ ३५ ॥ २७२ ॥

नन्वेतदपि प्रागुक्तमेव–अभावे विकल्पाभावान्न प्रसङ्ग इत्यत्राह—

**भावस्याभवनं यत् तदभावभवनं तु यत् ।**
**तत् तथा धर्मके ह्युक्तविकल्पो न विरुध्यते ॥ ३६ ॥ २७३ ॥**

**भावस्येति**–सत्त्वस्येत्यर्थः, **अभवनं यत्** यत् तुच्छरूपं, **तत्** तदेव, **अभावभवनम्** नाशित्वलक्षणाभावस्य भवनम्, एतच्च आर्थप्रत्ययमाश्रित्य भावो न भवतीत्युक्त्याऽभावो भवतीत्यर्थात् प्रतीयते, यथा घटो नास्तीत्यतो घटास्तित्वाभावबोधोऽनुभवसिद्धस्तथा घटाभावेऽस्तित्वबोधोऽप्यनुभूयते, यथा घटास्तित्वाभावबोधतो घटोऽस्ति न वेति संशयो निवर्तते तथा घटाभावास्तित्वबोधतोऽप्युक्तसंशयो निवर्तत एव, घटो नास्तीति वाक्यं घटास्तित्वाभावं बोधयत्विति वक्तुस्तात्पर्यं श्रोतुश्चेदं वाक्यं घटास्तित्वाभावबोधेच्छयोच्चरितमिति तात्पर्यज्ञानं तदोक्तवाक्याद्

घटास्तित्वाभावबोधो भवति, यदा तु घटो नास्तीति वाक्यं घटाभावास्तित्वं बोधयत्विति वक्तुस्तात्पर्यं श्रोतुश्चेदं वाक्यं घटाभावास्तित्वबोधेच्छयोच्चरितमिति तात्पर्यज्ञानं तदोक्तवाक्याद् घटाभावास्तित्वबोधोऽपि भवत्येव, यत् तु भूतले घटो नास्तीत्यादौ भूतलपदोत्तरसप्तमीविभक्तेर्निरूपितत्वमर्थः, तस्य चासूधातोरर्थे आधेयत्वेऽन्वयः, तस्य च त्याद्य[तिङ]र्थे वर्तमानान्वितस्य त्याद्य[तिङ]र्थे आश्रयत्वेऽन्वयः, तस्य च नञर्थाभावेऽन्वयः, तस्य च प्रथमाविभक्त्यन्तघटपदार्थे घटेऽन्वयः, तथा च भूतलनिरूपितवर्तमानाधेयत्वाश्रयत्वाभाववान् घट इति बोधः, एकवचनस्याद्य[सुब]र्थे निषिध्यमानाश्रयत्ववाचित्यादेः [तिङः] एकवचनस्यैव साकाङ्क्षत्वमिति स्त्यादे[सुप्तिङो]र्वचनैक्यनियमोपपत्तिः, यदि च गगनमस्तीत्यादावसूधात्वर्थो नाधेयत्वम्, नित्यद्रव्यभिन्नस्यैवाश्रितत्वं साधर्म्यमिति गगनस्य कुत्रापि वृत्तित्वाभावात्, किन्तु कालसम्बन्ध एवासूधात्वर्थः, तदाऽसूधात्वर्थे कालसम्बन्धेऽन्वययोग्यमवच्छिन्नत्वं सप्तम्यर्थः, तथा च भूतले घटो नास्तीत्यादौ भूतलान्यदेशगतस्य घटस्य कालसम्बन्धो न भूतलावच्छिन्न इति भूतलावच्छिन्नकालसम्बन्धाश्रयत्वाभाववान् घट इति बोधः, घटे मेयत्वमस्तीत्यादौ मेयत्वनिष्ठकालसम्बन्धस्यानवच्छिन्नत्वेन तत्र सप्तम्यर्थावच्छिन्नत्वस्य बाधात् सप्तम्या वृत्तित्वमात्रमर्थः, तथा च तत्र घटवृत्तिकालसम्बन्धवत्प्रमेयत्वमिति बोधो मेयत्वनिष्ठकालसम्बन्धस्यानवच्छिन्नत्वेऽपि घटवृत्तित्वादुपपद्यते, कालश्च वर्तमानलक्षणोऽत्र ज्ञेयः, यदि च कालसम्बन्धमक्रोडीकृत्यैव सप्तम्यर्थस्य वृत्तित्वस्य प्रमेयत्वेऽन्वयः स्वीक्रियते तदा घटे मेयत्वमस्तीत्यादौ दोषाभावेऽपि भवनान्निर्गते घटे भवने घटोऽस्तीति, भवनस्थे च घटे भवने घटो नास्तीति व्यवहारप्रामाण्यापत्तिः, भवनवृत्तिघटस्य भवनवृत्तिघटाभावस्य च क्वचित् सत्त्वात्, न च यत्र त्याद्य[तिङ]न्तधातुसमभिव्याहारो न वर्तते तत्र सप्तम्यर्थाधेयत्वस्य समभिव्याहृतपदान्तरार्थे नञ्समभिव्याहारे तु नञर्थेऽभावेऽन्वयो वाच्यः, तथा च "जातौ न सत्ता" इत्यत्रान्वयानुपपत्तिः, जातिनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या तदभावस्याप्यप्रसिद्धत्वात्, यदि च सम्बन्धसामान्यावच्छिन्नवृत्तित्वमेव सप्तम्यर्थः, तस्य च न तत्राप्यप्रसिद्धिः, जातिनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य जातित्वप्रमेयत्वादौ प्रसिद्धत्वात्, तदा जातिनिरूपितस्वसमवायिसमवेतत्वावच्छिन्नवृत्तित्वस्य सत्तायां भावेन तदभावस्य तत्राभावादिति वाच्यम्, एकार्थसमवायादिभिन्नसम्बन्धावच्छिन्नवृत्तित्वे सप्तम्या निरूढलक्षणास्वीकारादिति केषाञ्चिन्नैयायिकानां मतं, तदसत्, भूतले न

घट इत्यादौ भूतलावच्छिन्नास्तित्वाभाववान् घट इति भूतलावच्छिन्नास्तित्ववान् घटाभाव इत्येवं द्विविधबोधस्यैवानुभवसिद्धत्वात्, यश्च घटादिः पूर्वं गृहनिरूपितास्तित्ववान्, पश्चाद् गृहान्निर्गतः, तस्मिन् घटादौ कथञ्चिद् घटादिपृथग्भूताधेयत्वपर्यायस्य विनाशेन तत्पर्यायशून्ये तस्मिन् भवने घटोऽस्तीति व्यवहारस्य व्यवहर्तव्याभावान्न प्रामाण्यं, घटादौ भवनस्थतादशायां च निरुक्तपर्यायस्य घटादौ सत्त्वेन घटाभावादौ भवनस्थत्वपर्यायस्याभावेन भवने घटोऽस्तीति व्यवहारस्य व्यवहर्तव्यसत्त्वात् प्रामाण्यं, भवने घटो नास्तीति व्यवहारस्य व्यवहर्तव्याभावान्न प्रामाण्यमित्येवमनुपपत्त्यभावात्, भवने घटोऽस्तीत्यत्र भवनवृत्तित्वविशिष्टघटेऽस्तित्वान्वये भवनवृत्तित्वरूपविशेषणेऽपि चास्तित्वान्वय इति विशेष्यीभूतघटेऽस्तित्वस्य सत्त्वेऽपि तद्विशेषणीभूते भवनवृत्तित्वे तस्याभावेन तद्विशिष्टे घटेऽपि तदभावात्, उत्सर्गतश्च विशेषणविशेष्यभावावलम्बनप्रवृत्तव्यवहारे विशिष्ट एव पदार्थान्तरान्वयो न तूपलक्षिते, तथाऽनभ्युपगमे पाकरक्ततादशायां श्यामो घटोऽस्तीति धीरापद्येत, किञ्चैवं वृक्षे न संयोग इति व्यवहारो न प्रमाणं स्यात्, संयोगे वृक्षवृत्तित्वस्य सत्त्वेन तदभावस्याभावात्, वृक्षवृत्तित्ववान् संयोगाभाव इत्यर्थकरणे तु नानुपपत्तिः, यथा वृक्षस्य यत्किञ्चिदवयवे वर्तमानेऽपि कपिसंयोगेऽवयवावयविनोः कथञ्चिद् भेदमवलम्ब्य वृक्षे कपिसंयोग इति व्यवहारो वृक्षनिरूपितवृत्तित्ववान् कपिसंयोग इत्यर्थकः प्रामाण्यमासादयति तथा वृक्षस्य यत्किञ्चिदवयवे वर्तमानेऽपि कपिसंयोगाभावेऽवयवावयविनोः कथञ्चिद् भेदमाश्रित्य वृक्षे न कपिसंयोग इति व्यवहारो वृक्षनिरूपितवृत्तित्ववान् कपिसंयोगाभाव इत्यर्थकः प्रमाणम्, एतद्विषयविचारो नयरहस्ये उपाध्यायैः पल्लवितोऽवलोकनीयो विशेषजिज्ञासुभिः। यदपि एकार्थसमवायादिभिन्नसम्बन्धावच्छिन्नवृत्तित्वे सप्तम्या निरूढलक्षणां स्वीकृत्य जातिनिरूपितप्रमेयत्वादिनिष्ठस्वरूपसम्बन्धावच्छिन्नवृत्तित्वमपि भवत्येकार्थसमवायादिभिन्नसम्बन्धावच्छिन्नं तदभाववती च सत्तेति जातौ न सत्तेत्यत्रान्वयोपपत्तिरिति समाधानं, तदपि न शोभनम्, सामान्यत एकार्थसमवायादिभिन्नसम्बन्धावच्छिन्नजातिनिरूपितवृत्तित्वस्य प्रतिषेधेऽप्येकार्थसमवायादिभिन्नसम्बन्धत्वेन प्रकृते समवायो नोपादातुं शक्यते, यतः समवायसम्बन्धावच्छिन्नजातिनिरूपितवृत्तित्वाप्रसिद्ध्या तदभावाप्रसिद्धिस्तदवस्थैव, समवायातिरिक्तसम्बन्धस्य ग्रहणेऽपि तत्सम्बन्धावच्छिन्नवृत्तित्वाभावस्य सत्तायामुक्तवाक्यान्निर्णयेऽपि जातौ समवायेन सत्ता न वेति प्रश्नानिवृत्तेः, अथ जातौ न सत्तेत्यत्र जातिपदोत्तरसप्तमीविभक्त्यर्थो

निरूपितत्वं समवेतत्वं च, तत्र निरूपितत्वस्य नञर्थाभावेऽन्वयः, अभावस्य च समवेतत्वेऽन्वयः, तस्य च सत्तायामन्वयः, तथा च जातिनिरूपितत्वाभाववत्समवेतत्ववती सत्तेति बोधः, जातिवृत्तित्वाभाववान् सत्ताभाव इत्यर्थाङ्गीकारे च जातिघटयोर्न सत्तेत्यादावन्वयानुपपत्तिः स्यात्, सत्ताभावस्य घटावृत्तित्वेन जातिघटोभयत्वपर्याप्त्यधिकरणवृत्तित्वाभावात्, यदि च जातिघटयोर्न सत्तेत्यादौ जातिघटोभयत्वाधिकरणवृत्तित्वस्यैव सत्ताभावेऽन्वयोऽभिमतः, तस्य च नानुपपत्तिः, जातिघटोभयत्वाधिकरणजातिनिरूपितवृत्तित्वस्य समवायसम्बन्धावच्छिन्नसत्तानिष्ठप्रतियोगिताकाभावे सत्त्वादिति विभाव्यते, तदा पृथिवी-तद्भिन्नयोर्न द्रव्यत्वमित्यस्याप्यापत्तिः, पृथिवी-तद्भिन्नोभयत्वाधिकरणगुणादिनिरूपितवृत्तित्वस्य समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगिताकाभावे सत्त्वात्, न चैवं संयोगेन भवने न घट इति स्यात्, भवनावृत्तिप्राङ्गणादिसंयोगवैशिष्ट्यस्य घटे सत्त्वादिति वाच्यम्, घटान्वयिसंयोगत्वावच्छेदेन भवनावृत्तित्वस्यान्वय एव तथा व्यवहारात्, घटान्वयिसंयोगत्वस्य भवनघटसंयोगेऽपि सत्त्वेन तत्र भवनवृत्तित्वाभावस्याभावेन घटान्वयिसंयोगत्वावच्छेदेन भवनवृत्तित्वाभावान्वयासंभवात्, घटान्वयिसंयोगत्वव्यापकत्वस्य पदानुपस्थितत्वेन प्रकारतया तथाभानस्यासंभवेऽपि तदवच्छिन्नसंयोगस्य संसर्गविधया भानसंभवात्, तथैव साकाङ्क्षत्वात्, जातौ समवायेन न गगनमित्यादौ जातौ न सत्तेत्यत्रेवान्वयबोधो न संभवति, सत्तायां जातिनिरूपितत्वाभाववत्समवेतत्वस्य सत्त्वेऽपि गगने जातिनिरूपितत्वाभाववत्समवेतत्वस्याभावात्, किन्तु तत्र नञ् उभयत्र सम्बध्यते, तथा च जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभाववद् गगनमित्यर्थः, इत्यस्मन्मतपरिष्कार इति चेत्?, न—नञ उभयत्र सम्बन्धेन गच्छत्यपि चैत्रे न गच्छतीति प्रयोगयोग्यतापादनस्य तात्पर्यसत्त्वे इष्टापत्त्या निराससंभवेऽपि जातौ समवायेन न गगनजाती इत्यस्यानुपपत्तेः, गगने जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभावस्य सत्त्वेऽपि जातौ जातिवृत्तित्वाभाववत्समवायवैशिष्ट्यस्यैव सत्त्वेन गगनजात्युभयत्वावच्छेदेन जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभावाभावात्, गगनजात्युभयत्वसामानाधिकरण्येन जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभावान्वयसंभवेऽपि तथाऽन्वयबोधाभ्युपगमे च 'घटे सत्ता-तद्भिन्नजाती न स्तः' इत्यस्यापि प्रसङ्गात्, सत्ता-तद्भिन्नजात्युभयसामानाधिकरण्येन घटवृत्तित्वाभाववत्समवायवैशिष्ट्याभावसम्भवात्, तादृशोभयत्वाधिकरणे सत्तायां घटवृत्तित्वाभाववत्समवायवैशिष्ट्यस्याभावात्, एवं च

ह्रद-पर्वतयोर्न वह्निः शिशिरविशिष्टे पर्वते न वह्निरित्यादिप्रतीत्या व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकाभावस्य विशिष्टधर्मावच्छिन्नाधिकरणकाभावस्य च प्रतियोगिमत्यभ्युपगमेन घटवत्यपि घट-पटौ न स्त इत्यस्य गुणे न गुणकर्मान्यत्वविशिष्टसत्तेत्यस्य चोपपादनेऽपि न निर्वाह इति दिक्। वस्तुतः श्रुतज्ञानस्थलीयक्षयोपशमपाटवात् समनियतपर्यायाणामेकतरभानेऽन्यतरभानमप्यावश्यकम्, इति सिद्धं भावाभवनभानेऽभावभवनभानम्।

ननु भावाभवनमेवाभावभवनं न भवति, यत्र कदापि न घटस्तत्र घटरूपभावस्य विनाशलक्षणाभवनस्याभावेऽपि घटात्यन्ताभावरूपघटाभावस्य सद्भावात्मकभवनादिति चेत्?, कृष्णसर्पवदनादयममृतोद्गारः, येन स्वयमेव तुच्छत्वेऽप्यनुभवेन घटो नश्यति घटो नास्तीत्येवं विभिन्नाकारेण गले गृहीतोऽत्यन्ताभावान्नाशं विशेषयसि, तदिदमाह–**यदि**ति–एवमवतारयन्त्युपाध्यायाः, **यत्** यस्मादेवं, **तत्** तस्मात्, **तथाधर्मके** ज्ञेयत्वादिकस्वभावे, तस्मिन्निति पूरणादभवने इति लभ्यते, **हि** निश्चितम्, **उक्तविकल्पः** तत्त्वान्यत्वलक्षणः, **न विरुध्यते** विनाशलक्षणाभवनस्य तुच्छतयाऽत्यन्ताभावतुल्यत्वेऽपि कादाचित्कत्वेन भावतुल्यत्वात्, विनाशलक्षणभावाभवनस्य भावतुल्यत्वाभ्युपगमे शशविषाणाद्यलीकं यथा नित्यं नास्तीत्येवं निषेधरूपेणैव प्रतीयते न तु शशविषाणमस्तीति विधिरूपेण, तथा घटासत्त्वं नास्तीत्येवं निषेधरूपेणैव घटासत्त्वं प्रतीयेत न तु घटासत्त्वमिदानीं जातमित्यादिविधिरूपेण। अथ घटासत्त्वं नास्तीत्यत्र नास्तीत्येवं निषिध्यमानमस्तित्वं यदि सत्ता तदा तन्निषेधोऽसत्त्वमेव, तथा च घटासत्त्वं नास्तीत्येवमुल्लेखे इष्टापत्तिरेव, घटासत्त्वस्य सत्त्वनिषेधरूपत्वात्, यदि च नास्तीत्यत्र निषिध्यमानमस्तित्वं कालसम्बन्धरूपं, तदा ध्वंसलक्षणघटासत्त्वे कालसम्बन्धस्य सत्त्वेन तदभावस्याभावान्न घटासत्त्वं नास्तीत्युल्लेख इति चेत्?, तदाऽवच्छिन्नकालसम्बन्धस्य पूर्वकालासत्त्वे सत्युत्तरकालसत्त्वरूपस्य घटासत्त्वे भावात् प्रागावेदितमुत्पादादिमत्त्वमायातमिति घट्टकुट्यां प्रभातम्, यदि च नाशस्य काल्पनिकत्वं, तदुत्पादादीनां च काल्पनिकत्वम्, आश्रयस्य काल्पनिकत्वे तदाधेयस्य काल्पनिकत्वौचित्यादिति न वास्तविकोत्पादादिमत्त्वं, तदा काल्पनिकनाशोत्पादादिघटितं क्षणिकत्वमपि काल्पनिकमिति सौगतमतमेवोच्छिन्नं, तदिष्टस्य क्षणिकत्वस्य वास्तविकत्वाभावात्॥ ३६ ॥ २७३ ॥

दोषान्तमुपदर्शयति—

**तदेव न भवत्येतद्, विरुद्धमिव लक्ष्यते ।**
**तदेव वस्तुसंस्पर्शाद्, भवनप्रतिषेधतः ॥ ३७ ॥ २७४ ॥**

**तदेव न भवतीति, एतत्** तदेव न भवतीत्येवंस्वरूपं यत् परोक्तम्, **तत् विरुद्धमिव लक्ष्यते** वस्तुतत्त्वापेक्षया व्याहतमिव भाति, कथमित्याकाङ्क्षायामाह—**तदेवेति**—तदेवेत्येवंस्वरूपवचनेनेत्यर्थः, **वस्तुसंस्पर्शात्** अविकृतवस्तुनः परामर्शात्, अविकृतवस्तु च भवनरूपमिति, **भवनप्रतिषेधतः** न भवतीत्यनेन भवननिषेधात्, भवनं न भवनमिति प्रसङ्गात्. एवं च निषेधमुखेनैव विधिस्वरूपोद्गिरणे सत एव द्वितीयक्षणेऽसत्त्वं व्यवस्थापितं स्यात्, तथा च यदसद् द्वितीयक्षणे भवेत् तदेव पूर्वक्षणेऽपीति तदाऽप्यसदेवेति शून्यतत्त्वमापद्येतेति तदेवेत्यनेन सांवृतमेव परामृश्यते, न भवतीत्यनेन तदेव निषिध्यते इति चेत् ? तर्हि पारमार्थिकवस्तुतत्त्वस्य तदाऽपरामृष्टस्य न भवतीत्यनेनाप्रतिषेधाद् द्वितीयक्षणेऽपि तादवस्थ्यमिति वृथैव क्षणिकताप्रसाधनाऽऽयासः, सांवृतस्य प्रथमक्षणेऽपि वस्तुगत्याऽसत्त्वादेव । ननु यदुत्पद्यते तन्नश्यत्येवेति नियमाद् द्वितीयक्षणे उत्पन्नस्य वस्तुनाशस्याग्रिमक्षणे नाशेऽपि तत्प्रतियोगिनो वस्तुनो नोन्मज्जनप्रसङ्गः, तन्नाशनाशादिपरम्परानधिकरणतत्प्रागभावानधिकरणक्षणत्वस्यैव तदधिकरणत्वव्याप्यत्वात् तृतीयादिक्षणानां तत्प्रागभावानधिकरणत्वेऽपि तन्नाशाद्यनधिकरणत्वाभावादिति चेत् ?, मैवम्—लाघवेन तदभावानधिकरणत्वेन सममेव तदधिकरणत्वस्य व्याप्तेः कल्पनात्, तन्नाशनाशादेस्तत्प्रतियोगिकत्वाभावेन तदभावानात्मकत्वेन तदधिकरणस्यापि तदभावानधिकरणत्ववत्त्वेन तद्वत्त्वापत्तेर्दुर्वारत्वात्, सभागसन्ततौ तन्नाशक्षणे तज्जातीयस्वीकारेण बीजाङ्कुरवदुन्मज्जनापत्तेर्दुर्निवारत्वात्, तन्नाशादिपरम्पराया दुर्ग्रहत्वेन तद्घटितस्य तन्नाशादिपरम्परानधिकरणतत्प्रागभावानधिकरणक्षणवृत्तित्वलक्षणस्य क्षणिकत्वस्य दुर्ग्रहत्वादिति ॥ ३७ ॥ २७४ ॥

"सतोऽसत्त्वे०" इत्यादिमूलमुपसंहरति—

**सतोऽसत्त्वं यतश्चैवं, सर्वथा नोपपद्यते ।**
**नाभावो भावमेतीह, ततश्चैतद् व्यवस्थितम् ॥ ३८ ॥ २७५ ॥**

**सत इति, यतश्च** यस्मात् कारणात् पुनः, **एवम्** उक्तेन प्रकारेण, **सतोऽसत्त्वं** भावस्याभवनम्, **सर्वथा** सर्वैः प्रकारैर्विचार्यमाणं सत्, **नोपपद्यते**

नोपपत्तिपद्धतिमेति, भावाभवनाभवने भावोन्मज्जनापत्तेः, **ततश्चेह 'भावो नाभावमेति'** इति यदुक्तं प्राग् **एतत्, व्यवस्थितं** प्रतिष्ठितमुपपन्नमिति यावत्, भावविच्छेदेनाभावोत्पत्तेरनवलोकनात्, भावाविच्छेदे च द्रव्यांशान्वयादिति । अत्रेत्थं विशेषं शिष्यबुद्धिवैशद्यायोपाध्याया उपदर्शितवन्तः, तथाहि—

नैयायिकाः-नन्वेवं वराकस्य सौगतस्य तूष्णीम्भावेऽपि न वयमिदं मृषाभाषितं सहामहे, भावभिन्नस्यैवाभावस्य घटमानत्वात्, तथाहि—अभावो भावातिरिक्त एव, एवकारेण भावात्मकाधिकरणस्वरूपत्वव्यवच्छेदः, अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वेऽपि भावातिरिक्तत्वं न व्याहन्यते, अधिकरणस्याप्रतियोगिकत्वात्, अभावस्य च सप्रतियोगिकतयाऽनुभूयमानत्वेन भावात्मकाधिकरणस्वरूपत्वायोगात्, अन्यत्रापि विरुद्धधर्माध्यासस्यैव भेदसाधकतया तस्य सप्रतियोगिकत्वाप्रतियोगिकत्वलक्षणविरुद्धधर्माध्यासस्यात्रापि सद्भावात् । अथ सप्रतियोगिकत्वं प्रतियोग्यविषयकबुद्ध्यविषयत्वं, प्रतियोगिविषयकबुद्धिविषयत्वं त्वप्रतियोगिकस्याप्यधिकरणस्य प्रतियोगिविषयकस्वविषयकसमूहालम्बनज्ञानमादाय सम्भवतीत्यतो निषेधद्वयगर्भता, निरुक्तलक्षणं सप्रतियोगिकत्वं नैयायिकमतेऽपि नाभावस्य, इदन्त्वादिनाऽप्यभावप्रत्यक्षात्, किन्त्वभावत्वस्य, तस्य चाधिकरणस्वरूपाभाववादिमतेऽपि सप्रतियोगिकत्वमेव, घटशून्याधिकरणे घटाभावत्वस्य घटवद्भिन्नत्वरूपतया तज्ज्ञानस्य विशिष्टवैशिष्ट्यावगाहिबुद्धिरूपत्वेन विशेषणतावच्छेदकीभूतघटात्मकप्रतियोगिविषयकत्वस्याऽऽवश्यकत्वात्, इति चेत्?, न—घटवद्भिन्नत्वस्य तादात्म्यसम्बन्धावच्छिन्नघटवत्त्वावच्छिन्नप्रतियोगिताकाभावस्यान्योन्याभावविशेषस्याप्यधिकरणस्वरूपानतिरेकेणाप्रतियोगिकत्वात्, वस्तुतः प्रतियोग्यवृत्तिरनुयोग्यवृत्तिर्यो धर्मस्तज्ज्ञानस्य, प्रतियोगिवृत्तित्वेनाज्ञातधर्मग्रहस्य वा भेदग्रहहेतुत्वेन, तस्य चात्र भेदरूपस्यैव सम्भवेनान्योन्याश्रयाच्च । न चाभावव्यवहारार्थमेव प्रतियोगिज्ञानापेक्षा, अभावस्त्वप्रतियोगिक एव, तथा च न सप्रतियोगिकत्वाप्रतियोगिकत्वलक्षणविरुद्धधर्माध्यास इति वाच्यम्, व्यवहर्तव्यज्ञाने सति सत्यां चेच्छायां व्यवहारस्योदयेन तत्राधिकस्यानपेक्षणात्, हस्त-वितस्त्याद्यवच्छेद्यत्वेन दीर्घत्वग्रह एव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन तारत्वादिग्रह एव चावध्यपेक्षणात्; न चाभाववृत्त्यभावस्याधिकरणानतिरेकेण सर्वमिदं प्रतिबन्दिकवलितमिति वाच्यम्, अभावसिद्ध्युत्तरमुपस्थितायास्तस्याः फलमुखगौरववददोषत्वात्; न चाभावग्रहसामर्थ्यैव तदुपपत्तेः किमन्तर्गडुनाऽभावेनेति वाच्यम्, 'नास्ति' इति धीविषयस्य तस्यान्तर्गडुत्वाभावात्, किञ्च, अभावप्रत्यक्षस्य विशिष्ट-

वैशिष्ट्यावगाहिप्रत्यक्षरूपत्वेन मम विशेषणतावच्छेदकप्रकारकनिश्चयविधयैवप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्य हेतुत्वं, विशिष्टवैशिष्ट्यावगाह्यनुभवत्वावच्छिन्नं प्रत्येव विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन कारणत्वस्य दण्डो रक्तो नवेति संशयानन्तरं रक्तदण्डवान् पुरुष इति निश्चयानुत्पत्त्यनुरोधेन क्लृप्ततया तत एव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानं विनाऽभावप्रत्यक्षासम्भवेन स्वातन्त्र्येणाभावे प्रत्यक्षत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानत्वेन कारणत्वं नाङ्गीक्रियते, तव तु अभावव्यवहारे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानत्वेन कारणत्वं स्वातन्त्र्येण कल्पनीयमिति गौरवम् । किञ्चाधिकरणस्वरूपत्वेऽभावस्यापि कारणानामननुगतत्वात् कथमनुगताभावव्यवहारः ?, मम तु समवाय-स्वाश्रयसमवायान्यतरसम्बन्धावच्छिन्नसत्तानिष्ठप्रतियोगिताकात्यन्ताभाव एवानुगताभावत्वं, तस्य घटाभावपटाभावादिवृत्तित्वमिव स्ववृत्तित्वमपीति सत्तात्यन्ताभावेऽप्यभावव्यवहारोपपत्तिः । न चातिरिक्ताभावस्याधिकरणेन समं सम्बन्धानुपपत्तिः, सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यत्वलक्षणस्वरूपसम्बन्धस्याधिकरणा-ऽभावयोः सम्बन्धतया स्वीकारात् । नन्वेवं घटाभावभ्रमानुपपत्तिः, घटवत्यपि घटाभावस्य वैशिष्ट्यावगाहिभ्रमात्मकप्रतीतेरुत्पादेन सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतियोग्यतायाः फलैकगम्यायास्तत्रापि सत्त्वेन तत्र घटाभावज्ञानस्य घटाभाववन्निष्ठविशेष्यतानिरूपितघटाभावनिष्ठप्रकारताकज्ञानत्वलक्षणघटाभावप्रमात्वाऽऽक्रान्तत्वात् । न च सम्बन्धान्तरमन्तरेण विशिष्टप्रमाजननयोग्यतासम्बन्धः, घटवति घटाभावप्रतीतेः प्रमात्वाभावेन नोक्तयोग्यतेति वाच्यं, सम्बन्धसत्त्वे सम्बन्धिसत्ताया आवश्यकत्वेन घटवत्यपि घटाभावज्ञानस्य प्रमात्वात्, अन्यथा निरुक्तसम्बन्धाभावात् प्रमाभावः प्रमाभावाच्च सम्बन्धाभाव इत्येवमन्योन्याश्रयात्, योग्यतायाः प्रत्ययाविषयत्वेन विभागाभावाच्च । अथ योग्यतालिङ्गितमभावाधिकरणयोः स्वरूपमेव सम्बन्धः, भ्रम-प्रमयोश्च वस्तुगत्या घटतदभाववद्वृत्त्यवगाहित्वेनार्थाद् घटाभावभ्रमस्य घटवद्वृत्त्यवगाहित्वेन घटाभावप्रमायाश्च घटाभाववद्वृत्त्यवगाहित्वेनैव विभाग इति चेत् ?, न-अतीन्द्रियाभावस्वरूपसम्बन्धेऽव्याप्तेः; तस्य विशिष्टज्ञानाभावेन तज्जननयोग्यतालिङ्गितस्वरूपाभावादिति चेत् ?, न-योग्यतावच्छेदकावच्छिन्नस्वरूपस्यैव सम्बन्धत्वात्, योग्यतावच्छेदकं च क्वचित् प्रतियोगिदेशान्यदेशत्वं, यथा-घटाद्यत्यन्ताभावस्य, घटाद्यत्यन्ताभावस्य प्रतियोगी घटादिः, तदधिकरण-

भूतलादिदेशान्यदेशत्वं घटादिरहितदेशे वर्तत इति घटादिशून्यभूतलादिस्वरूपमेव घटाद्यत्यन्ताभावसम्बन्धः; क्वचित् प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वं योग्यताऽवच्छेदकत्वं, यथा–ध्वंसप्रागभावयोः, घटादिध्वंस-प्रागभावयोः प्रतियोगी घटादिस्तद्देशत्वं तदधिकरणकपालादौ वर्तते, घटादिकालान्यकालत्वमपि तत्र समस्तीति तथाभूतं कपालादिस्वरूपमेव घटादिध्वंस-प्रागभावयोः सम्बन्धः; क्वचित् प्रतियोगितावच्छेदकात्यन्ताभाववत्त्वं योग्यतावच्छेदकम्, यथा–अन्योन्याभावस्य, घटाद्यन्योन्याभावस्य घटादिभेदस्वरूपस्य प्रतियोगितावच्छेदकं घटत्वादि, तदत्यन्ताभाववत्त्वं पटादौ समस्तीति पटादिस्वरूपमेव घटाद्यन्योन्याभावसम्बन्धः; न च प्रतियोगिदेशान्यदेशत्वं प्रतियोगिदेशभेदाधिकरणदेशत्वं, प्रतियोगिकालान्यकालत्वं प्रतियोगिकालभेदाधिकरणकालवृत्तित्वं प्रतियोगितावच्छेदकात्यन्ताभाववत्त्वं प्रतियोगितावच्छेदकात्यन्ताभावाधिकरणत्वमित्येवं सर्वत्राधिकरणत्वं प्रविष्टं, तच्च केन सम्बन्धेनेति सम्बन्धानुयोगः स्यादेवेति वाच्यम्, तत्रापि निरुक्तयोग्यतावच्छेदकावच्छिन्नस्वरूपस्यैव सम्बन्धत्वात्; न चैवमनवस्था दोषतामास्कन्दति, अनवस्थितस्यैव वस्तुनः प्रामाणिकत्वात्, प्रत्ययानवस्था तु नास्त्येव, उक्तस्वरूपयोग्यतावच्छेदकवत्त्वस्य स्वरूपपरिचायकत्वेन संसर्गतानवच्छेदकत्वात् तत्समानाधिकरणतत्तत्स्वरूपव्यक्तिनिष्ठतद्व्यक्तित्वस्यैव संसर्गतावच्छेदकत्वात्, एवं च तादृशस्वरूपसद्भावे यत्राभावधीस्तत्र प्रमात्वं तादृशस्वरूपाभावे यत्राभावधीस्तत्र भ्रमत्वमित्येवं प्रमा-भ्रमविभागे न किञ्चिदनुपपन्नम्। वस्तुतः स्वसम्बद्धप्रकारावच्छेदेन यत्र ज्ञाने धर्मिसम्बन्धः, स्वसम्बद्धधर्म्यवच्छेदेन वा प्रकारसम्बन्धः, तत्र प्रमात्वं, यत्र तु स्वासम्बद्धप्रकारावच्छेदेन धर्मिसम्बन्धः स्वासंबद्धधर्म्यवच्छेदेन वा प्रकारसम्बन्धः, तत्र भ्रमत्वम्, अत एव विशिष्टज्ञाने प्रकार-धर्मिणोः संयोगादिवज्ज्ञानस्यापि परस्परसम्बन्धतया भासमानत्वात् 'इदं रजतम्' इति भ्रमे रजतत्वस्य शुक्तौ वैज्ञानिकसम्बन्धेन प्रमात्वं समवायेन च भ्रमत्वमिति दिक्। अत्राहुरुपाध्यायाः—

नैयायिकाऽस्मिन् नयवाददीपे, पतन् पतङ्गस्य दशां नु मा गाः।
बौद्धस्य बुद्धिव्ययजं कुकीर्तिविसृत्वरं कज्जलमस्य पश्य ॥ १ ॥

तथाहि–अभावस्य लाघवात् क्लृप्ताधिकरणस्वभावत्वे सिद्धे तत्र सप्रतियोगिकत्वं कल्प्यमानं तत्राभाववृत्त्यभावेऽन्यप्रतियोगिकत्वमिव तत्काले तद्बुद्धिजनितव्यवहारविषयत्वादिरूपं न बाधकम्; न चाधिकरणानामानन्त्यादभावस्य तत्स्वरूपत्वेऽननुगमो बाधकः, तथा सति घटाद्यभावाभावादेरनन्तघटादिस्वरूपत्वेऽननुगमा-

लाघवादितिरिक्तत्वव्यवस्थितौ तस्य प्रथमाभावप्रतियोग्यात्मकत्वविलयेऽप्रसिद्धान्तात्, "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्युदयनाचार्यवचनादभावाभावस्य प्रतियोग्यात्मकत्वमिति तव सिद्धान्तात्, अभावाभावः प्रतियोग्येवेत्यस्य तत्र तदभावाभावत्वं न त्वतिरिक्ताभाव इत्यत्र पर्यवसानं, तथा चैकमेव तदभावाभावत्वम्, धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायश्चात्रोपोद्बलक इति चेत्? घटादौ घटाभावाभावत्वादिकं किमिति वाच्यम्, घटत्वादिकमिति चेत्? कथं घटत्वादेर्घटाद्यभावाभावत्वरूपत्वम्, घटत्वादिरूपेण घटादिमत्ताप्रतीतौ घटाद्यभावाभावव्यवहारादिति चेत्? कथं तर्हि तदसाधारणधर्मान्तराणामपि न घटाद्यभावाभावत्वरूपत्वम्, किञ्च घटत्वादेर्घटाद्यभावाभावत्वरूपत्वे घटाद्यभावप्रतियोगिकत्वाद् घटाद्यभावरूपप्रतियोगिज्ञानं विना घटत्वादिज्ञानं न स्यात्, अभावत्वप्रत्यक्षे योग्यप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानत्वेन हेतुत्वस्यावश्यं स्वीकरणीयत्वात्, तथा हेतुहेतुमद्भावानुपगमे प्रतियोगितावच्छेदकधर्मात्मकविशेषणतावच्छेदकधर्मप्रकारकज्ञानाभावे तद्विशिष्टवैशिष्ट्यावगाह्यभावत्वप्रत्यक्षासम्भवेऽभावत्वनिर्विकल्पकप्रत्यक्षप्रसङ्गात्, यदि च निर्विकल्पकीयविषयतया प्रत्यक्षेऽभावत्वभेदस्य, घटत्वादिनाऽभावस्य प्रत्यक्षस्याभावत्वांशे निर्विकल्पकस्य स्वीकारे विशेष्यतानवच्छिन्ननिर्विकल्पकीयविषयतया प्रत्यक्षेऽभावत्वभेदस्य वा कारणत्वादभावत्वनिर्विकल्पकं वार्यते तदा घटत्वादेरपि निर्विकल्पकाप्रसङ्गात्, घटत्वादेर्घटाभावाभावत्वरूपतयाऽभावत्वभेदस्याभावेन निर्विकल्पकीयविषयतया विशेष्यत्वानवच्छिन्ननिर्विकल्पकीयविषयतया वा प्रत्यक्षस्योत्पत्त्यसम्भवात्, भावावृत्तिविशेष्यत्वानवच्छिन्ननिर्विकल्पकीयविषतया भावावृत्तिविशेष्यत्वानवच्छिन्ननिर्विकल्पकीयविषयतया वा प्रत्यक्षे अभावत्वभेदस्य कारणत्वे घटत्वादेरभावत्वस्वरूपत्ववद् भावत्वस्यापि भावेन तद्वृत्तिनिर्विकल्पकीयविषयताभावावृत्तिनिर्विकल्पकीयविषयता न भवतीति घटत्वादौ निर्विकल्पकीयविषयतया प्रत्यक्षे अभावत्वभेदस्याकारणत्वेन तत्समर्थनं तु न सम्भवति, भावावृत्तिनिर्विकल्पकीयविषयताया अभावस्य निर्विकल्पकाभावेनाप्रसिद्ध्या कार्यतावच्छेदकसंसर्गत्वासम्भवात्; अस्तु तर्हि अभावाभावोऽतिरिक्त एव तृतीयाभावादेः प्रथमाभावादिरूपत्वेनानवस्थापरिहारादिति चेत्?, तर्ह्यनन्ताभावानां तत्राभावत्वस्य च कल्पनामपेक्ष्य क्लृप्ताधिकरणेष्वेव वरमेकोऽभावत्वपरिणामोऽनुभूयमानः श्रद्धीयताम्, यद्यधिकरणस्वरूपग्रहणमन्तरेणैव अयमभावोऽयमभाव इत्येवं स्वातन्त्र्येण कस्यापि प्रमातुरभावानुभवो

भवेत् स्वीक्रियेताप्यभावस्यातिरिक्तत्वम्, न त्वेवमभावानुभवो विद्यते, किन्त्वधिकरणस्वरूपमेव तत्तदारोपतत्तत्प्रतियोगिग्रहादिमहिम्ना तत्तदभावत्वेनानुभूयत इति; अथ तदभावलौकिकप्रत्यक्षे तज्ज्ञानस्य हेतुत्वान्न प्रतियोगिग्रहणाधिकरणग्रहणमन्तरेण स्वातन्त्र्येणाभावभानम्; न च प्रमेयत्वस्य केवलान्वयित्वेन तदत्यन्ताभावस्याप्रसिद्ध्या घटाद्यत्यन्ताभाव एव स्वप्रतियोगिघटादिग्रहणमन्तरेण प्रमेयत्वप्रतियोगिकत्वेन प्रमेयत्वं नास्तीत्यत्र भासते, सर्वस्य वस्तुनः प्रमेयत्वेन प्रमेयभेदस्याप्रसिद्ध्या घटपटादिभेद एव प्रमेयप्रतियोगिकत्वेन प्रमेयो नेत्यत्र भासत इति स्वप्रतियोगिनमन्तरेणापि स्वातन्त्र्येण तदभावभानं भवत्येवेति वाच्यम्, प्रमेयत्वं नास्तीत्यत्र संयोगसम्बन्धावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगिताकाभावस्यैव स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेन प्रमेयो नेत्यत्र तत्तत्प्रमेयभेदस्यैव प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वेन भानमित्यन्यप्रतियोगिकत्वेनान्याभावभानस्यानभ्युपगमात्; न च अन्यप्रतियोगिकत्वेनान्याभावभानस्यानभ्युपगमेऽपि तद्घटाज्ञानेऽपि घटान्तरज्ञानाद् घटाभावप्रत्यक्षे व्यभिचारः, घटसामान्यस्य तद्घटोऽपि प्रतियोगीति तद्ग्रहणमन्तरेणापि तत्प्रतियोगिकस्य घटाभावस्य प्रत्यक्षोदयात्, एवं समनियताभावानामैक्ये एकधर्मावच्छिन्नाज्ञानेऽप्यन्यधर्मावच्छिन्नज्ञाने तदवच्छिन्नाभावप्रत्यक्षे व्यभिचारः, तदवच्छिन्नाभावस्य स्वसमनियताभावान्तरप्रतियोग्यपि प्रतियोगी, तदज्ञानेऽपि तत्प्रत्यक्षोदयादिति वाच्यं, तदभावप्रत्यक्षे तदभावाभावज्ञानत्वेन हेतुत्वान्न दोष इति चेत्?, न—द्रव्यत्वादिना तदभावाभावज्ञानेऽपि तदभावाप्रत्यक्षात्, तदभावप्रतियोगितावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वे तु कम्बुग्रीवादिमत्त्वस्य गुरुधर्मतया प्रतियोगितानवच्छेदकत्वेन कम्बुग्रीवादिमान् नेति प्रत्यक्षानापत्तेः, कम्बुग्रीवादिमत्त्वप्रकारकज्ञानस्य निरुक्तकारणतावच्छेदकधर्मानाक्रान्तत्वेनाकारणत्वात्, घटत्वप्रकारकज्ञानस्य निरुक्तकारणतावच्छेदकधर्माक्रान्तत्वेऽपि तदभावे जायमानस्य कम्बुग्रीवादिमान् नेत्याकारककम्बुग्रीवादिमदभावप्रत्यक्षस्य तज्जन्यत्वासम्भवात्; एवं तमस आलोकाभावरूपतयैव परेणाभ्युपगततया तत्प्रतियोगितावच्छेदकीभूतालोकत्वप्रकारकग्रहमन्तरेण तत्प्रत्यक्षस्योत्पादेन तत्र व्यभिचारात्, अभावो घटीयो न भवतीत्येवमभावे प्रतियोगितासम्बन्धेन घटस्य बाधे सति प्रतियोगितासम्बन्धेन घटप्रकारकाभावविशेष्यकस्य घटो नेति ज्ञानस्य प्रतिबन्धकाभावरूपकारणाभावादुत्पत्त्यसम्भवेन 'न' इत्याकारकाभावमात्रविषयकप्रत्यक्षापत्तेश्च, बदरादौ कुण्डसंयोगादिधीकाले

बदरे न कुण्डमित्याकारककुण्डाद्यभावधीवदभावे प्रतियोगितासम्बन्धावच्छिन्न-प्रतियोगितया घटवैशिष्ट्यधियः प्रतियोगितासम्बन्धेन घटो नास्तीत्याकारिकायाः कालेऽपि प्रतियोगितासामान्येन तदभावधीसम्भवात् ।

अपि च, एतादृशानन्तप्रतियोगिज्ञानानामिन्द्रियसम्बन्ध-विशेषणता-रूपाऽऽलोकादीनां पृथगनन्तहेतुहेतुमद्भावकल्पनापेक्षया लाघवादधिकरणस्यैव घटाभाववत्त्वेन ग्रहे क्लृप्तविशिष्टवैशिष्ट्यबोधस्थलीयमर्यादया निर्वाहः किं न कल्प्यते ?; अधिकरणस्वरूपाभावमात्रग्रहे इष्टापत्तेः, अधिकरणस्वरूपमात्रस्याप्रतियोगिकत्वेन तद्बोधस्यापि विशिष्टवैशिष्ट्यबोधानात्मकतया तत्र विशेषणतावच्छेदकप्रकारकज्ञान-विधया कस्याप्यकारणत्वात्, अभावत्वस्य च सप्रतियोगिकत्वेन प्रतियोगिग्रहं विनाऽग्रहात्, 'भावाभावरूपं जगत्' इत्युपदेशसहकृतेन्द्रियेण पद्मरागत्ववत् तद्ग्रहेऽपीष्टापत्तेर्वा । अधिकरणस्वरूपाभावाभ्युपगमे आधाराधेयभावानुपपत्तिरिति चेत्?, न–धर्मिताख्यस्याभेदस्याधारतानियामकत्वात्; कीदृशमधिकरणं घटाभाव इति चेत्?, यादृशं तव घटाभावाश्रयः, मम भूतले घटानयनदशायां घटाभावसम्बन्धस्य घटशून्यकालीनतद्भूतलस्वरूपस्यापगमाद् घटो नास्तीति न व्यवहारः, तव त्वतिरिक्तस्य घटाभावस्य पूर्वोत्तरकालयोरभावाद् भूतलस्वरूपस्य तादृशस्यैव सत्त्वाद् घटानयनदशायामपि कुतश्चित् कारणाज्जायमानस्य घटो नास्तीति व्यवहारस्य प्रामाण्यापत्तिरिति चेत्! न-तदा घटानयनजन्यघटसंयोगपर्यायेण घटाभावपर्याय-विगमात् 'इदानीं घटाभावो जातः' इति सार्वजनीनानुभवात्; न चैवं भूतलादतिरेकः, द्रव्य-पर्यायोभयात्मके वस्तुनि पर्यायनयादेशाद् भूतलद्रव्यस्य घटसंयोगपर्याय-घटाभावपर्याययोरतिरेकेऽपि द्रव्यनयादेशाद् द्रव्याभिन्नत्वस्यैव पर्यायेषु सद्भावात् तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादनतिरेकात्, द्रव्यात् कथञ्चिदभिन्नस्य पर्यायस्य विगमे तद्रूपतया द्रव्यविगमस्यैक्यप्रत्यभिज्ञानाप्रतिपन्थित्वात्, श्याम उत्पन्नो रक्तो विनष्ट इति वैधर्म्यज्ञानकालेऽपि स एवायं घट इति प्रत्यभिज्ञायाः सर्वसिद्धत्वात् । एतेन 'एवं दुःखध्वंसरूपमोक्षस्यात्मानतिरेकेणासाध्यत्वादपुरुषार्थत्वं स्यात्' इत्यादि बाधकं निरस्तम्, आत्मनोऽपि पर्यायतया साध्यत्वात्, परस्य तु घटानयनदशायां भूतले घटाभावव्यवहारप्रामाण्यापत्तिः, भूतलस्वरूपस्य सम्बन्धस्य सत्त्वात्, विशिष्टप्रतीतिजननयोग्यस्वरूपस्यैव सम्बन्धत्वेन तदभावभ्रमदर्शनेन तस्य तदा न सम्बन्धत्वमित्यस्य वक्तुमशक्यत्वात्; न चाप्रामाण्यज्ञानानास्कन्दितघटवत्ताज्ञानलक्षणबाधज्ञानलक्षणप्रतिबन्धकसत्त्वाद् घटानयनदशायां घटाभाव-

ज्ञानं नोत्पत्तुमर्हतीति कुतस्तस्य प्रामाण्यं ? कुतश्चित् कारणाद् घटज्ञानाभावेऽपि घटवति घटाभावप्रकारकत्वमेव तज्ज्ञानस्य न तु घटाभाववति घटाभावप्रकारकत्वं संसर्गप्रतीतेः प्रविष्टायाः प्रमात्मिकाया अभावादिति तदानीं बाधितविषयस्य घटाभावव्यवहारस्य न प्रामाण्यापत्तिरिति वाच्यम्, तत्र बाधज्ञानत्वेनाभिमतस्य घटवत्त्वज्ञानस्येदं ज्ञानं घटाभाववति घटप्रकारताकमित्याकारकाप्रामाण्यज्ञानास्कन्दितस्याप्रतिबन्धकत्वेन घटाभावज्ञानस्योत्पत्तेः सम्भवात्, अप्रामाण्यज्ञानास्कन्दितस्य बाधज्ञानस्याबाधकत्वेन बाधितविषयकत्वाभावेन घटाभाववति घटाभावप्रकारकत्वेन प्रामाण्यापत्तेरपि संभवात्; न च प्रमात्मकमेवाप्रामाण्यज्ञानं बाधज्ञाने उत्तेजकं घटज्ञानं च प्रमात्मकमिति तत्र यदप्रामाण्यज्ञानं तन्नाप्रामाण्यवत्यप्रामाण्यप्रकारकमिति न प्रमात्मकमिति तादृशाप्रामाण्यज्ञानसत्त्वेऽपि प्रमात्मकाप्रामाण्यज्ञानानास्कन्दितघटवत्ताज्ञानरूपबाधज्ञानेन प्रतिबन्धान्न तदानीं घटाभावज्ञानोत्पत्तिसम्भवः, उत्पन्नस्य वा बाधितविषयकत्वान्न प्रामाण्यापत्तिरिति वाच्यम्, प्रतियोगिदेशान्यदेशत्वादियोग्यतावच्छेदकोपलक्षिताधिकरणस्वरूपात्मकतद्व्यक्तिनिष्ठानवच्छिन्नसांसर्गिकविषयताप्रामाण्यस्य बाधज्ञानाद्युत्तेजकाप्रामाण्यज्ञानादौ निवेशे महागौरवात्; न च तदा भूतले घटाभावसम्बन्धसत्त्वेऽपि तत्सम्बन्धावच्छिन्नघटाभावत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणताया अभावात् तदभाववद्विशेषकत्वावच्छिन्नतत्प्रकारकत्वलक्षणमप्रामाण्यमक्षतमिति वाच्यं, धर्मिधर्मिस्वरूपापरावृत्ताधारताया अप्यपरावृत्तेः, तादृशाधारताद्यभावकल्पनापेक्षया तदभावविगमकल्पनस्यैव न्याय्यत्वात् ।

अथाभावस्याधिकरणानतिरेके मृद्द्रव्यस्यैव घटप्रागभावत्वात् तदनिवृत्तौ घटानुत्पत्तिप्रसङ्गः, कपालादेरेव घटनाशत्वेन तन्नाशे प्रतियोग्युन्मज्जनप्रसङ्ग इति चेत् ? न-प्रागभाव-प्रध्वंसयोर्द्रव्यपर्यायोभयरूपत्वेनानुपपत्त्यभावात्, तथाहि-व्यवहारनयादेशाद् घटपूर्ववर्तित्वविशिष्टं स्वद्रव्यमेव घटप्रागभावः, घटोत्तरकालवृत्तित्वविशिष्टं स्वद्रव्यमेव घटध्वंसः, पूर्वकालवृत्तित्वादिकं च परिचायकं, न तु विशेषणम्, अन्यथा पूर्वकालवृत्तित्वस्य प्रागभावाधिकरणकालवृत्तित्वरूपतया प्रागभावस्वरूपनिरूपणे प्रागभावापेक्षायामुत्तरकालवृत्तित्वस्य ध्वंसाधिकरणकालवृत्तित्वरूपतया ध्वंसस्वरूपप्ररूपणे ध्वंसापेक्षायाश्चात्माश्रयात्, विशिष्ट-शुद्धयोर्भेदस्याभ्युपगमेन स्वद्रव्यस्य घटकाले घटोत्तरकाले च सत्त्वेऽपि घटपूर्वकालवृत्तित्वविशिष्टस्वद्रव्यस्याभावान्न तदा घटप्रागभावव्यवहारः प्रसङ्गः, एवं स्वद्रव्यस्य

घटकाले घटपूर्वकाले च सत्त्वेऽपि घटोत्तरत्वाएवृत्तित्वविशिष्टस्य द्रव्यस्य तदानीमभावान्न घटध्वंसव्यवहारप्रसङ्गः, ऋजुसूत्रनयादेशाच्च प्रतियोगिप्राच्यक्षण एव प्रागभावः, उपादेयक्षण एवोपादानध्वंसः, न च तत्पूर्वोत्तरक्षणयोर्घटोन्मज्जनप्रसङ्गः, तत्सन्तानोपमर्दनस्यैव तदुन्मज्जननियामकत्वादिति व्यक्तं स्याद्वादरत्नाकरे ।

अथ मुद्गरपाताद् विनष्टो घट इति प्रतीत्याऽतिरिक्तनाशानुभवः, नहि भूतलं तद्बुद्धिर्वा मुद्गरपातजन्या, मुद्गरपातं विनाऽपि भूतल-तद्बुद्ध्योः सत्त्वादिति चेत्? न-मुद्गरपातेन कपालकदम्बकोत्पादरूपस्यैव विभागजातस्य घटध्वंसस्य स्वीकारात्, घटध्वंसोत्तरं संयोगविशेषेण कपालोत्पत्तिस्वीकारस्य कल्पनामात्रत्वात्, मुद्गरपातजन्यविलक्षणपरिणामवान् घट इति मुद्गरपाताद् विनष्टो घट इति वाक्यार्थत्वात्। एतेनेदं व्याख्यातं—

"दृष्टस्तावदयं घटोऽत्र निपतन् दृष्टस्तथा मुद्गरो,
दृष्टा कर्परसंहतिः परमतोऽभावो न दृष्टोऽपरः ।
तेनाभाव इति श्रुतिः, क्व निहिता ? किं वाऽत्र तत्कारणं ?,
स्वाधीना कलशस्य केवलमियं दृष्टा कपालावली" ॥ १ ॥ इति

अथ कालविशेषविशिष्टाधिकरणेनैवाभावान्यथासिद्धाववयव्यादेरप्रसिद्धिप्रसङ्ग इति चेत्? न-कालविशेषस्य द्रव्यपर्यायोभयत्वरूपत्वेन तस्यैवाभावावयव्यादिरूपत्वस्येष्टत्वात्, शबलवस्त्वभ्युपगमे दोषाभावादिति दिक् ।

प्राभाकरास्तु-"घटवद्भूतलबुद्धिभिन्ना भूतलबुद्धिर्घटाभावः; न च घटवति घटाज्ञानदशायां तदभावापत्तिः, अन्याभावानभ्युपगमात्, तद्व्यवहारस्य च प्रतियोग्यधिकरणज्ञाने यावत्प्रतियोग्युपलम्भकसत्त्वे चेष्टत्वात्; न च बाधावतारदशायां तदापत्तिः, प्रतियोगिमत्त्वज्ञानस्यैव बाधकत्वेन तदानीमभावव्यवहाराभावात्; न च बाधितव्यवहारस्य संवादापत्तिः, बाधितत्वेनैवासंवादात्; न च प्रतियोगिमत्तानवगाह्यधिकरणबुद्धि-प्रतियोगिमत्तावगाह्यधिकरणबुद्ध्योर्विषयतावृत्तौ किं केन बाध्यतां, प्रमात्वस्यापि साधारणत्वादिति वाच्यम्, अभावव्यवहारभ्रम-प्रमात्वानुरोधेन प्रतियोगिमत्तानवगाह्यधिकरणबुद्धेरधिकरणे विषयतया सत्त्वेऽपि घटाद्यभावत्वेन तत्रासत्त्वात्, यथा परेषां घटध्वंसस्य घटात्यन्ताभावत्वेन स्वात्मनि सत्त्वेऽपि घटध्वंसत्वेन तत्रासत्त्वं, घटध्वंसे घटो नास्तीति प्रत्ययभावेऽपि घटध्वंसे घटो ध्वस्त इति प्रत्ययाभावात्; यद्वा वस्तुगत्या यः प्रतियोगिमान् तज्ज्ञानभिन्नमधिकरणज्ञानमेव तदभावः, आकाशाद्यभावस्त्वधिकरणसामान्यज्ञानमेव; न

चैवमननुगमः, वृत्तिमदभावा-ऽवृत्तिमदभावयोर्लक्ष्ययोर्भेदेन लक्षणभेदात्; अथवा आरोप्यसम्बन्धसामान्ये यदधिकरणानुयोगिकत्व-यत्प्रतियोगिकत्वोभयाभावस्तद-धिकरणज्ञानत्वमेव तत्सम्बन्धावच्छिन्नतत्प्रतियोगिताकाभावत्वं, संयोगसम्बन्धेन यत्र भूतले यस्य घटस्य सत्त्वं संयोगात्मकारोप्यसम्बन्धसामान्ये तद्भूतलात्मकाधि-करणानुयोगिकत्व-तद्घटप्रतियोगिकत्वयोभयस्यैव सत्त्वेन तदभावस्याभावान्न तद्भू-तलात्मकाधिकरणज्ञानं तद्घटाभावः, किन्तु संयोगसम्बन्धेन यत्राधिकरणे न घटस्तदधिकरणानुयोगिकत्व-घटप्रतियोगिकत्वोभयाभावस्य संयोगात्मकारोप्यसम्ब-न्धसामान्ये सत्त्वात् तदधिकरणज्ञानं भवति संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रति-योगिताकाभावः, गगनं तु संयोगसम्बन्धेन कुत्राप्यधिकरणे न वर्तत इति संयोगात्मकारोप्यसम्बन्धासामान्य एवाधिकरणवस्तुमात्रानुयोगिकत्व-गगनप्रति-योगिकत्वोभयाभावसत्त्वाद् वस्तुमात्राधिकरणज्ञानं संयोगादिसम्बन्धावच्छिन्न-गगननिष्ठप्रतियोगिताकाभावः'' इत्याहुः ।

तच्चिन्त्यम्—अभावस्याधिकरणबुद्धिरूपत्वे सूक्ष्मस्य केशादेर्जिज्ञासानुपपत्तेः, अधिकरणबुद्धिरूपकेशाभावस्य स्वसंविदितस्य सत्त्वेन तन्नास्तित्वावधारणस्य तज्जिज्ञासाविरोधिनः सत्त्वात्, घटनाशस्य बुद्धिरूपत्वे च तन्नाशे घटोन्मज्जनापत्तेः, प्रतियोगिमद्भिन्नाधिकरणस्यैवाभावस्वरूपत्वे लाघवाच्चेत्यन्यत्र विस्तर इति । ततो भावपरिणाम एवाभाव इति, व्यवस्थितमेतद्–भावो नाभावमेतीति ॥३८॥२७५॥

साम्प्रतं ''नाभावो भावतां याति'' इति व्यवस्थापयति—

**असतः सत्त्वयोगे तु, तत्तथाशक्तियोगतः ।**
**नासत्त्वं तदभावे तु, न तत्सत्त्वं तदन्यवत् ॥ ३९ ॥ २७६ ॥**

**असत** इति—एकान्तासत्त्वेनाभिमतस्य तुच्छस्येति यावत्, **सत्त्वयोगे तु** सत्त्वसम्बन्धेऽभ्युपगम्यमाने पुनः, **तत्तथाशक्तियोगतः** तस्य–एकान्तासत्त्वे-नाभिमतस्य, तथा–तत्सत्त्वभवनप्रकारेण नियतरूपानुविद्धभविष्यत्तयेति यावत्, शक्तियोगतः–शक्तिसम्बन्धात् कारणात्, **नासत्त्वं** न तुच्छत्वम्, अत्यन्तासतः शशशृङ्गादेरिव नियतरूपानुविद्धभविष्यत्तया शक्तिसम्बन्धासम्भवात्, तथाविध-शक्तिसम्बन्धाभावे इष्टत्वेनाभ्युपगमे त्वाह–**तदभावे** त्विति–तथाशक्त्यभावे-ऽभ्युपगम्यमाने पुनरित्यर्थः, **तदन्यवत्** अधिकृतव्यक्तिभिन्नवत्, **तत्सत्त्वं** प्रतिनियतार्थकारित्वरूपं सत्त्वं, **न** न सम्भवति नियामकाभावात् ॥ ३९ ॥ २७६ ॥

अथ कार्यत्वं कारणत्वं च कार्यकारणव्यक्तिस्वरूपमेवेति प्रतिनियतार्थक्रियाकारित्वं प्रतिनियतार्थक्रियाकारितद्व्यक्तिस्वरूपमेव, तद्व्यक्तेरुत्पत्तिश्च तज्जननशक्तिमतो हेतुविशेषादेव, हेतुस्वरूपायाः शक्तेः प्राक् सत्त्वेऽपि कार्यस्वरूपायाः शक्तेः प्रागभावात् सत्कार्योपपत्तिर्न भवतीति पराकूतं चेतस्यारोप्याह—

**असदुत्पद्यते तद्धि, विद्यते यस्य कारणम् ।**
**विशिष्टशक्तिमत् तच्च, ततस्तत्सत्त्वसंस्थितिः ॥ ४० ॥ २७७ ॥**

**असदुत्पद्यते**—उत्पत्तेः प्राग् असदेव कार्यमुत्पद्यते, एवं सति असत्त्वाविशेषाद् घट-पटादिवच्छशशृङ्गादिकमप्युत्पद्येतेत्यत्राह–**तद्धीति**, हि यतः, तदेव वस्तु, असदप्युत्पद्यते, **यस्य कारणं विद्यते** यस्य कार्यस्य कारणं–जनकं समस्ति, **तच्च** कारणं पुनः, **विशिष्टशक्तिमत्** विवक्षितकार्यजननस्वभावं प्रतिनियतरूपानुविद्धकार्यजननशक्तियुक्तमिति यावत्, **ततः** तस्मात् कारणात्, **तत्सत्त्वसंस्थितिः** तद्व्यक्तेः प्रतिनियतसत्त्वव्यवस्था, एवं च शशशृङ्गादेरसतः कारणं न विद्यते ततो न तस्य प्रागसत उत्तरकालेऽपि सत्त्वमिति प्रागसतः सत्त्वलक्षणोत्पत्तिश्च तस्य न सम्भवतीति हृदयम् ॥ ४० ॥ २७७ ॥

अत्रोत्तरम्—

**अत्यन्ताऽसति सर्वस्मिन्, कारणस्य न युक्तितः ।**
**विशिष्टशक्तिमत्त्वं हि, कल्प्यमानं विराजते ॥ ४१ ॥ २७८ ॥**

**अत्यन्तासतीति**–सर्वथाऽविद्यमाने इत्यर्थः, **सर्वस्मिन्** निखिलेऽपि कार्ये, **कारणस्य** विवक्षितकार्यकारणतयाऽभिमतस्य, **युक्तितः** न्यायेन, **विशिष्टशक्तिमत्त्वं हि** विवक्षितजननस्वभावत्वमेव, हिरत्रैवकारार्थे, **कल्प्यमानं** कल्पनागोचरीक्रियमाणं, **न विराजते** न शोभते, अवधेरेव सर्वथाऽभावात्, अविद्यमानव्यक्तीनामवधित्वेऽतिप्रसङ्गात्, कथञ्चिद् विद्यमानत्वेनैवावधित्वे नियमोपपत्तेः, एकान्तासत्कार्यवादेऽवधितयाऽभिमतस्य कार्यस्य पूर्वं कथंचिद् विद्यमानत्वस्याभावात् ॥ ४१ ॥ २७८ ॥

एतदेव प्रकटयति—

**तत्सत्त्वसाधकं तन्न, तदेव हि तदा न यत् ।**
**अत एवेदमित्थं तु, न वै तस्येत्ययोगतः ॥ ४२ ॥ २७९ ॥**

**तत्सत्त्वसाधकमि**ति–विवक्षितकार्यसत्त्वसाधकं प्रतिनियतकार्यव्यक्त्युत्पादकमिति यावत्, **तत्** कारणं, विवक्षितकार्यसाधकत्वमेव कारणस्य विशिष्टशक्तिमत्त्वम्, तत्कारणव्यक्तित्वेन पूर्वावधित्वस्य तत्कार्यव्यक्तित्वेनोत्तरावधित्वस्य च संभवात्, वस्तुतोऽर्थस्य तथात्वेनैवंकल्पनगौरवस्यादोषत्वात्, अत्रोत्तरं–**न** नैतदेवम्, **यद्** यस्मात्, **तदेव** विवक्षितकार्यसत्त्वमेव, **तदा** कारणकाले, **न** नास्ति, **यत्** यस्मात्, तथा च कारणकाले कार्यस्यासत्त्वान्न तत्र हेतुव्यापारः संभवतीति हृदयम्, पर आह–**अत एवे**ति यत एव कार्यं कारणकालेऽसत् असदेवेत्यर्थः, **इदं** कारणस्य तत्सत्त्वसाधकत्वम्, **इत्थं तु** घटमानं पुनः, कार्यसत्त्वस्य पूर्वमपि सद्भावे यथा सत आकाशादेः साधकत्वं न कस्यचिद् भवति तथा सतः कार्यसत्त्वस्य साधकत्वं हेतोर्नोपपद्येत, अत्रोत्तरं–**न वै** नैतदेवम्, सर्वथाऽसति तस्मिन् "तत्सत्त्वसाधकं तत्" इत्यत्र **तस्येत्ययोगतः** तस्य सत्त्वं–तत्सत्त्वमिति सत्त्वेऽन्वितस्य तस्येति षष्ठ्यर्थस्यासम्भवात्, यथा सर्वथाऽसति शशशृङ्गादौ शशशृङ्गस्येति षष्ठ्या न प्रयोगस्तथा सर्वथाऽसति कार्येऽपि तस्येति षष्ठीप्रयोगासम्भवात् ॥ ४२ ॥ २७९ ॥

अथ 'तत्सत्त्वसाधकं तत्' इत्यत्र सत्त्वं न तावत् सत्तासम्बन्धः, घटपदादिव्यक्त्यतिरेकेण प्रत्यक्षे तस्यानवभासात्, दृश्यादर्शनस्याभावसाधकत्वस्य सर्ववाद्यविप्रतिपन्नत्वेनातिरिक्तदृश्यस्वभावसत्त्वादर्शनात् तदभावसिद्धेः, न च 'सन् घटः, सन् पटः' इत्येवमनुगतसविकल्पकबुद्ध्याऽतिरिक्तसत्त्वाध्यवसायोऽस्तीति वाच्यम्, तत्रापि बहिष्परिस्फुटव्यक्तिस्वरूपस्यान्तर्नामोल्लेखस्याध्यवसायव्यतिरेकेण सत्तास्वरूपानवभासनात्, तथा च 'सन् घटः, सन् पटः' इत्यनुगतप्रत्ययबलाद् घट-पटादौ सत्तोपेयते तथा 'सती सत्ता' इति प्रतीतिबलात् सत्तायामपि सत्तोपेया, आत्माश्रयभयान्न सैव सत्ता तस्यामिति सत्तान्तरस्याभ्युपगन्तव्यत्वेनैवं तत्रापीत्यनवस्थानाच्च, नापि स्वरूपतः सत्त्वम्, स्वप्नावस्थायामप्यवभासने पदार्थात्मनि स्वरूपसद्भावात् सत्ताप्रसक्तेः, परिस्फुटसंवेदनावभासनिर्ग्राह्यत्वात् स्वरूपस्य संनिहितत्वेनैव तदनुभवात्, असंनिहितस्वप्नावगतवस्तुकल्पनायां मानाभावात् 'असदिदमनुभूतम्, इति स्वप्नोत्तरं प्रतीतेस्तत्र संनिहितमात्रगतेदन्त्वावभासात्, किन्त्वर्थक्रियाकारित्वमेव सत्त्वम्, तथा चाविद्यमानाया अपि व्यक्तेः स्वरूपतः सत्त्वान्न 'तस्य' इत्यनुपपत्तिः, नहि तदा तत्सत्त्वे सत्येव तत्सम्बन्धव्यवहारः, अतीतघटस्य वर्तमाने ज्ञाने तदानीमविद्यमानस्याप्यतीतघटस्य सम्बन्धित्वेन

व्यवहारस्य सर्वसिद्धत्वात्, न च शृङ्गग्राहितया तत्कार्यव्यक्तिहेतुत्वाग्रहादनुपपत्तिः, घटार्थिप्रवृत्तौ घटजातीयहेतुताज्ञानस्यैव प्रयोजकत्वात्, विशिष्य हेतुतया च प्रतिनियतवस्तुव्यवस्थितेरेवोपपादनादिति पराभिप्रायमुपदर्शयति—

**वस्तुस्थित्या तथा तद् यत्, तदनन्तरभावि यत् ।**
**नान्यत् ततश्च नाम्नेह, न तथास्ति प्रयोजनम् ॥ ४३ ॥ २८० ॥**

**वस्तुस्थित्ये**ति–आर्थं न्यायमाश्रित्येत्यर्थः, **तथा तत्** तत्कार्यसत्त्वसाधकं तत् कारणम्, कुत इत्याकाङ्क्षायामाह—**यदि**ति–यस्मात् कारणादित्यर्थः, **तद्-नन्तरभावि** विवक्षितकारणानन्तरभावि, प्रतिनियतप्रकृतकारणानन्तरभावीति यावत्, **तत्** प्रतिनियतमेव कार्यसत्त्वम्, **नान्यत्** न सत्त्वान्तरं नान्यादृशकार्य-सत्त्वमिति यावत्, **ततश्च** यस्मादेवं तस्मात् पुनः, **इह** अस्मिन् विचारे, **नाम्ना** अभिधानेन, **तथा** विवक्षितजननस्वभावमित्येवंभूतेन, **नास्ति प्रयोजनं** न किमपि फलं समस्ति वस्तुसिद्धेर्नामानधीनत्वात्, शृङ्गग्राहिकया तद्ग्रहस्य चाप्रयोजकत्वा-दित्याकूतमिति ॥ ४३ ॥ २८० ॥

उत्तरयति—

**नाम्ना विनाऽपि तत्त्वेन, विशिष्टावधिना विना ।**
**चिन्त्यतां यदि सन्न्यायाद्, वस्तुस्थित्यापि तत् तथा ॥४४॥२८१॥**

**नाम्ना विनाऽपी**ति–अभिधानमन्तरेणापि, शृङ्गग्राहिकया तद्ग्रहं विनाऽपीति यावत्, **तत्त्वेन** आर्थ्यैव प्रतीत्या, **विशिष्टावधिना विना** स्वसम्बन्धिनं भाविनं विशिष्टमवधिमन्तरेण, **चिन्त्यतां** माध्यस्थ्यमाश्रित्य विचार्यताम्, **यदि सन्न्यायात्** यदि सूक्ष्मन्यायेन भवति, **वस्तुस्थित्याऽपि** उक्तलक्षणया वस्तु-स्थित्याऽपि, **तत्** कारणं, **तथा** असतः कार्यस्य सत्त्वसाधकम्, नैव तथा सम्भवति, अत्यन्तासत्त्वे तत्सम्बन्धस्यैवानुपपत्तेः, अतीतघटस्य वर्तमानपृथुबुध्नो-दराद्याकारपर्यायेण वर्तमानज्ञानकालेऽसत्त्वेऽपि तज्ज्ञानज्ञेयत्वपर्यायात्मना तदानीं सत्त्वादेव तज्ज्ञानसम्बन्धित्वात्, दण्डादौ घटकारणताया अपि तत्पर्यायद्वारा तत्सत्त्वं विना दुर्घटत्वात्; ननु ज्ञाने घटादेर्ज्ञानस्वरूपा विषयतैव सम्बन्धः, दण्डे च दण्डस्वरूपा कारणतैव सम्बन्धः; घटनिरूपितत्वेन दण्डनिष्ठकारणत्वस्य व्यवहारे पुनर्घटज्ञानस्य हेतुत्वान्न दोष इति चेत्?, न–प्रतियोग्यनुयोग्युभयनिरूप्यस्य सम्बन्धस्योभयत्रैवान्योन्यव्यासक्तत्वात् तदेकमात्रस्वरूपत्वानुपपत्तेः, अन्यथेतरा-

निर्भासविलक्षणनिर्भासानुपपत्तेः, विषयविशेषं विना ज्ञानाकारविशेषोपगमे साकारवादप्रसङ्गादित्येवं पल्लवितवन्त उपाध्यायाः ॥ ४४ ॥ २८१ ॥

एवं सत्यप्यत्यन्तासत्कार्यसत्त्वसाधकत्वोपगमेऽतिप्रसङ्गदोषमुपदर्शयति—

**साधकत्वे तु सर्वस्य, ततो भावः प्रसज्यते ।**
**कारणाश्रयणेऽप्येवं, न तत्सत्त्वं तदन्यवत् ॥ ४५ ॥ २८२ ॥**

**साधकत्वे** त्विति–कारणस्य निरवधिक एव साधकत्वेऽभ्युपगम्यमाने पुनरित्यर्थः, **सर्वस्य** अशेषस्य कार्यस्य, **ततः** कारणात्, **भावः** उत्पादः, **प्रसज्यते** आपद्यते, असत्त्वस्य प्रकृतकार्य इव तद्भिन्नकार्येऽप्यविशिष्टत्वेन तत्साधकत्वस्य प्रकृतकारणे भावात्, उपसंहरति–**कारणाश्रयणेऽप्येवमि**ति, **एवम्** उक्तेन न्यायेन, **कारणाश्रयणेऽपि** कार्यविशेषार्थं कारणविशेषानुसरणेऽपि, **न** नैव, **तत्सत्त्वं** प्रतिनियतकार्यसत्त्वं **तदन्यवत्**, ततोऽन्यत्रेव, योग्यताभावाविशेषान्नानाकार्यजननीनां तत्तद्धेतुव्यक्तीनां तद्व्यक्तिजनकत्वमेव स्वभावो नान्यव्यक्तिजनकत्वस्वभाव इत्यस्य विनिगन्तुमशक्यत्वात्, तत्स्वभावानुप्रविष्टत्वेन तद्वदेव सत्त्वप्रसक्तेरिति ॥ ४५ ॥ २८२ ॥

दोषान्तरमुपदर्शयति—

**किञ्च तत्कारणं कार्यभूतिकाले न विद्यते ।**
**ततो न जनकं तस्य, तदाऽसत्त्वात् परं यथा ॥ ४६ ॥ २८३ ॥**

**किञ्चे**ति । **तत्कारणं** पराभिप्रेतं कारणम्, **कार्यभूतिकाले** कार्योत्पत्तिसमये, **न** नैव, **विद्यते** वर्तते क्षणिकत्वात्, यत एवं **ततः** तस्मात् कारणात्, **न जनकं** न कारणं, **तस्य** प्रकृतकार्यस्य, कुतो न कारणमित्यपेक्षायामाह–**तदाऽसत्त्वादि**ति–कार्योत्पत्तिकालेऽविद्यमानत्वादित्यर्थः, अत्र दृष्टान्तमाह–**परं यथे**ति–कारणकारणं यथा प्रकृतकार्योत्पत्तिसमयेऽविद्यमानत्वान्न प्रकृतकार्यकारणमित्यर्थः ॥ ४६ ॥ २८३ ॥

आशङ्काशेषमपहस्तयति—

**अनन्तरं च तद्भावस्तत्त्वादेव निरर्थकः ।**
**समं च हेतुफलयोर्नाशोत्पादावसंगतौ ॥ ४७ ॥ २८४ ॥**

**अनन्तरं** चेति–कारणाव्यवहितोत्तरसमये चेत्यर्थः, **तद्भावः** कार्योत्पादो-

ऽभ्युपगम्यमानः, **तस्मादेव** अनन्तरत्वादेव, **निरर्थकः**, प्रयोजनरहितः, दण्डादीनां दण्डत्वादिना घटादिव्याप्यत्वाभावात्, घटाद्यभावेऽपि दण्डादिसद्भावात्, सामग्रीप्रविष्टदण्डत्वादिना दण्डादीनां घटादिव्याप्यत्वेऽभ्युपगम्यमाने गौरवात्, सामग्रीप्रविष्टदण्डत्वादिना दण्डादीनां कार्याव्यभिचारात् तथैव कारणत्वे कुर्वद्रूपत्वस्य कारणतावच्छेदकतया कल्पनस्य कार्यव्याप्यतानिर्वाहार्थमनावश्यकमिति कुर्वद्रूपत्वेन दण्डादीनां घटादिकार्यव्याप्यत्वे हि क्षणिकत्वसाधनाशा न पूर्यते, अव्यवहितोत्तरसमयवृत्तित्वसम्बन्धेन दण्डादीनां घटादिव्याप्यत्वे गौरवात्, अव्यवहितत्वमनिवेश्य केवलानन्तर्यस्य कारणकारणसाधारणत्वात् क्षणिकत्वानियामकत्वात्, कुर्वद्रूपत्वकल्पनापेक्षया कथञ्चिद् भिन्नाभिन्नसामग्र्यनुप्रवेशरूपकुर्वद्रूपत्वेन दण्डादेस्तदैव घटादिव्याप्यत्वाच्चेत्येवमाशयमुपाध्याया वर्णयन्ति, तथा **समं च** समसमयं च, **हेतु-फलयोः** कार्यकारणयोः, **नाशोत्पादौ** विगमोत्पत्ती, असङ्गतौ अघटमानौ ॥ ४७ ॥ २८४ ॥

एतदेव भावयति—

**स्तस्तौ भिन्नावभिन्नौ वा, ताभ्यां भेदे तयोः कुतः ? ।**
**नाशोत्पादावभेदे तु, तयोर्वै तुल्यकालता ॥ ४८ ॥ २८५ ॥**

**स्तस्ताविति**, **तौ** नाशोत्पादौ, **स्तः** स्याताम्, **ताभ्यां** हेतु-फलाभ्याम्, **भिन्नौ** व्यतिरिक्तौ, **अभिन्नौ** अव्यतिरिक्तौ, **वेति** विकल्पे, हेतुतो नाशो भिन्नोऽभिन्नो वा, फलत उत्पादो भिन्नोऽभिन्नो वेत्येवं पक्षद्वयम्, भेदाभेदयोर्मध्ये **भेदे**ऽभ्युपगम्यमाने, **तयोः** हेतु-फलयोः, नाशोत्पादौ **कुतः ?**, स्वभिन्नेन नाशेन समं हेतोः स्वभिन्नेनोत्पादेन समं फलस्य च सम्बन्धाभावादुत्पद्यमानो नाशो हेतुनाशो न भवति, उत्पादश्च हेतुतो जायमानः फलोत्पादो न भवतीति न हेतुनाशफलोत्पादौ स्याताम्, तादात्म्य-कार्यकारणभावावेव तात्त्विकसम्बन्धौ परस्याभिमतौ, तत्र नाशोत्पादयोर्हेतुफलाभ्यां भेदपक्षे तादात्म्यसम्बन्धो नेष्ट एव, नाशस्य निर्हेतुकत्वाभ्युपगमेन हेतुना समं कार्यकारणभावसम्बन्धोऽपि नास्ति, उत्पादस्य चोत्पद्यमानसमसमयत्वेन सव्येतरगोविषाणयोरिव जन्यजनकभावाभावेन तदुत्पत्तिसम्बन्धस्तत्रापि नास्तीति, **अभेदे तु** नाशोत्पादयोर्हेतु-फलाभ्यामभेदेऽभ्युपगम्यमाने तु, **वै** निश्चितं, **तयोः** हेतु-फलयोः, **तुल्यकालता** नाशोत्पादाभ्यां समं समसमयता, हेतुतन्नाशयोरभेदे यस्मिन् क्षणे हेतुस्तस्मिन्नेव क्षणे

तन्नाशोऽपि स्यादिति हेतुः प्रथमक्षणेऽप्यलब्धात्मसत्ताक एव स्यात् तदानीमेव विनष्टत्वात्, हेतोः कुर्वद्रूपात्मकस्य प्रथमक्षणेऽप्यभावे तज्जन्यस्योत्पद्यमानाभिन्नोत्पादस्याप्यभावात् ॥ ४८ ॥ २८५ ॥

यदि नामैवं ततः किमित्याह—

**न हेतुफलभावश्च, तस्यां सत्यां हि युज्यते ।**
**तन्निबन्धनभावस्य, द्वयोरपि वियोगतः ॥ ४९ ॥ २८५॥**

**न हेतु-फलभावश्चे**ति-कार्यकारणभावश्च नेत्यर्थः, **तस्यां च सत्यां** कार्यकारणयोस्तुल्यकालतायां च सत्याम्, हि निश्चितम्, **युज्यते** घटते, कुतो न तुल्यकालयोः कार्य-कारणयोः कार्यकारणभावो घटते इत्यपेक्षायामाह—**तन्निबन्धनभावस्ये**ति-कार्यकारणभावनियामकतद्भावभावित्वादिसद्भावस्येत्यर्थः, **द्वयोरपि** कार्यकारणभावनिरूपकयोः कार्यकारणोभयोरपि, **वियोगतः** अभावात्, यथा सव्येतरगोविषाणयोः समकालीनयोः कार्यकारणभावनियामकतद्भावभावित्वाभावान्न कार्यकारणभावस्तथा प्रकृतेऽपीति ॥ ४९ ॥ २९६ ॥

पराभिप्रायमाशङ्क्य परिहरति—

**कल्पितश्चेदयं धर्म-धर्मिभावो हि भावतः ।**
**न हेतुफलभावः स्यात्, सर्वथा तदभावतः ॥ ५० ॥ २८७ ॥**

**कल्पितश्चे**दिति । **अयं धर्मधर्मिभावः** कारणं धर्मि, नाशो धर्मः, कार्यं धर्मि, उत्पादश्च धर्म इत्याकारो धर्मधर्मिभावः, हि निश्चितम्, **भावतः** परमार्थतः, **कल्पितः** कल्पनया विषयीकृतः, धर्म-धर्मिणोर्मध्येऽन्यतरस्य कल्पितत्वे धर्मधर्मिभावस्य कल्पितत्वं भवति, प्रकृते हेतोः पारमार्थिकत्वेऽपि नाशस्य सांवृतत्वेन कल्पितत्वात् तयोर्धर्मधर्मिभावस्य कल्पितत्वं, न हि सुशिक्षितोऽपि बालः स्वस्कन्धमारोढुं प्रभवतीति धर्म-धर्मिणोर्भेदे सत्येव धर्मधर्मिभावो नाभेदे, प्रकृते आद्यक्षणसम्बन्धरूप उत्पादो धर्मो धर्मिणः कार्यस्य स्वरूपमेवेति वास्तविकत्वेऽपि तस्य धर्मधर्मिभावव्यवहारहेतोर्धर्मधर्मिणोर्भेदस्याभावाद् वास्तविकयोरपि कार्योत्पादयोर्धर्मधर्मिभावस्य कल्पितत्वमिति चेत्?, एवं सति **सर्वथा** एकान्ततः, **तदभावतः** धर्मधर्मिभावाभावात्, **हेतुफलभावः** कार्यकारणभावः, **न स्यात्** न भवेत्, अव्यवहितानन्तरक्षणकुर्वद्रूपत्वमेव कारणत्वं, तच्चानन्तर्यं स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वध्वंसाधिकरणत्वं, तत्र प्रविष्टस्य नाशस्य कल्पितत्वेन तद्घटितस्य कारणत्वस्यापि कल्पितत्वादिति भावः ॥ ५० ॥ २८७ ॥

पराभिप्रायमाह—

**न धर्मी कल्पितो धर्म-धर्मिभावस्तु कल्पितः ।**
**पूर्वो हेतुर्निरंशः स, उत्तरः फलमुच्यते ॥ ५१ ॥ २८८ ॥**

**न धर्मी**ति–धर्मी कारणादिः, **न कल्पितः** न काल्पनिकः, तस्य निर्विकल्पकाध्यक्षप्रमाणविषयस्य स्वलक्षणरूपस्य पारमार्थिकत्वात्, **धर्मधर्मिभावस्तु** कारणं विनाशः कार्यमुत्पाद इति चेत्यादिः, **कल्पितः** अवास्तवः, धर्मधर्मिभावस्य परापेक्षग्रहत्वेन सविकल्पकैकवेद्यत्वात् सविकल्पकस्याप्रमाणत्वेन वस्त्वसाधकत्वात्, कार्यकारणयोर्मध्ये, पूर्वः पूर्वो वस्तुक्षणः, **निरंशः** एकस्वभावो धर्मान्तराघटितः, **हेतुः** कारणम्, **उच्यते** अभिधीयते, **उत्तरः** उत्तरो वस्तुक्षणो धर्मान्तराघटितत्वान्निरंशः, **फलम्** कार्यमभिधीयते, एवं च पौर्वापर्यमात्रात् कार्यकारणभाव इति काल्पनिकं कारणत्वं कार्यत्वं च मा भूत्, वास्तवं तु धर्मिस्वरूपमन्याघटितं स्यादेव, इति को दोष इति पराभिप्रायः ॥ ५१ ॥ २८८ ॥

अत्रोत्तरमाह—

**पूर्वस्यैव तथाभावाभावे हन्तोत्तरं कुतः? ।**
**तस्यैव तु तथाभावेऽसतः सत्त्वमदो न सत् ॥ ५२ ॥ २८९ ॥**

**पूर्वस्यैवे**ति–पूर्वभावक्षणस्यैवेत्यर्थः, **तथा** तेन फलरूपप्रकारेण, **भावाभावे** परिणमनाभावे, **हन्त** ! इति खेदे, **उत्तरं** फलं, **कुतः** ? कस्मात् स्यात्?, यत् फलमुच्यते नैव तदस्ति, यत् सद् भवति, **तस्यैव तु** कारणक्षणस्यैव तु, **तथाभावे** फलरूपेण परिणमनेऽभ्युपगम्यमाने सति, एवं सति सतः कारणस्यैव फलरूपेण सत्त्वमायातमिति **असतः** असद्रूपस्य कार्यस्य, **सत्त्वं** उत्पत्तिः, यद् भवतोऽभीष्टम्, **अदः** एतद् वचनम्, **न सत्** न शोभनम्, व्याहतत्वादित्यर्थः ॥ ५२ ॥ २८९ ॥

एतेन परोक्तमन्यदपि यद् व्युदस्तं तदुपदर्शयति—

**तं प्रतीत्य तदुत्पाद, इति तुच्छमिदं वचः ।**
**अतिप्रसङ्गतश्चैव, तथा चाह महामतिः ॥ ५३ ॥ २९० ॥**

**तं प्रतीत्ये**त्यादि, **तं** कारणक्षणम्, **प्रतीत्य** आश्रित्य, **तदुत्पादः** कार्योत्पादः, **इति** एवंस्वरूपम्, **इदं वचः** परस्येदं वचनम्, **तुच्छम्** निष्प्रयोजनम्,

यतः कारणाश्रयणं यदि कारणरूपाश्रयणं तदा कार्यस्य कारणात्मकत्वात् सत्त्वमेवेति सत एवोत्पाद इति असत उत्पाद इति व्याहतमित्युक्तदोषतादवस्थ्यात्, यदि च तदानन्तर्यभावमात्रनिबन्धनस्वभावाश्रयणम्, तदा **अतिप्रसङ्गतश्चैव** विश्वस्यापि तदनन्तरभावित्वेन तत्कार्यैकस्वरूपत्वे वैश्वरूप्याभावप्रसङ्गाच्चैव, स्वोक्तेऽर्थे पूर्वाचार्यसम्मतिमुपदर्शयति **तथा चेति**-उक्तसदृशं चेत्यर्थः, **महामतिः** अस्य "महामतिनामा ग्रन्थकृत्" इत्येवं व्याख्यानमुपाध्यायैः कृतम्, सम्मतिकारोऽयमिति सम्भाव्यते, **आह** स्वग्रन्थे उक्तवान् ॥ ५३ ॥ २९० ॥

महामतिवचनमुल्लिखति—

**सर्वथैव तथाभाविवस्तुभावादृते न यत् ।**
**कारणानन्तरं कार्यं, द्राग् नभस्तस्ततो न तत् ॥ ५४ ॥ २९१ ॥**

**सर्वथैवेति**-कारणत्वादिपर्यायवत् तद्द्रव्यतयाऽपीत्यर्थः, **तथाभाविवस्तुभावादृते** कार्यकाले फलपरिणामिवस्तुसत्तां विना, **कारणान्तरं** प्रतिनियतहेत्वव्यवहितोत्तरसमये, **कार्यं** प्रतिनियतकार्यं, **द्राग्** झटित्येव, **नभस्तः** आकाशात्, अकस्मादिति यावत्, **यत्** यस्मात् कारणात्, **न** न संभवेत्, **ततः** तस्मात्, **तत्** कार्यं, **न** न भवदेव, इत्थंवादिन इत्याशयः ॥ ५४ ॥ २९१ ॥

एतदेव समर्थयति —

**तस्यैव तत्स्वभावत्वकल्पनासम्पदप्यलम् ।**
**न युक्ता युक्तिवैकल्यराहुणा जन्मपीडनात् ॥ ५५ ॥ २९२ ॥**

**तस्यैवेति**- विवक्षितकार्यस्यैवेत्यर्थः, **तत्स्वभावत्वकल्पनासम्पदपि** स्वभावत एव कारणानियम्यनियतजातीयत्वकल्पनसमृद्धिरपि, कारणमन्तरेण स्वभावतः प्रतिनियतजातीयं कार्यं भवतीति यावत्, अहमेतदनन्तरं भवामीति कार्यस्य स्वभावो न कारणनियम्यः, **अलम्** अत्यर्थम्, **न युक्ता** न समीचीना, कस्मादित्याकाङ्क्षायाम्— **युक्तिवैकल्यराहुणेति**-प्रमाणाभावलक्षणसिंहिकापुत्रक्रूरग्रहेणेत्यर्थः, **जन्मपीडनात्** उत्पादस्यैव दूषणात्, कारणमन्तरेणैव प्रतिनियतजातीयस्वभावकार्योत्पादाभ्युपगमे प्रतिनियतजातीयकार्यात्मककारणमन्तरेणैवार्थक्रियाया अपि स्वभावत एवोपपत्तौ प्रतिनियतजातीयस्वभावकार्योत्पादकल्पनाऽप्ययुक्तेति भावः; उक्तवचोभङ्ग्या 'क्रूरग्रहेण जन्मनि पीडिते न भवति विभूतिः' इति ज्योतिस्तन्त्रव्यवस्था सूचिता ॥ ५५ ॥ २९२ ॥

अतिप्रसङ्गमाह तदनन्तरेत्यादिनेति ग्रन्थकृदुक्तावतरणं स्वोपस्कारं व्याख्यानान्तरकृदुक्तोक्तावतरणप्रकारान्तरावेदनपूर्वकं स्वमतिविभावितप्रकारमुपाध्याया इत्थमाहुः—"तस्यैव तदनन्तरभवनस्वभावत्वे युक्त्यभावादाकस्मिकत्वेन कार्यानुत्पत्तिदूषणं स्वोक्तमेव संमतिग्रन्थे प्राग् योजितम्, अथ चातिप्रसङ्गं सामान्यशब्देन स्वोक्तमेव तत्र योजयितुमाह' इति केचित्, वस्तुतो घटकुर्वद्रूपत्वेन मृत्पिण्डदण्डादिक्षणानामेव घटहेतुत्वं, पटकुर्वद्रूपत्वेन च तन्तुवेमादिक्षणानामेव पटहेतुत्वम्, इत्यादिरीत्या नातिप्रसङ्ग इत्यत्राप्याह" इति ।

**तदनन्तरभावित्वमात्रतस्तद्व्यवस्थितौ ।**
**विश्वस्य विश्वकार्यत्वं, स्यात् तद्भावाविशेषतः ॥५६॥२९३॥**

**तदनन्तरे**ति । **तदनन्तरभावित्वमात्रतः** विवक्षितकारणानन्तर्यमात्रेण, **तद्व्यवस्थितौ** कार्यकारणभावसिद्धौ स्वीक्रियमाणायां सत्यां, **विश्वस्य** अशेषकार्यस्य, **विश्वकार्यत्वं** सकलकारणजन्यत्वं, **स्यात्** भवेत्, तत्र हेतुः—**तद्भावाविशेषत** इति- तदनन्तरभावित्वाविशेषादित्यर्थः, मृत्पिण्डदण्डादिक्षणानां स्वानन्तरक्षणभाविघटापेक्षयेव स्वानन्तरभाविपटापेक्षयाऽपि कुर्वद्रूपत्वं समस्त्येव, नहि नीलस्य नैल्यस्वभाव एकापेक्षया भवति तदन्यापेक्षया न भवतीति, तथा चानन्तरभाविकार्यमात्रापेक्षया कारणस्वभावस्य कुर्वद्रूपत्वस्याविशेषात् कार्यस्याप्यविशेष एव स्यात्, कार्यविशेषदर्शनात् कारणविशेषः कल्प्यत इति चेत् ?, न–मृत्पिण्डादीनां मृत्पिण्डत्व-दण्डत्वादिना कारणत्वे मृत्पिण्डत्व-दण्डत्वादिलक्षणविधिरूपकारणताऽवच्छेदकविशेषस्यास्माभिरप्यङ्गीकृतत्वात्, अतद्व्यावृत्तिस्वरूपकुर्वद्रूपत्वात्मकविशेष्यस्यैव निषेत्स्यमानत्वात्, विधिरूपत्वेऽप्यङ्कुरकुर्वद्रूपत्वादेः शालित्वाभाववति कुर्वद्रूपात्मकयवबीजेऽङ्कुरकुर्वद्रूपत्वं तदभाववति कुशूलस्थशालिबीजे शालित्वं तयोश्चैकत्राङ्कुरकुर्वद्रूपात्मकशालौ सामानाधिकरण्यमित्येवं शालित्वादिना साङ्कर्याज्जातिरूपस्यासम्भवात्, अनुगतधर्ममात्रमनभ्युपगच्छता बौद्धेन जातिरूपस्य तस्यानभ्युपगमाच्चेति भावः ॥ ५६ ॥ २९३ ॥

विशेषकारणं विक्षिपति—अभिन्नेत्यादिनेति मूलकृदवतारयति, इदमेव स्पष्टयति—अभिन्नेतीत्युपाध्यायोऽवतारयति—

**अभिन्नदेशतादीनामसिद्धत्वादनन्वयात् ।**
**सर्वेषामविशिष्टत्वान्न तन्नियमहेतुता ॥ ५७ ॥ २९४ ॥**

**अभिन्नदेशतादीनां** कारणदेशैकदेशत्वकारणजात्येकजातीयत्वादीनाम्, **असिद्धत्वात्** क्षणिकत्वेन कार्यकारणयोर्देशादिभेदोपपत्तेः, तथा च यत् कारणं यत्कार्यैकदेशत्वैकजातीयत्वादिविशेषवत् तत् तत्कार्यकारणमिति नियमः क्षणिकवादे न सम्भवति, **अनन्वयात्** कारणं यदि कार्यरूपेण परिणमेत तदा यद्यद्रूपेण तत् तत्कारणमित्येवं नियमः स्यादपि, न चैवम्, अपरिणामित्वेनानन्वयात्, **सर्वेषाम्** अनन्तरभाविनां सर्वेषां कार्याणाम्, **अविशिष्टत्वात्** सर्वाणि पूर्वभावीनि कारणानि प्रत्यविशिष्टत्वात्, **न तन्नियमहेतुता** न कारणविशेषे कार्यविशेषनियमहेतुता । अस्याभिप्रायोपवर्णनमुपाध्यायकृतं यथा—"अयं भावः-घटकुर्वद्रूपत्वेन घटहेतुतया कथञ्चित् कालनियमादिनिर्वाहेऽपि देशनियमस्तथाभाविकारणानभ्युपगमे दुर्घटः, सर्वेषां घटकुर्वद्रूपक्षणानामेकत्रासम्भवात्, मृत्पिण्डक्षणदेशेऽपि पूर्वत्र घटक्षणानुत्पत्तेश्च, न च मृद्रूपघटक्षणं प्रति घटकुर्वद्रूपक्षणत्वेन हेतुत्वान्नानुपपत्तिरिति वाच्यम्, दण्डादिसमाजादमृद्रूपघटापत्तेः, न च दण्डादीनामपि मृद्रूपघटत्वावच्छिन्नं प्रत्येव हेतुत्वान्नायं दोष इति वाच्यम्, स्फुटगौरवात्, कार्यगतयावद्धर्माणां कार्यतावच्छेदके प्रवेशप्रसङ्गात्, कारणगतमृद्रूपस्य कार्यसंक्रमेऽन्वयप्रसङ्गात्, अतिरिक्तस्यानिर्वचनाच्च, तस्माद् घटयोग्यताया घटहेतुत्वं विना न निर्वाह इति सूक्ष्ममीक्षणीयम्" इति ॥ ५७ ॥ २९४ ॥

पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**योऽप्येकस्यान्यतो भावः, संताने दृश्यतेऽन्यदा ।**
**तत एव विदेशस्थात्, सोऽपि यत् तन्न बाधकः ॥५८॥२९५॥**

**योऽपीति, एकस्य** धूमादेः, **अन्यतः** अग्न्यादेः सकाशात्, योऽपि **भावः** क्वचित् पर्वतादिप्रदेशे भूत्वा भवनम्, **अन्यदा** उत्पादादूर्ध्वम्, **सन्ताने** धूमसन्ततौ, **दृश्यते** प्रत्यक्षविषयो भवति, पूर्वधूमक्षणोत्तरधूमक्षणयोर्व्यावहारिकं ग्रहणं न भवतीति सन्तानग्रहणम्, **सोऽपि** भूत्वा धूमादेर्भावोऽपि, **विदेशस्थात्** भिन्नदेशस्थात्, **तत एव** अग्न्यादेरेव, **यत्** यस्मात् कारणात्, **तत्** तस्मात्, **न बाधकः** अग्नेरेव धूम इति नियतकल्पनाया न बाधकः । अत्रापि भावोपवर्णनमित्थमुपाध्यायस्य–"अयं भावः-तत्कार्यजननशक्तिमदेव कारणं तत्कार्यजनकं,

देशनियमस्तु स्वभावादेव, दूरस्थेनापि वह्निना दूरस्थधूमजननदर्शनादिति परस्याशयः, सोऽयमयुक्तवह्निना स्वसमीपदेश एव धूमोत्पादादनन्तरं तदुपसर्पणस्यापि तत्तत्क्रियादिहेतुदेशनियतदेशत्वात्, अन्यथा काशेयो वह्निः प्रयागेऽपि धूमं जनयेत्, न च न च लोहोपलस्यासन्निकृष्टलोहाकर्षकत्ववदन्यत्रापि तथा कल्पनम्, अतिप्रसङ्गात्, शक्तिरपि सूक्ष्मकार्यरूपैव, अत एव तिलादौ तैलसद्भावं निश्चित्यैव तैलार्थिनस्तत्र प्रवर्तन्ते, इति न किञ्चिदेतदिति दिग्'' इति ॥ ५८ ॥ २९५ ॥

एतेन प्रसङ्गाभिधानेन यद् व्युदस्तं तदभिधातुकाम आह—

**एतेनैतत् प्रतिक्षिप्तं, यदुक्तं सूक्ष्मबुद्धिना ।**
**नासतो भावकर्तृत्वं, तदवस्थान्तरं न सः ॥ ५९ ॥ २९६ ॥**

**एतेनेति**—अनन्तराभिहितप्रसङ्गेनेत्यर्थः, **एतत्** अनन्तरमेवाभिधीयमानम्, **प्रतिक्षिप्तं** निरस्तम्, **यदुक्तं सूक्ष्मबुद्धिना** कुशाग्रीयबुद्धिना शान्तरक्षितेन यदुपदिष्टम्, किमुक्तमित्यपेक्षायां तदुक्तमुल्लिखति—**नासत** इति, **असतः** अलीकस्य कारणस्य, **भावकर्तृत्वं** वस्तुजनकत्वं, **न** न भवति, येन शशशृङ्गादेरपि जनकत्वमापद्येत, तथा **सः** उत्पद्यमानो भावः, **तदवस्थान्तरं** सद्रूपापन्नासदवस्थाक्रान्तः, **न** नैव भवति, येन शशशृङ्गेऽपि सदवस्थापादनेन हेतुव्यापारोपवर्णनं साफल्यमनुभवेत् ॥ ५९ ॥ २९६ ॥

किं तर्हि तत्त्वमित्यपेक्षायामाह—

**वस्तुनोऽनन्तरं सत्ता, कस्यचिद् या नियोगतः ।**
**सा तत्फलं मता सैव, भावोत्पत्तिस्तदात्मिका ॥६०॥२९७॥**

**वस्तुन** इति—अग्न्यादेरित्यर्थः, **अनन्तरम्** उत्तरकालं, **सत्ता** सद्भावः, **कस्यचिद्** धूमादिपदार्थस्य, **नियोगतः** अवश्यम्भावेन, **या** या भवति, **सा** सत्ता, **तत्फलं** तस्यानन्तरपूर्ववर्तिनोऽग्न्यादेः कार्यम्, **मता** इष्टा, **तस्याः** सत्तायाः, कथमुत्पत्तिरित्याकाङ्क्षायामाह—**सैवेति**—सत्तैवेत्यर्थः, **भावोत्पत्तिः** धूमादिकार्योत्पत्तिः, उत्पत्ति-तद्वतोरभेदात्, **तदात्मिका** भावोत्पत्तिस्वरूपा सत्ता भावात्मिकैव, न तु तद्भिन्ना, सत्ता च सद्रूपैवेति तज्जनकत्वादसज्जनकत्वेनातिप्रसङ्गोद्भावनं न युक्तमित्यभिसन्धिः ॥ ६० ॥ २९७ ॥

ननु यद्युक्तयुक्त्या सत्तात्मकभावस्योत्पत्तिरेव कथं तर्ह्यसत उत्पत्तिरित्यभिधीयत इत्यत आह—

**असदुत्पत्तिरप्यस्य, प्रागसत्त्वात् प्रकीर्तिता ।**
**नासतः सत्त्वयोगेन, कारणात् कार्यभावतः ॥ ६१ ॥ २९८ ॥**

**असदुत्पत्तिरपीति**–अस्य प्रकीर्तितेत्यनेनान्वयः, असत उत्पत्तिरपीत्यर्थः, **अस्य** विवक्षितकार्यस्य सत्तात्मकभावरूपस्य, **प्रागसत्त्वात्** प्राक्कालवृत्तित्वाभावात्, **प्रकीर्तिता** कथिता, इदमेव पूर्वं नासीदित्यसदित्यभिधीयते, शशशृङ्गादितो भावस्य सत्तात्मकस्य पूर्वमसतो विशेषमुपदर्शयति–**नासतः सत्त्वयोगेनेति**–असतः–सर्वथाऽसतस्तुच्छस्य, सत्त्वयोगेन–सत्त्वव्यापारेण, नासदुत्पत्तिरित्यभिधीयत इत्यर्थः, कुत इत्थमित्यपेक्षायामाह–**कारणात् कार्यभावत** इति–कारणात् सकाशात् कार्योत्पादादित्यर्थः । कारणं च भावस्वरूपमेव, कार्यमपि भावस्वरूपमेव, एवञ्च भावाद्धि भावोत्पत्तिः, शशशृङ्गस्य च न किमपि भावस्वरूपं कारणं, नापि शशशृङ्गं भावस्वरूपमिति, तथा च प्रागसत्त्वेऽपि भावस्याविशेषिता सत्त्वस्यानुत्पत्तिव्याप्यस्याभावादुत्पत्तिर्युज्यते, प्रागसत्त्वं तु नानुत्पत्तिव्याप्यमिति ततो नानुत्पत्तिस्तत्रापादयितुं शक्यते, शशशृङ्गादौ तु तुच्छत्वपर्यवसितमविशेषितासत्त्वमनुत्पत्तिव्याप्यं समस्तीति तस्यानुत्पत्तिरेव न तूत्पत्तिः, प्रागसतो भावस्य नापि सत्ताऽनुपपन्ना, किन्त्वसत एव सा न घटत इत्याशयः ॥ ६१ ॥ २९८ ॥

यथैतत् प्रतिक्षिप्तं तथा लेशतो दर्शयति—

**प्रतिक्षिप्तं च तद्धेतोः प्राप्नोति फलतां विना ।**
**असतो भावकर्तृत्वं, तदवस्थान्तरं च सः ॥ ६२ ॥ २९९ ॥**

**प्रतिक्षिप्तं चेति**–एतत् प्रतिक्षिप्तं निराकृतं चेत्यर्थः, **तद्धेतोः** विशिष्टफलहेतुतो मृदादेः, **फलतां विना** घटादिकार्यरूपेण भवनमन्तरेण, **प्राप्नोति** आपद्यते, किमापद्यते? इत्यपेक्षायामाह **असत** इति–तुच्छस्यैवेत्यर्थः, **भावकर्तृत्वम्** प्राप्नोतीत्यस्यापाद्यत इत्यर्थकस्य सम्बन्धः, कारणत्वेनाभिमतस्य मृदादेस्तत्त्वतोऽकारणत्वात् कार्योत्पादकाले तस्यासत्त्वादर्थक्रियाकारित्वाभावेन स्वरूपसत्त्वस्य स्वप्नावगतपदार्थवद् वस्तुव्यवस्थाऽहेतुत्वात्, तथा **तदवस्थान्तरं च** असदवस्थान्तरं च, यदि मृदादिर्घटादिरूपेणोत्तरक्षणे भवनं नासादयेत् तदा तदानीमसन्नेव स्यात्, **सः** मृदादिलक्षणो भावः प्राप्नोतीत्यस्यात्रापि योगः, भवतु सतोऽसदवस्थान्तरप्राप्तिः, न–अनुत्पत्तिरूपासत्ताया एवोत्पत्तिरूपसत्तावस्थाप्राप्तेरिष्टत्वात्, सतोऽसदवस्थान्तरप्राप्तेश्चानिष्टत्वात् ॥ ६२ ॥ २९९ ॥

एतदेव भावयति—

**वस्तुनोऽनन्तरं सत्ता, तत् तथा तां विना भवेत् ।**
**नभःपातादसत्सत्त्वयोगाद् वेति न तत्फलम् ॥ ६३ ॥ ३०० ॥**

**वस्तुन** इति-मृदादेः कारणस्येत्यर्थः, **अनन्तरम्** अव्यवहितोत्तरक्षणे, **सत्ता** घटादिकार्यरूपा सत्ता, **तत् तथा तां** मृदादेरेव घटादिरूपतां, **विना** अन्तरेण, **भवेत्** स्यात्, मृदादिर्घटादिरूपो न भवति, एवमपि घटादिरूपा सत्ता भवतीति, तत्र द्विधा गतिः, एका-**नभःपातात्** आकाशतः पातात्, अकस्माद् घटादिरूपा सत्ता भवेद् वा द्वितीया **असत्सत्त्वयोगाद् वा** असतः—घटादेः सदवस्थाप्राप्तेर्वा, **इति** एतस्मात् कारणात्, नियमाभावात्, उभयथाऽपि घटादिरूपा सत्ता न मृन्नियतेति **न तत्फलम्** घटादिरूपा सत्ता न मृद एव कार्यम् ॥ ६३ ॥ ३०० ॥

उपन्यस्तशेषं निराकरोति—

**असदुत्पत्तिरप्येवं, नास्यैव प्रागसत्त्वतः ।**
**किन्त्वसत् सद् भवत्येवमिति सम्यग् विचार्यताम् ॥ ६४ ॥ ३०१ ॥**

**असदुत्पत्तिरपीति**-असत उत्पादोऽपीत्यर्थः, **एवम्** उक्तेन प्रकारेण, **अस्यैव न** विवक्षितकार्यस्यैव न नियन्तुं शक्यते, **प्रागसत्त्वतः** प्राक्कालवृत्तित्वाभावमात्रादेव, पृच्छति-**किन्त्विति**, उत्तरयति-**असत् सद् भवत्येवमिति**, एवं-त्वदभ्युपगमप्रकारेण, असत् सद् भवति, **इति** एवं, **सम्यग्** सूक्ष्मदृष्ट्या, **विचार्यतां** परिभाव्यताम्, विचारणा चात्रेत्थं प्रकटीकृतोपाध्यायैः-"तथाहि नाशवत् प्रागभावोऽपि तव तुच्छ एव, ततस्तत्सम्बन्धादसत्त्वमेव वस्तुन आपतितम्, इत्यसत एवोत्पत्त्या सद्भवनं सिद्धम्, अथ प्रागभावसम्बन्धित्वरूपं प्रागसत्त्वं काल्पनिकमेव, तात्त्विकं त्वधिकरणात्मकप्राक्कालवृत्तित्वाभावरूपं, तदेवोत्पत्तिव्याप्यम्, अतो न प्रागसत्त्वस्य तुच्छत्वे तत्त्वतस्तदभावविकल्पेनापि प्रागसत्त्वप्रसङ्गावकाशः, धर्मिरूपतदभावे सत्युत्पत्तिरूपायाः सत्तायाः प्राच्यत्वायोगात्, प्रागेव प्रागसत्त्वाभावकल्पनायाश्च प्रागसत्त्वकल्पनाप्रतिरोधादेवानुदयात्, असद्विषयत्वे तस्या भ्रमत्वव्यवस्थितेस्तद्विषयत्वेनापि तदसिद्धेरिति चेत् ?, न-असत्या अपि प्रागसत्तायाः सत्तास्वरूपनाशे तादात्म्यसम्बन्धेऽसत एव सत्त्वापत्तेः, भावरूपनाशस्य निर्हेतुकत्वानभ्युपगमेन तत्र तदुत्पत्तिरूपसम्बन्धोपगमे च

तुच्छस्य जनकत्वप्रसङ्गात्, असम्बन्धे च प्रागसत्ता न निवर्तेतैव, नित्यनिवृत्तत्वात्, एतदनिवृत्तिमभ्युपगम्य तन्निवृत्त्यनुभवापलापे च नीलाद्यनुभवस्याप्यपलापप्रसङ्गात्, कल्पनयैव सर्वव्यवहारोपपत्तेः, उत्पत्तेः स्वप्नावगतपदार्थसाधारणत्वेनासति सत्त्वाधानं विना सत्त्वस्य दुर्घटत्वाच्चेति न किञ्चिदेतत्'' इति ॥ ६४ ॥ ३०१ ॥

मूलोपक्रमोपसंहारमाह—

**एतच्च नोक्तवद् युक्त्या, सर्वथा युज्यते यतः ।**
**नाभावो भावतां याति, व्यवस्थितमिदं ततः ॥६५॥३०२॥**

**एतच्चेति**—अनन्तरापादितमसद्भवनं चेत्यर्थः, **उक्तवद्युक्त्या** कथितजातीययुक्त्या, **सर्वथा** भावावधिशून्यम्, **न युज्यते** न घटते, **यतः** यस्माच्छक्त्यभावेनातिप्रसङ्गादिलक्षणकारणात् **ततः** तस्मात्, यदुक्तं प्राग् **नाभावो भावतां यातीति, इदम्** एतत्, **व्यवस्थितम्** युक्त्युपपन्नम् मृदादिरेव घटादिरूपेण मत इति यदेव कारणं कार्याभिन्नं तदेवोपादानमिति स्वाभिन्नोपादानककार्यवादलक्षणसत्कार्यवादस्यैव साम्राज्यमिति । उक्तदिशा व्यवस्थापितं सत्कार्यवादसाम्राज्यमसहमानस्यासत्कार्यवादिधौरेयतां दधानस्य नैयायिकस्य मतमनुत्थाप्य यथाऽपाकृतमुपाध्यायैस्तथा सोपस्कारमुपदर्श्यते, तथाहि—''अत्र नैयायिकः—ननु उक्तदिशा सत्कार्यवादसाम्राज्यं यदुपदर्शितं तन्न युक्तं, ''यत्समवेतं कार्यं भवति ज्ञेयं तु समवायि जनकं तत्'' इति वचनात् स्वसमवेतकार्यकारिण एव समवायित्वलक्षणोपादानत्वात् सत्कार्यकारित्वेनैव स्वोपादानत्वसंभवात्, द्रव्यगुणकर्मवर्तिनी परा जातिः सत्ता योपगता तत्समवायेनैव चार्थानां सत्त्वात्, तद्भिन्नस्यार्थक्रियाकारित्वलक्षणसत्त्वादेरुपाधिरूपतया 'सन् घटः, सन् पटः' इत्यादिप्रतीतिविषयत्वानभ्युपगमात्, घटादावनुत्पत्तिदशायां प्रतियोगितासम्बन्धेन प्रागभावसम्बन्धित्वलक्षणासत्त्वस्य संभवेऽपि समवायसम्बन्धावच्छिन्नसत्तानिष्ठप्रतियोगिताकाभावलक्षणासत्त्वाभावेनाविरोधात्; यदा घटसमवायिकारणे कपाले घटप्रागभावस्तदा तत्र समवायसम्बन्धेन घटसत्त्वाभ्युपगम एव विरोधात्, पूर्वकालावच्छेदेन घटप्रागभावाधिकरणे कपाले उत्तरकालावच्छेदेन घटसत्त्वे विरोधाभावात् ध्वंस-प्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यानभ्युपगमेन घटत्वावच्छिन्नेन, समं घटाभावस्य घटत्वावच्छिन्नप्रतियोगिताकाभावत्वेन विरोधस्य घटप्रागभावे वक्तुमशक्यत्वादिति चेत्?, न—विरोधस्य विशिष्यैव कल्प-

नात्, 'इदानीं सन् घटः प्राग् न सन्' इति धियः 'इदानीं श्यामः, प्राग् न श्यामः' इतिवदुभयैकरूपवस्त्ववगाहित्वात्, तथा च पूर्वकाले न घटप्रतियोगिकप्रागभाव उक्तप्रतीतिविषयोऽतिरिक्तः समस्ति येन तेन सममेककालावच्छेदेन विरोधमाश्रित्य प्रागभावरूपासत्त्वं तस्य भवेत् समवाये मानाभावाच्च समवायसम्बन्धावच्छिन्न-स्वनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वपर्यवसितसमवायिकारण-त्वलक्षणं स्वोपादानत्वमभ्युपगमार्हं स्यात्; न च 'गुण-क्रिया-जातिविशिष्टबुद्धयो विशेषणविशेष्यसम्बन्धविषयाः, विशिष्टबुद्धित्वात्, दण्डी पुरुष इतिवद्' इत्यनु-मानात् समवायसिद्धिरिति वाच्यं, भूतले घटो नास्ति घटाभाववद् भूतलमित्या-द्यभावविशिष्टबुद्धौ विशेषणविशेष्यसम्बन्धविषयकत्वाभावेऽपि विशिष्टबुद्धित्वस्य भावेन व्यभिचारादुक्तानुमानस्यासद्धेतुकत्वेन वस्त्वसाधकत्वात्; न च तासामपि स्वरूपसम्बन्धविषयकत्वान्न व्यभिचारः, तर्हि गुण-क्रिया-जातीनामपि स्वाश्रयेण समं स्वरूपसम्बन्ध एवास्त्विति स्वरूपसम्बन्धविषयकत्वेनैवार्थान्तरत्वात्, न चानन्तानां स्वरूपाणां सम्बन्धत्वकल्पनापेक्षयाऽतिरिक्तमेकं समवायमभ्युपगम्य तस्य सम्बन्धत्वकल्पने लाघवात् पक्षधर्मताबलेनैकसमवायसिद्धिः, पक्षबाहुल्य-प्रयुक्तलाघवस्यानुपादेयत्वात्, अन्यथा द्रव्य-गुण-क्रिया-जातिविशिष्टबुद्धय इत्येवं द्रव्यमपि पक्षेऽन्तर्भाव्य दण्डादेरपि पुरुषादिना समं समवायस्य सिद्ध्यापत्तेः, न च दण्ड-पुरुषयोः प्रत्यक्षेणैव संयोगसम्बन्धोऽनुभूयत इति तेन बाधात् समवायो नानुमानेन कल्पयितुं शक्य इति वाच्यं, प्रमाणसमाहारे प्रमेयसमाहाराविरोधात्; न च नानाविशेषणसम्बन्धे एकत्वानेकत्वादर्शनात् तत्र लघुगुरुविषयताऽसम्भ-वेऽपि सम्बन्धैकत्वानेकत्वयोर्दर्शनेन तत्र लघुगुरुविषयतासम्भवात् प्रत्येकविशिष्ट-बुद्धिपक्षीकरणे लाघवात् समवायसिद्धिः, स्वरूपसम्बन्धस्य सम्बन्धिद्वयात्मकत्वेन गौरवात्, धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायस्याप्येककल्पनालाघव-मूलत्वेनात्रानवतारादिति वाच्यं, द्रव्येऽपि तत्सिद्ध्यापत्तेः; न च संयोगत्वावच्छेदेन सम्बन्धत्वकल्पनात् तत्र सम्बन्धान्तरकल्पने लाघववैपरीत्यं, गुणगुण्यादिद्वये तु नैवमनुगतं धर्मान्तरमस्ति, येन क्लृप्तलाघवाद् वैपरीत्यं स्यादिति वाच्यम्, तत्र वस्तुत्व-सत्त्वाद्यवच्छेदेन सम्बन्धत्वकल्पनात्, किञ्च प्रतीतेर्विषयभेदोऽनुभवात् सामग्रीभेदाद्वा, न तु लाघवात्, अन्यथा सविषयत्वानुमानात् सम्बन्धविषय-त्वमेव सिद्ध्येदिति ।

अथ विशेषणविशेष्यसम्बन्धनिमित्तका इति साध्यं, हेतौ च सत्यत्वं

विशेषणम्, तथा च 'गुण-क्रिया-जातिविशिष्टबुद्धयो विशेषणविशेष्यसम्बन्धनिमित्तकाः सत्यविशिष्टबुद्धित्वात्' इत्यनुमानप्रयोगः, एवं च विशेषणविशेष्यसम्बन्धमन्तरेणैव जायमाने भ्रमात्मकविशिष्टबोधे सत्यविशिष्टबुद्धित्वाभावान्न व्यभिचारः, पक्षे हेतौ च बुद्धिपदं प्रत्यक्षपरं, तेन नांशतो बाध-व्यभिचारौ, अन्यथा पक्षे बुद्धिपदस्य ज्ञानसामान्यपरत्वेऽनुमित्याद्यात्मकपरोक्षगुणक्रियादिविशिष्टबुद्धेरपि पक्षतावच्छेदकधर्माऽऽक्रान्ततया तत्र विशेषणविशेष्यसम्बन्धनिमित्तकत्वलक्षणसाध्यस्याभावेन पक्षतावच्छेदकसामानाधिकरण्येन पक्षे साध्याभाववत्त्वलक्षणोंऽशतो बाधः स्यात्, हेतौ बुद्धिपदस्य ज्ञानसामान्यपरत्वे तु विशेष्यविशेषणसम्बन्धनिमित्तकत्वलक्षणसाध्याभाववति परोक्षविशिष्टबुद्धौ सत्यविशिष्टबुद्धित्वस्य सत्त्वेन व्यभिचारः स्यात्, तथा च निरुक्तानुमाने न समवायसिद्धिरिति चेत्?, न-गुणादिविशिष्टप्रत्यक्षे विशेषणसम्बन्धत्वेन न हेतुत्वं, सम्बन्धत्वस्य विशेषणविशेष्यभिन्नविशिष्टबुद्धिविषयत्वरूपस्य विषयत्वादिगर्भतया जनकतावच्छेदकत्वादिति मिश्रेणैवोक्तत्वात्, न च सम्बन्धत्वस्य विषयत्वादिगर्भत्वेन जनकतावच्छेदकत्वादेव गुणादिविशिष्टप्रत्यक्षे गुणादिसमवायत्वेन हेतुत्वम्; न च समवायत्वमपि नित्यसम्बन्धत्वं तत्र सम्बन्धत्वं विषयत्वादिगर्भत्वेन जनकतावच्छेदकमेवेति वाच्यं, समवायस्याखण्डतया तद्व्यक्तित्वेनैव हेतुत्वात्, तद्व्यक्तित्वं तादात्म्येन सा व्यक्तिरेवेति वाच्यम्, गुणादिसमवायत्वापेक्षया लघुभूतेन गुणत्वादिनैव हेतुत्वौचित्यात्; न चाभावादिविशिष्टबुद्धिव्यावृत्तानुभवसिद्धवैलक्षण्यविशेषवद्बुद्धित्वावच्छिन्नं प्रति समवायं विना नान्यन्नियामकम्, गुणत्वादिना हेतुत्वे गुणं विना क्रियादितः क्रियां विना गुणादितो वैलक्षण्यविशेषवद्बुद्धेरुत्पादेन व्यभिचारादिति वाच्यम्, वैलक्षण्यस्य जातिरूपस्य स्मृतित्वानुमितित्वादिना साङ्कर्यात्, विषयतारूपस्य च समवायासिद्ध्या दुर्वचत्वात्, एतेनैव वैलक्षण्यापाकरणेन सम्बन्धांशे विलक्षणविषयताशालिगुणादिविशिष्टप्रत्यक्षे तद्धेतुत्वमिति परास्तम्, वस्तुनस्तथाज्ञेयत्वस्वभावविशेषादेव ज्ञानविशेषाच्च, अन्यथा समूहालम्बन-विशिष्टबुद्ध्योरविशेषापातात्, भासमानवैशिष्ट्यप्रतियोगित्वरूपप्रकारताया दण्डी पुरुष इत्यादिविशिष्टबुद्धाविव दण्डपुरुषसंयोगा इत्यादिसमूहालम्बनज्ञानेऽपि सत्त्वात्, तत्र प्रकारविधया संयोगत्वेन भासमानसंयोगात्मकवैशिष्ट्यप्रतियोगित्वस्य दण्डे सत्त्वात्, स्वरूपतो भासमानं यद् वैशिष्ट्यं तत्प्रतियोगित्वं प्रकारत्वमित्युक्तौ 'दण्डी पुरुष' इति विशिष्टबुद्धौ

संयोगः संसर्गविधया स्वरूपत एव भासत इति स्वरूपतो भासमानवैशिष्ट्यप्रतियोगित्वं दण्डे समस्ति, दण्डपुरुषसंयोगा इति समूहालम्बनज्ञाने तु संयोगः संयोगत्वेन भासते न स्वरूपत इति स्वरूपतो भासमानवैशिष्ट्यप्रतियोगित्वलक्षणं प्रकारत्वं दण्डे नास्तीत्येवं विशिष्टबुद्धि-समूहालम्बनबुद्ध्योर्वैलक्षण्यमित्युक्तौ तु यत्र संयुक्तसमवायादेः संसर्गत्वं तत्र सम्बन्धद्वयविशेषणविशेष्यभावनिष्पन्नत्वरूपस्य परम्परासंसर्गस्याखण्डैकव्यक्तिरूपत्वाभावात् समवायस्य संयुक्तप्रतियोगिकत्वेनैव भानं न स्वरूपतः, तथा संयुक्तसमवायादिलक्षणपरम्परासम्बन्धे विशेषणतया प्रविष्टसंयोगस्यैव प्रकारप्रतियोगी न तु संयुक्तसमवायस्य, एवं जात्यखण्डोपाध्यतिरिक्तस्य किञ्चिद्रूपेणैव भानमिति नियमे जाग्रति 'दण्डी पुरुष' इति विशिष्टबुद्धौ संयोगसर्गस्य जात्यखण्डोपाध्यतिरिक्तस्य स्वरूपतो भासमानत्वमपि वक्तुं न शक्यते, जात्यखण्डोपाध्यतिरिक्तस्य प्रकारविधया यद् भानं तत् किञ्चिद्रूपेणैवेति नियमशरीरं परिकल्प्य संयोगस्य संसर्गविधया स्वरूपतो भानस्योपपादनमपि न सम्यक्, संसर्गतावच्छेदकसंयोगत्वभानमन्तरेण संयोगसंसर्गभानस्वीकारे संयोगितादात्म्यसंसर्गकबुद्धि-संयोगसंसर्गकबुद्ध्योर्वैलक्षण्यं न स्यात् संयोगितादात्म्यस्य संयोगरूपतयोभयत्र संयोगस्यैव संसर्गविधया भासमानत्वात्, अतस्तद्वैलक्षण्योपपत्तये संसर्गतावच्छेदकभानं स्वीकरणीयं, तथा च संयोगितादात्म्यस्य संसर्गत्वसंयोगितादात्म्यत्वं संसर्गतावच्छेदकतया भासते, संयोगस्य संसर्गत्वे संयोगत्वं संसर्गतावच्छेदकतया भासते, तयोश्च भेदाद् भवति तदुभयबुद्ध्योर्वैलक्षण्यम्, तथा च संयोगादिलक्षणवैशिष्ट्यस्य स्वरूपतो भासमानत्वं न सम्भवत्येवेत्यतो न स्वरूपतो भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वमित्युपगमेन 'दण्डी पुरुष' इति विशिष्टबुद्धि-दण्डपुरुषसंयोगा इति समूहालम्बनबुद्ध्योर्वैलक्षण्याश्रयणं श्रेयः, सांसर्गिकज्ञानस्यानुपनायकत्वेन निरुक्तप्रकारत्वस्यानुव्यवसायग्राह्यत्वासंभवात्, विषयविशेषं विना ज्ञाननिष्ठप्रकारिताख्यविषयिताविशेषाभ्युपगमे च साकारवादापातादिति दिक् ।

यत्तु गुण-क्रिया-जातिविशिष्टबुद्धयो विशेषण-विशेष्यसम्बन्धविषया विशिष्टबुद्धित्वादिति प्रथमानुमानादेव समवायसिद्धिः, समवायबोधोत्तरकालकल्पनीयेन स्वरूपसम्बन्धेनार्थान्तराभावात्'' इति पक्षधरमिश्रेणाभिहितम्, तदसत्–स्वरूपसम्बन्धत्वस्य परिणामविशेषरूपत्वात्, एकक्षेत्रावस्थितधर्मिद्वयस्वरूपसंयोगस्थलेऽपि स्वरूपस्यैव सम्बन्धत्वात्, अन्यथा 'कुण्ड एव बदरवैशिष्ट्यधीः, न तु

बदरे कुण्डवैशिष्ट्यधीः' इति नियमायोगात्, स्वरूपसम्बन्धत्वस्य संयोगसमवायातिरिक्ताघटितत्वात्, गुण-गुण्यादीनां समवायसम्बन्धस्वीकारेऽप्यसम्बन्धस्य तस्य सम्बन्धत्वाभावात् तत्सम्बन्धतया स्वरूपस्यावश्याभ्युपेयत्वे प्रथमत एव तस्यैवोपजीव्यत्वेनाभ्युपेयत्वात् ।

यदपि तद्घट-रूपयोर्विशिष्टबुद्धौ विनिगमनाविरहादुभयोः सम्बन्धिनोः सम्बन्धत्वं कल्पनीयं, तथा च लाघवादेक एव समवायः सम्बन्धत्वेन कल्प्यते, अभावस्थले त्वधिकरणानां नानात्वेऽप्येकस्यैकस्यैवाभावस्य सम्बन्धत्वं युक्तम्, इति न तत्र सम्बन्धान्तरकल्पनप्रतिबन्ध्यवकाश इति, तदपि न–समवायः, तत्र समवायत्वं, क्लृप्तभावभेदः, नानाधिकरणवृत्तित्वमित्यादिकल्पनायां महागौरवात् ।

एतेन 'गुण-गुण्यादिस्वरूपद्वये सम्बन्धत्वं कल्पनीयम्, अतिरिक्तसमवाये वेति विनिगमनाविरहादप्यन्ततः समवायसिद्धिः' इति मालाकृतो वचनमपहस्तितम्, जातेरनुगतत्वेन व्यक्तिसम्बन्धत्वौचित्ये जाति-व्यक्त्योः समवायोच्छेदापत्तेश्च, किञ्च रूपि-नीरूपव्यवस्थानुरोधेन रूपादीनां सम्बन्धत्वकल्पनाऽऽवश्यकत्वान्न समवायस्य सम्बन्धत्वम्, वाय्वादेर्नीरूपत्वस्य रूपीयतद्धर्मताख्यसम्बन्धाभावादेव पक्षधरमिश्रैरुपपादितत्वात्, तद्धर्मतायाश्च तद्रूपानतिरिक्तत्वात् ।

यत्तु 'रूपसमवायसत्त्वेऽपि वायौ स्वभावतो रूपाभावादेव नीरूपत्वम्' इति चिन्तामणिकृतोक्तं, तदसत्–प्रतियोगिसम्बन्धसत्त्वे तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावायोगात्, अथ प्रतियोगिसम्बन्धसत्त्वेऽपि तद्वत्ताया अभावात् तत्र तदभावाविरोधः; न च तत्सम्बन्धस्तद्वत्तानियतः, गगनीयसंयोगे व्यभिचारात्, गगनस्य सर्वमूर्तसंयोगित्वेन गगनप्रतियोगिकसंयोगस्य मूर्तमात्रे सत्त्वेऽपि गगनवत्त्वस्याभावात्; न च वृत्तितानियामकतदीयसम्बन्धस्तद्वत्तानियामकः, मूर्तमात्रे गगनीयसंयोगसम्बन्धस्तु न वृत्तितानियामक इति न व्यभिचार इति वाच्यम्, करस्थिते कपाले करे कपालमिति प्रतीत्यनुरोधेन कपालसंयोगस्य करवृत्तितानियामकतया तस्य कपाले सत्त्वेऽपि कपालाभावसत्त्वेन व्यभिचारात्, यत्र यद्वृत्तितानियामकः सम्बन्धः, तत्र तद्वत्त्वनियमः, करकपालसंयोगस्तु करे कपालवृत्तितानियामक इति करे कपालवत्त्वमस्ति, कपाले कपालवृत्तितानियामकस्तु स न भवति, अतो न कपाले कपालवत्त्वं किन्तु तत्सम्बन्धावच्छिन्नकपालनिष्ठप्रतियोगिताकाभाववत्त्वमिति न व्यभिचार इति चेत्? तर्हि रूपसमवायस्य वायुनिरूपितवृत्तित्वानियामकत्वादेव वायौ न रूपवत्त्वमिति चेत्? न–तत्र तद्वृत्तिता-

नियामकत्वं हि तत्र तद्विशिष्टबुद्धिजनकत्वम्, अस्ति च वायावपि 'इह रूपम्' इति धीः, वायौ रूपाभावप्रत्यक्षत्वादिनाऽपि वायौ विशिष्टबुद्धेरवश्यं स्वीकारात्, प्रतियोग्यारोपजन्यप्रतीतिविषयाभावत्वं संसर्गाभावत्वमिति लक्ष्यलक्षणभावानुगमनानुरोधेन वायौ रूपाभावप्रत्यक्षे वायौ रूपारोपस्य कारणत्वमिति वायौ रूपप्रतीतिरारोपरूपा न तु प्रमात्मिकेति तत्र तद्वृत्तितानियामकत्वं तत्र तद्विशिष्टप्रमितिजनकत्वमित्युक्तौ न रूपसमवायस्य वायुनिरूपितवृत्तितानियामकप्रसक्तिरिति चेत् ?, न-तदभावधियः सत्यत्वासिद्धौ तदप्रमात्वासिद्धेरिति मिश्रेणैवोक्तत्वात्, प्रतियोगित्वादेरनतिरेकेण तदनुयोगितानिरूपिततत्प्रतियोगिताकवैशिष्ट्यस्य तत्र तद्वृत्तितानियामकत्वस्य वक्तुमशक्यत्वात् ।

यत्तु "एकस्यैव समवायस्य किञ्चिदधिकरणावच्छेदेन रूपसम्बन्धत्वं किञ्चिदधिकरणावच्छेदेन रूपासम्बन्धत्वमिति कल्पनेनैव रूपि-नीरूपव्यवस्थोपपत्तिः" इति, तन्न-रूपसम्बन्धत्वं हि रूपप्रकारकविशिष्टज्ञानीयसंसर्गताख्यविषयताशालित्वं, तच्च तत्तदधिकरणावच्छेदेन तत्तदधिकरणान्तर्भावेण विशिष्टधीहेतुतयैव निर्वहतीति महागौरवात्, अस्माकं तु रूपप्रकारकविशिष्टबोधे रूपसम्बन्ध एव तन्त्रमिति लाघवात्, किञ्चैवंरूपसम्बन्धे न रूपसम्बन्धत्वमिति व्यवहारः प्रामाणिकः स्यात् ।

अन्ये तु-"रूपि-नीरूपव्यवस्थानुरोधान्नानैव समवायः, समनियतकालदेशावच्छेदकानां संख्या-परिमाण-पृथक्त्वादीनां चैक एवायम्, तदभिप्रायेणैव समवायैकत्वप्रवादः, युक्तं चैतत्, इत्थमेव चक्षुःसंयुक्तघटादिसमवायात् पटत्वादेः प्रत्यक्षानापत्तेः" इति वदन्ति, तदपि न-गुणत्वावच्छेदेन गुणिस्वरूपसम्बन्धत्वकल्पनादतिरिक्तसम्बन्धकल्पनानौचित्यात्, जले स्नेहस्य समवायो न गन्धस्येति प्रतीतिवद् घटरूपसम्बन्ध एव न घट-रसयोः सम्बन्ध इति प्रतीतेरपि सत्त्वात्, अतिरिक्तसमवायाननुभवात् अपृथग्भावस्यैव समवायपदार्थत्वात्, यदि पुनरेवमप्यनुगतसम्बन्धधीनिर्वाहायातिरिक्तसमवायाभ्युपगमो न त्यज्यते, तदा लाघवादभावादिसाधारणं वैशिष्ट्यमेव किमिति नाभ्युपैमि; न चैवं घटवति भूतले घटाभावधीप्रसङ्गः, तदानीं तदधिकरणतास्वाभाव्याभावस्य वक्तुमशक्यत्वात्, स्वभावस्य यावद्द्रव्यभावित्वात्, रक्ततादशायां घटे श्यामाधिकरणतास्वाभाव्येऽपि श्यामाभावेन तदंशे लौकिकप्रत्यक्षाभावादिति वाच्यम्, शाखावच्छिन्नसंयोगसमवायस्य मूलावच्छेदेनेव वैशिष्ट्यस्य तत्काले तदधिकरणावच्छेदेन

पटाभावं प्रत्यसम्बन्धत्वात्, न च तत्र शाखासमवायोभयमेव सम्बन्धः, न तु समवायस्य सम्बन्धत्वे शाखाऽवच्छेदिकेति वाच्यम्, शाखावच्छेदेन समवायसम्बन्धावच्छिन्नसंयोगनिष्ठप्रतियोगिताकाभावग्रहेऽपि शाखायां संयोगीति बुद्ध्यापत्तेः, तत्र शाखासमवायोभयसम्बन्धावच्छिन्नसंयोगनिष्ठप्रतियोगिताकाभावग्रहस्यैव विरोधित्वात्, शाखायां संयोगीति बुद्धौ शाखावच्छेदेन समवायसम्बन्धावच्छिन्नसंयोगनिष्ठप्रतियोगिताकाभावग्रहस्यापि प्रतिबन्धकत्वकल्पने गौरवात्; अस्तु वा इदानीं पटाभाव इत्यत्रापि तत्काल-वैशिष्ट्योभयसम्बन्धावच्छिन्नपटनिष्ठप्रतियोगिताकाभाव एव विषय इति न किञ्चिदनुपपन्नम्; न च समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन हेतुत्वात् तादात्म्यसम्बन्धावच्छिन्नकारणतानिरूपितजन्यभावत्वावच्छिन्नकार्यतावच्छेदकतया समवायसिद्धिः, कालिकविशेषणताभिन्नवैशिष्ट्यसम्बन्धेन जन्यभावत्वावच्छिन्नं प्रत्येव तादात्म्येन द्रव्यत्वेन हेतुत्वात्। अथ प्रतियोगितासम्बन्धेन घटादिसमवेतनाशं प्रति स्वप्रतियोगिसमवेतत्व कालिकसम्बन्धेन स्वाधिकरणत्वोभयसम्बन्धेन घटादिनाशस्य हेतुत्वात् समवायसिद्धिः, स्वप्रतियोगिसमवेतत्वसम्बन्धमात्रेण घटादिनाशस्य कारणत्वे घटत्वादिजातावपि तत्सम्बन्धेन घटादिनाशस्य सत्त्वाद् घटत्वादिजातेरपि घटादिसमवेताया नाश आपद्येतेत्यतः कालिकसम्बन्धेन स्वाधिकरणत्वस्य कारणतावच्छेदकसम्बन्धतयाऽऽश्रयणम्, नित्ये कालिकायोगाद् घटत्वादिजातौ न कालिकसम्बन्धेन घटनाशाधिकरणत्वमिति तद्घटितोभयसम्बन्धेन तत्र कारणाभावान्न तन्नाशापत्तिः, स्वप्रतियोगिसमवेतत्वरूपकारणतावच्छेदकसम्बन्धस्थाने स्वप्रतियोगिवृत्तित्वस्य ग्रहणे घटादिनिरूपितवैशिष्ट्यसम्बन्धावच्छिन्नवृत्तित्वविशिष्टप्रतियोगिताकनाशस्य कार्यतयाऽऽश्रयणे च घटादिनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्ववतो ध्वंसस्यापि ध्वंसापत्तेः; न च द्वित्रक्षणस्थायिघटादिसमवेतनाशे स्वप्रतियोगिसमवेतत्वसम्बन्धेनैव घटनाशस्य हेतुत्वाद् घटत्वादिजातिनाशापत्तेश्च प्रतियोगितासम्बन्धेन नाशं प्रति तादात्म्येन सत्त्वेन हेतुत्वकल्पनादेव वारणादिति वाच्यम्, द्वित्रक्षणस्थायिघटादिसमवेतनाशेऽपि कालावच्छिन्नस्वप्रतियोगिसमवेतत्वसम्बधेन घटादिनाशस्य हेतुत्वादेवानतिप्रसङ्गादिति चेत्?, न–उक्ते हेतुतावच्छेदकेऽक्लृप्तसमवायनिवेशापेक्षया क्लृप्तसत्त्वनिवेशस्यैवोचितत्वात्, द्रव्यजात्यन्यचाक्षुषे महदुद्भूतरूपवद्भिन्नसमवेतत्वेन प्रतिबन्धकत्वात् समवायसिद्धिरित्यपि वार्त्तम्, द्रव्यान्यसच्चाक्षुषत्वावच्छिन्नं प्रति महदुद्भूतरूपवद्भिन्नवृत्तित्वेन प्रतिबन्धकत्वसम्भवादिति न किञ्चिदेतत्" इति ॥ ६५ ॥ ३०२ ॥

सामग्रीपक्षमधिकृत्याह—

**याऽपि रूपादिसामग्री, विशिष्टप्रत्ययोद्भवा ।**
**जनकत्वेन बुद्ध्यादेः, कल्प्यते साऽप्यनर्थिका ॥ ६६ ॥ ३०३ ॥**

याऽपीति । **रूपादिसामग्री** रूपा-ऽऽलोक-नमनस्कार-चक्षुस्सन्निधानादि-लक्षणा, **विशिष्टप्रत्ययोद्भवा** विशिष्टकारणजन्या, स्वहेतुसन्निधिपरम्परोपजनितविशेषा इति यावत्, **जनकत्वेन बुद्ध्यादेः** बुद्ध्यादेः कार्यजातस्य जनकत्वेन चरमैव, **कल्प्यते** अनुमीयते, समर्थस्य कालक्षेपायोगेन कार्यजनकानां सामग्र्यामनुप्रवेशात्, **साऽपि** बुद्ध्यादिकार्यजनकत्वेनानुमित्यात्मककल्पना-गोचरीकृता सामग्र्यपि, **अनर्थिका** अभीष्टार्थविकला ॥ ६६ ॥ ३०३ ॥

एतदेव भावयति—

**सर्वेषां बुद्धिजनने, यदि सामर्थ्यमिष्यते ।**
**रूपादीनां ततः कार्यभेदस्तेभ्यो न युज्यते ॥ ६७ ॥ ३०४ ॥**

**सर्वेषामिति**–अस्य रूपादीनामित्यनेनान्वयः, अखिलानामेव रूपा-ऽऽलोक-मनस्कार-चक्षुस्सन्निधानादीनामित्यर्थः, **बुद्धिजनने** बुद्धिस्वरूपैकजातीय-कार्योत्पादने, **यदि सामर्थ्यं** यदि शक्तिः, **इष्यते** स्वीक्रियते, एककार्यं तु पुञ्जात् पुञ्जोत्पत्तिरित्यभ्युपगन्तृसौत्रान्तिक-वैभाषिकमते रूपादिजन्यमप्रसिद्धम्, तन्मते सञ्चितेभ्यः परमाणुभ्यः सञ्चितानामेव परमाणूनामुत्पादात्, एकं तु घटादिकं तन्मते संवृति सदेवेति तस्य तदजन्यत्वात्, ज्ञानस्यापि ग्राह्यग्राहकाकारद्वयप्रतिभासनान्नाखण्डैकरूपत्वं किन्तु तदपि पुञ्जरूपमिति बोध्यम्, **रूपादीनाम् ततः** रूपादीनां बुद्ध्यादिलक्षणैककार्यजनकत्वतः, **तेभ्यः** रूपादिभ्यः सकाशात्, **कार्यभेदः** रूपाद्रूपमुपादेयकार्यम्, एवमालोकादालोक उपादेय-कार्यः, ज्ञानं तु सर्वेषां सहकार्यकार्यमिति रूपादिकार्यविशेषस्तदुपगतः, **न युज्यते** न घटते, किन्तु बुद्धिरेवैका रूपादिभ्यः स्यात् ॥ ६७ ॥ ३०४ ॥

न च रूपादिभ्यः कार्यभेदो माऽस्त्वेवेत्यत आह—

**रूपालोकादिकं कार्यमनेकं चोपजायते ।**
**तेभ्यस्तावद्ध्रुव एवेति, तदेतच्चिन्त्यतां कथम् ? ॥ ६८ ॥ ३०५ ॥**

रूपेति । **रूपालोकादिकं कार्यं** स्वस्वसन्तानगतं रूपालोकादिकं कार्यम्,

**अनेकं च विभिन्नं च उपजायते** उत्पद्यते, तदेतत् विभिन्नकार्यजननम्, **तेभ्यः** रूपालोकादिभ्यः, **तावद्भ्य एव** तावत्संख्यकेभ्य एव, **कथं** केन प्रकारेण स्यात्?, न कथञ्चित् स्यादित्यर्थः, **इति चिन्त्यताम्** इत्थं विचार्यताम्, बुद्धिजननसमर्थेभ्यो रूपादिभ्यो बुद्धिरेवैका जनिता, अतिरिक्तानि च रूपादीनि यानि स्वसन्ततिगतरूपादिजननसमर्थानि स्युः, तानि नान्यतः समागतानीति रूपादीनां स्वसन्ततिगतानामनुत्पादात् तत्तत्सन्तत्युच्छेदः स्यादित्याशयः ॥ ६८ ॥ ३०५ ॥

दोषान्तरमभिधित्सुराह—

**प्रभूतानां च नैकत्र, साध्वी सामर्थ्यकल्पना ।**
**तेषां प्रभूतभावेन, तदेकत्वविरोधतः ॥ ६९ ॥ ३०६ ॥**

**प्रभूतानां** चेति–बहुसंख्यकानां विभिन्नानां रूपादीनां चेत्यर्थः, **एकत्र** एकजातीये बुद्ध्यादिकार्ये, **सामर्थ्यकल्पना** शक्तिसमर्थना, **न** नैव, **साध्वी** समीचीना, कुतो न साध्वीत्याकाङ्क्षायामाह—**तेषामिति**–रूपादीनामित्यर्थः, **प्रभूतभावेन** विभिन्नत्वेन, **तदेकत्वविरोधतः** कार्यैकत्वविरोधात् कारणानां विभिन्नत्वे कार्याणामपि विभिन्नत्वस्यैव न्याय्यत्वात् ॥ ६९ ॥ ३०६ ॥

एतदेव भावयति—

**तानशेषान् प्रतीत्येह, भवदेकं कथं भवेत्? ।**
**एकस्वभावमेकं यत्, तत् तु नानेकभावतः ॥ ७० ॥ ३०७ ॥**

**तानिति**- समर्थानित्यर्थः, **अशेषान्** समस्तान्, **प्रतीत्य** आश्रित्य, **इह** लोके, **भवत्** उत्पद्यमानं कार्यम्, **एकं कथं भवेत्** एकमेव कथं स्यात्? अनेककारणप्रभवमेकं नैव भवेदित्यर्थः, अत्रोपपत्तिः–**यत्** यस्मात्, **एकस्वभावमेकम्** उच्यते इति शेषः, **तत्तु** एकस्वभावं पुनः **अनेकभावतः** अनेकेभ्यो रूपालोकादिभ्यः कारणेभ्यो बुद्धेरुत्पत्तेः, **न** न घटते ॥ ७० ॥ ३०७ ॥

किमित्येतदेवमित्याकाङ्क्षायामाह—

**यतो भिन्नस्वभावत्वे, सति तेषामनेकता ।**
**तावत् सामर्थ्यजत्वे च, कुतस्तस्यैकरूपता? ॥ ७१ ॥ ३०८ ॥**

**यत इति**–यस्मादित्यर्थः, **भिन्नस्वभावत्वे सति** नानास्वभावत्वे सति, **तेषां** रूपालोकादीनाम्, **अनेकता** विभिन्नरूपता, अन्यथा तु तेषामप्येकरूपतैव

स्यात्, ततः किमित्यत आह-**तावत्सामर्थ्यजत्वे चेति**-तावत्कारणशक्तिजन्यत्वे पुनरित्यर्थः, **तस्य** बुद्ध्यादेः कार्यस्य, **एकरूपता** अभिन्नस्वभावता **कथं** न कथञ्चित्, रूपसामर्थ्यजन्यत्वालोकसामर्थ्यजन्यत्वादिस्वभावभेदात् ॥ ७१ ॥ ३०८ ॥

एतदेव समर्थयति—

**यज्जायते प्रतीत्यैकसामर्थ्यं नान्यतो हि तत् ।**
**तयोरभिन्नतापत्तेर्भेदे भेदस्तयोरपि ॥ ७२ ॥ ३०९ ॥**

**यज्जायते** इति-यत् कार्यमुत्पद्यत इत्यर्थः, **एकसामर्थ्यम्** कारणगतमेकसामर्थ्यम्, **प्रतीत्य** आश्रित्य, **हि** यतः, **तत्** तदेव कार्यम्, **अन्यतः** कारणसामर्थ्यान्तरात्, **न** नैव जायते, कुतो न जायत इत्यपेक्षायामाह-**तयोरिति**-कारण-सामर्थ्ययोरित्यर्थः, **अभिन्नतापत्तेः** एकत्वप्रसङ्गात्, एककार्यजनकत्वेनैकस्वभावस्य न्याय्यत्वात्, **भेदे** कारण-सामर्थ्ययोः कुतश्चित् कारणात स्वभावभेदेऽङ्गीक्रियमाणे, **तयोरपि** कारण-सामर्थ्योभयजन्ययोर्बुद्ध्याद्योरपि, **भेदः** विभिन्नता स्यात् रूपसामर्थ्यजन्यत्वालोकसामर्थ्यजन्यत्वलक्षणस्वभावभेदात् ॥ ७२ ॥ ३०९ ॥

पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**न प्रतीत्यैकसामर्थ्यं, जायते तत्र किञ्चन ।**
**सर्वसामर्थ्यभूतिस्वभावत्वात् तस्य चेन्न तत् ॥ ७३ ॥ ३१० ॥**

**न प्रतीत्यैकसामर्थ्यमिति**-एककारणगतसामर्थ्यमाश्रित्य नेत्यर्थः, **जायते** उत्पद्यते, **तत्र** कार्ये **किञ्चन** किमपि, प्रत्येककारणसामर्थ्यप्रभवत्वनियतं कार्ये किमपि रूपं नास्तीत्यर्थः, कुत एवमित्यत आह-**सर्वेति**, **तस्य** बुद्ध्यादिलक्षणाधिकृतकार्यस्य, **सर्वसामर्थ्यभूतिस्वभावत्वात्** अधिकृतसकलकारणसामर्थ्यापेक्षोत्पत्त्येकस्वभावत्वात्, **चेत्** इति चेत्, एवं यदि परो मन्यते, **न तत्** नैतत् परमन्तव्यं युक्तम् ॥ ७३ ॥ ३१० ॥

प्रतिक्षेपहेतुमुपदर्शयति—

**प्रत्येकं तस्य तद्भावे, युक्ता ह्युक्तस्वभावता ।**
**न हि यत् सर्वसामर्थ्यं, तत् प्रत्येकत्ववर्जितम् ॥ ७४ ॥ ३११ ॥**

**प्रत्येकमिति**-एकमेकं प्रति प्रत्येकं, रूपादिकमेकैकमपेक्ष्येत्यर्थः, **तस्य** बुद्ध्या-

देरधिकृतकार्यस्य, **तद्भावे** तेभ्यो रूपादिभ्य उत्पत्तिस्वभावत्वे, **हि** निश्चितम् **उक्तस्वभावता** सर्वसामर्थ्यभूतिस्वभावता, **युक्ता** सङ्गता, प्रत्येकसामर्थ्यजन्यत्वे सत्येव सर्वसामर्थ्यजन्यत्वमित्यत्र युक्तिमुपदर्शयति–**न** हीति, **यत् सर्वं सामर्थ्यं** सर्वकारणसामर्थ्यं यत्, **तत्** सर्वसामर्थ्यं, **प्रत्येकत्ववर्जितम्** प्रत्येकसामर्थ्यभिन्नम्, प्रत्येकावृत्तिधर्मस्य समुदायावृत्तित्वनियमात् ॥ ७४ ॥ ३११ ॥

प्रत्येकसामर्थ्यं च प्रतिक्षिप्तमेवेति दर्शयति—

**अत्र चोक्तं न चाप्येषां, तत्स्वभावत्वकल्पना ।**
**साध्वीत्यतिप्रसङ्गादेरन्यथाप्युक्तिसम्भवात् ॥ ७५ ॥ ३१२ ॥**

**अत्र चे**ति–प्रत्येककारणसामर्थ्यजन्यत्वस्वभावपक्षे चेत्यर्थः, **उक्तम्**, यज्जायते प्रतीत्यैकसामर्थ्यं नान्यतो हि तदित्यनेनोक्तम्, दोषान्तरमप्याह–**न चापी**ति । **एषाम्** अधिकृतसकलहेतूनाम्, **तत्स्वभावत्वकल्पना** सर्व एव रूपादयो बुद्धिलक्षणकार्यजननस्वभावाः, बुद्धिश्च सर्वकारणजन्यस्वभावेत्येवं प्रकृतफलजननस्वभावत्वकल्पना, **साध्वी** अत्र **न** चेत्यस्यान्वयान्नैव न्याय्या, **अतिप्रसङ्गादेः** न्याय्यत्वाभावेऽयं हेतुः, प्रत्येकमकारणत्वेऽपि तत्समग्राणि यदि तज्जननस्वभावानि तदा समग्रान्तराण्यपि तज्जननस्वभावानि स्युरित्यतिप्रसङ्गः, आदिशब्दादेक एव तज्जननस्वभावोऽस्तु शेषा उपनिमन्त्रितकल्पा इत्यादिदोषसङ्ग्रहः, युक्तिवैकल्येऽपि तत्स्वभावत्वोक्तौ तु दोषमाह—**अन्यथाऽपी**ति–प्रकारान्तरेणापीत्यर्थः, **उक्तिसम्भवात्** वचनप्रवृत्तिसम्भवात्, समग्रान्तराणामपि तत्कार्यजननस्वभावत्ववचनसम्भवात्, साध्वीतीत्यत्रेति शब्द आद्यपक्षसमाप्त्यर्थः ॥ ७५ ॥ ३१२ ॥

मौलं विकल्पमधिकृत्य पक्षान्तरमाह—

**अथान्यत्रापि सामर्थ्यं, रूपादीनां प्रकल्प्यते ।**
**न तदेव तदित्येवं, नाना चैकत्र तत् कुतः ? ॥ ७६ ॥ ३१३ ॥**

**अथे**ति–शङ्कायामथशब्दः, **अन्यत्रापि** बुद्ध्यादिभिन्नस्य सन्ततावपि, **सामर्थ्यं** रूपादिजनिका शक्तिः, **रूपादीनां** रूपादीनां समग्राणाम्, **प्रकल्प्यते** अभ्युपगम्यते, समाधाता अत्र दोषमुपदर्शयति–**ने**ति, **तदेव** बुद्ध्यादिजननसामर्थ्यमेव, **तद्** नञोऽन्वयादन्यत्रापि सामर्थ्यं न, यदेव बुद्ध्यादिजननसामर्थ्यं तदेव यदि रूपादिजननसामर्थ्यं तदा बुद्ध्यादिजननसमर्थेभ्यो रूपादिभ्यो यथा जायमानस्य बुद्ध्यादेर्बुद्ध्यादित्वं तथा तेभ्य एव तथाभूतेभ्यो जायमानस्यान्यस्यापि

रूपादेर्बुद्ध्यादित्वप्रसङ्गात्, **इति** एतस्मात् कारणात्, **एवम्** अमुना प्रकारेण, **नाना** बुद्धिरूपादिजननसामर्थ्यमनेकम्, अथवा चकार एवमित्यनेन समभिव्याहृतः, एवं च नानात्वे च, **एकत्र** एकस्वभावे च रूपादौ, **तत्** उक्तदिशाऽनेकं बुद्धिरूपादिजननसामर्थ्यम्, **कुतः** कस्मात्?, नानासामर्थ्यस्वभावत्वेन सर्वथैकत्वविरोधात् ॥ ७६ ॥ ३१३ ॥

परपक्ष एव दोषान्तरं दर्शयति—

**सामग्रीभेदतो यश्च, कार्यभेदः प्रगीयते ।**
**नानाकार्यसमुत्पाद, एकस्याः सोऽपि बाध्यते ॥ ७७ ॥ ३१४ ॥**

**सामग्रीभेदत** इति–सामग्रीविशेषादित्यर्थः, **यश्च** योऽपि, **कार्यभेदः** कार्यविशेषः, **प्रगीयते** तत्र सुगतसुतैः प्रतिज्ञायते, **सोऽपि** सामग्रीविशेषात् कार्यविशेषोऽपि, **एकस्याः** एकस्या एव सामग्र्याः, **नानाकार्यसमुत्पादे** रूपालोकादिनानाकार्यसमुत्पादेऽभ्युपगम्यमाने सति, **बाध्यते** बाधितो भवति, सामग्र्यविशेषेऽपि कार्यविशेषादित्याशयः ॥ ७७ ॥ ३१४ ॥

अत्रैव पराभिमतपरिहारे दोषमुपदर्शयति—

**उपादानादिभावेन, न चैकस्यास्तु संगता ।**
**युक्त्या विचार्यमाणेह, तदनेकत्वकल्पना ॥ ७८ ॥ ३१५ ॥**

**उपादानादिभावेने**ति–अत्र उपादानादिभेदेनेति पाठ उपाध्यायव्याख्यास्वारस्यात्, मुद्रितहरिभद्रसूरिटीकोपेतमूले 'उपादानादिभोगेन' इति पाठो न समीचीनः, तट्टीकास्वारस्याभावात्, उपादानादीत्यादिपदात् सहकारिपरिग्रहः, तथा च ज्ञाने जननीये मनस्कारादेरुपादानत्वेन रूपालोकादीनां सहकारित्वेन सभागसन्ततौ रूपालोकादौ जननीये रूपालोकादीनामुपादानत्वेन तदन्येषां सहकारित्वेन चेत्यर्थः, **एकस्यास्तु** सामान्यत एकस्या एव सामग्र्याः, अवान्तरसामग्रीभेदेन, **युक्त्या** न्यायेन, **विचार्यमाणा** विचारपद्धतिमानीयमाना, **इह** प्रस्तुतविचारे, **तदनेकत्वकल्पना** सामग्र्यनेककल्पना, 'अनेकास्ताः सामग्र्यः' इत्येवंरूपा, **न च सङ्गता** नैव न्याय्या ॥ ७८ ॥ ३१५ ॥

यथा न सङ्गता तथा भावयति—

**रूपं येन स्वभावेन, रूपोपादानकारणम् ।**
**निमित्तकारणं ज्ञाने, तत् तेनान्येन वा भवेत् ॥ ७९ ॥ ३१६ ॥**

रूपमिति, अत्र पूर्वार्द्धं व्यक्तम्, तत् रूपं, तेन तेनैव स्वभावेन, ज्ञाने ज्ञानरूपकार्ये, निमित्तकारणम् भवेदित्यनेन सम्बन्धः, अन्येन वा रूपोपादानकारणनियामकस्वभावभिन्नस्वभावेन वा, ज्ञाने निमित्तकारणं भवेदिति पक्षद्वयम् ॥ ७९ ॥ ३१६ ॥

किञ्चात इत्याकाङ्क्षायामाह—

**यदि तेनैव विज्ञानं बोधरूपं न युज्यते ।**
**अथान्येन बलाद्रूपं, द्विस्वभावं प्रसज्यते ॥ ८० ॥ ३१७ ॥**

यदीति । **तेनैव** रूपोपादानस्वभावेनैव ज्ञानजननस्वभावं रूपमिति यदि प्रथमपक्ष आश्रीयते तदा **विज्ञानं बाधरूपं न युज्यते** कार्ये स्वगतसकलविशेषाधायकत्वलक्षणमुपादानत्वं रूपादेर्यदि ज्ञानेऽपि जननीये स्यात् तदा ज्ञानं रूपादिस्वरूपतामेवाऽऽसादयेत्, ज्ञानस्वरूपतां जह्यात्, रूपोपादानस्वभावभिन्नस्वभावेन रूपं ज्ञाने निमित्तकारणमिति द्वितीयपक्षे त्वाह–**अथे**ति–यदीत्यर्थः, **अन्येन** उपादेयजननस्वभावभिन्नस्वभावेन, रूपं बोधजनकमिति प्रकृतम्, **बलात्** त्वदिच्छामुल्लङ्घ्य सामर्थ्यात्, **द्विस्वभावं** रूपलक्षणोपादेयजननस्वभावविज्ञानलक्षणसहकार्यकार्यजननस्वभावेत्येवं द्विस्वभावं, **रूपं प्रसज्यते** आपद्यते, न च रूपस्य द्विस्वभावत्वं भवत इष्टम्, उपादान-सहकारिशक्तिभेदेऽपि रूपस्यैकत्वेनैव स्वसंवेदनेऽवभासनादेकत्वाभ्युपगमे जनकत्वाजनकत्वलक्षणविभिन्नधर्मवतोऽप्यक्षणिकस्य स्वसंविद्येकत्वेनावभासनादेकत्वाभ्युपगमे बाधकाभावात्, अथ न स्वभावभेदाद् भावभेदः, अपि तु विरुद्धस्वभावभेदात्, तत्कार्यजनकत्वाजनकत्वे चाक्षणिकस्य स्वभावौ, उपादानत्व-सहकारिशक्त्योश्च न विरोध इति न दोष इति चेत्?, न–तथाऽप्यनेकशक्तितादात्म्यानुविद्धैकरूपलक्षणाद्यभ्युपगमेऽनेकान्तप्रसङ्गात्, शक्तीनां शक्तिमतोऽभेद एवेत्यभ्युपगमे च 'इदमुपादानम्, इदं च सहकारिकारणम्' इत्यादिविभागाभावप्रसङ्गादित्युपाध्यायाः ॥ ८० ॥ ३१७ ॥

एकमेव रूपमबुद्धिजनकव्यावृत्तत्वेन बुद्धिजनकमरूपजनकव्यावृत्तत्वेन रूपजनकमिति कल्पनया विभागो भविष्यतीति पराकूतमाशङ्क्य परिहरति—

**अबुद्धिजनकव्यावृत्त्या, चेद् बुद्धिप्रसाधकः ।**
**रूपक्षणो ह्यबुद्धित्वात्, कथं रूपस्य साधकः? ॥ ८१ ॥ ३१८ ॥**

अबुद्धीति, **अबुद्धिजनकव्यावृत्त्या** रूपक्षणोऽबुद्धिजनकेभ्यो व्यावृत्त इति

कृत्वा, चेत् यदि, बुद्धिप्रसाधकः बुद्ध्युपधायकः, रूपक्षणः रूपात्मकक्षणः, इति विकल्प्यते, तदा हि निश्चितम्, अबुद्धित्वात् स्वसन्ततिगतरूपात्मककार्यस्य बुद्धिभिन्नत्वात्, स रूपक्षणः रूपस्य उपादेयस्य रूपस्य, कथं साधकः कथं जनकः?, यो ह्यबुद्धिजनकव्यावृत्तः सोऽबुद्धिजनको न भवितुमर्हतीति ॥ ८१ ॥ ३१८ ॥

पराभिप्रायमभिधित्सुः परो भूत्वाऽऽह—

**स हि व्यावृत्तिभेदेन, रूपादिजनको ननु।**
**उच्यते व्यवहारार्थमेकरूपोऽपि तत्त्वतः ॥ ८२ ॥ ३१९ ॥**

**स हीति**—रूपक्षण इत्यर्थः, **ननु** निश्चितम्, **तत्त्वतः** याथार्थ्येन, **एकरूपोऽपि** एकस्वभावोऽपि, **व्यवहारार्थं** विभिन्नव्यवहारोपपत्तये, **व्यावृत्तिभेदेन** अरूपजनकव्यावृत्त्यबुद्धिजनकव्यावृत्तीत्यादिव्यावृत्तिविशेषेण, **रूपादिजनकः** अरूपजनकव्यावृत्तितो रूपजनकः, अबुद्धिजनकव्यावृत्तितो बुद्धिजनकः, **उच्यते** कथ्यते, विरुद्धधर्मयोरेकत्रावस्थानासम्भवेऽपि विषयसत्त्वानियन्त्रिता कल्पना त्वप्रतिबद्धा स्यादेवेत्याशयः ॥ ८२ ॥ ३१९ ॥

अत्रोत्तरयति—

**अगन्धजनकव्यावृत्त्यायं कस्मान्न गन्धकृत्?।**
**उच्यते तदभावाच्चेद्, भावोऽन्यस्याः प्रसज्यते ॥८३॥३२०॥**

**अगन्धजनकव्यावृत्त्येति**—अगन्धजनकभिन्नत्वेन कल्पितेनेत्यर्थः, **अयं** रूपक्षणः, **कस्मान्न गन्धकृत्** व्यवहारार्थमेव कुतो न गन्धजनकः?, **उच्यते** कथ्यते, **तदभावाच्चेत्** अगन्धजनकव्यावृत्त्यभावाद् यदि गन्धजनको रूपक्षण इत्येवं नोच्यते, तदा **अन्यस्याः** अबुद्धिजनकव्यावृत्तेः, **भावः** परमार्थतः सत्त्वम्, **प्रसज्यते** आपद्यते ॥ ८३ ॥ ३२० ॥

भवत्वेवं ततः किमित्याकाङ्क्षायामाह—

**एवं व्यावृत्तिभेदेऽपि, तस्यानेकस्वभावता।**
**बलादापद्यते सा चायुक्ताभ्युपगमक्षतेः ॥ ८४ ॥ ३२१ ॥**

**एवमिति**—उक्तप्रकारेणेत्यर्थः, **व्यावृत्तिभेदेऽपि** एकस्य रूपक्षणस्यैकरूपेण रूपक्षणं प्रति बुद्धिं प्रति च कारणत्वे एकस्वभावकारणप्रभवयोस्तयोरेकजातीयत्वप्रसङ्गो मा नामापतेदित्येतदर्थं रूपं प्रति रूपाजनकव्यावृत्तत्वेन कारणत्वं बुद्धिं

प्रति बुद्ध्यजनकव्यावृत्तत्वेन कारणत्वमित्येवं विभिन्नकारणतावच्छेदके भेदविशेषेऽङ्गीक्रियमाणेऽपि, **तस्य** रूपक्षणात्मकवस्तुनः, **बलात्** पराभ्युपगमातिक्रमतः, **अनेकस्वभावता** अबुद्धिजनकव्यावृत्तत्वारूपजनकव्यावृत्तत्वलक्षणानेकस्वभावता, **आपद्यते** प्रसज्यते, **सा च** एकस्यानेकस्वभावता पुनः, **अभ्युपगमक्षतेः** प्रतिज्ञातविरोधात्, **अयुक्ता** अन्याय्या, अथ आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायेन रूपक्षणेन रूपक्षणानुत्पादेरूपसन्ततिरेव न प्रवर्तेतेति रूपक्षणस्य रूपजनकत्वमवश्यं कल्पनीयम्, एवं रूपालोकादितो बुद्धिरुपजायत इति रूपक्षणस्य बुद्धिजनकत्वमप्यवश्यं कल्पनीयं, न चैकस्यानेकत्वप्रसङ्गभयाद्वास्तविकं स्वभावद्वयमित्यरूपजनकत्वव्यावृत्त्या रूपजनकत्वस्याबुद्धिजनकत्वव्यावृत्त्या बुद्धिजनकत्वस्य च कल्पनायामपि रूपक्षणतो गन्धसन्ततिर्न भवति, किन्तु गन्धक्षणत एव गन्धसन्ततिरिति रूपक्षणस्यागन्धजनकत्वव्यावृत्त्या गन्धजनकत्वाकल्पनायामपि न काचित् क्षतिरिति गन्धजनकत्वं न कल्प्यत इति न दोष इति चेत् ?, न–रूपत्वादिना रूपादेर्बुद्ध्यादिकं प्रत्यन्वयव्यतिरेकग्रहेण गृहीतान्वयव्यतिरेकितावच्छेदकेन रूपत्वादिनैव रूपादेर्बुद्ध्यादिहेतुत्वौचित्यात्, इतरव्यावृत्तेर्दुर्ग्रहत्वेन तद्रूपेणान्वयव्यतिरेकाग्रहेण गृहीतान्वयव्यतिरेकितानवच्छेदिकयेतरव्यावृत्त्या कारणतावच्छेदासम्भवात्, कल्पनातः कारणतावच्छेदकत्वांश इव कारणतांशेऽप्यनाश्वासात्, स्वलक्षणासंस्पर्शेऽपि कल्पनाप्रसरात्, व्यावृत्तिभेदस्यापि स्वलक्षणसंस्पर्शे च व्यावृत्तिभेदानुगतनानाक्षणवृत्तित्वस्यापि स्वलक्षणसंस्पर्शप्रसङ्गात्, व्यावृत्तिभेदेन कारणक्षणानां कार्यक्षणानां चानुगमे एकैकग्रहविनिर्मोकाभ्यामविनिगमात्, विशिष्य हेतुताग्रहे चोपायाभावादितीत्थं परामृशन्त्युपाध्यायाः ॥ ८४ ॥ ३२१ ॥

दोषान्तरमाह—

**विभिन्नकार्यजननस्वभावाश्चक्षुरादयः ।**
**यदि ज्ञानेऽपि भेदः स्यान्न चेद् भेदो न युज्यते ॥८५॥३२२॥**

**विभिन्नेति**–यदि **विभिन्नकार्यजननस्वभावाश्चक्षुरादयो**ऽभ्युपगम्यन्ते, तदा **ज्ञानेऽपि** विभिन्नकार्यजननस्वभावचक्षुरादिजन्यज्ञानेऽपि, **भेदः स्यात्** विभिन्नत्वं स्यात्, अन्यथा विभिन्नकार्यजननस्वभावचक्षुरादिजन्यत्वमेव तस्य न स्यात्, **न चेत्** चक्षुरादीनां कारणविशेषाणां विभिन्नकार्यजननस्वभावत्वं न यदि, तदा **भेदो न युज्यते** रूपादिक्षणस्य विभिन्नकार्यजननस्वभावत्वाभावात्

तज्जन्यस्य रूपबुद्ध्यादेरपि भेदो न न्याय्यः स्यात्, समुदितानां रूपादीनां समुदितत्वेन विभिन्नकार्यजननस्वभावत्वाभावेऽपि प्रत्येकं विभिन्नकार्यजननस्वभावत्वादयमदोष इति चेत्?, न–तथापि उपादानकारणाद्विभिन्नकार्यजनकाद् यत् कार्यं ततो विभिन्नं सहकारिकारणाद् विभिन्नकार्यजननस्वभावादित्येवमेकत्र कार्ये प्रत्येकं विभिन्नत्वं प्रसज्यते ॥ ८५ ॥ ३२२ ॥

प्रस्तुतपक्षमुपसंहरति—

**सामग्र्यपेक्षयाप्येवं, सर्वथा नोपपद्यते ।**
**यद्धेतु-हेतुमद्भावस्तदेषाऽप्युक्तिमात्रकम् ॥ ८६ ॥ ३२३ ॥**

**सामग्र्यपेक्षयाऽपीति**–सामग्र्या एककार्यजनकत्वमाश्रित्यापीत्यर्थः, **एवम्** उक्तन्यायात्, **यत्** यस्मात् कारणात्, **सर्वथा** संभावितप्रकारमात्रेण, **हेतु-हेतुमद्भावः** कार्यकारणभावः, **नोपपद्यते** युक्त्युपपन्नो न भवति, **तत्** तस्मात् कारणात्, **एषाऽपि** सामग्र्यपि, **उक्तिमात्रकं** प्रकृतपक्षासाधकत्वाद्वचनमात्रमेव ॥ ८६ ॥ ३२३ ॥

अभ्युपगम्यापि हेतु-हेतुमद्भावं दोषमुपदर्शयति—

**नानात्वाबाधनाच्चेह, कुतः स्वकृतवेदनम्? ।**
**सत्यप्यस्मिन् मिथोऽत्यन्तत‌द्भेदादिति चिन्त्यताम् ॥८७॥३२४॥**

**नानात्वेति**, च पुनः, **इह** क्षणिकपक्षे भवदुपगते, **नानात्वाबाधनात्** कल्पितसन्तानैक्येऽपि परमार्थतो नानात्वस्याबाधितत्वात्, **सत्यप्यस्मिन्** पूर्वोत्तरक्षणरूपकर्तृ-भोक्त्रोर्हेतुहेतुमद्भावे सत्यपि, **मिथः** परस्परम्, **अत्यन्ततद्भेदात्** अन्वय्यात्मद्रव्याभावेन सर्वथा कर्तृ-भोक्त्रोर्भेदात्, **स्वकृतवेदनं** स्वकृतस्य–विहितनिषिद्धकर्मणो वेदनं–सुखदुःखफलानुभवः, **कुतः** कस्मात्?, येन यत् कर्म कृतं स कर्ता तत्फलोपभोगसमये नास्ति, यस्तु तदानीमस्ति भोक्ता स न तत्कर्मणः कर्ता, कर्मबन्धनसमयेऽभावात्, तत्कर्मकर्तृभिन्नस्य तत्कर्मफलोपभोक्तृत्वं चातिप्रसङ्गान्न सम्भवति, **इति** एवं, **चिन्त्यताम्** माध्यस्थ्यमवलम्ब्य विमृश्यताम् ॥ ८७ ॥ ३२४ ॥

अत्रैवाक्षेपपरिहाराभिधित्सया पर आह—

**वास्य-वासकभावाच्चेन्नैतत् तस्याप्यसंभवात् ।**
**असम्भवः कथं न्वस्य?, विकल्पानुपपत्तितः ॥८८॥३२५॥**

**वास्य वासकभावाच्चेदि**ति, स्वकृतवेदनमित्यनुवर्तते, युज्यत इति शेषः, वास्यं-भोक्तृचैतन्यं, वासकं-कर्तृचैतन्यं, तयोर्वास्य-वासकभावात् पुनः स्वकृतवेदनं युज्यते, 'स्ववासककृतं स्वेन भुज्यते' इति नियमात्, अत्र स्वं भोक्तृचैतन्यं तद्गत-वासनायाः परम्परया कारणत्वाद् वासकं कर्तृचैतन्यं तत्कृतं कर्म स्वेन वास्येन भोक्तृचैतन्येन भुज्यते; न चैवमप्यन्यकृतकर्मण उपभोक्तृत्वमन्यस्योपपादितं भवति, न तु स्वकृतकर्मोपभोक्तृत्वं स्वस्येति वाच्यं, स्ववासककृते स्वकृतत्वव्यवहाराच्च, स्वं-भोक्तृचैतन्यं, तद्वासकं-कर्तृचैतन्यं, तत्कृते कर्मणि स्वकृतत्वस्य-भोक्तृकृतत्वस्य व्यवहारात्, तथा च व्यवहारतः स्वकृतकर्मभोक्तृत्वमुपपन्नम्, अत्रोत्तरम्-**इति चेत्?** एवं परो मन्यते चेत्? **नैतत्** एतदेवं न संभवति, **तस्यापि** वास्यवासक-भावस्यापि, **असंभवात्** अनुपपत्तेः, पर आह-**असंभवः कथं न्वस्ये**ति-'नु' इति वितर्के, अस्य वास्य-वासकभावस्य, कथमसम्भवः? अत्राऽऽचार्य उत्तरयति-**विकल्पानुपपत्तित** इति विकल्प्यमानस्य सतस्तत्त्वतोऽघटमानत्वात्॥८८॥३२५॥

एतदेव प्रकटयति—

**वासकाद्वासना भिन्नाऽभिन्ना वा भवेद् यदि ।**
**भिन्ना स्वयं तया शून्यो, नैवान्यं वासयेदसौ ॥ ८९ ॥ ३२६ ॥**

**वासकादि**ति-वासकात् सकाशाद्, **वासना** भिन्ना वा **भवेत्**, अभिन्ना वा इति द्वयी गतिः, तत्र यदि **भिन्ना** वासकाद् वासना भिन्ना तदा **स्वयं तया** वासनया, **शून्यः** रहितः **असौ** वासकः क्षणः कर्तृचैतन्यस्वरूपः, **अन्यं** स्वस्माद् भिन्नं भोक्तृचैतन्यं, **नैव वासयेत्**, यथा वासनारहितोऽन्यक्षणो नान्यं वासयति तथाऽयमपि ॥ ८९ ॥ ३२६ ॥

वासकादभिन्ना वासनेति द्वितीयपक्षं दूषयति—

**अथाभिन्ना न सङ्क्रान्तिरस्या वासकरूपवत् ।**
**वास्ये सत्यां च संसिद्धिर्द्रव्यांशस्य प्रजायते ॥ ९० ॥ ३२७ ॥**

**अथे**ति, **अभिन्ना** वासकक्षणाद् वासनाऽभिन्ना, तदा **न सङ्क्रान्तिः** न सङ्क्रमणम्, **तस्याः** वासनायाः, **वास्ये** वास्यतयाऽभिमते भोक्तृचैतन्यक्षणे, **वासकरूपवत्** यथा वासकस्य स्वरूपं स्वस्मादभिन्नं निरन्वयविनष्टत्वान्नान्वेति, वास्ये, तथा वासनाया अपि वासकादभिन्नाया निरन्वयविनष्टत्वेन वास्येऽन्वयरूपा संक्रान्तिर्न भवेत्, **सत्यां च** अभ्युपगतायां च सङ्क्रान्तौ, **द्रव्यांशस्य** अन्व-

यिनो द्रव्यस्य, **संसिद्धिः** नियोगतः सिद्धिः, **प्रजायते** प्रसज्यते, अन्वयस्य द्रव्यपदाभिधेयत्वात् ॥ ९० ॥ ३२७ ॥

सङ्क्रान्तिं विनैव वासना स्यादित्यत आह—

**असत्यामपि सङ्क्रान्तौ, वासयत्येव चेदसौ ।**
**अतिप्रसङ्गः स्यादेवं, स च न्यायबहिष्कृतः ॥ ९१ ॥ ३२८ ॥**

**असत्यामपी**ति–अभावप्रतियोगिन्यामपीत्यर्थः, **सङ्क्रान्तौ** वास्ये वासनाया अनुगतौ, वास्ये वासकसंवेधाभावेऽपीति यावत्, **चेत्** यदि, **असौ** वासकक्षणः, **वासयत्येव** वास्यं वासयत्येव, **एवं** एवं सति, अतिप्रसङ्गः स्यात्, यद्वास्यत्वेन नाभिमतं तस्यापि वासनं प्रसज्येत, **स च** अतिप्रसङ्गश्च, **न्यायबहिष्कृतः** युक्तिबाधितः, तथा चेष्टापत्तित्वेन तत्परिहरणं न सम्भवतीति भावः ॥९१॥३२८॥

अथ वास्ये वासकसम्बन्धलक्षणा वासना नाभ्युपेयते, किन्तु पूर्वपूर्वमृगमदक्षणप्रभवोत्तरोत्तरमृगमदक्षणरूपा मृगमदक्षणपरम्परा यथा मृगमदवासना, तथा स्वहेतुप्रसूततत्तत्क्षणपरम्परारूपैव प्रकृतवासनेत्यभिप्रायमाकलय्याभ्युपगतमप्यसङ्गतत्वात् परित्यजन्नाह —

**वास्य-वासकभावश्च, न हेतु-फलभावतः ।**
**तत्त्वतोऽन्य इति न्यायात्, स चायुक्तो निदर्शितः ॥९२॥३२९॥**

**वास्यवासकभावश्चे**ति—वास्य-वासकभावश्चायं भवत्परिकल्पित इत्यर्थः, **न** नैव, **हेतु-फलभावतः** कार्य-कारणभावतः सकाशात्, **तत्त्वतः** परमार्थतः, **अन्यः** भिन्नः, किन्तु कार्य-कारणभावस्वरूप एव भवत्परिकल्पितो वास्य-वासकभावः, **स च** निरुक्तस्वरूपो वास्य-वासकभावश्च, **न्यायात्** सत्तर्कात्, **अयुक्तो** युक्तिबाधितः, **निदर्शितः** प्रतिपादितः ॥ ९२ ॥ ३२९ ॥

परः सिंहावलोकितन्यायेन स्वाभिप्रायमुपदर्शयति—

**तत् तज्जननस्वभावं, जन्यभावं तथा परम् ।**
**अतः स्वभावनियमान्नायुक्तः स कदाचन ॥ ९३ ॥ ३३० ॥**

**तदि**ति–मृदादिकारणमित्यर्थः, **तज्जननस्वभावं** घटादिजननस्वभावम्, **तथा** तद्वत्, **परं** घटादि, **जन्यभावं** मृदादिजन्यस्वभावम्, **अतः** एतादृशात्, **स्वभावनियमात्** हेतुफलयोः स्वभावनियमात्, **स** हेतुफलभावः,

**कदाचन** कदाऽपि, **नायुक्तः** अयुक्तो न भवति, एतत् पराकूतं हेतूपदर्शनेन स्पष्टयन्त्युपाध्यायाः–"अन्त्यावस्थायां सर्वेषां प्रत्येकमभिमतकार्योत्पादकत्वात्, अन्यसंनिधेस्तु स्वहेतुप्रत्ययसामर्थ्यनिमित्तत्वेनोपालम्भानर्हत्वात्; न च भिन्नकार्योत्पत्तिः, सर्वेषां तस्यैव जनने सामर्थ्यात्; अथवा मृदादिक्षण एव शक्तिरूपा घटादिहेतुता वास्तवी, अन्यत्र तु पौर्वापर्यनियममात्रम्, इति न विभागादिदोष इति" इति ॥ ९३ ॥ ३३० ॥

अत्रोत्तरमाह—

**उभयोर्ग्रहणाभावे, न तथा भावकल्पनम् ।**
**तयोर्न्याय्यं न चैकेन, द्वयोर्ग्रहणमस्ति वः ॥ ९४ ॥ ३३१ ॥**

**उभयोरिति**–हेतु-फलयोरित्यर्थः, **ग्रहणाभावे** ज्ञानाभावे सति, **न** नैव, **तथा भावकल्पनं** तज्जननस्वभावादिकल्पनम्, सम्बन्धज्ञाने सम्बन्धिद्वयज्ञानस्य कारणत्वेन तदभावे कल्पनात्मकसम्बन्धज्ञानासंभवात्, **तयोः** हेतु-फलयोः, अस्य तथाभावकल्पनमिति पूर्वेण सम्बन्धः, **न्याय्यम्** युक्तम्, अस्यापि तेनैव सम्बन्धः, **न च** नैव, **एकेन ग्राहकेण** एकेन ज्ञानेन, **द्वयोः** क्षणिकत्वेन भिन्नकालयोर्हेतु-फलयोः, **ग्रहणम्** अवगाहनम्, **अस्ति** विद्यते, **वः** क्षणिकैकान्तवादिनां युष्माकम्, मते इति शेषः ॥ ९४ ॥ ३३१ ॥

एतदेव दर्शयति—

**एकमर्थं विजानाति, न विज्ञानद्वयं यथा ।**
**विजानाति न विज्ञानमेकमर्थद्वयं तथा ॥ ९५ ॥ ३३२ ॥**

**एकमिति, यथा** यद्वत्, **विज्ञानद्वयं** क्षणिकत्वाद् विभिन्नकालीनं ज्ञानद्वयम्, **एकमर्थम्** एकं ग्राह्यं वस्तु, **न विजानाति**, न सम्यक् परिच्छिनत्ति ग्राह्यार्थस्यापि क्षणिकत्वेनैकज्ञानकालीनस्य तस्य ज्ञानान्तरकालेऽसत्त्वात्, **तथा** तद्वत्, **विज्ञानमेकम्** एकमेव ज्ञानं, क्षणिकत्वादेव, **अर्थद्वयं** भिन्नकालं ग्राह्यस्वभावं वस्तुद्वयं, **न विजानाति** नावगाहते, 'नाननुकृतान्वयव्यतिरेकं कारणं, नाकारणं विषयः' इति हि सौगतानां मतम्, तथा च यथा ज्ञानद्वये एकस्यार्थस्यानुकृतान्वयव्यतिरेकत्वाभावेन कारणत्वाभावः, ततश्च नैकस्यार्थस्य ज्ञानद्वयविषयत्वम्, तथैकस्मिन् ज्ञानेऽप्यर्थद्वयस्यानुकृतान्वयव्यतिरेकत्वाभावेन कारणत्वाभाव इति नैकेन ज्ञानेनार्थद्वयाजन्येनार्थद्वयग्रहणमित्याशयः ॥ ९५ ॥ ३३२ ॥

पराभिप्रायमाविष्करोति—

**वस्तुस्थित्या तयोस्तत्त्वे, एकेनापि तथाग्रहात् ।**
**नो बाधकं न चैकेन, द्वयोर्ग्रहणमस्त्यदः ॥ ९६ ॥ ३३३ ॥**

**वस्तुस्थित्ये**ति, एकं पूर्वं द्वितीयं पश्चादित्येवं **वस्तुस्थित्या**, पौर्वापर्यभावेनेत्यर्थः, **तयोः** हेतुफलयोः, **तत्त्वे** तज्जननादिस्वभावत्वे, **एकेनापि** धर्मिग्राहकेणैकेनापि ज्ञानेन, अर्थाद्धेत्वात्मकधर्मिग्राहकेण, फलात्मकधर्मिग्राहकेण वैकेन ज्ञानेन, **तथाग्रहात्**, तद्धर्म्यभिन्नतद्धर्मप्रकारकग्रहात्, **नो बाधकम्** प्रागुक्तं बाधकं न, **न च** नैव, **अदः** एतत्, एकेन धर्मिग्राहकेण तदभिन्नधर्मग्रहणम्, **एकेन द्वयोर्ग्रहणमस्ति** अत्रैव न चेत्यस्यान्वयः, धर्म-धर्मिणोर्भेदे हि धर्मधर्मिग्राहकं ज्ञानमेकमुभयग्रहणं भवेत्, तयोश्च सौगतमतेऽनर्थान्तरत्वेन न तद्ग्रहणेऽप्येकेन द्वयोर्ग्रहणम्, किन्त्वेकेनैकस्यैव ग्रहात् ॥ ९६ ॥ ३३३ ॥

एतत्परिजिहीर्षयाऽऽह—

**तथाग्रहस्तयोर्नेतरेतरग्रहणात्मकः ।**
**कदाचिदपि युक्तो यदतः कथमबाधकम्? ॥ ९७ ॥ ३३४ ॥**

**तथाग्रह** इति, तज्जननस्वभावत्वादिना ग्रह इत्यर्थः, **तयोः** हेतु-फलयोः, **ने**त्यस्य युक्त इत्यनेनान्वयः, तथाग्रहः किमात्मक इत्यपेक्षायामाह–**इतरेतरग्रहणात्मक** इति अन्योऽन्यग्रहणरूपः, घटकग्रहसापेक्षग्रहरूप इति यावत्, तथा च तज्जननस्वभावरूपविशिष्टशरीरस्य हेतुफलोभयघटितत्वाद् घटकीभूतहेतुफलोभयग्रहणे सत्येव ग्रहणं संभवतीति हेतुफलयोर्मध्यादेकस्य हेतोः फलस्य वा धर्मिमात्रस्य ग्रहात्, **कदाचिदपि न युक्तः**, अयुक्त एवेत्यर्थः, **अतः** अस्मात् कारणात्, **कथमबाधकम्** उभयोर्ग्रहणाभावे न तथाभावकल्पनम् इत्यादि यत् प्रागुक्तं तदबाधकं कथं? स्यादेव तद्बाधकम्, न हि स्वलक्षणाध्यक्षं स्वस्य याथात्म्ये प्रमाणम्, क्षणिकत्वस्वर्गप्रापणशक्त्यादावपि तथात्वप्रसङ्गात्, "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" इत्यस्य व्याघातापत्तेश्च ॥ ९७ ॥ ३३४ ॥

हेतुफलभावरूपधर्मस्य हेतुफलात्मकधर्मिस्वरूपत्वेऽपि तथाभूतधर्मिस्वरूपग्रहतो हेतुफलभावविकल्पोऽतिप्रसङ्गान्नाभ्युपगन्तुं शक्य इत्याह —

**तथाग्रहे च सर्वत्राविनाभावग्रहं विना ।**
**न धूमादिग्रहादेव, ह्यनलादिगतिः कथम्? ॥ ९८ ॥ ३३५ ॥**

**तथाग्रहे चेति, सर्वत्र तथाग्रहे च** सर्वत्र धर्मिस्वरूपमात्रग्रहात् तत्स्वभावत्वस्य धर्मस्य विकल्पात्मकग्रहे च **अविनाभावग्रहं विना** अविनाभावस्य ग्रहो यस्मात् सोऽविनाभावग्रहस्तं विना, तथा च व्यभिचारग्रहसहचारग्रहयोर्व्याप्तिग्रहं प्रति कारणत्वेन तयोरविनाभावग्रहशब्देन ग्रहणं, तं विना, **धूमादिग्रहादेव** वह्नि-धूमयोरविनाभावस्य तयोर्धर्मत्वेन तदात्मकधर्मिस्वरूपतया धूमाद्यात्मकधर्मिस्वरूपमात्रग्रहात् तदात्मकाग्न्यादिव्याप्तिलक्षणधर्मविकल्पादेव, हि निश्चितम्, **अनलादिगतिः** नालिकेरद्वीपवासिनोऽपि पूर्वमगृहीतवह्निधूमसहचारादेर्धूमदर्शनमात्राद् वह्न्याद्यनुमितिः, **कथं न** कस्मान्न भवेत्?, वह्न्याद्यनुमितिकारणस्य वह्निधूमाविनाभावग्रहस्य धूमस्वरूपमात्रग्रहादेव वृत्तत्वात्, यत्र च क्वचिद्धूमादिदर्शनाज्झटित्येव वह्न्याद्यनुमितिस्तत्रापि धूमादिधर्मिस्वरूपमात्रग्रहाद् भिन्नमेव वह्निधूमाविनाभावग्रहणमासाद्य सा, अभ्यासपाटवादिना झटित्येव जायमाना व्याप्तिस्मृतिर्विभिन्नक्षणवर्तितया नानुव्यवसीयते, न तु व्याप्तिग्रहणमतिरिक्तमनपेक्ष्यैव तत्रानुमितिः, अन्यथाऽगृहीतवह्निधूमसहचारस्य नालिकेरद्वीपवासिनोऽपि धूमदर्शनमात्रादग्निव्याप्तिविकल्पादग्न्यनुमानं प्रसज्यत इति ॥ ९८॥ ३३५ ॥

अत्रैवाऽऽक्षेप-परिहारानुपदर्शयति—

**समनन्तरवैकल्यं, तत्रेत्यनुपपत्तिकम् ।**
**तुल्ययोरपि तद्भावे, हन्त ! क्वचिददर्शनात् ॥ ९९ ॥ ३३६ ॥**

**समनन्तरवैकल्यमिति, तत्र** नालिकेरद्वीपवासिधूमादिज्ञानादग्न्याद्यनुमितिस्थले समनन्तरवैकल्यं भवेत्, **इति** एतदपि, **अनुपपत्तिकं** निर्युक्तिकम्, कुत इत्यपेक्षायामाह-**तुल्ययोरपी**ति–तुल्ययोरपि समनन्तरयोरित्यर्थः, **तद्भावे** उत्तरं धूमादिग्रहोत्पादे, **हन्त क्वचित्** अगृहीताविनाभावे पुंसि, **अदर्शनात्** अनलाद्यनुमित्यदर्शनात् ॥ ९९ ॥ ३३६ ॥

ननु ज्ञानमात्रे समनन्तरप्रत्ययस्यापादानविधया कारणत्वेन समनन्तरप्रत्ययं विना किमपि ज्ञानं नोपजायत एवेति सर्वत्र समनन्तरप्रत्ययसद्भावेऽपि न समनन्तरत्वमात्रेण समनन्तरतौल्यमपेक्षितम्, किन्तु गृह्यमाणकारणताश्रयकारणविषयत्वेन, इत्यभिप्रेत्य परः शङ्कते—

**न तयोस्तुल्यतैकस्य, यस्मात् कारणकारणम् ।**
**ओघात् तद्धेतुविषयं, न त्वेवमितरस्य तु ॥ १०० ॥ ३३७ ॥**

**न तयो**रिति-नञस्तुल्यतेत्यनेनान्वयः, **तयोः** गृहीताविनाभावपुरुषसमनन्तरप्रत्ययनालिकेरद्वीपवासिपुरुषसमनन्तरप्रत्यययोः, **तुल्यता** समानता **न** नैव, **यस्मात्**, यस्मात् कारणात्, **एकस्य** गृहीताविनाभावस्य पुंसः, **कारणकारणं** वह्न्यनुमितिकारणधूमज्ञानोपादानसमनन्तरप्रत्ययलक्षणकारणम्, **ओघात्** सामान्यतः, तथाविकल्पानुपरागेणेति यावत्, **तद्धेतुविषयं** गृह्यमाणधूमहेत्वग्निविषयम्, **न तु** नैव, **एवं** यथा गृहीताविनाभावपुरुषस्य कारणकारणं हेतुविषयं तथा, **इतरस्य तु** नालिकेरद्वीपवासिनः पुनः, नालिकेरद्वीपवासिना सर्वदा धूमहेत्वग्न्यग्रहणात् ॥ १०० ॥ ३३७ ॥

अत्रोत्तरयति—

**यः केवलानलग्राहिज्ञानकारणकारणः ।**

**सोऽप्येवं न च तद्धेतोस्तज्ज्ञानादपि तद्गतिः ॥ १०१ ॥ ३३८ ॥**

**य** इति-यः कश्चिन्नालिकेरद्वीपवासिसमनन्तरप्रत्यय इत्यर्थः, **केवलानलग्राहिज्ञानकारणकारणः** दैवादयोगोलकाङ्गारादिज्ञानसमुत्थः, **सोऽपि** केवलानलग्राहिज्ञानकारणकारण-नालिकेरद्वीपवासिसमनन्तरप्रत्ययोऽपि, **एवं** सामान्यतो गृह्यमाणधूमहेत्वग्निगोचरसमनन्तराविकलः, **न चे**त्यस्य तद्गतिरित्यनेनान्वयः, तज्ज्ञानादपीत्यपिना तद्धेतोरित्यन्वेति, तथा च **तद्धेतोरपि** निमित्तसमन्तरहेतोरपि, **तज्ज्ञानात्** नालिकेरद्वीपवासिधूमज्ञानात्, **तद्गतिः** अनलानुमितिः, **न च** नैव भवति, तथा च व्यभिचार एवेत्युत्तरयितुरभिप्रायः ॥ १०१ ॥ ३३८ ॥

परः समाधानान्तरमाशङ्कते—

**तज्ज्ञानं यन्न वै धूमज्ञानस्य समनन्तरः ।**

**तथाऽभूदित्यतो नेह, तज्ज्ञानादपि तद्गतिः ॥ १०२ ॥ ३३९ ॥**

**तज्ज्ञान**मिति, अग्निज्ञानमित्यर्थः, **यत्** यस्मात्, नञः तथाऽभूदित्यनेनान्वयः, **वै** निश्चितम्, **धूमज्ञानस्य** स्वोत्तरकालभाविनो धूमज्ञानस्य, **समनन्तरः** उपादानहेतुः, **न तथाऽभूत् इत्यतः** एतस्मात् कारणात्, **इह** नालिकेरद्वीपवासिनि, **तज्ज्ञानादपि** दैवादग्निविषयकज्ञानोत्थधूमज्ञानादपि, **न तद्गतिः** नानलानुमितिः, तथा चाग्न्यनुमितिं प्रति न धूमज्ञानत्वेन कारणत्वं येन नालिकेरद्वीपवासिनि धूमज्ञानादनुमित्यभावेनाग्न्यनुमितिं प्रति कारणत्वं, नालिकेरद्वीपवासिनो धूमज्ञानस्याग्निज्ञानोपादेयत्वाभावेन कारणतावच्छेदकधर्मानाक्रा-

न्तत्वात् ततोऽग्न्यनुमित्यभावेऽपि न व्यभिचार इति समाधातुः परस्याकूतम् ॥ १०२ ॥ ३३९ ॥

अत्रोत्तरयति—

**तथेति हन्त ! को न्वर्थस्तत्तथाभावतो यदि ।**
**इतरत्रैकमेवेत्थं, ज्ञानं तद्ग्राहि भाव्यताम् ॥ १०३ ॥ ३४० ॥**

तथेतीति, 'न तथाऽभूत्' इत्यत्र तथेति पदस्येत्यर्थः, हन्त को नु कः खलु अर्थः प्रतिपाद्यः, वाक्यार्थमविचार्यैव वाक्यं प्रयुञ्जानस्य महदनौचित्यम्, यतो वाक्यरचनां प्रति वाक्यार्थज्ञानं कारणमिति कारणमन्तरेण कार्यं न भवत्येवेति तत्सङ्गतार्थप्रतिपादकत्वलक्षणवाक्यत्वत्वदेव न भवतीत्युन्मत्तवाक्यवदुपेक्षणीयमिति 'हन्त' इत्यनेन सूच्यते । यदि 'न तथाऽभूत्' इत्यस्य तत्तथाभावतः तस्यैवाग्निज्ञानस्यैव धूमज्ञानभावेन परिणामो नाभूदिति नाग्न्यादिगतिरित्यर्थोऽभिमतः, तदा भवत्विदं समाधानम्, परम् इतरत्र अविनाभावग्रहस्थले, इत्थम् उक्तप्रकारेण, एकमेव ज्ञानम् एकाकारपरित्यागान्याकारोपादानेन, तद्ग्राहि धूमानलग्राहि, भाव्यताम् विमृश्यताम्, अन्यथा विशेषासिद्धेः ॥ १०३ ॥ ३४० ॥

पक्षान्तरनिरासेनाधिकृतमेव समर्थयति—

**तद्भावेऽन्यथा भावस्तस्य सोऽस्यापि विद्यते ।**
**अनन्तरचिरातीतं, तत् पुनर्वस्तुतः समम् ॥ १०४ ॥ ३४१ ॥**

तद्भाव इति, अग्निज्ञानाभावे इत्यर्थः, अन्यथा तत्तथाभावेन विशेषानभ्युपगमे, तस्य भावः धूमज्ञानस्योत्पादः, अत्रैव अग्निज्ञानाभावे इत्यर्थकस्य तद्भावे इत्यस्य सम्बन्धः, अभ्युपगतो भवति, प्रकारान्तराभावात्, इत्थमेवोपगमे न च विशेष इत्याह–स इति–तद्भावे भावः, अग्निज्ञानाभावे उत्पाद इति यावत्, अस्यापि नालिकेरद्वीपवासिधूमज्ञानस्यापि, अपिना यथा गृहीतधूमाग्न्यविनाभावपुरुषधूमज्ञानस्य वह्निज्ञानाभावे उत्पादस्तथेत्यर्थो गम्यते, विद्यते नालिकेरद्वीपवासिधूमज्ञानोत्पादकाले यथोक्ताग्निज्ञानाभावस्योभयत्राविशेषात् समस्ति, गृहीतधूमाग्न्यविनाभावपुरुषधूमज्ञानस्य वह्निज्ञानमव्यवहितानन्तरमेवानीतं नालिकेरद्वीपवासिपुरुषधूमज्ञानस्य वह्निज्ञानमेतज्जन्मनि पूर्वं नाभूदेव किन्त्वनादौ काले कदाचिद् बभूवेति चिरातीतमित्येवं विशेषः स्यादित्यत आह–

**अनन्तरचिरातीत**मिति–अनन्तरातीतं चिरातीतं चेत्यर्थः, **तत्** अग्निज्ञानं, **पुनः वस्तुतः** परमार्थतः, तदानीमसत्त्वात्, **समं** तुल्यम्, हेतुसत्त्वस्यैव कार्ये उपयोगात्, अनन्तरातीत-चिरातीतयोरनुपयोगाविशेषात्, वस्तुतो नाग्निज्ञानजधूमज्ञानत्वेनाग्न्यनुमितिं प्रति कारणत्वम्, अनग्निज्ञानादपि धूमं ज्ञात्वा नैयायिकादिमते मानसाध्यक्षेण, स्याद्वादिमते ऊहापरनामतर्कप्रमाणेन वा व्याप्तिग्रहेऽग्निज्ञानोदयात्, धूमज्ञनास्याग्निज्ञानकुर्वद्रूपत्वेन नाग्निज्ञानं प्रति कारणत्वं, तथा सति पिशाचस्याप्यग्निज्ञानकुर्वद्रूपत्वेनाग्निज्ञानं प्रति हेतुत्वप्रसङ्गादिति न किञ्चिदेतत् ॥ १०४ ॥ ३४१ ॥

एतेन यत् प्रतिक्षिप्तं तदुपदर्शयति --

**अग्निज्ञानजमेतेन, धूमज्ञानं स्वभावतः ।**
**तथाविकल्पकृन्नान्यदिति प्रत्युक्तमिष्यताम् ॥ १०५ ॥ ३४२ ॥**

**अग्निज्ञानज**मिति, अस्य धूमज्ञानमित्यनेनान्वयः, **एतेन** परमते तत्स्वभावत्वापरिज्ञानप्रतिपादनेन, अस्य प्रयुक्तमित्यनेनान्वयः, अग्निज्ञानजं धूमज्ञानं **स्वभावतः** तथाविकल्पजनकत्वस्वभावात्, **तथाविकल्पकृत्** अग्निजन्योऽयं धूम इति विकल्पहेतुः, **नान्यत्** अग्निज्ञानजधूमज्ञानभिन्नधूमज्ञानं न अग्निजन्योऽयं धूम इति विकल्पहेतुः, **इति** एवं पराभ्युपगतम्, **प्रत्युक्तं** निरस्तम्, **इष्यताम्** अङ्गीक्रियताम् ॥ १०५ ॥ ३४२ ॥

प्रस्तुतं निगमयति—

**अतः कथञ्चिदेकेन, तयोरग्रहणे सति ।**
**तथाऽप्रतीतितो न्याय्यं, न तथाभावकल्पनम् ॥ १०६ ॥ ३४३ ॥**

**अत** इति–उक्तयुक्तेरित्यर्थः, **कथञ्चित्** अन्वयानुगमनात्, **एकेन** एकेन ग्राहकेण, **तयोः** हेतु-फलयोः, **अग्रहणे सति** ग्रहणाभावे व्यवस्थिते सति, **तथाऽप्रतीतितः** तदितरावधिकत्वेन ज्ञानाभावात्, अवध्यवधिमतोरेकेन ग्रहणे स्यादपि एकावधिकत्वेनापरप्रतीतिर्नान्यथा, यतोऽवधिग्राहिणाऽवधेरेवैकस्य ग्रहणम्, अवधिमद्ग्राहिणा चावधिमत एव ग्रहणमिति, **तथाभावकल्पनम्** प्रक्रमात् हेतुफलयोस्तज्जननस्वभावत्वादिकल्पनम्, **न** नैव, **न्याय्यं** न्यायादनपेतम् ॥ १०६ ॥ ३४३ ॥

एवं च यत् परस्याभ्युपगतं न सिध्यति तदुपदर्शयति—

**प्रत्यक्षा-ऽनुपलम्भाभ्यां, हन्तैवं साध्यते कथम्? ।**
**कार्यकारणता तस्मात्, तद्भावादेरनिश्चयात् ॥ १०७ ॥ ३४४ ॥**

**प्रत्यक्षानुपलम्भाभ्यामिति**, परोदिताभ्यामन्वयग्रहण-व्यतिरेकग्रहणरूपाभ्यां प्रत्यक्षा-ऽनुपलम्भाभ्यामित्यर्थः, **हन्तेति** खेदे, **एवं** हेतुफलयोरतज्जननस्वभावत्वाद्यनवगमे, **कार्यकारणता** कार्यकारणभावः, **कथं** केन प्रकारेण, **साध्यते** व्यवस्थाप्यते?, कुतः कार्यकारणभावसाधनमशक्यमित्याकाङ्क्षायामाह **तस्मादिति**—प्रत्यक्षानुपलम्भत इत्यर्थः, **तद्भावादेः** कार्यगतस्य कारणान्वयानुकृतान्वयप्रतियोगित्वादेः, आदिपदात् कार्यगतस्य कारणव्यतिरेकानुकृतव्यतिरेकप्रतियोगित्वस्य ग्रहणम्, **अनिश्चयात्** निर्णयाभावात्, तदनिश्चयश्च सर्वथा कार्यकारणोभयानुपलम्भात् ॥ १०७ ॥ ३४४ ॥

एतदेव स्पष्टयति—

**न पूर्वमुत्तरं चेह, तदन्याग्रहणाद् ध्रुवम् ।**
**गृह्यतेऽत इदं नातो, नन्वतीन्द्रियदर्शनम् ॥ १०८ ॥ ३४५ ॥**

**न पूर्वमिति**, इह बौद्धदर्शने, **पूर्वं** कारणताश्रयः, **उत्तरं च** कारणतानिरूपकं कार्यम्, **न** नैव, **गृह्यते** ग्रहविषयः, **ध्रुवं** निश्चितम्, ग्रहणाभावे हेतुः-**तदन्याग्रहणात्** कारणताश्रयान्यस्य कारणतानिरूपकस्य कार्यस्याग्रहणात् कारणताश्रयो न गृह्यते, कार्यान्यस्य कार्यताप्रतियोगिनः कारणस्याग्रहणात् कार्यताश्रयो न गृह्यते, सनिरूपकपदार्थस्य निरूपकग्रहणे सत्येव ग्रहणमिति नियमात्, पूर्वोत्तरयोरग्रहणाच्च, **'अत इदम्'** 'अग्न्यादेर्धूमादि' इत्यन्वयज्ञानं, **नातः** इदमित्यन्वेति, तथा च 'जलादेर्नाग्न्यादि' इति व्यतिरेकज्ञानम्, **ननु** इत्यक्षमायाम्, **अतीन्द्रियदर्शनम्** इन्द्रियातीतं दर्शनम्, प्रत्यक्षं चेन्द्रियजन्यज्ञानमेव प्रसिद्धम्, प्रकृतं चेन्द्रियाजन्यमपि प्रत्यक्षमित्यपूर्वमित्युपहासः प्रतीयते, कार्यानुकृतान्वयव्यतिरेकप्रतियोगित्वलक्षणकारणताशरीरघटकयोरन्वयव्यतिरेकयोरग्रहणे सति कारणताग्रहो न संभवत्येव, घटितग्रहस्य घटकग्रहाधीनत्वात्, अनन्यथासिद्धनियतपूर्ववर्तित्वलक्षणकारणताग्रहेऽपि सहचारग्रहत्वेन अन्वय-व्यतिरेकाभ्यां वाऽन्वय-व्यतिरेकग्रहस्य हेतुत्वस्यावश्यकत्वात्, न च

शक्तिरूपकारणताऽपि धर्मिग्रहमात्रात् सुग्रहा, शक्तेरतीन्द्रियत्वेन तदात्मककारणताया अप्यतीन्द्रियत्वेनानुमानैकवेद्यत्वादिति ॥ १०८ ॥ ३४५ ॥

प्रत्यक्षाभावेऽनिश्चयात्मा विकल्पोऽपि कारणत्वस्य न युज्यत इत्याह—

विकल्पोऽपि तथान्यायाद्, युज्यते न ह्यनीदृशः ।
तत्संस्कारप्रसूतत्वात्, क्षणिकत्वाच्च सर्वथा ॥१०९॥३४६॥

**विकल्पोऽपीति**-निश्चयोऽपीत्यर्थः, **तथान्यायात्** उक्तन्यायात्, **तत्संस्कारप्रसूतत्वात्** पूर्वोत्तरलक्षणहेतु-हेतुमद्विषयकानुभवजन्यसंस्कारप्रभवत्वात्, **सर्वथा क्षणिकत्वाच्च** अन्वयविच्छेदेन क्षणिकत्वलक्षणनिरन्वयविनाशित्वाभ्युपगमाच्च, **अनीदृशः** असंस्पृष्टविप्रतिषेधः, तदभावाप्रकारकतत्प्रकारकज्ञानलक्षण इति यावत्, **न हि** नैव **युज्यते** युक्त्युपपन्नः, स्मरणात्मकनिश्चये संस्कारद्वाराऽनुभवस्य कारणत्वेन क्षणभङ्गे प्राच्यसंस्कारावस्थानाभावेन तद्द्वारा कारणीभूतानुभवाभावान्निश्चयो न संभवतीति ॥ १०९ ॥ ३४६ ॥

उपसंहरति—

नेत्थं बोधान्वयाभावे, घटते तद्विनिश्चयः ।
माध्यस्थ्यमवलम्ब्यैतत्, चिन्त्यतां स्वयमेव तु ॥११०॥३४७॥

**नेत्थमिति**, **इत्थम्** उक्तेन प्रकारेण, **बोधान्वयाभावे** कार्यकारणोभयकालवृत्त्येकबोधाभावे सति, **तद्विनिश्चयः** तज्जननस्वभाव्यादिनिश्चयः, **न** नैव, **घटते** युज्यते, **एतत्** अनन्तरमुपदर्शितम्, **माध्यस्थ्यमवलम्ब्य** स्वमतकदाग्रहलक्षणपक्षपातराहित्यमाश्रित्य, **स्वयमेव चिन्त्यतां** विचार्यताम्, नानाकारानुविद्धस्यैकोपयोगस्यानुभूतेरन्यथानुपपत्तेः ॥ ११० ॥ ३४७ ॥

बोधान्वयमसहमानो बौद्धः शङ्कते—

अग्न्यादिज्ञानमेवेह, न धूमज्ञानतां यतः ।
व्रजत्याकारभेदेन, कुतो बोधान्वयस्ततः ॥ १११ ॥ ३४८ ॥

**अग्न्यादीति**, **इह** लोके तत्तथाभावग्रहस्थले वा, **अग्न्यादिज्ञानमेव** कारणीभूताग्न्यादिज्ञानमेव **धूमज्ञानतां** धूमज्ञानस्वरूपतां, **यतः** यस्मात् कारणात्, **न व्रजति** न प्राप्नोति, **आकारभेदेन**, वह्निज्ञानस्यायं वह्निरित्याकारः, धूमज्ञान-

स्यायं धूम इत्याकार इत्येवमाकारभेदात्, आकारभेदेऽप्यैक्याभ्युपगमे नील-पीतज्ञानयोरप्यैक्यप्रसङ्गात्, ततः तस्मात्, **कुतो बोधान्वयः?** न कथञ्चिद् बोधान्वयः सम्भवतीति ॥ १११ ॥ ३४८ ॥

अत्रोत्तरमाह—

**तदाकारपरित्यागात्, तस्याकारान्तरस्थितिः ।**
**बोधान्वयः प्रदीर्घैकाध्यवसायप्रवर्तकः ॥ ११२ ॥ ३४९ ॥**

**तदाकारपरित्यागादिति**-अग्न्याद्याकारतिरोधानादित्यर्थः, **तस्य** बोधस्य, **आकारान्तरस्थितिः** धूमाद्याकारेणाविर्भावः, **बोधान्वयः** सर्वथाऽसतो धूमाकारज्ञानस्य शशशृङ्गादेरिव सद्भावासम्भवाद् बोधरूपेणान्वयोऽवस्थानम्, कीदृशो बोधान्वय इत्यपेक्षायामाह—**प्रदीर्घेति**-प्रदीर्घः-प्रवाहवान्, य एकः-एकसन्ततिमान्, अध्यवसायः, तत्प्रवर्तकः-तन्निमित्तम्, नील-पीताकारयोर्भिन्नसन्ततिगतत्वेन विरोधेऽप्यग्निधूमाद्याकाराणामेकसन्ततिगतत्वेनाविरोधात्, यथैकत्र ज्ञाने स्वसंवेदनस्वरूपे ग्राह्य-ग्राहकाकारयोर्न विरोधस्तथा प्रकृतेऽपि; न च स्वसंविदि ज्ञाने ग्राह्याकार-ग्राहकाकारयोः समानकालीनत्वात् तद्भेदेऽपि तद्गतो न भेदः, परं तु क्रमिकाकारभेदेन तद्गतो भेदः स्यादेवेति वाच्यं, समानकालीनाकारयोरिव विभिन्नकालीनाकारयोरिव विरोधाभावेनाभेदकत्वात्, मुहूर्तमात्रमहमेकविकल्पपरिणत एवासमित्याद्यनुभवस्यैकसन्ततिगतोपयोगदैर्घ्ये प्रमाणत्वात्; न च नैयायिकोऽप्युक्तानुभवमपलपितुं समर्थः, तथा सति प्रदीर्घाध्यवसायस्य धारावाहिकतया समर्थनपरायण एव स स्यात्, एवं च घटादीनां क्षणिकत्वेऽपि स्थूलकालमादाय घटं पश्यामीत्यादिको घटादौ वर्तमानताप्रत्ययः सौसादृश्यदोषादुपजायमानो भ्रान्त एव, 'सोऽयं घट' इत्यादिप्रत्यभिज्ञाऽपि सेयं दीपकलिका, तदेवौषधमित्यादिप्रत्यभिज्ञावत् तज्जातीयाभेदविषयकत्वे सत्येव प्रामाण्यम्, अन्यथा तु भ्रान्ततेत्येवं बौद्धसिद्धान्तप्रवेश एव तस्य स्यात्; न च मुहूर्तमात्रमहमेकविकल्पपरिणत एवासमित्यनुभवस्य यथा प्रामाण्यं तथा यदा गौर्मया दृष्टा तदाऽश्वो विकल्पित इत्यनुभवस्यापि प्रामाण्यमास्थेयमिति तद्बलाद् गोदर्शनाऽश्वविकल्पयोरप्येकदोत्पादोऽभ्युपगमनीयः स्यात्, तथा चार्हतस्यापि "जुगवं दो णत्थि उवओगा" इति वचनव्याघात इति वाच्यम्, सम्मतिटीकाकृता "जुगवं दो णत्थि उवओगा" इति वचनस्य मानसविकल्पद्वयनिषेधपरत्वेन दर्शनविकल्पयो-

रिन्द्रियमनःप्रभवयोरेकदोत्पत्तेरुररीकारात्, उपाध्यायास्तु—“भिन्नेन्द्रियजन्यज्ञानयौगपद्यं तु बाधकात् त्यज्यते, प्रकृते च नैकोपयोगानुभवे किञ्चिद् बाधकं पश्यामः” इत्याहुः । न च योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविभुविशेषगुणनाश्यत्वमिति नियमादुत्तरक्षणवर्तिविभुविशेषगुणानां स्वपूर्ववृत्तियोग्यविभुविशेषगुणनाशकत्वेन प्रदीर्घाध्यवसायस्य बाध इति वाच्यं, सुषुप्तिप्राक्कालीनज्ञानादेरुत्तरक्षणे तत्समानाधिकरणविशेषगुणानुत्पादेन स्वोत्पादाधिकरणक्षणाव्यवहितोत्तरक्षणवृत्तित्वविशिष्टस्य स्वस्यैव स्वनाशकत्ववत् सर्वस्यैवोत्तरक्षणवृत्तित्वविशिष्टस्य स्वनाशकत्वापत्त्याऽपेक्षाबुद्धेरपि तृतीयक्षणे नाशप्रसक्त्याऽभिमतस्य त्रिक्षणस्थायित्वस्याभावापत्तेः, स्वत्वस्याननुगतत्वेन विशिष्टस्यैव नाशकत्वस्य कल्पने प्रदीर्घाध्यवसायस्यानुभूयमानमुहूर्तादिकालस्थायित्वानुरोधेन नाशकान्तरस्यैव कल्पनौचित्यात्; न च यस्य वह्निज्ञानस्यानन्तरं न धूमज्ञानं, यस्य च धूमज्ञानस्याव्यवहितपूर्वं न वह्निज्ञानं, तयोः स्वतन्त्राग्निधूमोपयोगयोर्यथा भेदस्तथाऽव्यवहितपौर्वापर्यशालिनोर्वह्निज्ञान-धूमज्ञानयोरपि भेद एवेति वाच्यम्, एकसामग्रीप्रभवैकविचाराङ्गीभूताकारभेदेऽप्यङ्गिनो भेदाभावात्; न चाग्निविषयकज्ञानेऽग्निः कारणं, धूमविषयकज्ञाने धूमः कारणमिति कारणभेदात् तद्घटितसामग्र्योरपि भेद इति वाच्यम्, लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्यसम्बन्धेन विषयस्य कारणत्वाभावेऽपि क्षयोपशमविशेषणलक्षणयोग्यतातो विषयप्रतिनियमोपपत्तौ विषयस्याध्यक्षाहेतुत्वात्, अन्यथा लौकिकविषयत्वापेक्षया लाघवेन विषयत्वस्यैव कार्यतावच्छेदकसंसर्गत्वसंभवे योगिज्ञानं प्रत्यपि विषयस्य कारणत्वतोऽतीतानागतयोर्योगिप्रत्यक्षाव्यवहितापूर्वकालेऽसत्त्वेन कारणत्वासम्भवेन वर्तमानमात्रस्यैव विषयस्य कारणत्वतो योगिज्ञानस्यावर्तमानार्थग्राहित्वानुपपत्तेः, अथैवमेकत्र प्रमातरि एक एवोपयोगः स्यात्, तदाकारभेदादखिलव्यवहारोपपत्तेरिति चेत्?, यथा घट-शरावोदञ्चनादेर्घटत्व-शरावत्वोदञ्चनत्वादिना भेदेऽपि मृदादिरूपतयैक्यं तथोपयोगस्य तत्तदाकारविनाशोत्पादलक्षणविच्युतरूपभेदस्यात्मद्रव्यतयैक्येऽप्यनुभवसिद्धत्वेनाविरोधात् ॥ ११२ ॥ ३४९ ॥

बोधान्वयस्य स्वसंवेदनसिद्धत्वेन न भ्रान्तत्वमित्युपदर्शयति—

**स्वसंवेदनसिद्धत्वान्न भ्रान्तोऽयमित्यपि ।**
**कल्पना युज्यते युक्त्या, सर्वभ्रान्तिप्रसङ्गतः ॥११३॥३५०॥**

**स्वसंवेदनसिद्धत्वादिति**–स्वसंविदितज्ञानपरिच्छिन्नत्वादित्यर्थः, अस्य 'न च युज्यते' इति निषेधेऽन्वयः, **अयं** बोधान्वयः, **भ्रान्तः** भ्रमात्मकज्ञानविषयः, **इत्यपि कल्पना** इत्याकाराऽपि कल्पना, **न च** नैव, **युक्त्या** सन्न्यायेन, **युज्यते** घटते, निषेधे हेतुः-**स्वसंवेदनसिद्धत्वादिति**, स्वसंवेदनात्मकप्रत्यक्षप्रमाणसिद्धस्यापि बोधान्वयस्य भ्रमविषयत्वाभ्युपगमे, **सर्वभ्रान्तिप्रसङ्गतः** अन्यानुभवानामप्यनुभवत्वाविशेषाद् भ्रमत्वे तद्विषयाणां घटादीनामप्यसत्त्वापत्त्या प्रमाणप्रमेयेत्यादिसूत्रेण षोडशपदार्थाविभजनस्याप्युच्छेदप्रसङ्गात्॥ ११३ ॥ ३४० ॥

अत्र चतुर्दशाधिकशततमपद्यावतरणमुपाध्यायपरिकल्पितं क्वचित् क्वचिदुपकारपरिकर्मितमुपदर्श्यते—

"ननु बोधान्वयग्राहिणो विकल्पस्य भ्रान्तत्वेऽपि स्वलक्षणनिर्विकल्पस्याध्यक्षत्वेनाभ्रान्तत्वान्न सर्वभ्रान्तिप्रसङ्गदोषोपनिपातः; न च नामाद्युल्लेखपरिष्वक्तमूर्तिविकल्पोऽपि बोधान्वयग्राही प्रत्यक्षरूपत्वादभ्रान्त एवेति वाच्यम्, विकल्पस्यासंनिहितनामादियोजनाकरम्बितस्य सन्निहितमात्रविषयकत्वलक्षणप्रत्यक्षधर्माक्रान्तत्वाभावेन प्रत्यक्षरूपत्वासम्भवात्, एतेन

> "वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती ।
> न प्रकाशः प्रकाशेत, सा हि प्रत्यवमर्शिनी" ॥ १ ॥

इति वाक्संस्पृष्टस्यैव सकलार्थस्य संवेदनम्" इति शाब्दिकमतं निरस्तम्, वागर्थयोर्वाच्यवाचकभावसम्बन्धेन परस्परसम्बन्धित्वे एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमित्यर्थदर्शने तद्वाचकवाक्स्मृतेर्वाक्संस्पर्शः, वाक्संस्पर्शे च वाक्संस्पृष्टार्थग्रहणमित्यन्योऽन्याश्रयात्, वाक्संस्पृष्टस्यैवार्थस्य ग्रहणाभ्युपगमे येन बालेन 'इदं पदममुमर्थं बोधयतु' इति 'अस्मात् पदादयमर्थो बोद्धव्य' इति सङ्केतो न गृहीतः सङ्केतग्रहणरूपव्यञ्जकाभावाच्छब्दा-ऽर्थयोः प्रतिनियतयोर्वाच्यवाचकभावलक्षणसम्बन्धोऽपि च न गृहीतः, तस्य बालस्य वागसंस्पर्शेनार्थाग्रहणप्रसङ्गात्, किमिति वाक्संस्पर्शे च सामान्यग्रहेऽपि विशेषाग्रहात्, किं च वैखरी-मध्यमा-पश्यन्तीभेदेन त्रिविधा वाक्, तत्र नायनं ज्ञानं वैखरीं वाचं नोपस्पृशति, वैखर्या वाचः श्रोत्रमात्रग्राह्यत्वाभ्युपगमात्, नापि स्मृतिविषयां मध्यमां वाचमुपस्पृशति, मध्यमां वाचमन्तरेणापि शुद्धसंविदो भावात्, संहृताशेषवर्णादिविभागा पश्यन्ती च वागेव न संभवति बोधरूपत्वात्, वाचश्च वर्णरूपत्वात्, अतो न वाग्युक्ता प्रतिपत्तिः, अपि तु नयनजन्या प्रतिपत्तिरविकल्पिकैवेति; अथाद्यमध्यक्षं वाचक-

स्मृत्यभावे निर्विकल्पकमेव ... न स्मृतिसहकृतेन्द्रियजम्, उत्तरं तु स्मृतिसहकृतेन्द्रियजं प्रत्यक्षं सविकल्पकमित्यत्र को दोष इति चेत् ?, न–घ्राणजप्रत्यक्षोपनीते परिमले इव स्मृत्युपनीतेऽपि शब्देऽविषयत्वान्नयनस्याप्रवृत्तेः; न च नाम्नो नयनागोचरत्वात् तद्विशिष्टस्यार्थस्य नयनेनाग्रहणेऽपि द्रव्यादेश्चक्षुर्ग्राह्यत्वेन तद्विशिष्टार्थग्राहि नायनं प्रत्यक्षं सविकल्पकमस्तु बाधकाभावादिति वाच्यं, विशेषणविशेष्यभावस्य वास्तवत्वे दण्ड-पुरुषयोरिव प्रतिनियतस्यैव संभवात् कदाचिद् दण्डस्यैव विशेषणत्वं 'दण्डी पुरुष' इत्यत्र, कदाचिच्च पुरुषस्यैव विशेषणत्वं 'पुरुषीयो दण्डः' पुरुषे दण्डः 'पुरुषस्य दण्ड' इत्यादाविति विशेषानुपपत्तेः, यस्य यत्रार्थक्रियाप्रयोजनकत्वात् प्राधान्यं तस्य तत्र विशेष्यत्वं, यस्य यत्रार्थक्रियाप्रयोजकत्वादुपसर्जनता तस्य तत्र विशेषणत्वमित्येवमर्थक्रियाजनकत्वतत्प्रयोजकत्वापेक्षया प्रधानोपसर्जनभावरूपस्य विशेषणविशेष्यभावस्य कल्पनाविषयत्वात् तस्मादध्यक्षसंविद् निरस्तविशेषणमर्थमवगच्छति, विशेषणयोजना तु स्मरणादुपजायमानाऽपास्ताक्षार्थसंनिधिर्मानसीति प्रतिपत्तव्यम्, बहिरर्थावभासिकाभ्यो विशदसंविद्भ्यः स्वग्रहणमात्रपर्यवसितानां सुखादिसंविदामिवार्थसाक्षात्करणस्वभावायास्तस्या भिन्नत्वेन बाधकाभावात्; न च जात्यादिविशिष्टार्थप्रतिपत्तेः सविकल्पिकाऽक्षजा मतिरिति वाच्यम्, प्रत्यक्षे जात्यादेः स्वरूपानवभासनात्; न हि व्यक्तिद्वयाद् व्यतिरिक्तवपुर्ग्राह्याकारतां बहिर्बिभ्राणा विशददर्शने जातिराभाति; न चात्र बकुलादिषु तरुस्तरुरित्युल्लिखन्ती बुद्धिराभातीति नासती जातिरिति वाच्यम्, विकल्पोल्लेख्यमानतयाऽपि बहिर्ग्राह्याकारतया जातेरनुद्भासनात्, प्रतीतिरेव तत्र तुल्याकारतां बिभर्तीति। न चानुगतैकस्वरूपजातिरूपवाच्यस्य तदात्मकविषयस्य चाभावे शब्दः प्रतीतिर्वा तुल्याकारतां नानुभवतीति वाच्यम्, द्रव्य-गुण-कर्मस्वेव जातिपदार्थो जातिवादिभिरुपेयते, न तु जात्यादौ, भवति हि व्यतिरिक्तजातिमन्तरेणापि घटत्वं जातिः पटत्वं जातिर्गोत्वं जातिरित्येवमनुगतमतिर्घटत्वादिषु तुल्याकारतां बिभ्राणेति विकल्पात्मिकाया अनुगतमतेरनुगतविषयमन्तरेणापि भावस्य स्वीकरणीयत्वात्; न च घटत्वादिजातिष्वपरजातिरस्तु नाम, प्रमाणस्यापक्षपातित्वादिति वाच्यं, तथाऽभ्युपगमेऽनवस्थाप्रसक्तेः, घटत्वादिसामान्येषु जातित्वजातित्वलक्षणजातिसहितेष्वपि तेषु तत्कल्पनानुपरमात्।

ननु यथा विभिन्नाकारा प्रतीतिर्विभिन्नविषयनिमित्तिकेति तया विभिन्नविषयसिद्धिस्तथा तुल्याकाराऽपि प्रतीतिरनुगतैकस्वरूपविषयनिमित्तकैव, न निर्निमित्तका,

तथा सति सर्वदा भाव आकाशादिवत् स्यात्, कदाचिदपि वा भावो न भवेत् खरविषाणादिवदिति कादाचित्कत्वान्यथानुपपत्त्या सा सनिमित्तकाऽऽस्थेया; न च व्यक्तिनिमित्तका सा, तथा सति तरुस्तरुरिति प्रतीतिर्यथाऽऽम्रादिषु तथा घटादिष्वपि स्यात्, व्यक्तिरूपायास्तत्रापि सद्भावादिति तन्निमित्ततया जातिसिद्धिरिति चेत्?, न-प्रतिनियतव्यक्तिनिमित्तकत्वेनातिप्रसङ्गाभावेनातिरिक्तजातिनिमित्तकत्वकल्पनस्य गौरवपराहतत्वात्, यथा हि-ताः प्रतिनियता एव कुतश्चिन्निमित्तात् प्रतिनियतजातिव्यञ्जकत्वं प्रतिपद्यन्ते, तथा प्रतिनियतां तुल्याकारां प्रतिपत्तिमपि तत एव जनयिष्यन्तीति किमपरजातिकल्पनया, यथा वा गुडूच्यादयो भिन्ना एकजातिमन्तरेणापि ज्वरादिशमनात्मकं कार्यं निर्वर्तयन्ति तथाऽऽम्रादयस्तरुत्वजातिमन्तरेणापि तरुस्तरुरिति प्रतीतिं जनयिष्यन्तीति किं तरुत्वादिजातिकल्पनया, ततो जात्यादेरभावान्न तद्विशिष्टाध्यवसायिनी मतिरिति चेत्?,

अत्रोच्यते-स्पष्टधूमाध्यवसायानन्तरमस्पष्टावभासाग्न्यनुमानाकारस्येव विशददर्शनवपुषोऽर्थाकारादनन्तरमस्पष्टाकारविकल्पधियोऽननुभवादेकहेलयैव स्वलक्षणसन्निधौ जायमानाऽन्तर्बहिश्च स्थूलमेकं स्वगुणावयवात्मकं ज्ञानं घटादिकं वाऽवगाहमाना मतिर्न निर्विकल्पिका; न चानध्यक्षा, विशुद्धस्वभावतयाऽनुभूतेः; न च सविकल्पा विकल्पयोर्मनसोर्युगपद्वृत्तेः क्रमभाविनोर्लघुवृत्तेरेकत्वमध्यवस्यति मनः, इत्यविकल्पाध्यक्षगतं वैशद्यं विकल्पे स्वांश-स्वार्थाध्यवसायिन्यारोपयतीति वैशद्यावगतिरत्रेति वाच्यम्, एवं ह्यनुभूयमानमेकाध्यवसायमपलप्याननुभूयमानस्यापरनिर्विकल्पस्य परिकल्पने बुद्धेश्चैतन्यस्याप्यपरस्य परिकल्पनया साङ्ख्यमतमप्यनिषेध्यं स्यात्।

किञ्च, कोऽयं सविकल्पाविकल्पयोरैक्याध्यवसायः? किं तयोर्वस्तुसदभेदपरिच्छेदः? उत मिथस्तादात्म्याध्यवसायः? आद्ये-विरोधः, सविकल्पाविकल्पयोः सविकल्पकत्वाविकल्पकत्वलक्षणविरुद्धधर्मयोगिनोर्वस्तुसतोऽभेदस्यैवाभावात्, अन्त्ये च-निर्विकल्पे सविकल्पतादात्म्याध्यासान्निर्विकल्पकं 'सविकल्पम्' इति प्रतीयेत, सविकल्पे निर्विकल्पकतादात्म्याध्यासात् सविकल्पकं 'निर्विकल्पकम्' इति प्रतीयेत, यथा-शुक्तौ रजततादात्म्याध्यासाद् 'इदं रजतम्' इति, न तु विशदाध्यक्षस्वरूपम्; अथ प्रमुष्टनिर्विकल्पकत्वस्य विशदत्वावच्छिन्नस्य निर्विकल्पकस्यैव सविकल्पकेऽध्यारोपान्न दोषः, निर्विकल्पकत्वस्य प्रमोषादेव सविकल्पकं 'निर्विकल्पकम्' इत्येवंरूपतया न भासते, यथा-विशिष्टभ्रमात्मकज्ञानानङ्गीकर्तुः

प्रभाकरस्य मते–'इदं रजतम्' इति नैकं ज्ञानम्, किन्तु 'इदम्' इति प्रत्यक्षम्, 'रजतम्' इति स्मरणम्, तयोश्च भेदाग्रहः, तत्तांशस्य प्रमोषादेव 'तद् रजतम्' इति स्मरणाकारो न भवति, किन्तु 'रजतम्' इत्येव। एतेन अविकल्पकाज्ञानान्न तस्य सविकल्पकेऽध्यारोपः, न ह्यप्रतिपन्नरजतः शुक्तौ 'इदं रजतम्' इत्यध्यवस्यति, न वेश्वरानध्यवसाये ईश्वराद्यध्यासवदुपपत्तिः, भ्रमविशेषाव्यवस्थितेः, इत्युक्तावपि न क्षतिः, प्रागनुभूतस्यैव विशदस्यात्राभेदाध्यासादिति चेत् ?, न–वैशद्यावलीढस्यैव तस्य प्रमीयमाणत्वेन तत्र तदारोपायोगात्, न हि तदपरं किञ्चिदनुभूयते, यस्य वैशद्यं धर्मः कल्प्येत, एवमपि तत्र तत्परिकल्पने ततोऽप्यपरमननुभूयमानं विशदत्वादिधर्माधारं परिकल्पयतः कस्तव मुखं पाणिना पिधत्ते ?; अर्थसामर्थ्यप्रभवं वैशद्यं नालीकग्राहिणि सविकल्पके, किन्तु निर्विकल्पक एवेति चेत् ?, न–अर्थसामर्थ्यप्रभवेऽपि दूरस्थितपादपादिज्ञाने वैशद्यादेरभावात्, अर्थसामर्थ्याजन्येऽपि च बुद्धादिज्ञाने वैशद्यादेः सद्भावाद् वैशद्यादेरर्थप्रभवत्वानियमात्; अथ दूरत्वादिदोषाभावोऽपि वैशद्ये नियामकः, बुद्धज्ञाने च चिरातीतभाविनामपि विषयाणां हेतुत्वाभ्युपगमान्न दोष इति चेत् ?, न–चिरातीतादिविषयाणां येन स्वभावेन तत्तदनन्तरभाविकार्योत्पादकत्वं तेनैवेदानीन्तनसुगतज्ञानोत्पादकत्वे प्राक् पश्चाद् वैतदुत्पादप्रसङ्गात्, समनन्तरप्रत्ययस्येदानीमेव हेतुत्वे चोभयहेतुस्वभावविप्रतिषेधात् तदनुत्पत्तिप्रसङ्गात्; अथ तत्तदनन्तरभाविकार्योत्पादकत्वनिबन्धनस्वभावभिन्नस्वभावेन चिरातीतादिविषयाणामिदानीन्तनसुगतज्ञानोत्पादकत्वं तर्हि स्वभावद्वयशालितया चिरातीतादिविषयाः सांशाः प्रसज्येरन्निति तद्ग्राहिणोऽपि ज्ञानस्य सांशैकवस्तुग्राहकत्वेन सविकल्पकताप्रसङ्गः, दृश्यते चान्यत्र कार्याव्यवहितपूर्ववर्तिन एव कारणत्वमिति, दृष्टविपरीता च चिरातीतादिविषयाणां बुद्धज्ञानजनकत्वकल्पना, दृष्टविपरीतकल्पनाया अप्यादरणे च व्यापारमन्तरेणापि धनप्राप्तिसम्भवाद् विश्वमदरिद्रं स्यात्, तस्माद् बुद्धज्ञानस्येव विकल्पस्यार्थाप्रभवस्यापि वैशद्यमविरुद्धम्; अथ विकल्पस्यायमेव स्वभावो यदुत विशदो न भवतीति, तदुक्तम्—

' न विकल्पानुबन्धस्य स्पष्टार्थप्रतिभासिता ।
स्वप्नेऽपि स्मर्यते स्मार्तं, न च तत् तादृगर्थदृक्'' ॥ १ ॥

इति चेत् ?, न–स्वप्नदशायामपि स्मरणविलक्षणस्य पुरोवृत्तिहस्त्याद्यवभासिनो बोधस्य निर्विकल्पकत्वेऽनुमानस्यापि सांशवस्तुग्राहिणस्तथात्वप्रसङ्गे विकल्पवार्ताया

एव व्युपरमप्रसङ्गात्; अथ संहृतसकलविकल्पावस्थायां पुरोवर्तिवस्तुनिर्भासि-कल्पनाव्युपरमतो विशदमक्षप्रभवमविकल्पकमेवानुभूयते, तदुक्तम्—

"प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति"

इत्यादि, तथा—

"संहृत्य सर्वतश्चिन्तां, स्तिमितेनान्तराऽऽत्मना ।
स्थितोऽपि चक्षुषा रूपं, वीक्षते साऽक्षजा मतिः" ॥ १ ॥

इति, अतो विकल्पे कदाचित् समनन्तरपृष्ठभाविनि तद् वैशद्यमेवाध्यारोप्यत इति चेत्?, मैवम्-तस्यामप्यवस्थायां स्थिरस्थूलस्वभावशब्दसंसर्गयोग्यपुरोऽवस्थितगवादिप्रतिभासस्यानुभूतेः सविकल्पकज्ञानानुभवस्यापह्नोतुमशक्यत्वात्, न हि शब्दसंसर्गप्रतिभास एव सविकल्पकत्वम्, तद्योग्यावभासस्यापि कल्पनात्वाभ्युपगमात्, अन्यथाऽव्युत्पन्नसङ्केतस्य पुंसो ज्ञानं शब्दसंसर्गविरहात् कल्पनावन्न स्यात्, अवश्यं च शब्दयोजनामन्तरेणाप्यर्थनिर्णयात्मकमध्यक्षमुपगन्तव्यम्, अन्यथा विकल्पाध्यक्षेण लिङ्गस्याप्यनिर्णयात्, अनुमानात् तन्निर्णयेऽनवस्थानादनुमानस्याप्युच्छेदप्रसङ्गात्; किञ्च विकल्पस्य शब्दसंयोजितार्थग्रहणरूपत्वे प्रत्यक्षस्य प्रामाण्यमेवानुपपन्नं स्यात्, यत्रैव हि पाश्चात्यं विधिनिषेधविकल्पद्वयं प्रत्यक्षं जनयति तत्रैव विषये प्रत्यक्षस्य प्रामाण्यं सौगतस्याभिमतं, विकल्पश्च शब्दसंयोजितार्थग्रहणं, शब्दसंयोजना चार्थे शब्दस्मरणाधीना, श्रोत्रग्राह्यस्य शब्दस्य चक्षुरिन्द्रियायोग्यत्वेन चक्षुषा लौकिकसंनिकर्षेण शब्दाप्रतिभासतः शब्दयोजनाया असम्भवात्, शब्दस्मरणं च सम्बन्धितावच्छेदकप्रकारकसम्बन्धिग्रहरूपार्थधीजन्यमिति, सम्बन्धितावच्छेदकप्रकारकसम्बन्धिग्रहश्च सविकल्पकत्वान्न शब्दयोजनामन्तरेण सम्भवतीति, यदि च सम्बन्धितावच्छेदकप्रकारकसम्बन्धिग्रहजन्यशब्दस्मरणमन्तरेणापि शब्दसंयोजनाऽर्थे उपेयते तदा गवानुभवाद् गोशब्दसंयोजनावत् क्षणिकत्वानुभवात् क्षणिकत्वशब्दसंयोजनाऽपि स्यात्, इति नीलाद्यध्यक्षं नीलत्वविकल्पोत्पादनतो यथा नीलत्वे प्रमाणं तथा क्षणिकत्वविकल्पोत्पादनतः क्षणिकत्वेऽपि प्रमाणं स्यादिति सत्त्वहेतुकक्षणिकत्वानुमानायासो विफल एव सौगतस्य स्यात्। एतेन "अश्वं विकल्पयतो गोदर्शनेऽपि तदा गोशब्दसंयोजनाभावाद् युगपद् विकल्पद्वयानुपपत्तेश्च निर्विकल्पकमेव गोदर्शनम्" इति निरस्तम्, गोशब्दसंयोजनामन्तरेणापि गोदर्शनस्य निर्णयात्मकत्वात्, अन्यथा यदा मया गौर्दृष्टा तदाऽश्वो विकल्पित इत्येवमुत्तरकालं गोस्मरणानुपपत्तेः,

समानप्रकारकानुभवस्यैव समानप्रकारकस्मरणजनकत्वात्, तदानीं गौरासीन्नवेति संशयापत्तेश्च, गोत्वप्रकारकनिश्चयस्यैव गोत्वप्रकारकसंशयविरोधित्वात्, यदि च गोस्वरूपज्ञानमेव गोस्मरणजनकं गोसंशयविरोध्यपि गोविषयकज्ञानमेव, तदा नीलाध्यक्षमपि नीलस्वलक्षणरूपक्षणिकत्वाद्यध्यक्षमिति ततोऽप्युत्तरकालं क्षणिकत्वस्मरणं तत्संशयाभावश्च प्रसज्येत ।

अथ क्षणिकत्वादेर्निर्विकल्पकैकवेद्यत्वान्निर्विकल्पकैकगृहीतस्यागृहीतकल्पत्वान्नोत्तरकालं तत्स्मरणं तत्संशयाभावो वेति, तदाह धर्मकीर्तिः–"पश्यन्नपि न पश्यतीत्युच्यते" इति न दोष इति चेत् ?, न–सच्चित्तांशेऽपि तथात्वप्रसङ्गात्, स्वसंवेदनलक्षणनिर्विकल्पकगृहीतेऽपि सच्चित्तांशे विकल्पोत्पत्तेर्न तस्य स्मरणानुपपत्तिसंशयो वेति चेत् ?, न–स्मरणरूपतदनुत्पत्तेरनुत्तरत्वात्; तत्र विस्तीर्णप्रघट्टकानुभवे सकलवर्णपदाद्यस्मरणवदुपपत्तिरिति चेत्, न–मम विस्तीर्णप्रघट्टकस्थले वर्णानां तज्ज्ञानानां च व्यक्तिभेदाद् दृढसंस्कारस्यैव निश्चयस्य स्मृतिजनकत्वेन नियमसंभवात्, तव तु निरंशानुभवस्यांशे विकल्पजननाजननस्वभावभेदस्य, शक्तिभेदस्य, पाटवा-ऽपाटवादेर्वा न संभव इत्युक्तत्वात्; एकस्यापि सहकारसाचिव्येन तद्विकल्पस्यैव जनकत्वं नान्यविकल्पस्येत्यभ्युपगमे स्थिरस्यापि सहकारिसाचिव्या-ऽसाचिव्याभ्यां कार्यजनकत्वा-ऽजनकत्वाभ्युपगमप्रसङ्गात्, कुम्भकारादिसहकृतस्य मृदादेर्घटाद्यन्वयव्यतिरेकदर्शनवदभ्यासादिसहकृतस्य निर्विकल्पकस्य कदापि विकल्पान्वयव्यतिरेकाग्रहणेनाभ्यासादिसहकृतस्याविकल्पस्य विकल्पजनकत्वकल्पनाया अन्याय्यत्वाच्च ।

अथ पूर्वपूर्वक्षणिकस्योत्तरोत्तरक्षणिकरूपस्य कार्यसाधर्म्यात्, अक्षणिकत्वादिसमारोपाद् वा क्षणिकत्वाद्यनुभवेऽपि न विकल्पः, अनिश्चयरूपस्याध्यक्षस्य समारोपाप्रतिपन्थित्वात्, तदुक्तम्—

"एकस्यार्थस्वभावस्य, प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः, स्याद् यः प्रमाणैः परीक्ष्यते ॥ १ ॥
नो चेद् भ्रान्तिनिमित्तेन, संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारो, रूप्यसाधर्म्यदर्शनात्" ॥ २ ॥

इति चेत् ?, न–क्षणिकत्वादाविव सच्चेतनत्वादावप्यनिश्चयप्रसङ्गात्, वस्तुतो निरंशत्वात्, अनिश्चितस्यानुभवे मानाभावाच्च, यस्य निर्णयः सविकल्पको नास्ति

तस्य निर्विकल्पकात्मकेऽनुभवे मानाभावान्निर्विकल्पकस्य सविकल्पकरूपकार्याऽन्यथानुपपत्त्या कल्प्यत्वादित्यभिसन्धिः; नान्तरीयकत्वादेकानुभवोऽन्यानुभवे मानमिति चेत् ?, न - तैमिरिकदर्शनेन चन्द्रग्रहणेऽपि चन्द्रगतैकत्वाग्रहणतो व्यभिचारात्, द्विचन्द्रावगाहिनस्तैमिरिकदर्शनस्य द्वित्वे भ्रान्तत्वेऽपि चन्द्रेऽभ्रान्तत्वात्, प्रमाणेतरव्यवस्थाया व्यवहारिजनापेक्षत्वात्, "प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्" इति त्वयैवाभिहितत्वात्, अन्यथैकचन्द्रदर्शनस्यापि चन्द्ररूपे प्रमाणता, क्षणिकत्वे चाप्रमाणतेति रूपद्वयस्याभ्युपगमविरोधात् ।

यस्य तु मतं–'दृश्य-प्राप्ययोरेकत्वेऽविसंवादाभिमानिनः प्रत्यक्षं प्रमाणम्, इतरस्य तयोर्विवेके सत्यनुभूतेऽपि न प्रमाणम्' तस्य चन्द्रप्राप्त्यभिमानिनः किमिति चन्द्रमात्रे तत्र प्रमाणम् ? । अथ दोषजन्ये द्विचन्द्रादिज्ञाने चन्द्रस्यापि न परमार्थसतो भानम्, किन्तु प्रातिभासिकसत्तावलीढस्यारोपितस्यैव, इति न तद्ग्रहात् तदेकत्वग्रहः, अध्यक्षस्यांशे प्रामाण्याप्रामाण्यद्वैरूप्यमपि व्यावहारिकमेव, परमार्थतस्तु तत्र सद्विषयत्वरूपं प्रामाण्यमेव, अभ्यासदशायां दृश्य-प्राप्ययोरेकत्वाध्यवसायात्, 'प्रत्यक्षमेव प्रमाणम्' इत्यपि व्यवहारादेव प्रज्ञाकरस्याभिमतम्, मण्यादिप्राप्यसंसर्गिदृश्यमणिप्रभाद्यवच्छेदेनोपप्लवमहिम्ना मण्याद्यारोपाददूरदेशप्रवृत्तिदर्शनात् तथा व्यवहारप्रवृत्तिरिति चेत् ?, न–चन्द्रे द्वित्वस्येव चन्द्रस्य मिथ्यात्वेनाननुभवात्, तस्य परमार्थतोऽसत्त्वे मानाभावात्, अध्यक्षेऽपारमार्थिकद्वैरूप्यस्य सम्बन्धाभावात् तद्व्यवहारायोगात्, अन्यथाऽतिप्रसङ्गात्, आरोपिताध्यक्षे आरोपिततद्वैरूप्यस्य विकल्पेन विषयीकरणे च पारमार्थिकस्य तस्याप्रवर्तकत्वात्, विकल्पस्यैव प्रवर्तकस्य परमार्थतः प्रामाण्यौचित्यात् ।

अर्थाप्रभवत्वेनार्थाग्राहित्वान्न विकल्पस्य प्रामाण्यमित्यपि परिभाषामात्रम्, अर्थप्रभवत्वाज्ज्ञानस्यार्थग्राहकत्वे इन्द्रियादिप्रभवत्वाज्ज्ञानस्येन्द्रियादिग्राहकताया अप्यापत्तेः, योग्यतातः प्रतिनियमे च किमनिमित्तमर्थस्य ज्ञानहेतुत्वकल्पना, ज्ञाने स्वाकाराधायकत्वादर्थो हेतुरिति चेत् ?, न–अर्थेन सर्वात्मना तत्र स्वाकाराधाने ज्ञानस्य जडताप्रसक्तेः, उत्तरार्थक्षणवत्; एकदेशेन तदाधायकत्वे सांशताप्रसक्तेः; समनन्तरप्रत्ययस्य तत्र स्वाकाराधायकत्वान्न जडत्वम्, इत्युक्तावपि समनन्तरप्रत्ययार्थक्षणयोर्द्वयोरपि तत्र स्वाकारार्थकत्वे तज्ज्ञानस्य चेतना-ऽचेतनरूपद्वयापत्तेः; किञ्च तदाकारं समनन्तरप्रत्ययादुत्पन्नं, न च समनन्तरप्रत्ययस्य ग्राहकमिति तदुत्पत्ति-सारूप्ययोर्व्यभिचारित्वादर्थेऽपि न प्रमाणं स्यात् ।

अथ यदाकारं यदुत्पन्नं यदध्यवस्यति तत्र तत् प्रमाणं, समनन्तरप्रत्ययाकारं समनन्तरप्रत्ययोत्पन्नमपि ज्ञानं न समनन्तरप्रत्ययमध्यवस्यति, अर्थाकारमर्थोत्पन्नमर्थमध्यवस्यति ज्ञानमित्यर्थे प्रमाणम्; नन्वत्र यदाकारं यदुत्पन्नं विज्ञानमेवार्थाध्यवसायं जनयतीत्यर्थः, उत यदाकारं यदुत्पन्नं विज्ञानमर्थाध्यवसायमेव जनयति, आहोस्विद् यदाकारं यदुत्पन्नं विज्ञानमर्थाध्यवसायं जनयत्येवेति, आद्ये विज्ञानमेवेत्येवकारेण विज्ञानातिरिक्तस्यार्थाध्यवसायलक्षणविकल्पजनकत्वव्यवच्छेदाद् विकल्पवासनाऽप्यर्थाध्यवसायकारणं न भवेत्, एवं च निर्विकल्पकबोधादर्थाकारादर्थोत्पन्नाद् यथा सामान्यावभासी विकल्पः, तथाऽर्थाकारादर्थोत्पन्नादर्थादेव सामान्यावभासो विकल्पो भविष्यति अर्थाकारत्वार्थोत्पन्नत्वयोर्निर्विकल्पकज्ञान इवार्थेऽपि सत्त्वादिति किमन्तरालवर्तिनिर्विकल्पककल्पनया ?, न च विकल्पभिन्नत्वाविशेषेऽपि दर्शनादेव विकल्पोत्पत्तिः नार्थात्, वस्तुस्वाभाव्यादित्युत्तरम्, अर्थस्यैव विकल्पकारणत्वे दर्शनस्य स्वरूपेणैवासिद्धेः, 'स्तम्भोऽयं स्तम्भोऽयम्' इति ज्ञानस्य यथा तिर्यक्सामान्यविषयकत्वं तथा स्थिरैकस्तम्भावगाहिज्ञानस्योर्ध्वतासामान्यविषयकत्वमित्यस्य कल्पयितुं शक्यत्वात्, ऊर्ध्वतासामान्यापलापे तिर्यक्सामान्यस्याप्यपलापाज्जगतः प्रतिभासवैकल्यप्रसङ्गात्, निरंशक्षणिकानेकपरमाण्वाकारस्य तस्य सांशत्वेनाभ्युपगन्तुमशक्यत्वात्, प्रतिविविक्तपरमाणु तद्भेदस्य दुःश्रद्धानत्वात्; किञ्च यथा विकल्पादर्थाद्विकल्पदर्शनप्रभवः, तथा दर्शनादप्यविकल्पाद्विकल्पस्यैव प्रभव इति विकल्पकथाऽप्युच्छिन्ना, यदाकारं यदुत्पन्नं विज्ञानमर्थाध्यवसायमेव जनयतीति द्वितीयपक्षे निर्विकल्पकादर्थाध्यवसायलक्षणविकल्पस्यैव जनने धारावाहिकनिर्विकल्पकसन्ततिर्न स्यात्; न चेष्टापत्तिः, सुषुप्तावालयविज्ञानलक्षणनिर्विकल्पकसन्ततेरेवाभ्युपगमात्, यदाकारं यदुत्पन्नमर्थाध्यवसायं जनयत्येवेति तृतीयपक्षेऽपि क्रियासङ्गतैवकारार्थोऽत्यन्तायोगव्यवच्छेदः स्वभावभेदं विना दुर्घटः, निर्विकल्पकजनकत्वस्वभावस्य निर्विकल्पकस्य कदाचित् सविकल्पकजनकत्वस्वभावमन्तराऽत्यन्तायोगव्यवच्छेदासम्भवादिति न किञ्चिदेतत्, तस्मात् तदुत्पत्ति-सारूप्यार्थग्रहणमन्तरेणाप्यध्यवसायस्य प्रामाण्यं युक्तम्, अनाद्यसत्यविकल्पवासनात एव तदुत्पत्त्यभ्युपगमे दर्शनस्याप्यहेतुत्वात्, "यत्रैव जनयेदेनाम्" इत्याद्यभ्युपगमव्याघातात् ।

न च वासनाप्रबोधविधायकत्वेन दर्शनस्यापि विकल्पहेतुत्वम्, इन्द्रियार्थसन्निधानस्यैव वासनाप्रबोधहेतुत्वात्, तद्धेतोरिति न्यायात्; न च वासनाप्रभवत्वेना-

क्षजस्यैव भ्रान्तता स्यात्, अर्थप्रभवत्वेनानुमानवत् प्रमाणत्वात्, सामान्यादिविषयकत्वस्य तुल्यत्वात्; न च स्वग्राह्यस्यावस्तुत्वेऽप्यध्यवसायस्य स्वलक्षणत्वाद् दृश्य-विकल्प्यावर्थावेकीकृत्य प्रवृत्तेरनुमानप्रामाण्यम्, प्रकृतविकल्पेऽपि समानत्वात्; न च गृहीतग्राहित्वाद् विकल्पो न प्रमाणं, क्षणक्षयानुमानस्याप्यप्रामाण्यप्रसक्तेः, नीलादिस्वलक्षणग्राहिणा निर्विकल्पकेन क्षणक्षयस्यापि गृहीतत्वात्; अनिर्णीतमनुमेयं निश्चिन्वत् प्रमाणं यद्यनुमानं तर्ह्यनिश्चितं नीलं निश्चिन्वन् विकल्पोऽपि किं न प्रमाणम्?, अथ समारोपव्यवच्छेदकरणादनुमानं प्रमाणम्, तर्हि विकल्पोऽपि समारोपव्यवच्छेदकरणादेव किं न प्रमाणम्?, शुक्तिका-रज्ज्वादिषु रजत-सर्पादिसमारोपाणाम् 'इयं शुक्तिरियं रज्जुः' इति विकल्पान्निवृत्तिदर्शनात्; अथ विकल्पस्य प्रामाण्येऽपि नानुमानबहिर्भावः, अनभ्यासदशायां ह्यनुमानं प्रमाणम्, अभ्यासदशायां तु दर्शनमेव, न च तृतीया दशाऽस्ति, यस्यां विकल्पः स्वातन्त्र्येण प्रमाणभावमनुभवेदिति चेत्?, न—विकल्पं विना पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वलक्षणलिङ्गत्रैरूप्यस्यानिश्चयेनानुमानस्यैव न प्रवृत्तिरित्युक्तत्वात्; न च तदपेक्षं दर्शनमेव प्रमाणं, स्वत एव विकल्पस्याप्रमाणत्वात्, विकल्पस्यापि विकल्पापेक्षया प्रमाणत्वेऽनवस्थाया दुष्परिहरत्वादिति वाच्यम्, सम्यग्विकल्पस्य स्वत एव प्रमाणत्वात्, दर्शनस्यागृहीतभाव्यर्थप्रवर्तकत्वेऽतिप्रसङ्गात्, अन्यथा "शाब्दमपि सामान्यमात्रविषयं विशेषे प्रवृत्तिं विधास्यति" इति मीमांसकमतमनिषेध्यं स्यात्।

यत्तु "स्मृत्युपनीतेऽपि नामादाविन्द्रियाप्रवृत्तेर्न नामादिविशिष्टार्थग्राहिण्यक्षजा मतिः" इत्युक्तम्, तत् प्रलापमात्रम्-अर्थात्मकस्य नामवाच्यतादिधर्मस्य विशिष्टक्षयोपशमव्यपेक्षयाऽक्षधिया प्रतिपत्त्यभ्युपगमात्, तद्वाच्यताप्रतिपत्तिर्मतिज्ञानं श्रुतज्ञानं वेत्यन्यदेतत्;

न च "विशेषणविशेष्यभावस्यानवस्थानान्न वस्तुनो विशिष्टप्रतीतिः" इत्यप्युक्तं युक्तम्, अनेकधर्मकलापाक्रान्तस्य वस्तुनो विशिष्टसामग्रीप्रभवप्रतिपत्त्या प्रतिनियतधर्मविशिष्टतया ग्रहणात्; न च अर्वाग्दर्शनेऽशेषधर्माध्यासितवस्तुस्वरूपप्रतिभासः, कस्यचित् कथञ्चित् कयाचित् प्रतिपत्त्या यथा-क्षयोपशमं ग्रहणात्; एतेनातीतविशेषणादिग्रहणेऽतिप्रसङ्गः परास्तः, अन्यथैकस्तम्भपरिणत्यापन्नैकपरमाणुग्रहणप्रवृत्ताक्षस्यापरमाणुग्रहणेऽपि सकलपदार्थग्रहणप्रसङ्गस्य दुष्परिहरत्वात्।

यदपि "मानस्येव विकल्पमतिः" इत्यभिहितम्, तदप्यसत्-स्तम्भादिप्रतिभासस्य मानसत्त्वे विकल्पान्तरतो निवृत्तिप्रसङ्गात्, न चैवमस्ति, क्षणक्षयित्वमनुमा-

नाग्निश्चिन्वतोऽश्वादिकं वा विकल्पयतस्तदैवास्य प्रतिभासस्य संवेदनात्। यदपि "जात्यादेः स्वरूपानवभासनात् तद्विशिष्टार्थधीरयुक्ता" इति गदितम्, तदपि निर्युक्तिकम्-स्वसंवेदनवत् सदृशपरिणामस्य प्रमीयमाणत्वेन सत्यत्वात्, एकान्त-भेदाभेदपक्षस्यानिष्टेः, "त एव विशेषाः कथञ्चित् परस्परं समानपरिणतिभाजः" इत्यस्मदभ्युपगमे दोषाभावात्, चित्रैकविज्ञानवत् समानाऽसमानपरिणत्योरेक-त्वाविरोधात्, तस्मात् सविकल्पकमेव प्रमाणमिति व्यवस्थितम्, ततः कथं न बोधान्वयोऽर्थान्वयो वा? इति परिभावनीयं रहसि, माऽस्तु वा त्वन्नये सर्वस-विकल्पकप्रामाण्यम्, तथापि नश्वरत्वादिग्राहिणो विकल्पस्य त्वया प्रामाण्यमव-श्यमभ्युपेयम्, तस्य च व्याप्त्यादिपर्यालोचनप्रवणस्यान्वयित्वमपि स्वसंवेदन-सिद्धम्, तदंशे तत्र भ्रान्तत्वे क्षणिकत्वांशेऽपि तथात्वप्रसङ्गात्, एकस्य भ्रान्ता-ऽभ्रान्तोभयरूपत्वाभावात्, भ्रान्तिबीजसाम्याच्चेत्यभ्युच्चयमाह—

**प्रदीर्घाध्यवसायेन, नश्वरादिविनिश्चयः।**
**अस्य च भ्रान्ततायां यत्, तत् तथेति न युक्तिमत् ॥११४॥३५१॥**

**प्रदीर्घाध्यवसायेनेति**—अन्वयिव्याप्त्यादिपर्यालोचनप्रवाहरूपतयाऽनुभूय-मानेन लिङ्गादिविकल्पेनेत्यर्थः, **नश्वरादिविनिश्चयः** क्षणक्षयित्वादिनिर्णयः, तथाऽनुभवात्, **अस्य च** प्रदीर्घाध्यवसायस्य पुनः, **भ्रान्ततायां** तथाऽतत्परि-च्छेदात्मकतायामभ्युपगम्यमानायाम्, **यत्** यस्मात्, **तत्** अधिकृतं वस्तु, **तथा** नश्वरम्, **इति** एवम्, **न युक्तिमत्** न सम्भवदुक्तिकम्, भ्रान्तबोधावधृतत्वाद् द्विचन्द्रवत् ॥ ११४ ॥ ३५१ ॥

विकल्पस्याभ्रान्तत्वमुपसंहरति—

**तस्मादवश्यमेष्टव्या, विकल्पस्यापि कस्यचित्।**
**येन तेन प्रकारेण, सर्वथाऽभ्रान्तरूपता ॥ ११५ ॥ ३५२ ॥**

**तस्मादिति**-यस्मादनन्तरोदितो दोषो विकल्पमात्रस्याप्रामाण्याभ्युपगमे तस्मादित्यर्थः, **अवश्यं** **नियमेन**, **एष्टव्या** अङ्गीकरणीया, **विकल्पस्यापि** सप्रकारकज्ञानलक्षणाध्यवसायस्यापि, **कस्यचित्** नश्वरत्वादिग्राहिणः, **येन तेन प्रकारेण** स्वपरिभाषानुसारिणा तथाविधसंस्कारोत्पादादिना प्रकारेण, **सर्वथा** सर्वविषयावच्छेदेन, **अभ्रान्तरूपता** परमार्थविषयता; तथा च स्वात्मकप्रमाण-परिनिष्ठिता स्वान्वयिता सिद्धैवेत्यभिसन्धिः ॥ ११५ ॥ ३५२ ॥

इदमेवोपदर्शयति—

**सत्यामस्यां स्थितोऽस्माकमुक्तवन्न्याययोगतः ।**
**बोधान्वयोऽदलोत्पत्त्यभावाच्चातिप्रसङ्गतः ॥ ११६ ॥ ३५३ ॥**

**सत्यामस्या**मिति-कस्यचिद् विकल्पस्याभ्रान्ततायां सत्यामित्यर्थः, **स्थितः** व्यवस्थितः, सिद्ध इति यावत्, **अस्माकम्** स्याद्वादिनाम्, **उक्तवत्** प्रागुक्तरीत्या, **न्याययोगतः** तथानुभवनलक्षणसन्न्यायेन, कः स्थित इत्यपेक्षायामाह-**बोधान्वय** इति-स्वद्रव्यात्मा बोधाविच्छेद इत्यर्थः, उपपत्त्यन्तरमाह-**अदलोत्पत्त्यभावाच्चे**ति-अतथाभाविहेतुकस्योत्पत्त्ययोगाच्च, न ह्यसत् सद् भवितुमर्हतीत्यर्थः, कथमदलस्यासत उत्पत्तिः-सद्भावो नास्तीत्यपेक्षायामाह-**अतिप्रसङ्गत** इति-असतः सद्भावे विवक्षितकार्यवदन्यकार्यस्याप्यसत्त्वाविशेषाद् विवक्षितकार्यसामग्रीत उत्पत्त्यापत्तेरित्यर्थः ॥ ११६ ॥ ३५३ ॥

न चास्माद् विकल्पादनित्यत्वसिद्धिरित्युपचयमाह—

**अन्यादृशपदार्थेभ्यः, स्वयमन्यादृशोऽप्ययम् ।**
**यतश्चेष्टस्ततो नास्मात्, तत्रासन्दिग्धनिश्चयः ॥ ११७ ३५४ ॥**

**अन्यादृशपदार्थेभ्य** इति-अनित्यादिरूपेभ्य आलम्बनभूतेभ्य इत्यर्थः, **स्वयम्** आत्मना, **अयं** विकल्पः, **अन्यादृशोऽपि** अनित्यत्वविसदृशनित्यत्वादिग्रहात्मकोऽपि, **यतः** यस्मात्, **इष्टः** स्वीकृतः, **ततः** तस्मात्, **न** नैव, **अस्मात्** अधिकृतविकल्पादविश्वसनीयात्, **तत्र** अनित्यत्वादौ, **असन्दिग्धनिश्चयः** अत्रैव नञोऽन्वयः, अप्रामाण्यज्ञानास्कन्दितत्वादप्रामाण्यज्ञानानास्कन्दितनिर्णयरूपासन्दिग्धनिश्चयो न संभवतीति, अत्रेत्थं शिष्यबुद्धिवैशद्याय बौद्धमन्तव्योन्मूलनाय च विचारमाविर्भावितवन्त उपाध्यायाः, तथाहि-"अथालीकविषयत्वरूपाप्रामाण्यज्ञानेऽपि विकल्पे दृश्य-विकल्पयोरर्थयोरेकीकरणात् तदभाववति तदवगाहित्वरूपाप्रामाण्यज्ञानाभावान्न दोष इति चेत्?, न-रजतत्वारोपस्यासत्यरजतधीस्थलेऽपि सत्त्वात्, सत्यरजतधीस्थले तत्तुल्यताज्ञानेनार्थसंशयात्, एकत्रारजते रजतत्वारोपः, अन्यत्र तु रजते, इति न तत्तौल्यमिति चेत्?, न-रजते रजतत्वारोप इति वदत एव व्याघातात्, विकल्पस्य विशेषणमात्रविषयत्वे स्वलक्षणासंस्पर्शाभ्युपगमाच्च। एकत्र स्वजनकरजताभेदग्रहादन्यत्र स्वाजनकरजताभेदग्रहात् सत्या-

सत्यरजतधीविशेष इति चेत् ?, न-बाधेऽपि प्रवृत्त्यौपयिकरूपाव्याघाताद् गृहीत-रजतग्रहाभेदग्रहत्वेनैव रजतार्थिप्रवृत्तिहेतुत्वात् ।

अथागृहीतरजतग्रहभेदं दर्शनमेव रजतार्थिप्रवृत्तिहेतुः, स्वतो निश्चितप्रामाण्य-कत्वात्, असत्यरजतधीस्थले च शुक्तिदर्शने रजतग्रहभेदग्रहान्न प्रवृत्तिः, केवल-निर्विकल्पकादप्रवृत्तेश्च रजतविकल्पसाहित्यं कारणतावच्छेदकमिति न दोष इति चेत् ?, न-दृश्यविषयस्य दर्शनस्य प्राप्यविषयप्रवृत्त्यहेतुत्वात्, विकल्पा-ऽविकल्प-योर्भिन्नकालत्वेनासाहित्याच्च ।

अथ दर्शन-प्रवृत्त्योरेकसन्ततिगामित्वेन न सामान्यत एव हेतुहेतुमद्भावः, समानविषयतया तु रजतत्वविकल्पस्यैव रजतार्थिप्रवृत्तिहेतुता, अलीकविषयत्वेन तस्य स्वभावत एवासंनिहितप्राप्यविषयत्वात्; इदमेव हि दृश्य प्राप्ययोरेकीकरणं यद् दृश्यविषयतयाऽध्यवस्यमानस्य प्राप्यविषयत्वं, विशेषणमात्रविषयत्ववचनं च विकल्पस्य संनिहितविशेष्यानवगाहित्वाभिप्रायात्, शुक्तौ रजतधीस्थले बाधावतारे च रजतविशेष्यकरजतत्वप्रकारकत्वाभावरूपाप्रामाण्यग्रहादिति न दोष इति चेत् ?, न-एवं सति विकल्पस्य विशिष्टविषयत्वावश्यकत्वेऽलीकतदाकारायोगात्, सतो-ऽसदसंस्पर्शित्वात्, अन्यथा निर्विकल्पकेऽप्यनाश्वासात्, निर्विकल्पकप्रामाण्यस्य सविकल्पकैकग्राह्यत्वेन तदप्रामाण्ये तदप्रामाण्यादिति न किञ्चिदेतदिति दिक्, एवं तत्तज्जननस्वभावत्वग्रहो न क्षणिकपक्षे, बोधान्वय एव तद्ग्रहसंभवात्, अतो न तव तज्जननस्वभावत्वसिद्धिरिति प्रघट्टकार्थः" इति ॥ ११७ ॥ ३५४ ॥

प्रकारान्तरेणान्वयसिद्धिमुपदर्शयति—

**तज्जननस्वभावत्वे, ध्रुवं तद्भावसङ्गतिः ।**
**तस्यैव भावो नान्यो, यज्जन्याच्च जननं यथा ॥ ११८ ॥ ३५५ ॥**

**तत्तज्जननस्वभावत्व** इति–कारणस्य कार्यजननस्वभावत्वे कथ्यमाने इत्यर्थः, **ध्रुवं** निश्चितं, **तद्भावसङ्गतिः** कार्ये कारणभावपरिणतिः कथिता भवति, कुत इत्याकाङ्क्षायामाह- **तस्यैवे**ति–कारणस्यैवेत्यर्थः, **भावः** स्वसत्ता-लक्षणः, **नान्यो** नार्थान्तरभूतः, असत्त्वप्रसङ्गात्, **यत्** यस्मात्, **जन्याच्च जननं तथा** तद्वत् कार्यादुत्पत्तिरपि नान्या, अस्य भावार्थं श्रीहरिभद्रसूरय इत्थमाहुः-"मृद्घटजननस्वभावेति मृद एवायं स्वभावः—आत्मीया सत्ता, यदुत—घटजन्म, यदा च तस्या एवेयमात्मीया सत्ता तदा सैव तथाभूतेति तद्भाव-

संगतिः" इति, उपाध्यायास्तु–तमेव भावार्थं नवीनप्रक्रियया पल्लवितवन्तो यथा–मृद्घटजननस्वभावेत्यत्र घटस्य जनने निरूपितत्वाख्यस्वरूपसम्बन्धेन, तस्य च स्वभावे तादात्म्याख्यस्वरूपसम्बन्धेन, तस्य च मृदि तेन [ तादात्म्याख्यस्वरूप-सम्बन्धेन ] अन्वयाद् घटाभिन्नजननाभिन्नस्वभावाभिन्नत्वेन मृदि घटाभिन्नत्वं स्फुटमेव प्रतीयते, घटादतिरिक्ते जनने निरूपितत्वसम्बन्धकल्पने तत्रापि सम्बन्धान्तरकल्पनेऽनवस्थानात्, अभेदे च चित्रप्रतीतेर्भेदानुवेधेन समाधानात् तथोल्लेखेन प्रतीतेस्तथाक्षयोपशमाधीनत्वात्; न चैवं 'मृद् घटीभूता' इतिवद् 'दण्डोऽपि घटीभूतः' इति व्यवहारः स्यात्, तज्जननस्वभावत्वघटकाभेदाविशेषादिति वाच्यम्, तस्य तज्जननस्वभावत्वव्यवहारनियामकत्वेऽप्युपादानत्वघटकाभेदस्यैव तदर्थत्वादिति दिक्" इति ॥ ११८ ॥ ३५५ ॥

कारणस्य कार्यजननस्वभावत्वमिति शब्दार्थपर्यालोचनया यथाऽन्वयसिद्धिः, तथा तत्कार्यं तत्कारणजन्यस्वभावमिति शब्दार्थपर्यालोचनयाऽप्यन्वयसिद्धिरित्यतिदिशति—

**एवं तज्जन्यभावत्वेऽप्येषा भाव्या विचक्षणैः ।**
**तदेव हि यतो भावः, स चेतरसमाश्रयः ॥ ११९ ॥ ३५६ ॥**

एवमिति–उक्तन्यायेनेत्यर्थः, **तज्जन्यभावत्वेऽपि** घटादिकार्यस्य मृदादिकारणजन्यस्वभावत्वेऽप्युच्यमाने, **एषा** तद्भावसङ्गतिः, **भाव्या** विभावनीया, **विचक्षणैः** न्यायज्ञैः, तद्भावनां दर्शयति–तदेवेति–हि निश्चितम्, तदेव–जन्यत्वमेव, **यतः** यस्मात्, **भावः** घटादेः स्वभावतः स्वसत्तालक्षणः, **स च** स्वसत्तालक्षणभावश्च, **इतरसमाश्रयः**, मृदादिकारणसमाश्रयः, मृदादिकारणस्वरूप इति यावत्, तथा च घटो मृज्जन्यस्वभाव इत्यनेन घटेऽभेदसम्बन्धेन मृदन्वितजन्यत्वान्वितस्वभावान्वयान्मृदभिन्नजन्यत्वाभिन्नस्वभावाभेदेन घटस्य मृदभिन्नत्वं 'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति न्यायात् सिद्धमिति घटान्वयः पूर्वोत्तरकालयोः सिद्धः ॥ ११९ ॥ ३५६ ॥

उपसंहरति—

**इत्येवमन्वयापत्तिः, शब्दार्थादेव जायते ।**
**अन्यथाकल्पनं चास्य, सर्वथा न्यायबाधितम् ॥ १२० ॥ ३५७ ॥**

इत्येवमिति-उक्तेन प्रकारेणेत्यर्थः, **अन्वयापत्तिः** भावाविच्छेदलक्षणाऽन्वयधीः, **शब्दार्थादेव** तत्तज्जननस्वभावमिति तत्तज्जन्यस्वभावमिति वाक्यार्थपर्यालोचनादेव, **जायते**, उत्पद्यते, अथ निरूपितत्वादेरभेदस्वरूपस्य संसर्गत्वेऽपि सार्वज्ञ्यापत्त्या सांसर्गिकज्ञानस्य नोपनायकत्वमित्यस्योपेयतया कथमन्वयापत्तिरिति चेत्, 'घटो नास्ति' इत्यादौ नञर्थेऽभावे घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन घटस्यान्वयेऽभावे घटत्वावच्छिन्नप्रतियोगिताकत्वं यथाऽऽक्षेपाल्लभ्यते तथा मृद् घटजननस्वभावेत्यादिवाक्याद् घटादेर्जननादावभेदस्य संसर्गविधया भानेऽपि मृदि घटाभेदान्वयबोधस्याऽऽक्षेपतः सम्भवात्, मृदि अभेदेन घटान्वयाभावे अभेदसम्बन्धेन घटविशिष्टजननस्याभेदसम्बन्धेन विशिष्टो यः स्वभावस्तस्याभेदेन मृद्यन्वयस्यासंभवात्, तदभिन्नस्यैव साक्षात् परम्परया वा तदभिन्नाभिन्नत्वात्, **अन्यथाकल्पनं चास्य** तत्तज्जननमित्यादिशब्दस्य तदनन्तरं तद्भाव इत्यादिरेवार्थः 'तत्परिणामित्वबोधस्तु नोत्तरकालेऽपि' इत्यादिकल्पनं पुनः, **सर्वथा** सर्वप्रकारेण, **न्यायबाधितम्** नानुभूयते न युक्तित उपपद्यते, एकान्तभेदे तदानन्तर्यस्य वक्तुमशक्यत्वादित्यनुभवविरुद्धं युक्तिविरुद्धं च ॥ १२० ॥ ३५७ ॥

एतदेव भावयति—

**तद्रूपशक्तिशून्यं, तत् कार्यं कार्यान्तरं यथा ।**
**व्यापारोऽपि न तस्याऽपि, नापेक्षा सत्त्वतः क्वचित् ॥१२१॥३५८॥**

**तद्रूपशक्तिशून्यमिति**–मृदादिकारणरूपशक्तिशून्यमित्यर्थः, **तत् कार्यं** घटाद्यात्मककार्यम्, **कार्यान्तरं यथा** पटादिलक्षणं कार्यं यथा मृदाद्यनन्तरभावेऽपि मृदाद्यन्वयि तथा घटादिकार्यमिति पटादिविलक्षणं घटादि न भवेत्, मृदानन्तर्यस्य पटादौ भावेऽपि मृदन्वयाभावाद् यथा न पटादिकं मृत्कार्यं तथा घटाद्यपि मृत्कार्यं न स्यात्, पटादिसाधारणस्य मृदानन्तर्यमात्रस्य मृत्कार्यत्वानियामकत्वात्, तथा **व्यापारोऽपि** कश्चिद् व्यापारोऽपि, **न** नैव, तत्कार्यत्वस्य नियामकः, **तस्यापि** कारणस्यापि, क्षणिकत्वेन सर्वधर्माणां निर्व्यापारत्वेनासत्त्वादेव तस्य कार्यनियामकत्वासम्भवात्, तथा **नापेक्षा** न पूर्वावधितयाऽपेक्षणं स्वसत्त्वं प्रति, **असत्त्वात्** कार्यस्य स्वतस्तुच्छत्वात्, **क्वचित्** कस्मिन्नपि कारणे, असत्त्वाविशेषात् क्वचिदेवासति सत्त्वाधानलक्षणोपकारिकारणं नान्यत्रेत्यत्र बीजाभावात्, सत्कार्यवादे तु सत्त्वस्य सर्वकार्येष्वविशिष्टत्वेऽपि परस्परवैलक्षण्यरूपा विशिष्टता दृष्टत्वात् कारणाधेया स्यादेवेति ॥ १२१ ॥ ३५८ ॥

अतिप्रसङ्गे सत्यपि स्वदर्शनपक्षपातेनानन्वयाभ्युपगमो बौद्धस्य न युक्त इत्याह—

**तथापि तु तयोरेव, तत्स्वभावत्वकल्पनम् ।**
**अन्यत्रापि समानत्वात् , केवलं स्वान्ध्यसूचकम् ॥१२२॥३५९॥**

**तथापि** त्विति-कार्यस्य तद्रूपशक्त्यादिवैकल्येनातिप्रसङ्गोऽपीत्यर्थः, स्वदर्शनानुरागेण, **तयोरेव** विवक्षितहेतु-फलयोरेव, **तत्स्वभावत्वकल्पनम्** तज्जननादिस्वभावत्वसमर्थनम्, **अन्यत्रापि** अनभिप्रेतहेतुफलभावेऽपि, **समानत्वात्** वाङ्मात्रेण सुवचत्वात्, **केवलं स्वान्ध्यसूचकम्** वक्तुरज्ञानव्यञ्जकम्, 'स्वान्ध्यसूचकम्' इत्युपाध्यायसम्मतः पाठः, तत्स्थाने 'ध्यान्ध्यसूचकम्' इति हरिभद्रसूरिसम्मतः पाठः, अज्ञानसूचकमित्येतावन्मात्रतद्व्याख्यानात् ॥ १२२ ॥ ३५९ ॥

क्षणिकत्वाभ्युपगमे बौद्धानामागमविरोधमप्यावेदयति—

**किञ्चान्यत् क्षणिकत्वे व, आर्षार्थोऽपि विरुध्यते ।**
**विरोधापादनं चास्य, नाल्पस्य तमसः फलम् ॥ १२३ ॥ ३६० ॥**

**किञ्चे**ति-अपि चेत्यर्थः, **अन्यद्** दूषणान्तरम्, **क्षणिकत्वे** निरन्वयनश्वरत्वाभ्युपगमे, **वः** युष्माकं बौद्धानामिति यावत्, **आर्षार्थोऽपि** आगमार्थोऽपि, **विरुध्यते** असङ्गतो भवति, **विरोधापादनं** तद्विषयविरुद्धविषयाभ्युपगमेनासङ्गतत्वसम्पादनम्, **अस्य च** आर्षार्थस्य पुनः, **न** नैव, **अल्पस्य** स्वल्पप्रमाणस्य, **तमसः** अज्ञानस्य, **फलं** कार्यम्, किन्तु क्षणिकत्वे अनन्तरोल्लिख्यमानबुद्धोक्तेः स्थैर्ये सत्येव सम्भविन्या अप्रामाण्यापत्तौ तन्मूलकामुष्मिकप्रवृत्तिमात्रोच्छेदेन महापायहेतुत्वान्महत एवाज्ञानस्य फलमेतत् ॥ १२३ ॥ ३६० ॥

यस्य बुद्धवचनस्य विशेषः क्षणिकत्वाभ्युपगमे आपतति, तद्बुद्धवचनमुल्लिखति—

**इत एकनवते कल्पे, शक्त्या मे पुरुषो हतः ।**
**तेन कर्मविपाकेन, पादे विद्धोऽस्मि भिक्षवः ॥ १२४ ॥ ३६१ ॥**

**इत** इति-अस्माद् वर्तमानसमयादित्यर्थः, **एकनवते कल्पे** अतिक्रान्ते एकनवते कल्पे, **मे** मया, **शक्त्या** प्रहरणविशेषेण, **पुरुषः** अनिर्दिष्टनामा कश्चित् पुरुषः, **हतः** व्यापादितः, **तेन कर्मविपाकेन** यत् तस्मिन् हते कर्म बद्धं तदनुभावेन पुरुषव्यापादनजनितकर्मभोगकालसाम्मुख्येनेति यावत्, **पादे विद्धोऽस्मि**

**भिक्षवः** हे भिक्षवः-साधवः!, अहं पादे-चरणे, कण्टकेन विद्धोऽस्मि इय-मुक्तिर्बुद्धस्य कण्टकवेधे कथमयं कण्टकमप्यपश्यन् सर्वज्ञ इत्येवंविधापरिणतभिक्षु-गतमिथ्यात्वापोहाय, पश्यन्नपि कण्टकं तस्य कर्मणो नियमवेदनीयत्वात्, न ह्येतत् ममापि फलमदत्त्वा निवर्तेत इति विदितमस्तु भवताम् ॥ १२४ ॥ ३६१ ॥

अनन्तरोल्लिखितबुद्धोक्तौ क्षणिकताभ्युपगमविरोधो यथाऽऽपद्यते तथोप-दर्शयति—

**मे मयेत्यात्मनिर्देशस्तद्गतोक्ता वधक्रिया ।**
**स्वयमाप्तेन यत् तद्वः, कोऽयं क्षणिकताग्रहः? ॥ १२५ ॥ ३६२ ॥**

**मे मयेत्यात्मनिर्देश** इति-'शक्त्या मे पुरुषो हतः' इत्येतत्सन्निविष्टस्यास्म-च्छब्दस्य स्वतन्त्रोच्चारणकर्तृशक्तस्य 'मे' इत्येवमुल्लिखितस्य षष्ठ्यन्तत्वभ्रमव्यपोहाय यद्विवरणं '**मया**' इति तत् स्थिरप्रवक्तृबुद्धात्मनिर्देश इत्यर्थः, **तद्गता** आत्मगता, **वधक्रिया** क्तप्रत्ययान्तहन्धातुनिष्पन्न 'हत' इति शब्दार्थप्राणवियोगानुकूलव्या-पारजन्यफलशालित्वघटकीभूता प्राणवियोगानुकूलव्यापारलक्षणा वधक्रिया, **यत्** यस्मात्, **स्वयमाप्तेनोक्ता** 'मया हतः' इत्येवं स्वयं बुद्धेनाभिहिता, 'मया हतः पुरुषः' इत्यस्य मद्वृत्तिप्राणवियोगानुकूलव्यापारजन्यप्राणवियोगलक्षणफलशाली पुरुष इत्यर्थः, **तत्** तस्मात् कारणात्, **वः** युष्माकं बौद्धानाम्, **कोऽयम्** अप्रा-माणिकः, **क्षणिकताऽऽग्रहः** सर्वं क्षणिकमित्येवं क्षणिकताऽभिनिवेशः, अत्र बुद्धेन कर्तृ-भोक्त्रोरभेदे प्रतिपादिते तदवगणनेन तद्भेदाभ्युपगमानौचित्यादिति भावमाहुरुपाध्यायाः ॥ १२५ ॥ ३६२ ॥

अत्रैवाक्षेप-परिहारावुद्भावयति—

**संतानापेक्षयैतच्चेदुक्तं भगवता ननु ।**
**सहेतुफलभावो यत्, तद् 'मे' इति न संगतम् ॥ १२६ ॥ ३६३ ॥**

**संतानेति**, एतत् 'इत एकनवते' इत्यादिवचनं, **सन्तानापेक्षया** हन्तृचै-तन्य-भोक्तृचैतन्ययोरेकः सन्तान इत्येवं सन्तानैक्याभ्युपगमेन, **भगवता** बुद्धेन, **उक्तं** कथितम्, **चेत्** इति यदि, अत्रोत्तरं-**ननु स** सन्तानः, **यत्** यस्मात्, **हेतुफलभावः** हेतुफलप्रवाहलक्षणः, **तत्** तस्मात्, **मे इति न सङ्गतम्** हेतुफलभावलक्षणसन्तानस्य भावेऽपि वधकर्तृ-तत्फलभोक्त्रोर्भेदेन हन्तृक्षणनिष्ठाया वधक्रियाया उच्चारयितृभोक्तृक्षणवृत्तित्वाभावादित्याशयः ॥ १२६ ॥ ३६३ ॥

तदीयमभिप्रायान्तरमपाकरोति—

**ममैव हेतुशक्त्या चेत्?, तस्यार्थोऽयं विवक्षितः ।**
**नात्र प्रमाणमत्यक्षा, तद्विवक्षा यतो मता ॥ १२७ ॥ ३६४ ॥**

**ममैवेति, ममैव हेतुशक्त्या** 'मे' इत्यस्य ममेत्यर्थकत्वेन 'शक्त्या इत्यस्य हेतुशक्त्येत्यर्थकत्वेन 'शक्त्या मे' इत्यनेन ममैव हेतुशक्त्येत्येवमर्थो बुद्धस्य विवक्षितः, **चेत्** इत्येवं यदि वोऽभिमतम्, अत्रोत्तरं-**तस्ये**ति-बुद्धस्येत्यर्थः, **अयमनन्तर**-मुपदर्शितः, **अर्थः** 'शक्त्या मे' इत्यस्यार्थः, **विवक्षितः** विवक्षाविषयः, **अत्र** ईदृशेऽर्थे, **न** नैव, **प्रमाणम्**, किमपि प्रमाणम्, **यतः** यस्मात्, **तद्विवक्षा** बुद्धविवक्षा, **अत्यक्षा** अक्षमतिक्रान्ता, अतीन्द्रिया, अप्रत्यक्षेति यावत्, **मता** अभिमता, तथाविवक्षायां प्रत्यक्षप्रमाणस्याप्रवृत्तौ तन्मूलकमनुमानप्रमाणमपि न प्रवर्तितुमुत्सहत इत्याशयः ॥ १२७ ॥ ३६४ ॥

"शक्त्या मे" इत्यस्य मम हेतुशक्त्येत्यर्थो यदि बुद्धस्य न विवक्षितस्तदा क्षणिकत्वदेशनैव बुद्धस्यानुपपन्ना स्यात्, अतस्तदीयक्षणिकत्वदेशनान्यथानुपपत्त्या तादृशी बुद्धविवक्षा कल्प्यत इत्यत आह—

**तद्देशना प्रमाणं चेत्?, साऽन्यार्था न भविष्यति ।**
**तत्रापि किं प्रमाणं चेदिदं पूर्वोक्तमार्षकम् ॥ १२८ ॥ ३६५ ॥**

**तद्देशने**ति, "क्षणिकाः सर्वसंस्काराः" इत्याद्या बुद्धदेशनेत्यर्थः, **प्रमाणं चेत्** तादृशबुद्धविवक्षायां प्रमाणमिति चेत्?, **न**—नैवम्, **यत** इति शेषः। यस्मादित्यर्थः, **सा** "क्षणिकाः सर्वसंस्काराः" इत्याद्या बुद्धदेशना, **अन्यार्था** संसारस्य क्षणभङ्गुरत्वादिभावनया तत्र मोहो न कार्य इत्येवं संसारास्थानिवृत्त्यर्था, भविष्यति, एवं च "क्षणिकाः सर्वसंस्काराः" इत्यादिबुद्धदेशना वाच्यार्थे न प्रमाणं, किन्तु संसारास्थानिवृत्तिरूपतात्पर्यार्थे प्रमाणमित्यभिसन्धिः, **तत्रापि** यथाश्रुतार्थे सा न प्रमाणं किन्तु निरुक्ततात्पर्यार्थे इत्यत्रापि, **किं प्रमाणं चेत्?** विनिगमकस्य कस्यचिददर्शनादिदमत्र प्रमाणमिति वक्तुमशक्यमिति प्रष्टुरभिप्रायः, प्राय आर्षवचनस्य तात्पर्यविषयार्थकत्वं दृश्यते, "इत एकनवते" इत्यादिवचन-प्रामाण्यस्य स्थैर्ये सत्येवोपपन्नतेति तदनुरोधेन "क्षणिकाः सर्वसंस्काराः" इति देशनाया अन्यार्थत्वमित्याशयेनोत्तरयति-**इदं पूर्वोक्तमार्षक**मिति-"इत एकनवते" इत्यादिपूर्वोक्तमार्षवचनमेव "क्षणिकाः सर्वसंस्काराः" इति देशनाया

यथाश्रुतार्थातिरिक्ततात्पर्यविषयार्थकत्वे प्रमाणमित्यर्थः; न च क्षणिकत्वदेशनाऽन्यथानुपपत्त्या "इत एकनवते" इति देशनाया अन्यार्थत्वम् "इत एकनवते" इति देशनान्यथानुपपत्त्या "क्षणिकाः सर्वसंस्काराः" इत्यादिदेशनाया अन्यार्थत्वमित्यत्र विनिगमकाभाव इति वाच्यं, क्षणिकत्वपक्षे उक्तदोषोपनिपातस्य क्षणिकत्वदेशनाया अन्यार्थत्वे विनिगमकत्वादित्यभिसन्धिः ॥ १२८ ॥ ३६५ ॥

"क्षणिकाः सर्वसंस्काराः" इत्यस्य क्षणिकत्वार्थकत्वे आर्षान्तरविरोधमुपदर्शयति—

**तथाऽन्यदपि यत् कल्पस्थायिनी पृथिवी क्वचित् ।**
**उक्ता भगवता भिक्षूनामन्त्र्य स्वयमेव तु ॥ १२९ ॥ ३६६ ॥**

**तथेति**–"इत एकनवते" इत्यादिबुद्धवचनविरोधो यथा क्षणिकत्वदेशनायां तद्वदित्यर्थः, **अन्यदपि** आर्षं वचनान्तरमपि, विरुद्धमिति दृश्यम्, **यत्** यस्मात्, **क्वचित्**, सूत्रान्तरे, **कल्पस्थायिनी पृथिवी** "कप्पट्ठाई पुहई भिक्खवो !" इति वचनेन, **भिक्षून्** साधून्, **आमन्त्र्य** अभिमुखीकृत्य, **भगवता** बुद्धेन, **स्वयमेव तु** साक्षादेव च, **उक्ता** अभिहिता, एकस्याः क्षणिकपृथिवीव्यक्तेः कल्पस्थायित्वं नोक्तं, किन्तु पृथिवीपदं पृथिवीसन्ततिपरं, तथा च पृथिवीसन्ततेः कल्पस्थायित्वोक्तेर्न दोष इति चेत् ?, न–शक्त्या निर्वाहे लाक्षणिकप्रयोगाश्रयणस्यानौचित्यात्; पृथिवीत्वावच्छिन्नशक्तेन पृथिवीपदेन सन्तानभावमापन्नाः पृथिवीक्षणाः शक्त्यैव बोधितास्तेषां सन्तत्यात्मना कल्पस्थायित्वमिति चेत् ?, न–एकवचनानुपपत्तेः, सन्तानिव्यतिरिक्तस्यैकस्य सन्तानस्याभावेन तद्गतैकत्वस्याप्रसिद्ध्या तद्बोधकैकवचनानुपपत्तेः, वास्तविकस्यैकत्वस्याभावेऽपि सन्तानिनां पृथिवीव्यक्तिक्षणानां सांवृतमेकत्वमस्तीति तद्बोधकतयैकवचनमुपपद्यत इति चेत् ?, न–एकस्या अपि पृथिवीक्षणव्यक्तेर्वास्तविकस्य कल्पस्थायित्वादेरभावेऽपि काल्पनिकं तदस्त्विति सर्वं सुगतवचनं काल्पनिकार्थत्वाद् विलूनशीर्णं स्यात्, तस्मात् "कप्पट्ठाई पुहई" इत्यस्य यथाश्रुत एवार्थो ज्यायानिति पृथिव्याः स्थैर्यबोधकमिदं वचनं "क्षणिकाः सर्वसंस्काराः" इत्यादिबुद्धदेशनाविरुद्धमेव, ततः "क्षणिकाः सर्वसंस्काराः" इत्यादिदेशना न यथाश्रुतार्था, किन्तु संसारास्थानिवृत्त्यर्थैवेति ॥ १२९ ॥ ३६६ ॥

कथञ्चिन्नित्यत्वसाधकं वचनान्तरमपि सुगतस्येत्याह—

**पञ्च बाह्या द्विविज्ञेया इत्यन्यदपि चार्षकम् ।**
**प्रमाणमवगन्तव्यं प्रक्रान्तार्थप्रसाधकम् ॥ १३० ॥ ३६७ ॥**

पञ्चेति–पञ्चसंख्यका इत्यर्थः, **बाह्याः** बहिःस्थिता रूप-रस-गन्ध-स्पर्श-शब्दाः, **द्विविज्ञेयाः** चक्षुरादिबहिरिन्द्रियमनोविज्ञानग्राह्याः, **इत्यन्यदपि चार्षकं** एवं-स्वरूपं वचनान्तरमपि सुगतवक्तृकं, **प्रक्रान्तार्थप्रसाधकं** तन्त्रयुक्त्या प्रक्रान्तस्य कथञ्चिदक्षणिकत्वस्य सिद्धिजनकम्, **प्रमाणमवगन्तव्यम्** प्रमाणमवबोद्धव्यम् ॥ १३० ॥ ३६७ ॥

रूपादिकं चक्षुरादिना यदा गृह्यते न तदैव मनसा, किन्तु प्रथमं चक्षुषा, तदनन्तरं मनसा गृह्यत इत्येवं द्विविज्ञेयत्वं रूपादीनां स्थायित्वे सत्येवोपपद्यत इत्याह—

**क्षणिकत्वे यतोऽमीषां, न द्विविज्ञेयता भवेत् ।**
**भिन्नकालग्रहे ह्याभ्यां, तच्छब्दार्थोपपत्तितः ॥१३१॥३६८॥**

**क्षणिकत्व** इति–क्षणमात्रस्थितिमनुभूय विनशनस्वभावत्व इत्यर्थः, **यतः** यस्मात्, **अमीषां** बाह्यानां रूप-रस-गन्ध-स्पर्श-शब्दानाम्, **द्विविज्ञेयता** चक्षुरादीन्द्रिय-मनोविज्ञानग्राह्यता, **न भवेत्** नैव स्यात्, **हि** यतः, **आभ्याम्** इन्द्रिय-मनोभ्यां, **भिन्नकालग्रहे** पूर्वमिन्द्रियेण ततो मनसेत्येवं कालभेदेन ज्ञान-द्वयजनने सति, **तच्छब्दार्थोपपत्तितः** द्विविज्ञेयत्वशब्दार्थस्य घटमानत्वात् ॥ १३१ ॥ ३६८ ॥

कथं भिन्नकालग्रहे द्विविज्ञेयत्वार्थो घटते न त्वेककालग्रहे, एकदाऽपि द्वाभ्या-मिन्द्रिय-मनोभ्यां ज्ञानद्वयजनने तद्विषयत्वलक्षणस्य द्विविज्ञेयत्वस्य सम्भवादित्यत आह—

**एककालग्रहे तु स्यात्, तत्रैकस्याप्रमाणता ।**
**गृहीतग्रहणादेवं, मिथ्या ताथागतं वचः ॥ १३२ ॥ ३६९ ॥**

**एककालग्रहे** त्विति–एकदैवेन्द्रिय-मनोभ्यां ज्ञानद्वयजनने पुनरित्यर्थः, **तत्र** इन्द्रिय-मनोविज्ञानयोर्मध्ये, **एकस्य** इन्द्रियविज्ञानस्य मनोविज्ञानस्य वा, **गृहीत-ग्रहणात्** मनोविज्ञानगृहीतस्येन्द्रियविज्ञानेन ग्रहणात्, इन्द्रियविज्ञानगृहीतस्य

मनोविज्ञानेन ग्रहणात्, **अप्रमाणता** अगृहीतग्राहित्वलक्षणप्रामाण्यविरुद्धमप्रामाण्यं, **स्यात्** आपद्येत, एवं भवत्वेवं किं नश्छिन्नमित्युपगमे सति, **ताथागतं** बौद्धं, **वचः** "पञ्च बाह्या द्विविज्ञेयाः" इति वचनम्, **मिथ्या** अप्रमाणं भवेत् ॥ १३२ ॥ ३६९ ॥

पराभिप्रायमुपदर्शयति—

**इन्द्रियेण परिच्छिन्ने, रूपादौ तदनन्तरम् ।**
**यद् रूपाणि ततस्तत्र, मनोज्ञानं प्रवर्तते ॥ १३३ ॥ ३७० ॥**

**इन्द्रियेणे**ति–इन्द्रियजज्ञानेनेत्यर्थः, **परिच्छिन्ने** गृहीते, इन्द्रियजज्ञानस्य निर्विकल्पकत्वेन निश्चयरूपत्वाभावात् 'परिच्छिन्ने' इत्यस्य 'निर्णीते' इत्यर्थकत्वासम्भवात्, **रूपादौ** रूपादिलक्षणबाह्यविषये **तदनन्तरम्** इन्द्रियगृहीतरूपाद्यनन्तरं, **यद्रूपादि** इन्द्रियजरूपादिज्ञानसमानकालोत्पत्तिकं तज्ज्ञानगृहीततदव्यवहितपूर्वकालीनरूपादिक्षणसमुत्पन्नं रूपादि, **ततः** इन्द्रियजज्ञानलक्षणसमनन्तरप्रत्ययात्, **तत्र** इन्द्रियजज्ञानसमानकालोत्पन्नरूपादौ, **मनोज्ञानं** मनोजन्यज्ञानम्, **प्रवर्तते** ग्रहणव्यापृतं भवति, तदाह न्यायवादी धर्मकीर्तिर्बौद्धप्रधानः "स्वविषयानन्तरविषयसहकारिणेन्द्रियविज्ञानेन समनन्तरप्रत्ययेन जनितं मनोविज्ञानम्" इति ॥ १३३ ॥ ३७० ॥

एतदेव निगमयति—

**एवं च न विरोधोऽस्ति, द्विविज्ञेयत्वभावतः ।**
**पञ्चानामपि चेन्न्यायादेतदप्यसमञ्जसम् ॥ १३४ ॥ ३७१ ॥**

**एवं चे**ति–अनन्तरोदितन्याये सतीत्यर्थः, **न्यायात्** अनन्तरोपदर्शितयुक्तितः, **पञ्चानामपि** रूपादिबाह्यानां पञ्चानामपि, **द्विविज्ञेयत्वभावतः** इन्द्रिय-मनोविज्ञेयत्वयोगात्, **न विरोधोऽस्ति** "पञ्च बाह्या द्विविज्ञेयाः" इति बुद्धवचनस्य विरोधो नास्ति, क्षणिकत्वेऽभ्युपगम्यमानेऽपि द्विविज्ञेयत्वस्योक्तदिशोपपत्तेः, **चेत्** इति चेत्, अत्रोत्तरम्–**एतदपी**ति–अनन्तराभिहितमपीत्यर्थः, असमञ्जसं न सङ्गतिमेति ॥ १३४ ॥ ३७१ ॥

यं न्यायादसमञ्जसं तं न्यायमुपदर्शयति—

**नैकोऽपि यद् द्विविज्ञेय, एकैकेनैव वेदनात् ।**
**सामान्यापेक्षयैतच्चेत्, न तत्सत्त्वप्रसङ्गतः ॥ १३५ ॥ ३७२ ॥**

**नैकोऽपीति**–रूपादीनां पञ्चानां मध्यादेकोऽपि नेत्यर्थः, **यत्** यस्मात् कारणात्, **द्विविज्ञेयः** इन्द्रिय-मनोविज्ञेयः, **एकैकेनैव** एतदनन्तरम् एकैकस्येति दृश्यम्, **वेदनात्** एकैकेनैवेन्द्रियज्ञानादिनैकैकस्यैव रूपादेर्वेदनाद्–ग्रहणात्, यदिन्द्रियज्ञानाव्यवहितपूर्वक्षणोत्पन्नं रूपादि तदिन्द्रियज्ञानेन वेद्यते, न तु मनोविज्ञानेन, यच्चेन्द्रियज्ञानसमानकालभावि रूपादि तन्मनोविज्ञानेन वेद्यते, नेन्द्रियविज्ञानेनेति द्विविज्ञेयत्वं न कस्यापीति, परः शङ्कते-**सामान्यापेक्षयेति**–रूपादिसामान्यापेक्षयेत्यर्थः, **एतत्** रूपादीनां पञ्चानां द्विविज्ञेयत्वम्, उपपद्यते इति दृश्यम्, एवं च क्षणिकत्वेऽप्येषां नोक्तवचनविरोधः, **चेत्** यदि, **न** एतदेवं न, तत्र हेतुः–**तत्सत्त्वप्रसङ्गत** इति–सामान्यस्यासत्त्वे तस्येन्द्रियजज्ञानं न स्यादसतो विकल्पमात्रवेद्यत्वाभ्युपगमादितीन्द्रियजज्ञानविषयत्वेन सामान्यस्य सत्त्वप्रसङ्गादित्यर्थः ॥ १३५ ॥ ३७२ ॥

सामान्यस्य सत्त्वेऽपि स्वलक्षणमात्रविषयकत्वेनाभ्युपगतस्येन्द्रियजज्ञानस्य मनोज्ञानस्य च प्रत्यक्षात्मकस्य विषयत्वं न सम्भवतीति दोषमुपदर्शयति—

**सत्त्वेऽपि नेन्द्रियज्ञानं, हन्त ! तद्गोचरं मतम् ।**
**द्विविज्ञेयत्वमित्येवं, क्षणभेदेन तत्त्वतः ॥ १३६ ॥ ३७३ ॥**

**सत्त्वेऽपीति**–रूपादिसामान्यस्य सत्त्वेऽपीत्यर्थः, **न** नैव, अस्य मतमित्यनेनान्वयः, **इन्द्रियज्ञानं** चक्षुरादिजन्यज्ञानम्, एतच्च मनोज्ञानस्याप्युपलक्षणम्, **हन्त !** सूक्ष्मशेमुषीशालिनोऽपि बौद्धस्य न स्वसिद्धान्ताभिज्ञत्वमित्याश्चर्यम्, **तद्गोचरं** सामान्यविषयकम्, **मतं** बौद्धेन स्वीकृतं, नैवेत्यर्थः, स्वलक्षणविषयकत्वेनैवेन्द्रिय-मनोविज्ञानयोः प्रत्यक्षरूपयोर्बौद्धमतेऽपगमात् । उपसंहरति-**इत्येवमिति**–उक्तप्रकारेणेत्यर्थः, **क्षणभेदे** इन्द्रियजज्ञानविषयरूपादिक्षण-मनोविज्ञानविषयरूपादिक्षणयोर्भेदः, **तत्त्वतः** परमार्थतः, **द्विविज्ञेयत्वम्** इन्द्रिय-मनोज्ञानद्वयविषयत्वं, **न** न शोभते । अत्र शिष्यबुद्धिवैशद्याय श्रीमद्भिर्यशोविजयोपाध्यायैरुपदर्शितो विचारः किञ्चिदुपस्कारसनाथीकृत उपदर्श्यते, तथाहि–"ननु रूपादीनां पञ्चानां क्षणभेदेऽपि द्विविज्ञेयत्वं शोभत एव, यथा नैयायिकादीनां मते यदेव घटे रूपं न तदेव पटे रूपं, किन्तु तयोर्भेद एव, एवमपि घट-पटयो रूपमित्यादौ रूपे प्रत्येकं घटवृत्तित्व-पटवृत्तित्वान्वयमुपादाय घटपटोभयवृत्तित्वान्वयः, तथा रूपादीनामपि प्रत्येकमेकस्मिन् रूपादाविन्द्रियज्ञानवेद्यत्वमपरस्मिन्

रूपादौ मनोज्ञानवेद्यत्वमित्येवं विभिन्नज्ञानविषयत्वद्वयान्वयसमाश्रयणेन द्विविज्ञेयत्वान्वयोपपत्तेः, न हि नैयायिकादिमते रूपत्वसामान्ये घटपटोभयवृत्तित्वान्वयः सम्भवति, रूपत्वस्य द्रव्यावृत्तित्वादिति चेत्?, न—नैयायिकादीनां मतेऽपि सामान्यविशेषरूपानेकान्तात्मकवस्त्वनभ्युपगमे घटपटोभयनिरूपितवृत्तित्वस्य रूपेऽन्वयानुपपत्तेः, सङ्ग्रहनयाश्रयणेन घट-पटोभयरूपसामान्योद्भूतत्वविवक्षयैव घट-पटयो रूपमित्यादौ रूपसामान्ये घट-पटोभयनिरूपितवृत्तित्वान्वयस्योपपत्तेः, सङ्ग्रहनयानाश्रयणे तु घटे रूपमन्यत् तदन्यच्च पटे रूपमिति नैकस्य रूपस्य घटपटोभयनिरूपितवृत्तित्वमिति घट-पटोभयगतं यदेकं द्वित्वमुद्भूतं द्विवचनेन प्रकटीभूतं तेन पर्याप्तिसम्बन्धेन क्रोडीकृतत्वादेकतापन्नयोर्घट-पटयोरेकैकरूपनिष्ठवृत्तित्वे निरूपकतयाऽन्वयासम्भवात्, घट-पटयोरिति द्विवचनोपस्थिताद् द्वित्वाद् द्वयोर्घट-पटयोर्भेदविवक्षणेनार्थादुपलक्षणतयैव द्वित्वभानोपगमेन रूपे द्वित्वोपलक्षितघटनिरूपितवृत्तित्वान्वयस्य द्वित्वोपलक्षितपटनिरूपितवृत्तित्वान्वयस्येत्येवं प्रत्येकान्वयस्य तु घटाधेयघटरूपपटाधेयपटरूपगतद्वित्वस्योपलक्षणत्वं समाश्रित्य तदुपलक्ष्यतावच्छेदकघटरूपत्व-पटरूपत्वावच्छिन्नबोधकघटरूपेति पटरूपेति पदोपसंदानस्थल एव व्युत्पन्नत्वात्, यथा घट-पटयोर्घटपटरूपे इति, घट-पटयो रूपमित्यादौ तु निरुक्तधर्मद्वयावच्छिन्नवाचकपदसमभिव्याहाराभावात् प्रत्येकान्वयासम्भवादिति सङ्ग्रहनयेनैवैकं रूपसामान्यं द्वित्वपर्याप्त्याश्रयघटपटनिरूपितवृत्तितावदिति घट-पटयो रूपमिति प्रयोगो युज्यते, व्यवहारनयाश्रयणात् तु घट-पटयो रूपमिति प्रयोगोऽनुपपन्न एव, रूपपदादेकरूपेणोपस्थितियोग्यस्यापि रूपस्य भिन्नाश्रयवाचकपदसमभिव्याहारेण भेदविवक्षावश्यकत्वात्, उभयत्र मिलितवृत्तित्वान्वयायोगात्, अत एव न तन्मते पञ्चानां प्रदेशः, किन्तु पञ्चविधः प्रदेश एव इति व्युत्पादितं नयरहस्ये, अत एव च 'स्याद् घट-पटयोर्न रूपं, स्याद् घट-पटयो रूपम्', इति वाक्यात् तात्पर्यज्ञस्य क्रमिकविधिनिषेधान्वयानुभवः सुघटः, भिन्ननयजन्यान्वयबोधे भिन्ननयजन्यबोधधियोऽप्रतिबन्धकत्वात्, प्रत्युत महावाक्यार्थबोधेऽवान्तरवाक्यार्थज्ञानस्य हेतुत्वेनानुगुणत्वात्।

यत्तु—घट-पटयोर्न रूपमिति वाक्यं तात्पर्यभेदेन योग्यायोग्यम्; घट-पटयो रूपत्वावच्छिन्नाभावान्वयतात्पर्येऽयोग्यमेव, रूपत्वावच्छेदेन घट-पटोभयवृत्तित्वाभावान्वयतात्पर्ये च योग्यमेव, घट-पटयो रूपमित्यादौ च तद्वृत्तित्वस्यापि रूपत्वादिसामानाधिकरण्येनान्वयबोध एव साकाङ्क्षत्वे तु एतयोर्घटरूपमित्यपि स्यादिति

परेषां वासनाविजृम्भितम्, तदसत्–उभयरूपसामान्यस्य प्रत्येकरूपविशेषात् कथञ्चिद् भेदानभ्युपगमे व्युत्पत्तिभ्रमात्, घट-पटयोर्घटरूपमिति जायमानस्य बोधस्य प्रामाण्यापत्तेः, मम तु स्यादंशबाधेन तदभावात्, एतन्मतखण्डने नयामृततरङ्गिण्यां ग्रन्थसन्दर्भ एवम्–"तदसत्, प्रतिवस्तुन्याकाङ्क्षावैचित्र्यस्यापेक्षाबोधात्मकफलवैचित्र्यार्थमेवाश्रयणात्, उभयरूपसामान्यस्य प्रत्येकरूपविशेषात् कथञ्चिद्भेदानभ्युपगमे त्वदुक्तान्यव्युत्पत्तिग्रहात् 'घट-पटयोर्घटरूपम्' इति जायमानबोधस्य प्रामाण्यापत्तेश्च, अस्माकं तु स्यादर्थानुप्रवेशस्यैवातिप्रसङ्गभञ्जकत्वान्न दोष इति। किञ्च, एवं 'द्वयोर्गुरुत्वं न गन्धः' इत्यादौ का गतिः? गुरुत्वत्वसामानाधिकरण्येनेव गन्धत्वसामानाधिकरण्येनापि पृथिवी-जलोभयाश्रयवृत्तित्वसाम्यात्, विधि-निषेधविषयार्थानिरुक्तेः, अत्र सप्तम्याः स्वार्थान्वयितावच्छेदकस्वरूपा तत्समव्याप्याऽतिरिक्तैव वाऽऽधेयताऽर्थः, तत्र च प्रकृत्यर्थस्य तन्निष्ठनिरूपितत्वविशेषेणान्वयात् पृथिवी-जलोभयविशिष्टाधेयतावत्त्वेन गुरुत्वं विधेयतया, गन्धश्च निषेध्यतया प्रतीयत इत्युक्तौ च नामान्तरेण गुरुत्वसामान्यस्यैव विधेयत्वं गन्धसामान्यस्यैव च निषेध्यत्वमुक्तमायुष्मता, अतिरिक्ताधेयताऽनिरूपणात्, अन्यथा घट-पटयोर्न घटरूपमित्यादौ सप्तम्यर्थान्वयितावच्छेदकघटरूपत्वादिस्वरूपाया आधेयताया घट-पटोभयनिरूपिताया अप्रसिद्धत्वेनानिषेध्यत्वेऽपि जाति-घटयोर्न सत्तेत्यादाविव घट-पटोभयनिरूपितत्वाभाववदाधेयतावद्घटरूपमित्यन्वयोपपादनेऽपि घट-पटयोर्न घटरूप-पटरूपे इत्यस्यानुपपादनात्, घटरूपत्वादिस्वरूपाया आधेयताया उभयानिरूपितत्वात्; तत्र तद्वित्वादिस्वरूपैवाधेयतेति चेत्?, द्वयोः प्रत्येकरूपावच्छेदेन द्वित्वाभावात् निषेधस्यापि प्रवृत्तिः स्यात्; अनुयोगितावच्छेदकावच्छेदेनैव सप्तम्यर्थाधेयत्वान्वयव्युत्पत्तेर्नायं दोष इति चेत्?, तथापि घट-पटयोर्न घटरूपाकाशे इत्यादिकं कथम्?, एतद्वित्वादिस्वरूपाया आधेयताया उभयानिरूपितत्वात्, नञस्तात्पर्यवशात् द्वेधाऽन्वयेऽप्युभयस्यानाधेयत्वाभावात्, अनुभवविरुद्धं च सर्वमेतत् कल्पनमिति न किञ्चिदेतत्; शबलात्मकमेव हि वस्तु कदाचिदनुगतं, कदाचिच्च व्यावृत्तमनुभूयमानं शोभते, भेदाभेदशक्तिवैचित्र्यात्, आर्थन्यायेन यथाक्षयोपशमं ग्रहणादिति परिभावनीयम्" इति। सर्वं चैतन्नयामृततरङ्गिण्यामपि श्रीमद्भिरुपाध्यायैरुपदर्शितम्; तद्व्याख्यायां चास्माभिर्यथावदुपपादितमिति तत एव तद्याथार्थ्यावगमो विधेयो जिज्ञासुभिः ॥ १३६ ॥ ३७३ ॥

सर्वपदार्थक्षणिकत्वप्रसाधनप्रवणसौत्रान्तिकमतखण्डनवार्तां उपसंहरति—

**सर्वमेतेन विक्षिप्तं, क्षणिकत्वप्रसाधनम् ।**
**तथाप्यूर्ध्वं विशेषेण, किञ्चित् तत्रापि वक्ष्यते ॥ १३७ ॥ ३७४ ॥**

**सर्वमिति, एतेन** उक्तदोषकदम्बकेन, **सर्वं** निखिलम्, **क्षणिकत्वप्रसाधनं** क्षणिकत्वसिद्धिप्रगल्भं नाशहेत्वयोगादिकं, **विक्षिप्तं** निराकृतम्, क्षणिकत्वबाधक-स्थैर्यसाधकतर्कप्राबल्यात्; यद्यपि योगाचारमतमपि प्रसङ्गादपाकृतमेव, **तथाऽपि** सामान्यतः क्षणिकत्वैकान्तस्वीकर्तृसकलसुगतसुतमतापाकरणेऽपि, **ऊर्ध्वं** योगाचारमतनिराकरणानन्तरम्, **तत्रापि** नाशहेत्वयोगादीनां सौत्रान्तिक-योगाचारोभयप्रसिद्धक्षणिकत्वसाधनप्रवणानां निराकरणानन्तरमवसरप्राप्ते योगाचारनिराकरणग्रन्थेऽपि **किञ्चित्** यद् यद् योगाचारमतनिराकरणमुपपादनसापेक्षमेव परीक्षकानुमोदनार्हं तत्तदुपपादनस्थानानुरोधिसूक्ष्ममतिगम्यं, **विशेषेण** प्रतिस्वं तदाशयोद्भावनेन, **वक्ष्यते** पञ्चमस्तबके कीर्तयिष्यते ॥ १३७ ॥ ३७४ ॥

भो ताथागत ! बुद्धसूत्रनिवहं नो रक्षितं यत् त्वया,
तत् सूत्रान्तकसंज्ञयैव निजकैर्वाच्योऽसि वादाङ्गणे ।
स्वार्थे तद्धितप्रत्ययभ्रमवता सौत्रान्तिकेति प्रथा,
लोके पल्लविता वितर्करसिकाऽऽनन्दाय योग्या न किम् ? ॥ १ ॥
तर्कैः स्थैर्यविधायकैरतितरां सौत्रान्तिक ! त्वन्मतं,
क्षिप्तं नो स्थिरतामुपैति हि ततः स्वात्माश्रितं युज्यते ।
योगाचार ! पराजितस्त्वमपि तैस्तर्कैः प्रमाणाश्रितै-
र्योगं त्वाचर सङ्गता ननु तदा संज्ञापितेऽन्वर्थिका ॥ २ ॥
एकान्तक्षणिकत्वपक्षदलने श्रीहारिभद्रं वचो,
युक्तिव्रातसमेधितं स्वयमपि प्रागल्भ्यमाबिभ्रति ।
तत्र श्रीयशसां नवीनमननं लावण्यसञ्चारितं,
स्याद्वादैकविलोकितं सुगतये भूयादमन्दप्रभम् ॥ ३ ॥

या भक्तिर्मम नेमिसूरिगुरुगा सम्यक् स्थिरा भावतः,
सैवैका हरिभद्रसूरिवचनव्यक्तौ प्रवीणाऽभितः ।
अन्या काऽपि यशोवचोऽनुगमनानेकान्ततत्त्वादरा,
भक्तिर्वीरसमाश्रिता भवतु सा जन्मान्तरेऽपीष्टदा ॥ ४ ॥
स्थैर्यस्थापनतत्परे परमतोत्खातेऽपि संदीक्षिते,
स्याद्वादाऽऽगमतत्त्वबोधफलके तर्कौघसम्मिश्रिते ।
श्रीलावण्यसमुद्गते मतिधना मात्सर्यमुत्सार्य भो !,
ग्रन्थेऽस्मिन् मननैकतानहृदया दृष्टिः शुभा दीयताम् ॥ ५ ॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीविजयनेमिसूरीश्वर-पट्टालङ्कारेण व्याकरण-वाचस्पति-शास्त्रविशारद-कविरत्नेति पदालङ्कृतेन विजय-लावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चय-टीकायां चतुर्थः स्तबकः समाप्तः ॥

॥ अर्हँ ॥

## अथ पञ्चमः स्तबकः ।

यो विश्वस्य समीहितार्थगतयेऽनेकान्तसंदर्शको,
योऽन्तःस्थो नियमयत्यशेषमपि यः स्वर्णाभदेहः प्रभुः ।
यत्स्याद्वादविचालने न प्रभवो नित्योद्यता वादिनो,
वीरं तं सततं नमामि महितं देवाधिदेवं जिनम् ॥ १ ॥

येषां विद्याऽनवद्या बहुविधविषयोल्लासनैकान्तदक्षा,
वादिव्रातोदितार्थप्रचयविदलने मानतर्कानुगम्या ।
नव्यप्राचीनवार्तोभयघटनपराभीष्टसिद्धान्ततत्त्वो-
द्बोधैकान्तप्रगल्भा अमरगुरुसमाः सन्तु तेऽभीष्टसिद्धयै ॥ २ ॥

श्रीनेमिसूरीश्वरपादपद्मसेवाविदग्धो मितधीधनोऽपि ।
लावण्यसूरिर्हरिभद्रसूरेर्वचोऽर्थगत्यै वितनोति किञ्चित् ॥ ३ ॥

जगद् विज्ञानस्वरूपमेवेति योगाचारमतमपाकरोति—

**विज्ञानमात्रवादोऽपि न सम्यगुपपद्यते ।**
**मानं यत् तत्त्वतः किञ्चिदर्थाभावे न विद्यते ॥ १ ॥ ३७५ ॥**

**विज्ञानमात्रवादोऽपीति**—सुगतसुतयोगाचारपरिकल्पितो विज्ञानमात्रं विश्वमिति वादोऽपीत्यर्थः, **सम्यग्** सद्युक्तिभिर्विचार्यमाणः सन्, **न** नैव, **उपपद्यते** उपपन्नो भवति, कुतो नोपपद्यत इत्यपेक्षायामाह—**मानमिति**, **यत्** यस्मात् कारणात्, **मानं** विज्ञानमात्रं जगदित्यस्मिन्नर्थे प्रमाणं, **किञ्चित्** किमपि, **तत्त्वतः** परमार्थतः, **न विद्यते** यदि विज्ञानव्यतिरिक्तस्यार्थस्याभावे किमपि प्रमाणं योगाचारस्य स्वतन्त्रनीत्यैव भवेत्, तदा ततोऽर्थाभावनिश्चयतो ज्ञानमात्रमेवेत्यवधारणं युज्येतापि, अर्थाभावे प्रमाणाभावे तु ज्ञानमेवेत्येवकारार्थस्यार्थव्यवच्छेदस्य निर्णयाभावाज्ज्ञानमेवेत्यवधारणं न युज्यते; तदुक्तम्—

"अयमेवेति यो ह्येष भावे भवति निर्णयः ।

नैव वस्त्वन्तराभावसंवित्त्यनुगमादृते ॥ १ ॥" इति ॥ १ ॥ ३७५ ॥

स्वलक्षणविषयकमध्यक्षं कार्य-स्वभावा-ऽनुपलब्धिलिङ्गकत्रिप्रकारमनुमानमित्येवं प्रमाणद्वयमेवेष्यते तैः, न च तदन्यतरदप्यर्थाभावसाधनप्रगल्भमित्याह—

**न प्रत्यक्षं यतोऽभावालम्बनं न तदिष्यते ।**

**नानुमानं तथाभूतसल्लिङ्गानुपलब्धितः ॥ २ ॥ ३७६ ॥**

**न प्रत्यक्षमिति**–प्रत्यक्षं तावदर्थाभावे न प्रमाणमित्यर्थः, कुत इत्यकाङ्क्षायामाह-**यत** इति–यस्मादित्यर्थः, **तत्** प्रत्यक्षम्, **अभावालम्बनम्** अभावविषयकम्, **न** नैव, **इष्यते** सुगतसुतैरभ्युपगम्यते, स्वलक्षणमात्रविषयकत्वेन सौगताभ्युपगतस्य प्रत्यक्षस्य तुच्छस्वरूपाभावविषयकत्वासम्भवात्; **नानुमानं** प्रत्यक्षाभावे तत्पूर्वकमनुमानमपि नार्थाभावे प्रवर्तितुमुत्सहते, **तथाभूतसल्लिङ्गानुपलब्धितः** अर्थाभावरूपसाध्येन सहाविनाभूतयोः स्वभाव-कार्यलिङ्गयोरसतोरनुपलम्भात्, तुच्छस्याभावस्य निःस्वभावत्वेन स्वभावस्य सामर्थ्यविकलत्वेन कार्यस्य च कस्यचिदभावात् ॥ २ ॥ ३७६ ॥

स्वभाव-कार्यलिङ्गकयोरनुमानयोरभावेऽपि तत्रानुपलब्धिलिङ्गकानुमानं प्रमाणं समस्तीति पराकूतमभिधातुकाम आह—

**उपलब्धिलक्षणप्राप्तोऽर्थो येनोपलभ्यते ।**

**ततश्चानुपलब्ध्यैव, तदभावोऽवसीयते ॥ ३ ॥ ३७७ ॥**

**उपलब्धिलक्षणप्राप्त** इति–यदि बाह्योऽर्थो भवेत् तदा तत्प्रत्यक्षसामग्रीतस्तदुपलम्भो भवेदित्येवमुपलम्भस्यापादयितुं शक्यत्वेनोपलब्धिस्वरूपयोग्य इत्यर्थः, **अर्थो** बाह्यो घटादिः, **यद्** यस्मात्, **नोपलभ्यते** उपलम्भविषयो न भवति, नैयायिकादिनीत्योपलब्धिलक्षणप्राप्तोऽपि वस्तुस्थित्या नोपलभ्यते इति यावत्, एतद्व्याख्यानं "यन्नोपलभ्यते" इति हरिभद्रसूरिसम्मतं मूलपाठमनुसृत्य, "येनोपलभ्यते" इत्युपाध्यायसम्मतः पाठः, तत्र येन कारणेन नैयायिकादिनीत्या बाह्यो घटादिरर्थ उपलभ्यत इत्युपलब्धिलक्षणप्राप्तोऽर्थ इत्यर्थः, **ततश्च** यस्मान्नोपलभ्यते तस्माच्च, उपाध्यायपाठानुरोधे तु–उपलब्धिलक्षणप्राप्तत्वाच्च, **अनुपलब्ध्यैव**

बाह्यार्थानुपलम्भलक्षणलिङ्गेनैव, **तदभावः** बाह्यार्थाभावः, **अवसीयते** अनुमीयते ॥ ३ ॥ ३७७ ॥

अत्रोत्तरमधिकरोति—

**उपलब्धिलक्षणप्राप्तिस्तद्धेत्वन्तरसंहतिः ।**
**तेषां च तत्स्वभावत्वे, तस्यासिद्धिः कथं भवेत्? ॥ ४ ॥ ३७८ ॥**

**उपलब्धीति**–नैयायिकादीनां मते–उपलब्धिलक्षणप्राप्तिर्नाम **तद्धेत्वन्तरसंहतिः** तस्य–प्रतियोग्युपलम्भस्य, यद्धेत्वन्तरं–प्रतियोगितद्व्याप्यभिन्नं कारणं, तत्संहतिः-तत्समुदायः, प्रतियोगितद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधानमुपलब्धिलक्षणप्राप्तिरिति यावत्, **तेषां च** नैयायिकाद्यभिमतघटतद्व्याप्येतरघटोपलम्भकानां तत्स्थाने सौगताभिषिक्तानां कारणान्तराणां वा, **तत्स्वभावत्वे** बाह्यार्थोपलम्भजननस्वभावत्वे योगाचारमतानुयायिनाऽभ्युपगम्यमाने सति, **तस्यासिद्धिरिति** हरिभद्रसूरिसम्मतः पाठः, तस्योपलब्धस्यार्थस्यासिद्धिरनुपलब्धिरित्येवं तद्व्याख्यानात्, तत्स्थाने "तदसिद्धिः" इत्युपाध्यायाभिमतः पाठः, तदसिद्धिः–बाह्यासिद्धिरित्येवं व्याख्यानात्, **कथं भवेत्** बाह्यार्थोपलम्भजननस्वभावहेतुसाकल्ये सति बाह्योपलम्भलक्षणबाह्यसिद्धिरेव भवेत्, बाह्योपलम्भाभावे बाह्योपलम्भजननस्वभावहेतुसाकल्यमित्येव विरुध्येत्, नहि हेतुसाकल्ये सत्यपि कार्यं न भवतीति, प्रतियोगिनो बाह्यार्थस्य तद्व्याप्यस्य चोपलम्भं प्रति कारणत्वं यदि स्यात् तदा प्रतियोग्युपलम्भकयावत्सन्निधानलक्षणोपलब्धिलक्षणप्राप्तौ प्रतियोगितद्व्याप्येतरत्वनिवेशस्यावश्यकतया प्रतियोगितद्व्याप्यासन्निधानेऽपि बाह्यार्थोपलम्भजननस्वभावतथाभूतप्रतियोग्युपलम्भकसमवधानेऽपि प्रतियोग्युपलम्भकसामग्र्यभावात् प्रतियोग्यनुपलब्धिः स्यात्, किन्तु बाह्यार्थस्यालीकत्वमभ्युपगच्छता त्वया बाह्यार्थस्य ज्ञानजनकत्वापत्तिभिया प्रतियोगि-प्रतियोगिव्याप्येतरत्वस्य निरुक्तस्वरूपोपलब्धिलक्षणप्राप्तौ निवेशयितुमशक्यत्वात्, पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानं प्रति कारणत्वं विज्ञानधाराऽनुवृत्त्यर्थमभ्युपगच्छता त्वया तदुपलम्भजनकपूर्वविज्ञानलक्षणसमनन्तरप्रत्ययान्यत्वस्य प्रतियोगि-प्रतियोगिव्याप्येतरत्वस्थाने निवेशेऽपि समनन्तरप्रत्ययात् तदुपलम्भजननस्वभावात् तत्कुर्वद्रूपात्मकादवश्यं कार्यमिति न ह्येकं जनकं सामग्री वै जनिकेति स्वसिद्धान्तो व्याहन्येत, सामग्र्यननुप्रविष्टानामेवार्थानां जनकत्वाभ्युपगमात्, बाह्यार्थस्यालीक-

तया नोपलम्भजनकत्वं किन्तूपलम्भाजनकत्वमेवेति स्वसिद्धान्तविपरीतस्यार्थस्योपलम्भजनकत्वस्याभ्युपगमेऽपसिद्धान्तापत्तेश्चेति ॥ ४ ॥ ३७८ ॥

नन्वर्थो वस्तुगत्या नोपलम्भजनकः किन्त्वर्थेन कल्पितेन सहिताः समनन्तरप्रत्ययादयोऽर्थोपलम्भजनका इत्येतावताऽर्थे कल्पितमुपलम्भजननस्वभावत्वं न तु वास्तवमिति नापसिद्धान्त इति पराकूतमाश्रित्याक्षेप-परिहारावाह—

**सहार्थेन तज्जननस्वभावानीति चेन्ननु ।**
**जनयन्त्येव सत्येवमन्यथाऽतत्स्वभावता ॥ ५ ॥ ३७९ ॥**

**सहार्थेनेति**–बाह्यार्थवादिकल्पितेनार्थेन सहेत्यर्थः, **तज्जननस्वभावानि** अर्थोपलम्भजननस्वभावानि समनन्तरप्रत्ययादिकारणान्तराणि, यदाह न्यायवादी– "स्वभावविशेषश्च यः स्वभावः सत्स्वन्येषूपलम्भप्रत्ययेषु सन् प्रत्यक्ष एव भवति" इति, तथा च—अर्थस्य क्लृप्तत्वात् तत्साहित्येनार्थोपलम्भजननस्वभावत्वं विशिष्टं प्रत्ययान्तराणां क्लृप्तमित्याशय **इति चेत्** ? अत्रोत्तरं–**ननु** कोमलामन्त्रणे, **एवम्** उक्तदिशाऽभ्युपगमे, **सति** क्लृप्तेऽर्थे सति, **जनयन्ति** कारणान्तराण्यर्थोपलम्भं जनयेयुः, यो हि यादृशस्वभावः स तथाविधस्वभावाऽऽलिङ्गित एवास्त इति सहार्थेनोपलम्भजननस्वभावानि कारणान्तराणीत्यर्थे सत्येव तथास्वभावानीत्यर्थोपलम्भं जनयन्त्येव, **अन्यथा** अर्थोपलम्भलक्षणकार्याभावे, एतच्च तदैव स्याद् यद्यर्थो न स्यात् कारणान्तराणि च स्युरिति, एवं च **अतत्स्वभावता** सहार्थेन तज्जननस्वभावताविलयः स्यात् ॥ ५ ॥ ३७९ ॥

यदा बाह्यार्थसमवधानं तदा तेन सह तदुपलम्भं जनयेयुः कारणान्तराणीति योग्यतायां कारणान्तराणामुपलम्भजननस्वभावत्वं कल्प्यत इत्याशये त्वाह—

**योग्यतामधिकृत्याथ, तत्स्वभावत्वकल्पना ।**
**हन्तैवमपि सिद्धोऽर्थः, कदाचिदुपलब्धितः ॥ ६ ॥ ३८० ॥**

**योग्यतामिति** । अथ यदि, **योग्यतामधिकृत्य** योग्यतामाश्रित्य, **तत्स्वभावत्वकल्पना** प्रत्ययान्तराणां यदाऽर्थो भवति तदा तेन सह तदुपलम्भं जनयन्ति ते नान्यदा, इत्येवं तत्स्वभावत्वकल्पना, अत्रोत्तरं–**हन्त** कोमलाऽऽमन्त्रणे, **एवमपि** एवमभ्युपगमेऽपि, योग्यतासमाश्रयणेऽपीति यावत्, **सिद्धोऽर्थः** सामान्यतः सिद्धो बाह्यो घटादिरर्थः, तत्र हेतुः–**कदाचिदुपलब्धित** इति–यस्मिन् कस्मिंश्चित् काले उपलम्भसम्भवादित्यर्थः ॥ ६ ॥ ३८० ॥

एतदेव विपक्षे बाधकोपदर्शनेन समर्थयति—

**अन्यथा योग्यता तेषां, कथं युक्त्योपपद्यते ? ।**
**नहि लोकेऽश्वमाषादेः, सिद्धा पक्त्यादियोग्यता ॥७॥३८१॥**

**अन्यथे**ति–यदि ते कदाचिदपि नार्थोपलम्भलक्षणं कार्यं जनयन्तीत्यभ्युपगम इत्यर्थः, **योग्यता** तदा बाह्यार्थोपलम्भजननयोग्यता **तेषां** कारणान्तराणां, **कथं युक्त्या** न्यायेन, **उपपद्यते** घटते, न कथञ्चिद् घटते, यत् कदाचिदपि कार्यं न करोति तस्य कार्यकारित्वाभावः स्वतः सिद्ध एव, न तु कारणान्तराभावप्रयुक्त इति कारणान्तरवैकल्यप्रयुक्तकार्यकारित्वाभावत्वलक्षणयोग्यता तस्यैव लोके व्यवह्रियते यस्य कारणान्तरसमवधाने सति कार्यकारित्वं भवतीति, एतदेव द्रढयति–**न ही**ति–अस्य **सिद्धे**त्यनेनान्वयः, **लोके** व्यवहारिणि जने, **अश्वमाषादेः** कदापि पक्त्याद्यजनकस्य कङ्कटुकादेः, आदिपदादाकाशादिपरिग्रहः, **पक्त्यादियोग्यता** पक्त्यादीति 'आदि' पदात् मूर्तत्वादिपरिग्रहः, आकालं तथाविधसहकार्यभावादश्वमाषादिर्न विपच्यते, आकाशादिश्च न मूर्तो भवतीति ॥ ७ ॥ ३८१ ॥

अधिकृतावशिष्टमुपदर्शयति—

**पराभिप्रायतो ह्येतदेवं चेदुच्यते न यत् ।**
**उपलब्धिलक्षणप्राप्तोऽर्थस्तस्योपलभ्यते ॥ ८ ॥ ३८२ ॥**

**पराभिप्रायत** इति–बाह्यार्थवादिनैयायिकाद्यभिप्रायत इत्यर्थः, हि निश्चितम्, **एतदेवमुच्यते** उपलब्धिलक्षणप्राप्तोऽर्थो नोपलभ्यत इति प्रतिपाद्यते, **चेत्** इति यदि त्वं मन्यसे तदाऽत्र विकल्पद्वयमुपतिष्ठते–किं नैयायिकाद्यभिमतानङ्गीकारेण बाह्यार्थाभावः साध्यते ?, उत घटज्ञानात् प्रागपि घटसत्ताभ्युपगमे तदानीं तदुपलम्भः स्यादिति नैयायिकं प्रति प्रसङ्गापादनं क्रियते ?, आद्ये–नैयायिकाभ्युपगतानुपलब्धिलक्षणहेतुना यथा तदभावसाधनं, तथा तदभिमतकार्याऽयोजनादिहेतुनेश्वरसाधनमपीतीश्वराभ्युपगमप्रसङ्ग इति स्फुट एव दोषः, अन्त्ये त्वाह–**ने**ति–तत्पुरुषीयघटज्ञानात् प्राग् घटसत्ताऽभ्युपगमे तदा तस्य घटोपलम्भप्रसङ्गो न सम्भवतीत्यर्थः, **यत्** यस्मात्, **तस्य** यस्य तदानीं घटेन सहेन्द्रियसन्निकर्षादिः, तस्य पुरुषस्य, **उपलब्धिलक्षणप्राप्तोऽर्थः** तेन पुरुषेण **उपलभ्यते** उपलभ्यत एव, एतेन यस्य तदानीं न तद्ग्राहकेन्द्रियसन्निकर्षादिः, तस्य तद्ग्राहकेन्द्रियसन्निकर्षाद्यभावात् तदुपलम्भप्रसङ्गासम्भवात् ॥ ८ ॥ ३८२ ॥

अतत्स्वभावत्वपक्षमधिकृत्याह—

**तदग्रहणभावैश्च, यदि नाम न गृह्यते ।**
**तत एतावताऽसत्त्वं, न तस्यातिप्रसङ्गतः ॥ ९ ॥ ३८३ ॥**

**तदग्रहणभावैश्चेति**–बाह्यार्थग्रहणस्वभावैश्च, प्रत्ययान्तरैरित्यर्थः, अयं चोपाध्यायसम्मतमूलपाठार्थः, अतद्ग्रहणभावैश्चेति तु हरिभद्रसूरिसम्मतः पाठः, **अबाह्यार्थग्रहणस्वभावैश्च** प्रत्ययान्तरैरित्येवं तद्व्याख्यानात्, **यदि नाम न गृह्यते** बाह्योऽर्थ इति प्रक्रमाल्लभ्यते, बाह्यार्थग्रहणस्वभावैः, अबाह्यार्थग्रहणस्वभावैर्वा प्रत्ययान्तरैर्यदि बाह्यार्थग्रहणस्वभावविज्ञानं न जन्यत इति यावत्, **ततः** तस्मात्, **एतावता** एतावन्मात्रकारणेन, **असत्त्वम्** असद्भावः, **तस्य** बाह्यार्थस्य, **न** नैव सम्भवति, तत्र हेतुः–**अतिप्रसङ्गत** इति बाह्यार्थाननङ्गीकुर्वताऽपि योगाचारेण नीलसंवेदनं पीतसंवेदनमित्याद्युपगम्यते, तदपि न स्यात्, नीलासंवेदनस्वभावेन नीलसंवेदनस्य पीतासंवेदनस्वभावेन पीतसंवेदनस्याभावादित्येवं सर्वसंवेदनाभावप्रसङ्गादित्यर्थः ।

अत्र विशेषप्रतिपत्तये श्रीमद्भिरुपाध्यायैराकलितो विचार उद्भाव्यते, तथाहि–“ननु यथा शशविषाणादेरभावेऽपि तद्विषयकदर्शनस्याभावेऽपि च शशविषाणं गगनकुसुमं वन्ध्यापुत्र इत्याद्यनादिवासनाविशेषप्रबोधोपस्थितस्य शशविषाणादेरभावग्राहकसमनन्तरप्रत्यये सति शशविषाणं नास्ति गगनकुसुमं नास्ति वन्ध्यापुत्रो नास्तीत्याद्याकारकोऽभावग्रहो भवति, तत्र समनन्तरप्रत्ययोत्पन्ने प्रतिबन्धकं न भवति शशविषाणाद्याकारग्रहः, तथा बाह्यघटस्यासतो दर्शनाभावेऽप्यन्यदर्शनाहिताभ्यासवासनाप्रबोधादुपस्थितस्याभावग्राहकसमनन्तरप्रत्यये सत्यभावग्रहः सर्वदैव घटो नास्तीत्याकारः समुल्लसति, न च तस्मिन् बाह्यघटाभावग्रहे घटाकारज्ञानं भवति प्रतिबन्धकम्, अतः किमुच्यते ‘योग्यानुपलब्ध्यभावान्न बाह्यघटाभावग्रहः’ इति, तत्तदभावाकारज्ञाने तत्तत्समनन्तरप्रत्ययस्यैव कारणत्वेन तस्यैव योग्यतात्वात्, न हि नैयायिकादिनाऽपि स्वमतानुरोधेनैका योग्यता वक्तुं शक्यते, तथाहि–प्रतियोगि-तद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधानमुदयनाभिमता योग्यता, न चैकत्र कुत्रापि न प्रतियोगि-तद्व्याप्येतराणां यावतां प्रतियोग्युपलम्भकानां समवधानं सम्भवति, ये प्रतियोग्युपलम्भका एकत्र सम्मिलिताः, ये च विभिन्नदेशकालीना न सम्मिलिताः, तेषां सर्वेषां प्रतियोग्युपलम्भकतावच्छेदकानुगत-

धर्माक्रान्तत्वेन प्रतियोग्युपलम्भकयावदन्तर्गतानामेकत्राभावादिति वाच्यं, प्रतियोगितावच्छेदकप्रतियोगिव्याप्यतावच्छेदकेतरयावत्प्रतियोग्युपलम्भकतावच्छेदकसमवधानस्यैव योग्यतात्वेनाभिधानात्, समवधानं च प्रतियोग्युपलम्भकतावच्छेदकानां स्वाश्रयवत्त्वसम्बन्धेन, तथा च यावतां प्रतियोग्युपलम्भकतावच्छेदकानां प्रत्येकमेकैकाश्रयसम्बन्धमुपादाय योग्यतात्वं निर्वहति; अत्र प्रतियोगिव्याप्यत्वं न कालिकसम्बन्धेन प्रतियोगिना घटेन सहेन्द्रियसन्निकर्षस्य प्रतियोगिव्याप्यतयाऽभिमतस्य, तथा सति प्रतियोगिव्याप्यत्वं न स्यात्, घटनाशजन्यनाशप्रतियोगिनि तस्मिन् कालिकेन तद्घटानधिकरणतद्घटध्वंसोत्पत्त्यधिकरणक्षणे कालिकेन विद्यमाने व्यभिचारात्, अणौ पृथिवीत्वाभावोपलम्भप्रसङ्गाच्च, कालिकेन महत्त्वस्य कालिकेन पृथिवीत्वात्मकप्रतियोगिनो व्याप्यतया तस्य प्रतियोगि-तद्व्याप्येतरयावत्प्रतियोग्युपलम्भकानन्तर्गतत्वेनाणौ तदसमवधानेऽपि निरुक्तयोग्यतासम्पत्तेः; अथवा नित्यपदार्थमात्रस्याभावोपलम्भाभावापत्तेः, कालिकेन पदार्थमात्रस्य नित्यप्रतियोगिव्याप्यतया प्रतियोगिव्याप्येतराप्रसिद्ध्या तद्घटितयोग्यतावैकल्यात्, न च दैशिकविशेषणतया प्रतियोगिव्याप्यत्वं, दैशिकविशेषणतया कुत्राप्यविद्यमानस्येन्द्रियसन्निकर्षस्य प्रतियोगिव्याप्यत्वानापत्तेः, किन्तु प्रतियोगिग्रहासाधारणकारणत्वं प्रतियोगिव्याप्यत्वम्, असाधारणत्वनिवेशात् प्रतियोगिप्रत्यक्षसाधारणकारणं तत्प्रतियोगिव्याप्येतरद् भवत्येवेति परमाणौ महत्त्वाभावान्न पृथिवीत्वाभावप्रत्यक्षं, नवा सर्वस्यैव प्रतियोग्युपलम्भकस्य प्रतियोगिव्याप्यत्वापत्त्या निरुक्तयोग्यताऽप्रसिद्धिः, अत एव संयोगिनाशजन्यसंयोगनाशप्रत्यक्षम्, संयोगनाशप्रतियोगिसंयोगस्यासाधारणकारणत्वेन संयोगिनो निरुक्तप्रतियोगिव्याप्यत्वेन तत्समवधानस्यानपेक्षणात्, अत एव प्रतियोग्युपलम्भप्रागभावस्याभावप्रत्यक्षे कारणत्वाभावेऽपि न दोषः, प्रतियोग्युपलम्भप्रागभावस्य प्रतियोगिप्रत्यक्षं प्रत्यसाधारणकारणत्वेन निरुक्तप्रतियोगिव्याप्यतया तदितरत्वाभावेन तदसमवधानेऽपि निरुक्तयोग्यतासम्पत्तेः, संसर्गाभावग्रहे चेयं योग्यताऽपेक्षिता, नान्योन्याभावग्रहे, तेन स्तम्भः पिशाचो न भवतीत्यतीन्द्रियान्योन्याभावप्रत्यक्षस्य नानुपपत्तिः, प्रतियोग्युपलम्भकसमवधानशब्देन यावत्प्रतियोगितावच्छेदकावच्छिन्नोपलम्भकसमवधानम्, अर्थात् प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नोपलम्भकसमवधानं विवक्षितं, तेन पिशाचवद् घटाभावस्य प्रतियोगिनो घटस्य यावदुपलम्भकसमवधानेऽपि न पिशाचवद् घटाभावस्य प्रत्यक्षता, पिशाच-घटत्वयोरुभयोरपि प्रतियोगितावच्छेदक-

तापर्याद्यधिकरणत्वेन तदवच्छिन्नोपलम्भकाप्रसिद्ध्या निरुक्तयोग्यताभावात्; न च गुणे रूपाभावप्रत्यक्षानुपपत्तिः, रूपप्रत्यक्षकारणस्य महत्त्वस्य गुणेऽभावादिति वाच्यं, द्रव्यसमवेतवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति महत्त्वस्य स्वाश्रयसमवेतत्वसम्बन्धेन कारणतया तेन सम्बन्धेन रूपोपलम्भकस्य महत्त्वस्य गुणे सत्त्वादिति निष्कर्षः।

सोऽयमनुपपन्नः, असाधारणत्वस्य दुर्वचत्वात्, विषयतान्यसम्बन्धेन हेतुत्वरूपासाधारणत्वस्य विवक्षणे आलोकसंयोगादेरपि प्रत्यक्षं प्रति विषयतान्यसम्बन्धेनैव कारणतया प्रतियोगिव्याप्यत्वेन तत्समवधानस्य योग्यतायामनपेक्षितत्वेन आलोकसंयोगाद्यसमवधानेऽपि तमसि घटाभावादेः प्रत्यक्षतापातात्, कार्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वं साधारणकारणत्वं कार्यत्वव्याप्यकिञ्चिद्धर्मावच्छिन्नकार्यतानिरूपितकारणत्वमसाधारणकारणत्वमिति सामान्यतः, विशेषतस्तु तत्साधारणकारणत्वं तदसाधारणधर्मव्यापकधर्मावच्छिन्नकार्यतानिरूपितकारणत्वं, तदसाधारणकारणत्वं च तदसाधारणधर्मावच्छिन्नकार्यतानिरूपितकारणत्वमित्येवं विवक्षायां च प्रतियोग्युपलम्भकप्रागभावस्य स्वप्रतियोगिनं प्रतियोग्युपलम्भं प्रति यत् कारणत्वं तत् कार्यमात्रं प्रत्येव तत्प्रागभावस्य कारणत्वमिति कार्यत्वावच्छिन्नकार्यतानिरूपितप्रागभावत्वावच्छिन्नकारणत्वमेवेति प्रतियोग्युपलम्भकप्रागभावस्यापि प्रतियोग्युपलम्भसाधारणकारणत्वात् प्रतियोगिग्रहासाधारणकारणत्वलक्षणप्रतियोगिव्याप्यत्वविकलत्वेन प्रतियोगिव्याप्येतरतयाऽभावप्रत्यक्षाहेतोरपि तस्याभावग्रहयोग्यतायां प्रवेशापत्तेश्च, उपलम्भपदेन प्रतियोगितावच्छेदकाश्रयाणां यावतामुपलम्भस्वरूपयोग्यत्वग्रहणे महति वायावुद्भूतरूपाभावाप्रत्यक्षतापत्तेः, उद्भूतरूपाभावप्रतियोगितावच्छेदकोद्भूतरूपत्वाश्रययावदन्तर्गतस्य परमाणुद्व्यणुकमतोद्भूतरूपस्योपलम्भाप्रसिद्धेः, यत्किञ्चित्प्रतियोगितावच्छेदकाश्रयस्योद्भूतस्वरूपयोग्यत्वस्योपलम्भपदेन ग्रहणे च वायौ रूपसामान्याभावस्यापि प्रत्यक्षतापत्तेः प्रतियोगितावच्छेदकरूपत्वाश्रयस्य घटादिगतोद्भूतरूपस्योपलम्भस्वरूपयोग्यत्वात्; किञ्च यदधिकरणगततयाऽभावप्रत्यक्षमभिमतं तदधिकरणे येन केनचित् सम्बन्धेनाप्रतिनियतेन तदुपलम्भकतावच्छेदकाश्रयसत्त्वं यदि योग्यताकुक्षिनिक्षिप्तं, तदा द्व्यणुकेऽपि पृथिवीत्वाभावस्य प्रत्यक्षं स्यात्, पृथिवीत्वोपलम्भकतावच्छेदकमहत्त्वत्वाश्रयस्य महत्त्वस्य घटादिगतस्य कालिकसम्बन्धेन द्व्यणुके सत्त्वात्; यदि च प्रतिनियतेनैकेन सम्बन्धेन तदुपलम्भकतावच्छेदकाश्रययावत्सत्त्वं योग्यताकुक्षि-

प्रविष्टं तदा वायौ रूपोपलम्भकतावच्छेदकाश्रययावत्सत्त्वं नैकेन सम्बन्धेनेति निरुक्तयोग्यताऽभावाद् वायौ रूपाभावप्रत्यक्षतानापत्तिः; एतेन प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्यभावविषयकयावद्ग्रहनिष्ठकार्यताभिन्नप्रतियोगिग्रहनिष्ठकार्यता-निरूपितकारणताकत्वमसाधारणत्वम्, भावविषयकेति विशेषणान्नालोकादेरसाधारणकारणत्वलक्षणप्रतियोगिव्याप्यत्वापत्त्या तत्समवधानस्य योग्यतानन्तर्भावात् तमसि घटाभावादिप्रत्यक्षापत्तिः, भावविषयकेति विशेषणानुपादाने तु घटाभावप्रतियोगिघटग्राहकत्वाभिमतचक्षुरिन्द्रियजन्यतमःप्रत्यक्षस्यापि प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्ययावद्ग्रहान्तर्गततया तन्निष्ठकार्यताऽऽत्ममनःसंयोगादिनिष्ठकारणतानिरूपितकार्यतैव न त्वालोकनिष्ठकारणतानिरूपितकार्यता, आलोकमन्तरेणैवाऽऽलोकाभावलक्षणतमःप्रत्यक्षस्योत्पादेन तत्साधारणकार्यताया आलोकनिष्ठकारणत्वानिरूपितत्वादिति तद्भिन्नघटात्मकप्रतियोगिग्रहनिष्ठकार्यतानिरूपितकारणताकत्वस्याऽऽलोके सत्त्वात्, भावविषयकेति विशेषणोपादाने तु चक्षुरिन्द्रियजन्यभावविषयकप्रत्यक्षमात्रे आलोकस्य कारणत्वेनाऽऽलोकनिष्ठकारणतानिरूपितकार्यता, प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्यभावविषयकयावद्ग्रहनिष्ठैव भवति न तद्भिन्नेति न निरुक्तासाधारणत्वमालोकस्येति, तथा च प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्यभावविषयकयावद्ग्रहजनकतावच्छेदकावच्छिन्नं प्रतियोगिभिन्नं यावत्तत्समवधानं योग्यतेति फलितम्, यावति प्रतियोगिभिन्नेति विशेषणानुपादाने रूपाभावप्रतियोगिरूपग्राहकत्वाभिमतचक्षुरिन्द्रियजन्यभावविषयकयावद्ग्रहजनकतावच्छेदकावच्छिन्नं रूपमपि भवति, चक्षुरिन्द्रियजन्यप्रत्यक्षमात्र एव रूपस्य कारणत्वात्, तत्समवधानं च वायौ नास्तीति तत्र रूपाभावप्रत्यक्षं न स्यादतस्तदुपादानम्" इति निरस्तम्, ब्राह्मण्यादिभिन्नस्य ब्राह्मण्याद्युपलम्भकयावत्समवधानस्य शूद्रादौ सत्त्वेन शूद्रादौ ब्राह्मण्याभावादेः प्रत्यक्षापत्तेः, यावदुपलम्भकावच्छिन्नाभावत्वेन स्वरूपयोग्यत्वे विनिगमनाविरहाद्भावावच्छिन्नतावदुपलम्भकानामप्यभावप्रत्यक्षहेतुत्वसम्भवात्, योग्यानुपलब्धेरभावप्रत्यक्षकारणत्वे तद्विशेषणयोग्यतासन्निविष्टत्वेन तथाभूतानुपलब्धिकुक्षिनिक्षिप्तत्वेनेन्द्रियादेरभावप्रत्यक्षहेतुत्वोच्छेदाच्च ।

केचित्तु—"यद्धर्मावच्छिन्नप्रतियोगिनि प्रतियोगितत्सन्निकर्षविरहमात्रप्रयुक्तो यदधिकरणविशेष्यकलौकिकोपलम्भविषयत्वाभावस्तदधिकरणे तद्धर्मावच्छिन्नाभावो योग्यः, यथा घटत्वावच्छिन्नघटात्मकप्रतियोगिनि घटरूपप्रतियोगितदिन्द्रियसन्निकर्षाभावमात्रप्रयुक्तो भूतलात्मकाधिकरणविशेष्यकलौकिकोपलम्भ-

विषयत्वाभावः समस्ति, भूतलादिना तद्वृत्तिरूपादिना चेन्द्रियसन्निकर्षस्यालोकादेश्च सत्त्वेऽपि यदा घटो नास्ति घटेन सहेन्द्रियसन्निकर्षश्च नास्ति तदा भूतलविशेष्यकलौकिकघटप्रकारकोपलम्भो भवति, न तु भूतलविशेष्यकलौकिकघटप्रकारकोपलम्भ इति भूतलाधिकरणे घटत्वावच्छिन्नाभावो योग्यः, तत्प्रयुक्तत्वं च स्वरूपसम्बन्धविशेषः, कारणाभावप्रयुक्तः कार्याभाव इति प्रत्ययात्, तेन घटत्वावच्छिन्ने भूतलविशेष्यकलौकिकोपलम्भविषयत्वाभावस्यात्यन्ताभावरूपतया नित्यत्वेन घट-तदिन्द्रियसन्निकर्षविरहमात्रजन्यत्वाभावेऽपि न क्षतिः, आलोकादिमति भूतले घट-तदिन्द्रियसन्निकर्षे सति भवत्येव भूतलविशेष्यकलौकिकघटोपलम्भः, घट-तदिन्द्रियसन्निकर्षाभावे तु न भवति निरुक्तोपलम्भ इति भूतले घटानुपलम्भस्य घट-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्तत्वात्, एवं स्तम्भे पिशाचत्वसत्त्वे योग्यस्तम्भव्यक्तिवृत्तितया पिशाचत्वस्यापि योग्यत्वं स्यादेवेति पिशाचत्वादेरयोग्यत्वे मानाभावेन स्तम्भे पिशाचत्वानुपलम्भोऽपि पिशाचत्व-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्तः, सहकारिविरहादेव तत्र कार्याभावात्, नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमस्यासिद्धेरिति स्तम्भे पिशाचत्वाभावप्रत्यक्षं भवत्येव, भूतले पिशाचानुपलम्भस्तु न पिशाच-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्तः, भूतले पिशाचसत्त्वेऽपि पिशाचेन्द्रियसन्निकर्षसत्त्वेऽपि च पिशाचे उद्भूतरूपलक्षणोपलम्भकारणाभावेन पिशाचानुपलम्भसम्भवेन तत्रोद्भूतरूपाभावस्यापि प्रयोजकत्वादिति योग्यानुपलब्ध्यभावान्न भूतले पिशाचाभावप्रत्यक्षम्, अस्तु वाऽन्योन्याभावे प्रतियोगितावच्छेदक-तत्सन्निकर्षविरहमात्रप्रयुक्तस्तदधिकरणीयलौकिकोपलम्भप्रकारत्वाभावः प्रतियोगितावच्छेदकनिष्ठ एव योग्यानुपलम्भः, एवञ्च स्तम्भे पिशाचभेदे पिशाचत्वरूपप्रतियोगितावच्छेदकतदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्तः स्तम्भात्मकाधिकरणविशेष्यकलौकिकोपलम्भप्रकारत्वाभावः पिशाचत्वरूपप्रतियोगितावच्छेदके समस्ति, यदि स्तम्भः पिशाच इति लौकिकप्रत्यक्षं भवेत् तदा स्तम्भविशेष्यकलौकिकोपलम्भप्रकारत्वस्यैव पिशाचत्वे सत्त्वान्न भवेदपि निरुक्तप्रकारत्वाभावो न चैवमिति स्तम्भे निरुक्तानुपलब्धितः पिशाचान्योन्याभावस्य स्तम्भः पिशाचो नेत्याकारकं प्रत्यक्षं भवति, पिशाचादेरनुपलम्भस्योक्तलक्षणस्य योग्यत्वप्रयोज्यत्वेऽपि पिशाचत्वादेः स्तम्भेऽनुपलम्भस्य योग्यत्वप्रयोज्यत्वाभावात्, योग्यव्यक्तिवृत्तित्वेनैव जातेर्योग्यत्वेनायोग्यपिशाचव्यक्तिवर्तिनः पिशाचत्वसामान्यस्यायोग्यत्वात्, अत्यन्ताभावे तु पूर्वैव योग्यता, अत एव न जलपरमाणौ

पृथिवीत्वाभावप्रत्यक्षम्, जलपरमाणौ पृथिवीत्वानुपलम्भस्य पृथिवीत्व-तदिन्द्रिय-सन्निकर्षविरहमात्रप्रयुक्तत्वाभावात्, जलपरमाणौ पृथिवीत्वानुपलम्भो जलपरमाणौ महत्त्वाभावस्यापि प्रयोजकत्वात्, अत एव पृथिवीपरमाणौ पृथिवीत्व-तदिन्द्रियसन्निकर्षसत्त्वेऽपि महत्त्वरूपकारणाभावान्न तत्र पृथिवीत्वस्योपलम्भ इति, ब्राह्मण्याभावस्तु शूद्रादौ न प्रत्यक्षः, विशुद्धिज्ञानस्य तद्व्यञ्जकस्याभावात्, एवञ्च ब्राह्मण्यत्वावच्छिन्ने शूद्रविशेष्यकलौकिकोपलम्भविषयत्वाभावो न ब्राह्मण्य-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्तः, किन्तु ब्राह्मण्याभिव्यञ्जकविशुद्धिज्ञानविरह-प्रयुक्तोऽपीति निरुक्तयोग्यताऽभावात्, न च य एव गगनादौ भूतलविशेष्यकोपलम्भविषयत्वाभावः स एव घटादौ, आश्रयभेदेनाभावभेदाभावादिति गगनादौ तस्य प्रतियोगि-तत्सन्निकर्षविरहमात्रप्रयुक्तत्वाभावे घटादावपि तदभाव इति निरुक्तयोग्यत्वाभावाद् भूतले घटाद्यभावप्रत्यक्षानुपपत्तिरिति वाच्यं, भूतल-विशेष्यकगगनप्रकारकलौकिकप्रत्यक्षाप्रसिद्ध्या गगनादौ भूतलविशेष्यकलौकिकोपलम्भविषयत्वाभावः सर्वदैव वर्तत इति व्याप्यवृत्तिः, घटादौ च भूतले घटादीन्द्रियसन्निकर्षादिसमवधानदशायां भूतलविशेष्यकघटादिप्रकारकलौकिकोपलम्भ-विषयत्वं भवति, घटादीन्द्रियसन्निकर्षाद्यसमवधानशायां तदभावो भवतीति घटादौ भूतलविशेष्यकलौकिकोपलम्भविषयत्वाभावोऽव्याप्यवृत्तिरिति व्याप्य-वृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासात् तद्भेदात्, यद्धर्मावच्छिन्नप्रतियोगि-त्वावच्छेदेन यदधिकरणविशेष्यकलौकिकोपलम्भविषयत्वाभावः प्रतियोगितत्सन्नि-कर्षविरहमात्रप्रयुक्तः, तदधिकरणे तद्धर्मावच्छिन्नाभावो योग्य इति वा विवक्षणात्, गगनादौ घटादौ च भूतलविशेष्यकलौकिकोपलम्भविषयत्वाभावस्यैकत्वेऽपि गगन-त्वावच्छिन्नप्रतियोगित्वावच्छेदेन प्रतियोगि-तत्सन्निकर्षविरहमात्रप्रयुक्तत्वाभावेऽपि घटत्वावच्छिन्नप्रतियोगित्वावच्छेदेन प्रतियोगि-तत्सन्निकर्षविरहमात्रप्रयुक्तत्वमस्तीति भूतले गगनाभावस्यायोग्यत्वान्न प्रत्यक्षं, भूतले घटाद्यभावस्य योग्यत्वात् प्रत्यक्ष-मिति, संयोगप्रत्यक्षे च न संयोगिद्वयप्रत्यक्षमपि हेतुः, मिथःसंयुक्तयोरन्यावच्छेदे-नोपलम्भेऽपि संयोगाप्रत्ययात्, संयोगिनः सन्निकर्षघटकतयैवोपयोगादिति न तदभावप्रत्यक्षानुपपत्तिः संयोगत्वावच्छिन्नसंयोगलक्षणप्रतियोगिनि संयोगा-भावाधिकरणत्वाभिमतधर्मिविशेष्यकलौकिकोपलम्भविषयत्वाभावस्य संयोगात्मक-प्रतियोगि-तत्सन्निकर्षविरहमात्रप्रयुक्तत्वात्" इत्याहुः।

तदपि न-धारावाहिकाभावप्रत्यक्षानुपपत्तेः, तत्र द्वितीयक्षणे द्वितीयाभावप्रत्यक्षकाले तृतीयादिक्षणे तृतीयाद्यभावप्रत्यक्षकाले यत् प्रतियोगिप्रत्यक्षं न भवति, तत्र यथा प्रतियोगि-तदिन्द्रियसन्निकर्षविरहो यथा प्रयोजकस्तथा तद्धर्मिकतद्वत्ताज्ञानसामान्ये तद्धर्मिकतदभाववत्ताज्ञानलक्षणबाधस्य प्रतिबन्धकत्वमिति प्रतिबन्धकविधया बाधोऽपि प्रयोजक इति तदानीं तत्र तदनुपलम्भस्य प्रतियोगि-तदिन्द्रियसन्निकर्षविरहव्यतिरिक्तबाधप्रयुक्तत्वेन प्रतियोगि-तदिन्द्रियविरहमात्रप्रयुक्तत्वलक्षणयोग्यत्वाभावात्, न चैकधर्मावच्छिन्ने धर्मिणि बाधसत्त्वेऽप्यन्यधर्मावच्छिन्ने तत्र तदुपलम्भो भवतीति बाध-तद्वत्ताज्ञानयोरेकधर्मावच्छिन्नधर्मिणमवलम्ब्य प्रतिबध्यप्रतिबन्धकभावः, धर्मितावच्छेदकामिश्रितोपलम्भस्याभावस्तु प्रतियोगि-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्त इति स एव वाच्यः, अथवा प्रतियोगितत्सन्निकर्षबाधाभावविरहमात्रप्रयुक्त इत्येवं निवेश्य इति वाच्यम्, धर्मितावच्छेदकामिश्रितोपलम्भाभावः प्रतियोगि-तदिन्द्रियसन्निकर्षविरहमात्रप्रयुक्त इत्युक्तौ निरुक्तोपलम्भाभावः प्रतियोगि-तदिन्द्रियसन्निकर्ष-बाधाभावविरहमात्रप्रयुक्त इत्युक्तावपि वा भूतले घटानुपलम्भस्य घटालोकसंयोगाभावप्रयुक्तत्वेन निरुक्ततन्मात्रप्रयुक्तत्वाभावाद् योग्यत्वाभावेन भूतले घटाभावप्रत्यक्षानापत्तेः, न च तत्सन्निकर्षातिरिक्तप्रतियोग्युपलम्भकतावच्छेदकावच्छिन्नविरहाप्रयुक्त इति मात्रान्तार्थः, भूतले चाऽऽलोकसंयोगसत्त्वान्न तत्सन्निकर्षातिरिक्तप्रतियोग्युपलम्भकतावच्छेदकावच्छिन्नविरह इति तदप्रयुक्तत्वमक्षतमेव, द्रव्यचाक्षुषे आलोकसंयोगत्वेनैव हेतुत्वं न त्वालोकपटसंयोगत्वेनेति भूतलालोकसंयोगस्यापि प्रतियोग्युपलम्भकतावच्छेदकालोकसंयोगत्वावच्छिन्नत्वात्, आलोकसंयोगत्वेन हेतुत्वे घटे चक्षुःसंयोगः, आलोकसंयोगस्तु न घटे किन्तु भूतलादौ तत्रापि घटप्रत्यक्षं स्यादित्येवमतिप्रसङ्गो न शङ्क्यः, द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषप्रत्यक्षं प्रति समवायसम्बन्धेनाऽऽलोकसंयोगः कारणमित्येवं विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्योररीकरणेन घटातिरिक्तेन सहाऽऽलोकसंयोगस्य समवायेन घटेऽभावादेव घटे लौकिकविषयतासम्बन्धेन चाक्षुषोत्पत्त्यसम्भवात्, अत एव घटाकाशसंयोगाद्यनुपलम्भस्य घटाकाशसंयोगादीनां गुरुत्वादिवदयोग्यत्वेन प्रयुक्तत्वेऽपि न क्षतिः, गुरुत्वादिभेदस्य सामान्यत एव प्रत्यक्षहेतुत्वात्, अर्थात् लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति स्वरूपसम्बन्धेन गुरुत्वादिभेदः कारणमिति घटाकाशसंयोगानुपलम्भस्य तत्सन्निकर्षातिरिक्तोपलम्भकतावच्छेदकावच्छिन्न-

विरहाप्रयुक्तत्वेन योग्यत्वेऽपि घटाकाशसंयोगभेदस्य कारणस्याभावादेव न घटाकाशसंयोगस्य प्रत्यक्षमिति वाच्यं, सन्निकर्षस्यापि त्यागापत्तेः, प्रतियोगिविरहमात्रप्रयुक्तत्वोपादानेऽपि दोषाभावात्, चक्षुःसंयोगत्वेनैव चाक्षुषहेतुत्वात्, अतिप्रसङ्गस्य विषयनिष्ठसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावेनैव वारितत्वात्, भूतले घटसत्त्वेऽपि दोषाद्घटानुपलम्भे घटाभावभ्रमो भवति सोऽपि न स्यात्, तत्र घटत्वावच्छिन्नघटरूपप्रतियोगिनि भूतलविशेष्यकलौकिकोपलम्भविषयत्वाभावस्य दोषविशेषप्रयुक्तत्वेन बाधाभावप्रतियोगितत्सन्निकर्षविरहमात्रप्रयुक्तत्वाभावेन निरुक्तयोग्यानुपलम्भरूपकारणाभावात्, न च बाधाभावदोषविशेषाभाव-प्रतियोगि-तत्सन्निकर्षविरहमात्रप्रयुक्तो यद्धर्मावच्छिन्नप्रतियोगिनि यदधिकरणविशेष्यकलौकिकोपलम्भविषयत्वाभावस्तदधिकरणे तद्धर्मावच्छिन्नाभावो योग्य इत्युक्तौ न घटाभावभ्रमानुपपत्तिरिति वाच्यं, ह्रदादौ वह्न्यादिभ्रमाभावरूपस्य वह्न्याद्यनुपलम्भस्य बाधाभावदोषविशेषाभावप्रतियोगि-तत्सन्निकर्षविरहव्यतिरिक्तदोषाभावप्रयुक्तत्वेन निरुक्तविरहमात्रप्रयुक्तत्वाभावेन विवक्षितयोग्यानुपलम्भाभावाद्ध्रदादौ वह्न्याद्यभावप्रमात्मकप्रत्यक्षानुपपत्तेः, निरुक्तविरहप्रतियोगिकोटौ वह्न्यादिभ्रमजनकदोषविशेषाणामपि निवेशे चातिगौरवात्, भङ्ग्यन्तरेणोदयनीययोग्यतोक्तिरेवेति दिक् ।

प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोग्युपलम्भाभाव इति चिन्तामणिकारीया योग्यता, अत्र प्रतियोगिपदेन यस्य घटाभावादेः प्रत्यक्षं योग्यानुपलम्भकार्यतयाऽभिमतं तत्प्रतियोगिनो घटादेर्ग्रहणं, तथा च प्रतियोगिनो घटादेः सत्त्वप्रसञ्जनेन–अत्र यदि घटः स्यादित्येवंरूपापादनेन, प्रसञ्जितः–तर्ह्युपलभ्येतेत्येवमापादितो यः प्रतियोग्युपलम्भो घटाद्युपलम्भस्तदभावो योग्यता घटाद्यभावप्रत्यक्षे हेतुरिति पर्यवसितम्, किन्तु 'अत्र यदि घटः स्यात् तर्हि घटोपलम्भः स्यात्' इत्यापादनात्मकज्ञानं विनापि घटात्मकप्रतियोगिज्ञाने चक्षुस्संयुक्तविशेषणताद्यात्मकलौकिकसन्निकर्षे च सति भूतले 'घटो नास्ति' इत्याद्याकारको घटाभावादिलौकिकप्रत्यक्ष आलोकादिकारणसमवधाने सति जायत एवेति प्रतियोगिसत्त्वव्यापकोपलम्भविषयप्रतियोगिकाभावत्वलक्षणयोग्यतावच्छेदकवत्त्वमभावगतलौकिकप्रत्यक्षविषयताप्रयोजकमिति निरुक्तचिन्तामणिकारीययोग्यतोक्त्या विवक्षितमिति वाच्यम्, तत्र शुद्धं प्रतियोगिसत्त्वमुपलम्भव्याप्यं किञ्चिदवच्छिन्नं वा, नाद्यः–प्रतियोगिसत्त्वसत्त्वेऽपि कारणान्तरात् प्रतियोगिनोऽनुपलम्भेन व्यभिचारात्, न

द्वितीयः—जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षतापातात्, तत्रापि महत्त्वादिविशिष्ट-पृथिवीत्वसत्त्वस्योपलम्भव्याप्यतया तेनोपलम्भरूपव्यापकस्यापादनसम्भवात्, न च पक्षावृत्तिविशेषणानवच्छिन्नयत्सत्त्वमुपलम्भव्याप्यम्, तथा च जलपरमाणौ महत्त्वादिविशिष्टपृथिवीत्वसत्त्वेन तदुपलम्भापादनं न सम्भवति, तत्र जलपरमाणोः पक्षत्वेन महत्त्वादेस्तदवृत्तितया महत्त्वादिविशिष्टपृथिवीत्वसत्त्वस्य पक्षावृत्तिविशेषणावच्छिन्नत्वेन पक्षावृत्तिविशेषणानवच्छिन्नत्वाभावादिति साम्प्रतम्, तथापि गन्धवदणुभिन्नत्वे सति पृथिवीत्वेन जलपरमाणौ पृथिवीत्वोपलम्भापादनसम्भवेन जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षतापातात्, गन्धवदणुभिन्नत्वं च जलपरमाण्वात्मकपक्षवृत्त्येवेति तदात्मकविशेषणावच्छिन्नं पृथिवीत्वसत्त्वं भवति पक्षावृत्ति-विशेषणानवच्छिन्नं, गन्धवदणुभिन्नत्वे सति पृथिवीत्वं द्व्यणुकादिपृथिव्यामेव वर्तते तत्र च पृथिवीत्वोपलम्भो भवत्येवेति तद्व्याप्यं च तत्।

अथ यदधिकरणवृत्तिप्रतियोग्युपलम्भकातिरिक्तानवच्छिन्नं यत्सत्त्वमुपलम्भ-व्याप्यमिति वाच्यं, गन्धवदणुभिन्नत्वादिकं च न प्रतियोग्युपलम्भकमिति तदव-च्छिन्नं पृथिवीत्वसत्त्वं जलपरमाण्वात्मकाधिकरणवृत्तिप्रतियोग्युपलम्भकातिरिक्ता-वच्छिन्नमेव न तु तदनवच्छिन्नमिति न तेनाव्याप्येनोपलम्भापादनसम्भव इति न जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिः, यद्धर्मावच्छिन्नसत्त्वं यद्धर्मावच्छिन्नो-पलम्भव्याप्यं तद्धर्मावच्छिन्नोपलम्भाभावस्य तद्धर्मावच्छिन्नाभावप्रत्यक्षहेतुत्वाद् न गुरुत्ववद्घटाभावादिप्रत्यक्षता, गुरुत्व-घटत्वोभयावच्छिन्नसत्त्वं न गुरुत्वघटत्वो-भयावच्छिन्नोपलम्भव्याप्यं गुरुत्वस्यातीन्द्रियत्वेन तदवच्छिन्नस्याप्यतीन्द्रियतया गुरुत्वघटत्वोभयावच्छिन्नोपलम्भस्यैवाप्रसिद्धेः, तदप्रसिद्धौ तदभावस्याप्यप्रसिद्ध-त्वेन तद्धर्मावच्छिन्नाभावप्रत्यक्षहेतुत्वासम्भवात्, न वाऽऽकाशादिभेदस्य प्रत्यक्ष-त्वम्, शब्दाश्रयत्वादेरयोग्यत्वेन तदात्मकाकाशत्वाद्यवच्छिन्नसत्त्वं नाकाशत्वाद्य-वच्छिन्नोपलम्भव्याप्यम्, आकाशत्वाद्यवच्छिन्नस्योपलम्भाप्रसिद्ध्या तद्व्याप्यत्व-स्याप्यप्रसिद्धेः, न वा घटत्वत्वाद्यवच्छिन्नप्रतियोगिताकस्य घटत्वात्यन्ताभावस्य प्रत्यक्षत्वम्, घटेतरासमवेतत्वे सति सकलघटसमवेतत्वलक्षणस्य घटत्वत्वस्या-तीन्द्रियघटेतरपरमाण्वादिघटितत्वेनायोग्यतया तद्धर्मावच्छिन्नसत्त्वस्य तद्धर्मा-वच्छिन्नोपलम्भाप्रसिद्ध्या तद्व्याप्यत्वासम्भवात्, शूद्रादौ ब्राह्मणत्वाभावस्तु सुतरां न प्रत्यक्षः, शूद्रात्मकाधिकरणवृत्तिब्राह्मणत्वरूपप्रतियोग्युपलम्भकमात्रा-वच्छिन्नेन ब्राह्मणत्वसत्त्वेन ब्राह्मणत्वोपलम्भस्यापादयितुमशक्यत्वात्, ब्राह्मणत्वे

विशुद्धमातापितृजन्यत्वज्ञानस्यापि व्यञ्जकत्वात्, न चैवं तमसि आलोकनियत-घटाद्यभावप्रत्यक्षापत्तिः, तमसि आलोकनियतघटात्मकप्रतियोगिसत्त्वस्यैवालोक-नियतघटोपलम्भव्याप्यत्वादिति वाच्यम्, प्रतियोगिसत्त्वस्योपलम्भव्याप्यतायां निरुपाधिसहचारातिरिक्ततर्कवत्त्वस्य विवक्षितत्वात्, प्रतियोग्युपलम्भकावच्छिन्न-प्रतियोगिसत्त्वस्योपलम्भव्याप्यतायां कार्यकारणभावस्यापि तर्कत्वात्, न चैवम-भावानुपलब्धिर्भावप्रत्यक्षेऽपि हेतुः स्यात्, भावज्ञानस्य निर्विकल्पकादेरधिकरणा-निश्रितस्याप्युत्पादार्थं तत्र महत्त्वादेरेव हेतुत्वस्वीकारात्; इति चेत्?,

न—व्यापकत्वेनाभिमतस्योपलम्भस्य लौकिकस्य विवक्षणे स्तम्भ-पिशाचान्योन्या-भावादेर्गुडतिक्तत्वाभावादेश्चाप्रत्यक्षत्वप्रसङ्गात्, प्रतियोग्यंशेऽधिकरणांशे च तादृश-लौकिकोपलम्भरूपसाध्याप्रसिद्ध्या व्याप्यताया असम्भवात्; एतेन 'पिशाचत्वं यदि स्तम्भवृत्तिजातिः स्यात् स्तम्भविशेष्यकलौकिकोपलम्भप्रकारः स्यात्' इत्या-पादनं सम्भवत्येव, इति स्तम्भविशेष्यकलौकिकप्रत्यक्षे पिशाचत्वप्रकारकत्वाभावस्य हेतुत्वान्न दोष इत्यपि निरस्तम्, तस्य सदा सत्त्वेनाहेतुत्वात्, तादृशोपलम्भस्या-लौकिकस्य विवक्षणे च प्रतियोगिसत्त्वस्याव्याप्यत्वात्, तदधिकरणवृत्त्यलौकिको-पलम्भावच्छिन्नप्रतियोगिसत्त्वस्यालौकिकोपलम्भव्याप्यत्वे च भूतलादौ पिशाचा-त्यन्ताभावादिग्रहप्रसङ्गात्, यावत्प्रतियोग्युपलम्भकावच्छिन्नस्य प्रतियोगिसत्त्वस्यो-पलम्भव्याप्यत्वोक्तावुदयनीययोग्यताया मेव पर्यवसानाच्च योग्यप्रतियोगिकत्वं संसर्गाभावग्रहे योग्यता, योग्याधिकरणकत्वं चान्योन्याभावग्रहे योग्यतेत्यपि तुच्छम्, मनस्त्वात्यन्ताभावादेरप्रत्यक्षत्वापातात्, घटादौ परमाणुभेदादेः प्रत्यक्ष-तापाताच्चेति ।

तस्माद्भावप्रत्यक्ष इवाभावप्रत्यक्षेऽपि महत्त्वादीनां हेतुत्वात्, विशिष्यघटाभाव-प्रत्यक्षे चालोकसंयोगादीनां हेतुता वाच्या, साऽपि वक्तुं न शक्यते, मेचकादि-चाक्षुषे व्यभिचारादिति घटाभावाद्याकारे तत्कुर्वद्रूपसमनन्तरत्वेनैव हेतुता युक्तेति चेत्? न—स्ववासनया कथञ्चित् स्वयं बाह्याभावानुभवेऽपि परं प्रति तत्साधनार्थं प्रयोगानुपपत्तेस्तूष्णीम्भावेन कथायां निग्रहात्, बाह्यत्वस्य ज्ञान-भिन्नत्वरूपस्यातीन्द्रियत्वेन तद्घटितघटोपलम्भस्य तु पिशाचवद् घटोपलम्भस्येवा-पादयितुमशक्यत्वेन तदभावप्रत्यक्षस्यानापादनादिति दिक् ॥ ९ ॥ ३८३ ॥

घटादेर्ज्ञानरूपत्वे घटादिर्न ज्ञानभिन्नः प्रत्यक्षत्वाज्ज्ञानस्वरूपवदित्यनुमानं प्रमाणमिति पराभिप्रायेणाह—

**विज्ञानं यत् स्वसंवेद्यं, न त्वर्थो युक्त्ययोगतः ।**
**अतस्तद्वेदने तस्य, ग्रहणं नोपपद्यते ॥ १० ॥ ३८४ ॥**

**विज्ञानमिति । यत्** यस्मात् कारणात्, **विज्ञानं स्वसंवेद्यं** स्वत एव प्रकाशमानस्वरूपं स्वत एव स्फुरद्रूपतयाऽनुभूयमानत्वात्, **न तु** नैव, **अर्थः** परपरिकल्पितो बाह्यः पदार्थः, स्वसंवेद्य इति लिङ्गविपरिणामेनानुषञ्जनीयः, नञर्थस्यात्रान्वयात् परपरिकल्पितोऽर्थो न स्वसंवेद्य इत्यर्थः, तत्र हेतुः–**युक्त्ययोगतः** युक्त्यभावात्, बाह्यार्थस्य स्वत एव स्फुरद्रूपत्वे सर्वान् प्रत्यविशेषात स्फुरद्रूपतया सर्वस्य सर्वज्ञताद्यापत्तेः, **अतः** परपरिकल्पितबाह्यार्थस्य स्फुरद्रूपतयाऽननुभूयमानत्वात् स्वसंवेद्यत्वाभावतः, **तद्वेदने** विज्ञानानुभवे, **तस्य** परपरिकल्पितस्य बाह्यार्थस्य, **ग्रहणं** ज्ञानं **नोपपद्यते** युक्त्या न घटते ।

यथा च बाह्यार्थस्य ज्ञानरूपत्वे सत्येव ग्रहणं घटते, न तु ज्ञानभिन्नत्वलक्षणबाह्यतायां, तथोपपादयितुं विज्ञानवाद्यभिप्रायमुपवर्णयन्नुपाध्याय इत्थमावेदितवान्–“तथाहि—ज्ञानविषयताया इन्द्रियसन्निकर्षादिनियम्यत्वाज्ज्ञानस्यार्थस्य च परतः प्रकाश एव” इति नैयायिकादीनां मतं न युक्तं, स्वसंवेदनस्य प्रसाधितत्वात्, क्वचित् प्रत्यक्षत्वस्य क्वचिच्च प्रत्यक्षविषयत्वस्य प्रत्यक्षत्वव्यवहारप्रयोजकत्वे गौरवात्, नीलाद्यर्थस्य नीलज्ञानादिरूपत्वे नीलत्वादिकं ज्ञानवृत्त्येवेति नीलज्ञानत्वाद्यपेक्षया नीलत्वादेरेव चक्षुरादिजन्यतावच्छेदकत्वे लाघवाच्च एतेन ज्ञानाभेदः सन्निकर्षादिश्च ज्ञानविषयतायां नियामक इति ज्ञानस्य स्वप्रकाशत्वम्, अर्थस्य च परतः प्रकाशत्वमित्यन्येषामपि मतं प्रत्याख्यातम्, विषयताया ज्ञानस्वरूपत्वात्, ज्ञानभिन्नस्य ज्ञानाविषयत्वात् । अथ ‘नीलस्य प्रकाशः’ इति प्रतीतेर्नील-प्रकाशयोर्भेद इति चेत् ?, न–विवेकेनाप्रतीयमानयोर्नील-तत्संविदोर्भेदाभावात्, अभेदसम्बन्धमुपादायापि षष्ठीविभक्तितः प्रतीत्युल्लेखस्य सम्भवात्, अन्यथा नीलस्य स्वरूपं प्रकाशस्य प्रकाशतेत्यादावपि भेदसिद्धिप्रसङ्गात् . अभेददर्शनलक्षणबाधकस्याप्युभयत्र तुल्यत्वात्; न चार्थमन्तरेणाप्रतीयमाना बुद्धिरर्थस्येति संयोज्य प्रत्येतुं शक्या, शक्यत्वे वा नियतसहोपलम्भयोः पृथगपोद्धारकल्पनाया अभेदनिश्चयपर्यवसायित्वादिति, तदुक्तम्–“सहोपलम्भनियमादभेदो नीलतद्धियोः” इति ।

नन्वेवं कथमर्थाकारो ग्राह्य एव, बोधाकारस्तु ग्राहक एवेति नियम इति चेत् ?,

न-कथञ्चित्, भिन्नकालयोर्ग्राह्यग्राहकभावाभावात्, समानकालयोरप्येकस्य ग्राह्यत्वम्, अन्यस्य च ग्राहकत्वमित्यत्राविनिगमात्, ग्रहणक्रियाकर्तृ ज्ञानं ग्राहकं, तदाश्रयश्चार्थो ग्राह्य इति चेत् ?, न—अन्तःसुखाकारव्यतिरेकेण बहिश्च नीलाद्याकारव्यतिरेकेणापराया ग्रहणक्रियाया अभानात्, भाने च तस्याः स्वतः परतो वा ? इति विकल्पावतारः, आद्ये—एकदा नीलबोधग्रहणानां स्वरूपनिमग्नानां प्रतिभानान्न कर्तृ-कर्म-क्रियाव्यवहृतिः, अन्त्ये च—तत्राऽप्यपरग्रहणक्रियाग्राहकान्तरापेक्षायामनवस्था, इति विनिर्मुक्तग्राह्यग्राहकभावस्वसंवित्तिमात्रवाद एव साधीयान्, तदुक्तम्—

"नान्योऽनुभाव्यो बुद्ध्याऽस्ति, तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात्, स्वयं सैव प्रकाशते ॥ १ ॥" इति,

कथं तर्हि 'नीलमहं वेद्मि' इति कर्मकर्तृभावाभिनिवेशी प्रत्ययः, कर्मकर्तृभावस्याभावादिति चेत् ?, यथा रजतमन्तरेणापि शुक्तिकायां रजतावगमः, बाधकाभावान्न तद्वदस्य भ्रान्तत्वमिति चेत् ?, न—स्वरूपासंसक्तयोर्द्वयोः स्वातन्त्र्योपलम्भस्य कर्मकर्तृभावोल्लेखे बाधकत्वात्, किं तत्र भ्रान्तिबीजमिति चेत् ?, पूर्वभ्रान्तिरेव, तत्रापि पूर्वभ्रान्तिरिति बीजाङ्कुरस्थलीयानवस्था, तदुक्तम्—

"अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते ।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ॥ १ ॥
तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् ।
यदा तदा न संनोद्य-ग्राह्य-ग्राहकलक्षणा ॥ २ ॥ इति,

अनयोरयमर्थः—स्वरूपेणाविद्यमानवेद्य-वेदकाकाराऽपि बुद्धिर्यथा भ्रान्तैर्व्यवहर्तृभिर्निरीक्ष्यते तथैव कृतव्यवस्थेयं व्यवह्रियते, तैस्तु केशादिज्ञानभेदवत् तिमिराद्युपप्लुताक्षाणां बोधभिन्नाविद्यमानकेशादिप्रतिपत्तिवदियं विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा निरीक्ष्यते, विभक्तलक्षणौ ग्राह्य-ग्राहकाकारावेव विप्लवौ असन्निर्भासविभागौ यस्याः सा तथोक्ता, यदाऽयमविद्यमानानिबन्धनो बुद्धेः प्रविभागस्तदा न संनोद्यग्राह्य-ग्राहकाकारलक्षणा—संनोद्ये पर्यनुयोज्ये ग्राह्यग्राहकलक्षणे यस्याः सा तथा न भवति, न ह्यविद्यासमारोपिताकारः पर्यनुयोगमर्हति, अतो न 'भ्रान्तेः प्रकाशमानत्वेनाबोधरूपता, बोधरूपतायां वा नासदाकारसंस्पर्शः, तत्संस्पर्शो वा सत्त्वापत्तिः' इत्यादिपर्यनुयोगावकाशः । 'नीलमहं वेद्मि' इति

परस्परासंसक्तं प्रतीतित्रयं क्रमवत् प्रतिभाति, न कर्म-कर्तृभावः' इत्यन्ये, तेषां द्वितीयाद्यर्थानुपपत्तिः ।

अथ सुख-स्तम्भाद्याकारव्यतिरिक्तसंवेदनाभावे कथं 'चक्षुरादिना मया रूपं प्रतीयते' इत्यादिप्रतीतिः ? इत्युपलभ्ये रूपादिके चक्षुरभिमुखीभूतं तत्प्रकाशत्वं विदधाति सैव बुद्धिरिति चेत् ?, न-'चक्षुरादिना रूपमुपलभ्यते' इत्यादौ बाह्यार्थवादिपरिकल्पिते परोक्षे रूपादौ तदाकारा प्रकाशता चक्षुरादिना जन्यत इति वासनाविशेषेण तथा व्यपदेशसम्भवात्, पूर्वसामग्रीतश्चक्षुरादिरूपाद्याकारप्रकाशता बुद्धिस्वभावोपजायत इत्येकसामग्र्यधीनतया वा तथा व्यपदेशात्, दृश्यते हि प्रदीप-प्रकाशयोः समानकालयोः 'प्रदीपेन घटः प्रकाशितः' इत्येकसामग्र्यधीनतया व्यपदेश इति, दर्शनात् प्रागर्थसद्भावे तु न मानमस्ति, येन तत्र प्रकाशतां चक्षुरादिकमादध्यात्, दर्शनमेव तत्र मानमिति चेत् ?, न-तेन सकलावधेरेवार्थस्य ग्रहणात् । अथ 'पूर्वदृष्टं पश्यामि' इति व्यवसायात् प्रागर्थः सिद्ध्यति, प्रागर्थसत्तां विना दृश्यमानस्य पूर्वदृष्टैकत्वगतेरयोगादिति चेत् ?, केन तयोरेकत्वं गम्यते ? इदानीन्तनदर्शनेन पूर्वदर्शनेन वा ?, नाद्यः-इदानीन्तनदर्शनकाले पूर्वकालस्यास्तमयात् तेनाविद्यमानपूर्वदृग्गर्भपूर्वदृष्टताया अग्रहणात्, अन्यथा वितथत्वप्रसङ्गात्, अत एव न द्वितीयः-पूर्वदर्शनेन वर्तमानकालदर्शनव्याप्तेरनवसायात्, तस्मादपास्तपूर्वदृगादियोगं सर्वं वस्तु दृशा गृह्यते, पूर्वदृष्टतां तु स्मृतिरुल्लिखतीति । न च 'स एवायम्' इति प्रतीतिरेका, स इत्यस्य स्मृतिरूपत्वात्, अयमित्यस्य च दृक्स्वरूपत्वात् परोक्षत्वापरोक्षत्वाभ्यां तद्भेदात्, न च पश्यामीति प्रतीतेः प्रत्यक्षमेव प्रत्यभिज्ञानम्, न च संस्कारजन्यत्वेन स्मृतित्वापत्तिः, संस्कारमात्रजन्यत्वस्यैव स्मृतित्वव्याप्यत्वात्, तत्तास्मृतेरेव वा तत्ताप्रत्यभिज्ञाहेतुत्वादिति नैयायिकादिमतमपि युक्तम्, तेषामपि पश्यामीत्याद्यनुगतमत्या चाक्षुषत्वासिद्धेर्निर्विकल्पकासाधारण्यात्, वैशद्यविशेषस्यैव पश्यामीति प्रतीतौ विषयत्वादिति न किञ्चिदेतत् ।

अथानुमानात् प्राग् भावोऽर्थस्य सिध्यति, प्राक् सत्तां विना पश्चाद्दर्शनायोगादिति चेत् ?, न-प्राक्सत्ताया असिद्ध्या तया सह पश्चाद्दर्शनस्य नियमासिद्धेः; अथ ज्ञाने नीलाद्याकारस्य कादाचित्कस्यान्यथाऽनुपपद्यमानत्वात् तत्प्रसिद्ध्येऽर्थः परिकल्प्यत इति चेत् ?, न-स्वप्नाद्यवस्थायां वासनाविशेषसामर्थ्यवशादविद्यमानकरि-तुरग-रथाद्याकारप्रतिपत्तिनियमवज्जाग्रद्दशायामपि तत एव प्रतिनियतविष-

यत्वोपपत्तेः, तन्न प्रागर्थसत्त्वम् । प्रागसत्त्वे तु धर्मिस्वरूपे दर्शनमेव प्रमाणम्, यद्येनैव रूपेणोपलभ्यते तत्तेनैव रूपेणास्ति, यथा नीलं नीलरूपतयैव, इत्थं च वर्तमानत्वेनानुमत एव पूर्वकाले सम्बन्धित्वं व्यवच्छिनत्तीति; अथ नीलं तद्दर्शन-विरतावपि परदृशि प्रतिभातीति साधारणतया ग्राह्यम्, विज्ञानं त्वसाधारणतया ग्राहकमिति भेदो युक्त इति चेत् ? न-नीलस्य साधारणतयाऽप्रतीतेः, नहि नीलं परदृशि प्रतिभातीत्यत्र प्रत्यक्षप्रसरोऽस्ति; अथ अनुमानात् तत्साधारणता प्रतीयते, स्वसन्ताने नीलादानार्थप्रतीतेः, नीलदर्शनमूलकत्वदर्शनेन परसन्तानेऽपि प्रवृत्ति-दर्शनात् तद्विषयदर्शनानुमानादिति चेत् ?, न-परप्रवृत्त्यादिना परदृष्टनीलानुमानेऽपि स्व-परदृष्टयोरैक्यासिद्धेः, सामान्येनान्वयपरिच्छेदात्, अपरधूमदर्शनादपर-वह्न्यनुमानात्, अपरवह्नौ पूर्वदृष्टवह्निसदृशताविकल्पवत् परदृष्टे स्वदृष्टसदृशता-मात्रविकल्पावतारात् । प्रतिभासभेदेऽपि स्व-परदृष्टयोः सदृशव्यवहारादिकार्य-दर्शनादभेदः स्यात् तदा सदृशरोमाञ्चोद्भवादिकार्यदर्शनात् सुखादेरपि स्वपर-सन्तानभुवस्तत्त्वं भवेत् ; न च सन्तानभेदात् तद्भेदः, तत्रापि भेदकान्तरगवेष-णायामनवस्थानात्, स्वरूपत एव तद्भेदे च सुखादेरपि तत एव भेदसंभवात् ; न च देशैकत्वात् स्व परदृष्टनीलादीनामेकत्वम्, देशस्यापि स्व परदृष्टस्योक्तवदेकत्वा-योगात्, तस्माद् ग्राहकाकारवत् प्रतिपुरुषमुद्रासमानं नीलादिकमपि भिन्नमेव, तच्चैककालोपलम्भाद् ग्राहकवत् स्वप्रकाशम् ।

अथ ग्राहकाकारश्चिद्रूपत्वाद् वेदकः नीलाकारस्तु जडत्वाद् ग्राह्य इति चेत् ?, न-अपरोक्षत्वरूपस्य चिद्रूपत्वस्य नीलादिसाधारण्यात्, नीलादेरपरोक्षस्वरूप-मन्यस्माद् भवति, न तु बोधस्येति विशेष इति चेत् ?, न-बोधस्यापीन्द्रियाद्य-पेक्षत्वात्; स्वोत्पत्तावेव बोध इन्द्रियादिकमपेक्षते, न तु स्वापरोक्षतायामिति चेत् ?, न-एकत्रापेक्षानपेक्षायोगात्; एवं चान्तर्बहिराकारयोस्तुल्यत्वेऽपि 'एकत्र ग्राहकताशक्तिः, अन्यत्र च ग्राह्यताशक्तिः' इति परेषां वासनामात्रम्, असिद्धे ग्राह्यग्राहकभावे तच्छक्तिकल्पनाया अयोगात्, तस्याः कार्यानुमेयत्वात्, एवं च यदवभासते तज्ज्ञानं, यथा-सुखादिकम्, अवभासते च नीलादिकम्, अतो ज्ञानमेव, इति स्वभावहेतुः ।

कथं तर्हि 'भूतले घट इति प्रतीतिः, न तु भूतलं न घटज्ञानवत्' इति वत् 'भूतलं न घटवत्' इति, कथं वा 'अहं घटज्ञानवान्' इतिवत् 'अहं घटवान्' इति न प्रतीतिः ? इति चेत् ?, पृच्छैतद् नियताऽऽधाराऽऽधेयभावकल्पनाबीजम्,

नहि परेणाप्याधाराधेयभावो वास्तवो वक्तुं शक्यते, संयोगमात्रस्य तत्त्वे कुण्ड-बदरयोगस्तद्विपर्ययस्य विनिगन्तुमशक्यत्वात्, तिर्यक्संयुक्तयोर्द्वयोस्तद्व्यवहारात्; न च बदरादिप्रतियोगिकत्वविशिष्टसंयोगादिरेव बदराद्याधारता, क्षणभङ्गापत्त्या विशिष्टस्यातिरिक्तस्यानभ्युपगमात्, प्रतियोगित्वाद्यविवेचनाच्च; न च कुण्डादि-स्वरूपैव बदराद्याधारता, तत्स्वरूपस्य साधारणत्वाद् बदरं प्रतीव करभं प्रत्यप्य-विशेषात्; तस्माद् भूतलादौ घटाद्याधारताप्रतीतिरविद्याविशेषादेव नियतेति प्रति-पत्तव्यम् । एतेन 'अर्थाभावेऽन्तर्बहिर्विभाग एव न स्यात्, इति निरस्तम्, भिन्नदेशसम्बन्धित्वेन तदसम्भवेऽपि विश्वरूपभेदेन तत्सम्भवात्, अन्यथा स्वप्नादौ रथादिज्ञाने बहिर्ज्ञानत्वं न स्यात् । एतेन चाहमिदमाकारभेदोऽपि व्याख्यातः, स्वरूपतस्तद्भेदात्, इदं नीलमित्यत्रेदमाकार-नीलाकारयोर्दोषादेवैक-ज्ञानत्वाभिमानात्, बहिर्नीलादिस्वरूपमिदन्त्वं त्वनुपपन्नम्, असत्यप्यर्थे दोष-वशात् 'इदम्' इति प्रतीतेः, 'इदं नीलम्' इत्यादिसहप्रयोगानुपपत्तेश्च, घटो घट इत्यादिवदिति दिग्'' इति, ॥ १० ॥ ३८४ ॥

विज्ञानस्वसंवेदनमेवार्थाकारं ज्ञानं गृह्णाति, विज्ञानव्यतिरिक्तस्यार्थस्याग्रहणमेव तदभावे मानमिति योगाचारमतं निगमयति—

**एवं चाग्रहणादेव, तदभावोऽवसीयते ।**
**अतः किमुच्यते मानमर्थाभावे न विद्यते ॥ ११ ॥ ३८५ ॥**

**एवं चे**ति-ज्ञानव्यतिरिक्तकालेऽर्थसत्त्वे उक्तरीत्या प्रमाणाभावे चेत्यर्थः, **अग्रहणादेव,** अदर्शनादेव, **तदभावः** ज्ञानव्यतिरिक्तस्य बाह्यार्थस्याभावः, **अवसीयते,** निश्चीयते, यत एवम् **अतः** अस्मात् कारणात्, **किमुच्यते अर्थाभावे मानं न विद्यत** इति-नीलादीनां स्वसंविदितज्ञानाभिन्नत्वग्रहे-ऽर्थाज्ज्ञानभिन्नतयाऽर्थो न दृश्यत इत्यदर्शनमर्थाभावे प्रमाणमस्त्येवेत्येवमपि तत्र मानं न विद्यत इति वचनं सकर्णानाकर्णनीयत्वात् कुत्सितं वचनमित्यर्थः । एतेन 'अदर्शनादेवाभावनिश्चये पुत्रादर्शनात् पुत्राभावनिश्चयेनोरस्ताडनादिना शोक-प्रसङ्गः' इति दुर्भाषितमपास्तम्, पुत्रध्वंसग्रहसामग्रीनियतत्वात् पुत्रध्वंसाकारस्य, पुत्रध्वंसग्रहस्य च शोकहेतुत्वान्नादर्शनमात्रं पुत्रध्वंसग्रहसामग्री, ततः 'पुत्रो मे नष्टः' इत्येवं पुत्रध्वंसाकारज्ञानं न जायत इति न तस्य शोकप्रसङ्गः; कथं तर्हि प्राक् पूर्वकालसम्बन्धित्वेनादर्शनात् तदभावग्रह उक्त इति चेत्?, धर्म्यतिरिक्तस्य तस्य दुर्वचत्वाद् धर्मिस्वरूपत्वे योग्यत्वेन तदापादनसम्भवादित्याकलय; एवं च

"विज्ञानस्वसंवेदनस्यैव मानत्वादित्यभिप्रायः" इति हरिभद्रसूरिव्याख्याने मानत्वादित्यस्य मानोत्थापकत्वादित्यर्थो ज्ञेयः ॥ ११ ॥ ३८५ ॥

एतद् योगाचारमतमज्ञानविलसितमित्युपदर्शयितुं सिद्धान्तवादिमतं तत्प्रतिक्षेपप्रवणमुपदर्शयति —

**अर्थग्रहणरूपं यत्, तत् स्वसंवेद्यमिष्यते ।**
**तद्वेदने ग्रहस्तस्य, ततः किं नोपपद्यते ? ॥ १२ ॥ ३८६ ॥**

**अर्थग्रहणरूपमिति**–बाह्यार्थपरिच्छेदात्मकं सदित्यर्थः, **यत्** यस्मात्, **तत्** विज्ञानम्, **स्वसंवेद्यम्** स्वसंविदितरूपम्, **इष्यते** योगाचारैरभ्युपेयते, न केवलं ज्ञानं स्वसंविदितम्, अर्थपरिच्छेदानात्मकस्य विज्ञानमात्रस्य वेद्मीत्येवमनुभवाभावात्, किन्तु 'नीलमहं वेद्मि' इति विच्छिन्नार्थग्रहणरूपतयाऽनुभवाद् बाह्यार्थपरिच्छेदात्मकं सदेव ज्ञानं स्वसंवेद्यम्, तथा च **तद्वेदने** बाह्यार्थपरिच्छेदात्मकविज्ञानानुभवे, **ग्रहः** ज्ञानं, **तस्य** बाह्यार्थस्य, **ततः** तस्मात् कारणात्, **किं नोपपद्यते** ?, अपि तु उपपद्यत एव, बाह्यार्थपरिच्छेदिज्ञानवेदनस्यैवार्थमन्तरेणायोगात्, इति । अत्रोपाध्यायाः स्वयमेव पूर्वमुपढौकितं योगाचारमतरहस्यमित्थं प्रतिक्षिप्तवन्तः—

"खलस्य योगाचारस्य ज्ञात्वाऽर्थद्वेषितामिव ॥
सभायामधुना सभ्याः! अनर्थ उपतिष्ठते ॥ १ ॥

तथाहि-यत् तावदुक्तम्—'ज्ञानभिन्नस्य ज्ञानाविषयत्वान्न बाह्यार्थः' इति तद् विपरीतम्, तद्विषयताप्रयोगस्य भेदगर्भत्वात् । किञ्च ग्राह्यग्राहकाकारस्वरूपभेदः प्रत्यक्षसिद्ध एव, अत एव 'नीलमहं वेद्मि' इति संवेदनं नीलमिति बाह्यनीललक्षणकर्माकारम्, अहमिति कर्त्राकारं, वेद्मीति ग्रहणक्रियाकारमिति विविक्तानेकाकारमनुभूयते; अथैकं ज्ञानमेकाकारमेव, तेन नीलाकारं नाहमाकारमिति चेत् ?, न–अनेकाकारकरम्बितैकविज्ञानानभ्युपगमे नील-धवलाद्यवगाहिचित्रज्ञानानुपपत्तेः, क्रमिकाण्येव तज्ज्ञानानीत्यभ्युपगमेऽप्येकमपि नीलादिज्ञानं न व्यवतिष्ठेत, नीलाभावेऽपि नीलत्वोपरागात्, एकापलापेऽन्यापलापस्य तुल्यत्वात्, चित्रज्ञानाभ्युपगमे च चित्रार्थोऽप्यनिवारितः, ग्राह्यग्राहकभेदस्य सत्त्वस्य प्रतिभासात्, एतेन 'विवेकेनाग्रहणान्न तद्भेदः सत्यः' इति निरस्तम्, आकारयोरसंभेदेन वेदनस्यैव विवेचनत्वात्, प्रकाश-प्रकाशतयोस्तु मिथोऽनुपरागलक्षणेनासंभेदेन वेदनाभावात् ।

यदपि 'सहोपलम्भनियमात्' इत्याद्युक्तं,–तदपि न युक्तम्, यतः सहोपलम्भो युगपदुपलम्भः, क्रमेणोपलम्भाभावः, एकोपलम्भो वाऽभिप्रेतः ?, आद्ये–बुद्धचित्त-सन्तानान्तरचित्तानां सहोपलम्भनियमेऽपि तद्भेदाभावेन व्यभिचारः; 'यो हि ज्ञानोपलम्भ एव ज्ञेयोपलम्भः, ज्ञेयोपलम्भ एव च ज्ञानोपलम्भः स युगपदुपलम्भनियमोऽभिधीयते' इति धर्मोत्तरानुसारिणः समाधानं, बुद्धज्ञाने च नायं नियमः, पृथक् सन्तानान्तरैः स्वचित्तसंवेदनादिति; तत्र यज्ज्ञेयं यज्ज्ञानोपलम्भ-नियतसहोपलम्भं तत् तज्ज्ञानाभिन्नमित्यर्थे पारमार्थिकज्ञाने सांवृतज्ञेयाभेदसाधने बाधात्, यज्ज्ञेयोपलम्भो यज्ज्ञानोपलम्भसहभावनियतः स तज्ज्ञानाभिन्न इत्युक्तौ च पूर्वोक्तदोषानतिवृत्तेः, यदीयत्वस्यापि व्याप्तौ निवेशे च बुद्धचित्तस्य सन्ताना-न्तरग्राहित्ववद्भेदं विनाऽपि कयाचित् प्रत्यासत्त्या ज्ञेयग्राहित्वोपपत्तावप्रयोजक-त्वम्, तद्ग्राहित्वे च तस्य सर्वज्ञानुपपत्तिः, विशुद्धज्ञानत्वेनैव तस्य गलितग्राह्य-ग्राहकाकारकलङ्कत्वात् सर्वज्ञत्वमिति कश्चित्, तदसत्,–सर्वाग्रहे सर्वज्ञतापदार्थ-स्यैवाघटमानत्वादिति न किञ्चिदेतत्, द्वितीये–क्रमेणोपलम्भाभावस्य तुच्छस्य न प्रतीतिरिति प्रतीत्यविषयत्वान्न ततः साध्यस्य ज्ञानाभिन्नत्वस्य सिद्धिः, तृतीये च–अर्थस्य ज्ञानाभिन्नत्वे सत्येव ज्ञानार्थयोरेकोपलम्भ इति साध्याविशेषः; किञ्च 'पुत्रेण सहागतः पिता' इत्यादौ भेदे सत्येव सहार्थो घटत इति ज्ञानार्थयोरेकान्तैक्ये सहशब्दार्थानुपपत्तिरिति न किञ्चिदेतत्।

एवं च 'नीलमहं वेद्मि' इत्यत्र कर्म-कर्तृभावप्रत्ययस्याविद्यकत्वं परास्तम्, बाधा-भावात्, बाधाभावेऽप्याविद्यकत्वाभ्युपगमे नीलादिप्रत्ययानामप्याविद्यकत्वापत्त्या शून्यतायां पर्यवसानप्रसङ्गात्; न च नीलं स्वतन्त्रतया भासते, अहमित्यादि च स्वतन्त्रतया भासत इति स्वातन्त्र्योपलम्भो बाधक इत्युक्तं युक्तम्, 'नीलमहं वेद्मि' इति परस्परोपरागेणैव कर्म-कर्त्रादीनां प्रतीतेः स्वातन्त्र्योपलम्भस्याभावात्; न च समकालयोर्भिन्नकालयोर्वा ग्राह्य-ग्राहकभावासम्भवात्, 'अर्थाग्राहि ज्ञानम्' इति युक्तम्, अनुमानोच्छेदप्रसङ्गात्, तत्रापि लिङ्गा-ऽनुमानयोः समकालयोः कार्यकारणभावः, भिन्नकालयोर्वेति विकल्पतः कार्यकारणभावासम्भवात्; एतेन 'नीलादि ज्ञानं ज्ञानकार्यत्वादुत्तरज्ञानवत्' इत्यपि निरस्तम्, 'अनुमानं लिङ्गं लिङ्गजन्यत्वादुत्तरलिङ्गवत्' इत्यनुमानस्यापि लिङ्गत्वापत्तेः, उपादानोपादेयभावेन ययोः कार्यकारणभावस्तयोरेवैकस्य तज्जन्यत्वेन तज्जातीयत्वं लिङ्गं तु नोपादान-विधयाऽनुमानजनकमिति न लिङ्गजन्यत्वेनानुमानस्य लिङ्गत्वमिति समाधानं तु

प्रकृतेऽपि तुल्यम्, लिङ्गादिकं प्रति ज्ञानमपि निमित्तविधयैव कारणं न तूपादानविधयेति ज्ञानजन्यत्वेऽपि नीलस्य न ज्ञानत्वम्;

एवं च "यया प्रत्यासत्त्या ज्ञानं स्वरूपं गोचरयति तयैव चेदर्थं, तदा तयोरैक्यापत्तिः, अन्यथा चेत् ?, स्वभावद्वयापत्तिः, तदपि चापरेण स्वभावद्वयेन, तदपि चान्येन तेन ग्राह्यमित्यनवस्था, स्वसंविदितस्यासंविदितरूपायोगात्" इत्यपि निरस्तम्, लिङ्गं येन स्वभावेनोत्तरं लिङ्गक्षणं जनयति तेनैवानुमानं जनयति चेत्? तयोरुत्तरलिङ्गक्षणानुमानयोरैक्यापत्तिः; एकेन स्वभावेनोत्तरलिङ्गक्षणं जनयति, अन्येन स्वभावेनानुमानं जनयतीत्युपगमे स्वभावद्वयापत्तिरित्यादेः समानत्वात्; लिङ्गं तदुभयकरणैकस्वभावं चेत् ? 'ज्ञानमपि स्वपरग्रहणैकस्वभावम्' इति स्वीकारे कस्तव कर्णशूलनिवारणोपायः ?; एवं ज्ञानाद् ग्रहणक्रियाया अर्थान्तरत्वानर्थान्तरत्वपक्षदोषेऽप्यनुमाने लिङ्गादुत्पत्तेस्तत्पक्षदोषतौल्यं विभावनीयम्;

परमार्थतो लिङ्गं नानुमानकारणं व्यवहारात् तु तथेष्यत इति चेत् ?, अर्थस्यापि परमार्थतो ज्ञानाग्राह्यत्वेऽपि व्यवहारत एव ज्ञानग्राह्यत्वं किं नेष्यते, व्यवहाराप्रामाण्याल्लिङ्गमप्यनुमानकारणं तत्त्वतो नेष्यत एव, ग्राह्यग्राहकभाववत् कार्यकारणभावस्यापि निषेधात्, समारोपव्यवच्छेदकरणात् त्वनुमानं प्रमाणमिष्यत इति चेत् ?, न–तत्र समारोपव्यवच्छेदस्य तन्मते कथमपि कर्तुमशक्यत्वात्, नाशस्य निर्हेतुकत्वाभ्युपगमात्, तत्कारणानां सामर्थ्येऽसामर्थ्ये वा तदुत्पत्तिप्रतिबन्धस्यापि वक्तुमशक्यत्वात्,

"यस्य शक्तिरशक्तिर्वा, या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य, कस्तां क्षपयितुं क्षमः ॥ १ ॥"

इति स्वयमेवाभ्युपगमात्; न चानुमानसहायस्य प्राक्तनसमारोपक्षणस्योत्तरसमारोपक्षणान्तरजननासमर्थक्षणजननाद् द्वितीयक्षणे कारणाभावादेव समारोपानुत्पत्तेरनुमानप्रामाण्यम्, लिङ्गानुमानयोरिव पूर्वोत्तरसमारोपक्षणयोर्हेतुफलभावाभावात्, न्यायस्य समानत्वात्;

यत् तु 'पूर्वदृष्टैकत्वगतेरयोगान्नानुमानात् प्रागर्थसिद्धिः' इत्यभिहितम्, तत्रापि न सम्यगवहितम्, प्रत्यभिज्ञयैव तदेकत्वावगतेः; न च "सोऽयमिति नैकं ज्ञानम्" इत्युक्तं युक्तम्, प्रत्यक्षत्वजातिवादिनां तदैक्यासङ्गतावप्यस्माकं स्वरूप इवेदमंशेऽपि स्पष्टतया प्रत्यक्षत्वेऽपि तदुपयोगसामान्ये विलक्षणक्षयोपशमबलायातप्रत्यभिज्ञात्वाविरोधात्, 'इदं पश्यामि' इतिवत् 'तमिमं प्रत्यभिजानामि' इत्यनुभवात्; न

चैवं "स्पष्टं प्रत्यक्षम्" [प्रमाणनयतत्त्वालोकालङ्कारे–२, १] इति प्रत्यक्षलक्षणातिव्याप्तिः, बहिर्विषयसामान्ये स्पष्टताया लक्षणघटकत्वात्, सोऽयमिति प्रत्यभिज्ञाया तत्तात्मकबहिर्विषये स्पष्टत्वाभावेन बहिर्विषयसामान्ये स्पष्टत्वाभावेनोक्तलक्षणासङ्गमनात्, 'बहिरर्थग्रहणापेक्षया हि' इत्याकरस्वारस्याविरोधादित्यन्यत्र विस्तरः।

'यदपि 'अर्थं विनाऽपि स्वापादाविव जाग्रद्दशायां भानमुक्तम्, तदसिद्धमसिद्धेन साधयतः स्वस्य महामोहमानतां व्यञ्जयति, न हि स्वप्नादावप्यर्थं विना भानं भवादृशं विना स्वीकुरुतेऽन्यः कश्चित्, अनुभूतस्यैव रथादेस्तदा सन्निहितत्वेन दोषमहिम्ना भानात्, असदाकारस्यैव जनने च वासना शशविषाणमपि किं न जनयेत्?, न ह्यत्र न पर्यनुयोग इति राज्ञामाज्ञा, 'प्रतिनियतशक्तिविशेषश्चाविद्यायामेव, न शशविषाणे' इत्यत्र श्रद्धामात्रमेव शरणम्।

यदपि 'प्रागसत्त्वे तु दर्शनमेव मानम्' इति,–तदपि न पेशलम्, तद्रूपेणानिश्चयात्, अन्यथा संशयायोगात्, यदपि 'स्व-परदृष्टनीलयोर्भेदान्न साधारणं नीलं ग्राह्यतयाऽभिमतं सिद्ध्यति, किन्तु ग्राहकत्वाभिमतमेव तद्युक्तम्' इति,–तदप्यसत्–विना साधारणतां परदृष्टे नीलेऽनुमानस्यैवानवतारात्, न हि धूमेऽप्यसाधारणवह्निना समं व्याप्तिग्रहोऽस्ति, न चागृहीतव्याप्तिकमनुमाने विषयीभवितुमर्हतीति; एतेन—

"लिङ्गस्याव्यभिचारस्तु, धर्मिणाऽन्यत्र गृह्यते।
तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति" ॥ १ ॥

इति वह्निविशिष्टदेश एवानुमेयः" इति दिङ्नागोक्तमपास्तम्, असाधारणेन तेनापि समं व्याप्त्यग्रहात्; नन्वेवं सुखादिकमपि साधारणं स्यादिति चेत्?, स्यादेव तिर्यक्सामान्येन; एवं नीलादिसाधारण्यं न दोषायेति चेत्?, न–'इदं देवदत्तदर्शनविषयो देवदत्तप्रवृत्तिविषयत्वात्' इत्यूर्ध्वतासामान्येनापि साधारण्यसिद्धेः, क्षणभङ्गस्य निरस्तत्वात्, निरसिष्यमाणत्वाच्च।

यदपि 'चिद्रूपत्वस्यापरोक्षरूपस्य नीलादिसाधारण्याज्ज्ञानवन्न ग्राह्यत्वम्' इति, तदप्यवद्यम्–स्फुरद्रूपत्वेनापरोक्षत्वे वह्न्यादेरपि तथात्वे प्रत्यक्षानुमानविभागव्याघातात्; तत्त्वतस्तदविभागान्न दोष इति चेत्?, नील-पीताद्याकाराणामपि कथं तत्त्वतो विभागः? प्रतिभासभेदादिति चेत्? प्रत्यक्षानुमानयोरपि किं न विशदाविशदप्रतिभासभेदः; नीलाद्याकारव्यतिरेकेण तत्र वैशद्याद्याकाराननुभवान्न तद्भेद इति चेत्? न–प्रदीर्घाध्यवसाये तदनुभवस्याबाधितत्वात्, क्षणिकाध्यवसाये तु प्रतिनियतैकाकारानुभवस्यापि दुर्घटत्वात्; एवं च 'यदवभासते तज्ज्ञानं यथा

सुखादिकम्' इत्यनुमानमपि निरस्तम्, सुखादीनां सर्वथा ज्ञानाभिन्नत्वाभावेन दृष्टान्तासिद्धेश्च; न च सुखादयो ज्ञानात्मका ज्ञानाभिन्नहेतुजत्वात्' इत्यतः सुखादीनां ज्ञानात्मकतासिद्धेः, कुम्भादिभङ्गजस्य शब्दस्य कपालखण्डादिना तुल्यहेतुजत्वेऽप्यतद्रूपत्वेन व्यभिचारात्, सुखादीनां विशिष्टादृष्ट-विपाक-स्रग्-वनितादिनिमित्तजन्यत्वेन सर्वथा ज्ञानाभिन्नहेतुजन्यत्वाभावाच्च, अन्यथा विभिन्नस्वभावत्वानुपपत्तेः; न च विभिन्नस्वभावत्वासिद्धिरेव, सुखादेराह्लादनाद्याकारत्वात्, ज्ञानस्य तु प्रमेयानुभवस्वभावत्वात्, तदुक्तम्-"सुखमाह्लादनाकारं विज्ञानं मेयबोधनम्" इति; न च ज्ञानक्षणोपादानत्वादुत्तरज्ञानक्षणवत् सुखादीनां ज्ञानाभिन्नत्वम्, आत्मद्रव्योपादानत्वात् तेषाम्, न खलु पर्यायाणां पर्यायान्तरोत्पत्तावुपादानत्वं क्वचिद् दृष्टम्, द्रव्यस्यैवान्तर्बहिर्वोपादानत्वोपपत्तेः, तदुक्तम्—

"व्यक्ताव्यक्तात्मरूपं यत्, पौर्वापर्येण वर्त्तते ।
कालत्रयेऽपि तद् द्रव्यमुपादानमिति स्मृतम्" ॥ १ ॥ इति ।

'यदि च सुखादयो ज्ञानात् सर्वथाऽप्यभिन्नाः, तर्हि तद्वदेवैषामर्थप्रकाशकत्वं स्यात्, न चात्र तदस्ति, सुखादीनामपि स्वज्ञानप्रकाश्यत्वेन बहिरर्थाविशिष्टत्वात्', इति देवसूरिप्रभृतयः । अन्ये तु सुखादीनामहङ्कार-क्रोधादिवदन्तर्मुखत्वेऽपि विभिन्नकर्मजत्वाज्ज्ञानभिन्नत्वम्' इत्यभिमन्यन्ते ।

यदपि घटादेर्ज्ञानाकारत्वेऽपि भूतले न घट इत्यादेर्नियताधाराधेयभावकल्पनाबीजसाम्राज्याद् वारणमकारि, तदप्यसत्–आधाराधेयाभ्यां कथञ्चिदपृथग्भूतस्याधाराधेयभावस्याबाधितानुभवसिद्धत्वेनाकाल्पनिकत्वात्, अन्यथा नीलादावप्यनाश्वासात् । यदपि 'अर्थाभावेऽपि धियामन्तर्बहिर्विभागः स्वरूपभेदादेव' इति भणितम्, तदपि न तथ्यम्-व्यक्तिभेदस्यातिप्रसङ्गितत्वात्, जातिभेदस्य चानभ्युपगमात्; न चान्तर्बहिर्विभागो मिथ्या, सुख-नीलाद्यनुभवानामन्तर्बहिर्भावस्याऽऽगोपालाङ्गनं प्रसिद्धत्वात् । एतेनाहमिदमाकारभेदव्याख्यानमपि सुप्रत्याख्यातम्, अहमाकारस्य शरीरालम्बनत्वे 'इदं गौरम्' इत्यनुपपत्तेः, निरालम्बनत्वे च भ्रान्तत्वापत्तेः, दानाद्याकारकालेऽहमाकारानुपपत्तेश्च । न चेदन्ताया अन्यस्या अनुपपत्तेर्ज्ञानाकारमात्रत्वं युक्तम्, प्रत्यक्षसमानकालीनार्थपर्यायविशेषरूपत्वात् तस्याः, अनन्तधर्मात्मकवस्त्वभ्युपगमे दोषलेशस्याप्यभावादिति न किञ्चिदेतत् ।

"इत्थं विलक्षीभूतस्य तूष्णीम्भावमुपेयुषः ।
योगाचारस्य योगाय च्छलमद्य विजृम्भते ॥ १ ॥" इति ।

स्याद्वादैकसहायस्य नयसाम्राज्यशालिनः ।
नैवात्र धीरवीरस्य प्रतिपक्षोऽस्ति सम्मुखः ॥ १ ॥
योगाचारस्य विज्ञानवादे नास्ति सयुक्तिता ॥
इत्युपाध्यायवाणीतो लावण्यो भावयत्यलम् ॥ २ ॥
महावीरस्तवस्यापि खण्डखाद्याभिधानिका ।
व्याख्योपाध्यायगीताऽपि योगाचारेष्टघातिनी ॥ ३ ॥
तत्र न्यायप्रभानाम्नी टीका मद्गुरुनिर्मिता ।
अवलोक्या बुधैर्योगाचारतत्त्वप्रभञ्जिनी ॥ ४ ॥
ग्रन्थगौरवभीत्याऽत्र नैव विस्तृतमादृतम् ।
उपाध्यायोक्तिमात्रं तूट्टङ्कितं बाह्यसिद्धये ॥ ५ ॥ १२ ॥ ३८६ ॥

बाह्यार्थपरिच्छेदस्वरूपमेव ज्ञानं स्वसंवेद्यं नातथाभूतम्, अतस्तद्वेदनेऽर्थग्रहणमुपपद्यत एवेति यन्निष्टङ्कितं तदेव भावयति—

**घटादिज्ञानमित्यादिसंवित्तेस्तत्प्रवृत्तितः ।**
**प्राप्तेरर्थक्रियायोगात्, स्मृतेः कौतुकभावतः ॥ १३ ॥ ३८७ ॥**

घटादीत्यादि, **घटादिज्ञानमित्यादिसंवित्तेः** 'घटमहं जानामि, पटमहं जानामि' इत्याद्यन्तर्बहिर्मुखसांशानुभवात्, अन्तर्बहिर्विषयविमुखज्ञानमात्राननुभवात्, अन्तर्बहिर्मुखसांशानुभवस्य ज्ञानविषयकस्यापलापे निराकारस्यैव दर्शनस्य सिद्ध्यापत्तेः, आकारव्यवस्थाऽपि काल्पनिकी स्यान्न पारमार्थिकीति साकारविज्ञानवादो न भवेत्, न चाकारस्य काल्पनिकत्वमेवेति युक्तं, तथा सति यज्ज्ञानं घटाकारत्वेन कल्पितं तदपि पटाकारत्वेन किं न कल्पितं स्यादित्येवमतिप्रसङ्गान्न ज्ञानमात्रं जगत्, तथा **तत्प्रवृत्तितः** 'अयं घट' इति ज्ञानाद् बाह्ये घटादावेव प्रवृत्तेः, बहिरर्थस्य घटादेरभावे तु तत्र प्रवृत्तिर्न स्यात्, तथा **प्राप्तेः** अयं घट इति ज्ञानात् प्रवृत्तस्य घटार्थिनो घटप्राप्तेः; एतेन 'घटाकारज्ञानस्य बाह्यघटरूपार्थाविषयकत्वेऽपि स्वभावतो घटप्रवृत्तिहेतुत्वाच्छुक्तौ रजतज्ञानादिव बहिःप्रवृत्तिः' इति निरस्तम्, घटे घटज्ञानात् प्रवृत्तिः संवादिनी शुक्तौ रजतज्ञानात् प्रवृत्तिर्विसंवादिनीत्येवं प्रवृत्तिसंवादा-ऽसंवादोपपत्तये प्राप्या-ऽप्राप्यघटादिविषयकज्ञानभेदस्वीकारस्यावश्यकत्वात्; अथ प्राप्तिरपि न ज्ञातव्यतिरिक्ता, किन्तु घटज्ञानात् प्रवृत्तस्य सतो घटोपलम्भ एव, तथा च घटोपलम्भलक्षणघटप्रवृत्तौ सत्यघटाकार-

ज्ञानस्य हेतुत्वान्न दोष इति चेत् ?, न–सत्यघटज्ञानोत्तरं घटभङ्गेऽपि तत्प्राप्ते-र्बाह्यार्थानपेक्षायाः प्रसङ्गात्, मम तु बाह्यार्थाभ्युपगन्तुर्घटज्ञानस्य सत्यस्य सद्भावेऽपि तद्विषयस्य बाह्यघटस्य विनाशादसन्निधानतस्तदप्राप्तेः; न च बाह्यार्थानभ्युपगन्तुरपि घटाभावज्ञानाद् घटाप्राप्तिः, घटज्ञानात् प्रवृत्तस्यानन्तरं घटभङ्गे घटाभावाज्ञानेऽपि घटप्राप्तेरयोगात्; न च घटाकारज्ञानमात्राद् घटप्राप्तिः, भूतले घटज्ञानात् पर्वते तत्प्राप्तिप्रसङ्गात्; न च 'घटवद् भूतलम्' इति ज्ञानं भूतले घटप्राप्तिहेतुरिति वाच्यम्, योगाचारमते विशिष्टज्ञानाभावात्; न चागृहीतासंसर्गकज्ञानद्वयं प्राप्तिकारणम्, भ्रमादपि प्राप्तिप्रसङ्गात्; सत्यघटाकारज्ञानस्य घटप्राप्तिहेतुत्वमिति च योगाचारानुयायिना वक्तुमशक्यम्, सत्यत्वस्य चार्थाभावेऽव्यवस्थानात्; तथा **अर्थक्रियायोगात्** बाह्यघटादितो जलानयनादिकार्यसिद्धेः, यदि च बाह्यो घटादिर्न जलानयनकारणं किन्तु ज्ञानाकार एव घटो जलानयनसमर्थः, तदा घटबुद्ध्यैव जनो जलमानयेत् ज्ञानाकारघटस्य जलानयनसमर्थस्य सद्भावादिति हता भवता कुम्भकारादीनामाजीविका, 'घटप्रवृत्त्याख्यज्ञानं घटानयनाख्यज्ञानजनकम्' इति पुनरर्थे विज्ञप्तिरिति नामान्तरकरणम्; **स्मृतेः** स्मरणात्, अनुभवस्मरणयोः समानविषयतया कार्यकारणभावः, य एवानुभवेन गृहीतो घटः स एव स्मृतिविषयो भवति, न च बाह्यघटमन्तरेणैतदुपपद्यते, उपलक्षणमेतत् प्रत्यभिज्ञाया अपि, तथा **कौतुकभावतः** बुभुत्सादिलक्षणकौतुकयोगात्, शशशृङ्गादावसति यथा बुभुत्सादिकं न भवति तथा बाह्यार्थो यद्यसन् स्यात् तदा तत्र बुभुत्सादिकं न भवेदतो ज्ञानविषयकान्तर्बहिर्मुखसांशानुभव-घटादिविषयकप्रवृत्ति-घटादिजलाद्यानयनाद्यर्थक्रियासिद्धि-स्मरण-कौतुकयोगेभ्यो बाह्यार्थोऽवश्याभ्युपेय इत्यर्थः ॥ १३ ॥ ३८७ ॥

विपक्षे दोषमभिधातुमाह—

**ज्ञानमात्रे तु विज्ञानं, ज्ञानमेवेत्यदो भवेत् ।**
**प्रवृत्त्यादि ततो न स्यात्, प्रसिद्धं लोक-शास्त्रयोः ॥१४॥३८८॥**

**ज्ञानमात्रे त्विति**–जगति ज्ञानमात्रस्वरूपेऽभ्युपगम्यमाने त्वित्यर्थः, **विज्ञानं ज्ञानमेवेत्यदो भवेत्** विज्ञानं ज्ञानमात्रं घटादीत्येतत् स्यात्, विज्ञानव्यतिरिक्तस्य परिच्छेद्यस्याभावाद् घटज्ञानं पटज्ञानमित्यादि न भवेत्, एवं च 'घटमहं वेद्मि, पटमहं वेद्मि' इत्येवं ज्ञानानुभवो न भवेत्, **ततः प्रवृत्त्यादि** ज्ञानमात्रभावाद् घटाद्यर्थिस्वर्गाद्यर्थिप्रयत्नादि, न चैतदप्रसिद्धमेव, किन्तु **लोक-शास्त्रयोः**

**प्रसिद्धम्** लोके जलाद्यानयनार्थं घटादौ प्रवृत्त्यादि शास्त्रे स्वर्गाद्यर्थं यागादौ स्वर्गादिकामस्य प्रवृत्त्यादि प्रतिपाद्यमानं दृश्यत इत्येवं लोक-शास्त्रयोः **प्रसिद्धम्**, **न स्यात्** उक्तदिशा नोपपद्येत ॥ १४ ॥ ३८८ ॥

अस्तु तर्हि ज्ञानव्यतिरिक्तस्य घटादेर्ग्रहणमित्यत आह—

**तदन्यग्रहणे चास्य, प्रद्वेषोऽर्थेऽनिबन्धनः ।**
**ज्ञानान्तरेऽपि सदृशं, तदसंवेदनादि यत् ॥ १५ ॥ ३८९ ॥**

**तदन्यग्रहणे** चेति–'घटमहं वेद्मि' इत्याद्यनुभवबलाज्ज्ञानव्यतिरिक्तघटादिग्रहणेऽभ्युपगम्यमाने चेत्यर्थः, **अस्य** ज्ञानस्य, **अर्थे** स्वस्वरूपवत् स्वविषये बाह्ये घटाद्यात्मकार्थे, **प्रद्वेषः** मत्सरोऽनभ्युपगमलक्षणः, **अनिबन्धनः** अनिमित्तः, **यत्** यस्मात्, एकज्ञानविषयीभूतं घटादि तदन्यज्ञानेन न संवेद्यते इत्येतन्मात्रेण घटादेरसत्त्वाभ्युपगमे, **ज्ञानान्तरेऽपि** सन्तानान्तरवृत्तिज्ञानेऽपि **तदसंवेदनादि** विज्ञानान्तरासंवेदनादि, **सदृशं** समानम्, ज्ञानान्तरासंवेदनाद्यर्थस्यासत्त्वं तदा ज्ञानान्तरासंवेदनात् सन्तानान्तरवर्तिज्ञानस्याप्यसत्त्वं स्यात्; यदि च ज्ञानान्तरासंवेदनेऽपि स्वात्मकज्ञानसंवेदनात्तस्य सत्त्वं तदाऽर्थस्यापि तज्ज्ञानस्य विषयितया विशेषणभावेन संवेदनात् सत्त्वं किं न स्यात्?, अनुपलभ्यमानस्यासत्त्वे सन्तानान्तरवर्तिचित्तस्याप्यनुपलभ्यमानतयाऽसत्त्वं स्याद् विशेषाभावात्; अत्र विशिष्यावगतये प्रश्नोत्तरभावेनायं विचार आवेदित उपाध्यायैः, तथाहि–"यदुपलभ्यमानं यथा नोपलभ्यते तत् तथा नास्ति, उपलभ्यमानं च नीलादि बाह्यत्वेन नोपलभ्यत इति तथा नास्तीति चेत्? न–एवं हि नीलाद्याकाराणामद्वयत्वेनाननुभूयमानानां तथात्वेनाभावप्रसङ्गात्; गृहीतेऽपि तस्मिन् निरंशत्वाद्द्वयबोधरूपे भ्रान्तिबीजानुपगमान्न यथाबोधमध्यवसायो जायत इति गृहीतमपि तदगृहीतकल्पम्, इत्यननुभूतिरद्वयस्य तत्त्वत इति चेत्? न–एवं द्वयानुभवमनुभूयमानमपलप्याननुभूयमानाद्वयानुभवसमर्थनेऽतिप्रसङ्गात्, नीलाद्याकारबोधादप्यन्यरूप एव बोधोऽनुभूयते, नीलादिभ्रान्तिबीजाननुगमात् तु न यथाबोधमवसीयत इत्यस्यापि वक्तुं शक्यत्वात्, तत्राद्वयत्वमनुमास्यत इति तु न पेशलम्, स्व-परदृष्टयोरिव साक्षात्क्रियमाणा-ऽनुमीयमानयोर्भेदेन तत्राद्वयत्वानुमानस्य वक्तुमशक्यत्वात्, अन्यथा नीलादौ बाह्यत्वानुमानस्यापि सुवचत्वादिति न किञ्चिदेतत्" इति ॥ १५ ॥ ३८९ ॥

विज्ञानं यत स्वसंवेद्यमिति कारिकयाऽर्थे युक्त्ययोगो य उक्तः स ज्ञानेऽपि समान इत्युपदर्शयति—

**युक्त्ययोगश्च योऽर्थस्य, गीयते जातिवादतः ।**
**ग्राह्यादिभावद्वारेण, ज्ञानवादेऽप्यसौ समः ॥ १६ ॥ ३९० ॥**

**युक्त्ययोगश्चेति**- युक्त्यभावश्चेत्यर्थः, यः पूर्वमावेदितरूपः; **अर्थस्य** बाह्यार्थस्य, **जातिवादतः** अनुभवविरुद्धासदुत्तरलक्षणजातिवादेन, **गीयते** योगाचारानुयायिभिर्महता प्रबन्धेन स्वेच्छामात्रेण प्रकल्प्यते, **असौ** युक्त्यभावः, **ग्राह्यादिभावद्वारेण** वक्ष्यमाणस्वरूपग्राह्यादिभावविकल्पेन, **ज्ञानवादेऽपि** 'ज्ञानस्वरूपं जगत्' इति योगाचारमतेऽपि, **समः** समानः, ययाऽसदुत्तरलक्षणजात्यात्मकयुक्त्या बाह्यार्थवादखण्डनं तयैव युक्त्या विज्ञानवादखण्डनमपीति ॥ १६ ॥ ३९० ॥

अत्र ज्ञानं हि ग्राह्यमात्रस्वभावं, ग्राहकमात्रस्वभावम्, ग्राह्यग्राहकोभयस्वभावम्, न ग्राह्यस्वभावं नापि ग्राहकस्वभावमित्यनुभयस्वभावं स्यादिति चतुर्धा विकल्प्य खण्डयति –

**नैकान्तग्राह्यभावं तद्, ग्राहकाभावतो भुवि ।**
**ग्राहकैकान्तभावं तु, ग्राह्याभावादसङ्गतम् ॥ १७ ॥ ३९१ ॥**

**नैकान्तग्राह्यभावं तदिति**–सर्वथा ग्राह्यस्वभावं ज्ञानं नेत्यर्थः, कथं नैकान्तग्राह्यस्वभावं ज्ञानमित्यपेक्षायामाह–**ग्राहकाभावतो भुवीति**–ज्ञानमात्रवादे ज्ञानातिरिक्तं जगति किञ्चिन्नास्त्येव यद् ग्राहकं परिकल्प्य तदपेक्षया ग्राह्यस्वभावं ज्ञानमिति वक्तुं शक्येतापि, सम्बन्धिशब्दश्चायं न सम्बन्ध्यन्तरेण विना प्रवर्त्तते, अत एव **ग्राहकैकान्तभावं तु** सर्वथा ग्राहकस्वभावं ज्ञानमित्यपि, यदपेक्षया ग्राहकमेतत् स्यात् तस्यैवाभावादित्याह–**ग्राह्याभावादिति, असङ्गतम्** अयुक्तम् ॥ १७ ॥ ३९१ ॥

ग्राह्य-ग्राहकोभयस्वभावं ज्ञानं तृतीयपक्षमधिकृत्याह—

**विरोधान्नोभयाकारमन्यथा तदसद् भवेत् ।**
**निःस्वभावत्वतस्तस्य, सत्त्वैवं युज्यते कथम्? १८ ॥ ३९२ ॥**

**विरोधादिति**–एकस्य ज्ञानस्य ग्राह्यग्राहकाकारोभयमिश्रणेन द्वित्वस्य विरो-

धादित्यर्थः, **नोभयाकारम्** न ग्राह्यग्राहकोभयस्वभावम्, **अन्यथा** ग्राह्यग्राहकानुभयस्वभावं ज्ञानमिति पक्षे, **तत्** ज्ञानम्, **असत्** अलीकम्, भवेत्, तत्र हेतुः—**निःस्वभावत्वतः** विशेषविनाकृतं हि सामान्यं न भवति, स्वभावसामान्यस्य विशेषौ ग्राह्यग्राहकस्वभावौ तयोर्निषेधेन स्वभावसामान्याभावात्, **एवम्** एवं सति, **तस्य** ज्ञानस्य, शशविषाणस्येव, **सत्ता** वस्तुत्वं **कथं युज्यते?** न कथञ्चित्, न हि निःस्वभावं सद् भवितुमर्हतीति । अत्रापि शिष्यबुद्धिवैशद्यायोपाध्यायोद्भावितो विचार उल्लिख्यते, तथाहि—"अत्र केचित्, तथागताश्चित्रप्रतिभासामेकां बुद्धिं स्वीकुर्वन्तस्तृतीयपक्षे विशेषमाहुः, तदुक्तम्—

"नीलादिश्चित्रविज्ञाने, ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि, पतत्यर्थे विवेचयन्" ॥ १ ॥

अत्र देवेन्द्रव्याख्या—'चित्रज्ञाने हि यो नीलादिः प्रतिभासते ज्ञानोपाधिर्ज्ञानविशेषणोऽनुभवस्वात्मभूत इति यावत्, स एवैकोऽनन्यभाक्–तज्ज्ञानस्वभावत्वादन्यमर्थं ज्ञानवदेव न भजते, तादृशश्च सन्नसौ तच्चित्रदर्शनप्रतिभासी तदन्यपीतादिप्रतिभासविवेकेन न केवलः शक्यते द्रष्टुम्, तस्मिन् प्रतिभासमाने सर्वेषामेव तज्ज्ञानतया तदन्येषामपि नियोगतः प्रतिभासनात्, तस्माद् यदैवमेकं नीलादिकमाकारं तदन्येभ्यः पीतादिभ्यः 'अयं नीलः' इति ज्ञानान्तरेण विवेचयति प्रमाता, तदैव तथा विवेचयन्नसौ न तज्ज्ञानमामृशति, अतद्रूपत्वात् तस्य, किं तर्हि? अर्थे पतति अर्थ एव तज्ज्ञानं प्रवृत्तं भवतीत्यर्थः, तस्मादेकस्मिन्नप्याकारे प्रतिभासमाने सर्वमाभाति न वा किञ्चिदपि, इत्यशक्यो विवेकतो दर्शने नीलादिप्रतिभास इति; न च चित्रताया बहिरर्थधर्मता, नीलादीनामवयविभेदा-ऽभेदाभ्यामनुपपत्तेः, सुखादीनां च ज्ञानाभिन्नहेतुजत्वादपि ज्ञानात्मकत्वम्' इति, तदसत्—बाह्यस्यापि द्रव्यस्य चित्रपर्यायात्मकस्याशक्यविवेचनत्वेन चित्रैकरूपताया दुरपह्नवत्वात्, अन्तर्विज्ञानात्तदाकाराणामिव बहिष्पुद्गलादे रूपादीनामशक्यविवेचनत्वात्; मणिसमूहे 'पद्मरागोऽयम्, चन्द्रकान्तोऽयम्' इत्यादिपृथग्बुद्धिरूपं विवेचनमस्त्येवेति चेत्? नीलाद्याकारैकज्ञानेऽपि 'नीलाकारोऽयम्, पीताकारोऽयम्' इति विवेचनं किं न प्रतीतम्?, चित्रप्रतिभासकाले नेदृग् विवेचनं, पश्चात् तु नीलाद्याभासानि ज्ञानान्तराण्यविद्योदयाद् विवेकेन प्रतीयन्त इति चेत्? तर्हि मणिराशिप्रतिभासकाले पद्मरागादिविवेचनमपि नास्त्येव, पश्चात् तु तत्प्रतीतिरविद्योदयादिति शक्यं वक्तुम्; मणिराशेर्देशभेदेन विभजनं विवेचनमिति चेत्?,

न–एकमण्याकारेषु तद्भावात्; मणेरेकस्य खण्डने तदाकारेषु देशविभजनमस्त्येवेति चेत् ?, ज्ञानस्याप्येकस्य बुद्ध्या खण्डने तदस्त्येव; बुद्ध्यन्तराण्येव तत्खण्डने तानीति चेत् ?, पराण्येव मणिखण्डने मणिखण्डद्रव्याणि तानीति समानम्; चित्रज्ञानं विवेचयन्नर्थे पततीति तदविवेचनमिति चेत् ?, एकत्वपरिणतद्रव्याकारान् विवेचयन् नानाद्रव्याकारेषु पततीति तदविवेचनं तुल्यम् । एतेन 'ग्राहकैकस्वरूपस्य नानाग्राह्याकारकृतवास्तवैकत्वाविघातोऽविवेचनम्' इत्यपि निरस्तम्, वस्तुत एकस्य बाह्यस्य नानाधर्मकृतैकत्वाविघाततौल्यात्, शब्दपरावृत्तिमात्रत्वात्; एतेन विविच्यमानस्यावास्तवानेकत्वपरिग्रहोऽपि व्याख्यातः । बाह्यस्याविवेच्यमानस्यानुपपद्यमानत्वाज्ज्ञानस्यैव चित्ररूपतेति चेत् ? न–बाह्यस्यात्यन्तानुपलभ्यस्वभावस्य तथात्वासम्भवात्, ज्ञानस्यैवोपलम्भयोग्यस्य तथात्वसम्भवात्; ज्ञानाकारस्य बाह्यत्वेनाभिमतस्य दृश्यत्वाद् विवेचनोपपत्तिरिति चेत् ? तद्विवेचनात् तस्यैवानुपपत्तिः, अन्यस्य वा ?, आद्ये-ज्ञानस्य नीलाद्याकारत्वायोगाच्चित्रैकरूपताव्याघातः, द्वितीये–अतिप्रसङ्गः, अन्यविवेचनादन्यानुपपत्तौ त्रैलोक्यस्याप्यभावप्रसङ्गात् । किञ्च, बाह्यस्य विवेचनं ज्ञानम्, इति कथं तेन तदसत्त्वव्यवस्था ?, अतिप्रसङ्गात्; भ्रान्तं तदिति चेत् ?, न–तस्याप्रमाणत्वात्; भ्रान्तिरप्यर्थसम्बन्धतः प्रमेति चेत्?, न–असता सह सम्बन्धाभावात्; असम्बन्धेऽपि दोषमहिम्ना तज्ज्ञानसम्भवान्न दोष इति चेत् ?, तथापि भ्रान्तं ज्ञानं भ्रान्तत्वेन प्रतिसन्धीयमानमर्थासत्त्वव्यवस्थापकम्, अन्यथा शुक्तौ रजतज्ञानं प्रागेव रजतासत्त्वं व्यवस्थापयेत्, तत्त्वप्रतिसन्धानं चासदर्थाकारत्वप्रतिसन्धानेन, ततश्च सदसत्त्वव्यवस्थेत्यन्योऽन्याश्रयः । किञ्च, नीलादेरवयविनोऽवयविबुद्ध्या विवेच्यमानस्यासत्त्वम्, अवयवबुद्ध्या वा ?, नाद्यः-तद्बुद्ध्या तत्सत्त्वस्यैव ग्रहात्, न द्वितीयः–अवयवबुद्धेरवयविनः सत्त्वं विधातुं निषेद्धुं वाऽसमर्थत्वात्, याऽपि नीलादेरवयविभेदाभेदाभ्यामनुपपत्तिरुक्ता, साऽप्ययुक्ता, कथञ्चिद्द्वैरूप्यस्वीकारे दोषाभावात्, अन्यथा तवाप्येतद्दोषानतिवृत्तेः, एकज्ञानस्य नानाकारतादात्म्ये प्रत्याकारं भेदप्रसङ्गात्, नानाकाराणां चैकज्ञानतादात्म्ये नानात्वव्याहतेः, सुखादीनां ज्ञानात्मकत्वं तु प्रागेव पराहतमिति नेदानीं प्रयास इति" इति ॥ १८ ॥ ३९२ ॥

विज्ञानवादी स्वाभिप्रायं प्रकटयति—

**प्रकाशैकस्वभावं हि, विज्ञानं तत्त्वतो मतम् ।**
**अकर्मकं तथा चैतत्, स्वयमेव प्रकाशते ॥ १९ ॥ ३९३ ॥**

**प्रकाशैकस्वभावं** हीति–गगनतलवृत्तिरालोको यथा नान्यं कमपि प्रकाशयति किन्तु स्वयमेव प्रकाशते तथा ज्ञानमपि स्वयमेव प्रकाशत इति प्रकाशमात्रस्वभावमित्यर्थः, किमीदृशमित्यपेक्षायां प्रक्रान्तमाह–**विज्ञानमिति**, **तत्त्वतः** परमार्थतः, **मतम्** विज्ञानवादिनो ममाभीष्टम्, **अकर्मकं** कर्मरहितम्, ज्ञानरूपग्रहणक्रियायाः प्रकाशापरपर्यायाया ग्राह्यं कर्म सम्भाव्येत, विचाराक्षमत्वेन च ग्राह्यमेव नास्ति, ततस्तदपेक्षाप्रकल्पितग्राहकत्वमपि ज्ञाने न सम्भवतीति कर्तृकर्मभावोपरागरहितं विज्ञानम्, तदुक्तं–"परस्परापेक्षया तयोर्व्यवस्थानात्" इति, **तथा च** ग्राह्य-ग्राहकाकारसंस्पर्शाभावे च, **एतत्** विज्ञानम्, **स्वयमेव** स्वसंविदितमेव, **प्रकाशते** 'किं प्रकाशते' इति प्रश्ने 'विज्ञानं प्रकाशते' इत्येवोत्तरं, तत्र कर्मणोऽश्रवणात्, तदुक्तम्—

"नील-पीतादि यज्ज्ञानाद्, बहिर्वदवभासते ।
तन्न सत्यमतो नास्ति, विज्ञानं तत्त्वतो बहिः ॥ १ ॥
तदपेक्षा च संवित्तेर्मता या कर्तृरूपता ।
साऽप्यतत्त्वमतः संविदद्वयेति विभाव्यते" ॥ २ ॥ इति ॥ १९ ॥ ३९३ ॥

अकर्मकप्रयोगस्य नादृष्टचरत्वमित्याशयेनात्र दृष्टान्तमाह—

**यथास्ते शेत इत्यादौ, विना कर्म स एव हि ।**
**तथोच्यते जगत्यस्मिंस्तथा ज्ञानमपीष्यताम् ॥ २० ॥ ३९४ ॥**

**यथे**ति, **आस्ते शेत इत्यादौ** प्रयोगे, **विना कर्म** कर्मप्रयोगमन्तरेणैव, **स एव हि** आसनादिक्रियोपरक्तो देवदत्तादिः कर्तैव, **तथा** कर्मानुपरागेण, **उच्यते** 'देवदत्त आस्ते, देवदत्तः शेते' इत्येवं प्रयुज्यते, **अस्मिन् जगति** न तु यथा 'कटं करोति देवदत्तः' इत्यादिः कर्मोपरागेण तथा, उपवेशनादिक्रियाणामकर्मकत्वेन तत्र कर्मणोऽन्वयासम्भवेन तत्प्रतिपादककर्मप्रयोगासम्भवात्, **तथा** अस्मिन् जगति, **ज्ञानमपि इष्यताम्** अकर्मकं स्वीक्रियताम्; ननु प्रकाशरूपस्य सतो ज्ञानस्य यथा क्रियत्वादकर्मकः 'प्रकाशते' इति प्रयोगस्तथा 'जानाति' इत्येतावन्मात्रमकर्मकः प्रयोगः किं न स्याद् ?, इति चेत् ?, न–लोके ज्ञाधातोरकर्मकत्वेनाप्रयोगादेवाप्रयोगात्, शब्दानां विकल्पयोनित्वेन वासनासामर्थ्याद् 'घटं जानाति, पटं जानाति' इत्येवं कर्मोपसंदानेनैव तथा प्रयोगात् ॥ २० ॥ ३९४ ॥

अत्रोत्तरमाह—

**उच्यते साम्प्रतमदः, स्वयमेव विचिन्त्यताम् ।**
**प्रमाणाभावतस्तत्र, यद्येतदुपपद्यते ॥ २१ ॥ ३९५ ॥**

**उच्यत** इति–अनन्तराभिहितपराकूतप्रतिक्षेपकं समाधानमभिधीयत इत्यर्थः, **असाम्प्रतम्** अयुक्तम्, **अदः** एतत्, यद्वा-साम्प्रतमद उच्यते–अथैतदभिधीयत इत्यर्थः, किं तदित्याह–**स्वयमेव विचिन्त्यताम्** अभिनिवेशत्यागेन स्वयमेवालोच्यताम्, **प्रमाणाभावतः** प्रमाणसामान्याभावात्, **तत्र** अविशिष्टप्रकाशमात्रे विज्ञाने, **यद्येतत्** एवं तत्त्वव्यवस्थापनम्, **उपपद्यते** उपपत्तिमद् भवति, यत्र प्रमाणं नास्ति तदुपपद्यते इति 'स्वयमेव विचार्यताम्' इत्युक्त्या एतन्नोपपद्यत इत्यायाति ॥ २१ ॥ ३९५ ॥

एवं तत्त्वव्यवस्थापनं यथा नोपपद्यते तथोपदर्शयति—

**एवं न यत् तदात्मानमपि हन्त ! प्रकाशयेत् ।**
**अतस्तदित्थं नो युक्तमन्यथा न व्यवस्थितिः ॥ २२ ॥ ३९६ ॥**

**एवमिति**–ज्ञानप्रकाशस्य गगनतलवर्त्यालोककल्पतायामित्यर्थः, **यत्** यस्मात् कारणात्, प्रकाशैकमात्रस्वभावत्वान्निर्विषयं ज्ञानं, **तदात्मानमपि** प्रकाशस्वरूपमात्मानमपि, **हन्तेति** परस्य बुद्धिमान्द्यं सूचयति, **न प्रकाशयेत्** ज्ञानस्य प्रकाशस्वरूपज्ञानाप्रकाशकत्वे सति, **अतः** अस्मात् कारणात्, **इत्थं** प्रकाशमात्रम्, **तत्** ज्ञानम्, **नो** नैव, **युक्तं** युज्यते, अबुद्ध्यमानस्य बोधरूपत्वायोगात्, **अन्यथा** तस्य प्रकाशैकमात्रत्वे, **न व्यवस्थितिः** अकर्मकस्वरूपस्य न व्यवस्थितिः, अकर्मकस्वरूपस्याग्रहणेऽकर्मकं तदिति कथं सिद्ध्येत् ? ॥२२॥३९६॥

एतदेव समर्थयति—

**व्यवस्थितौ च तत्त्वस्य, तथाभावप्रकाशकम् ।**
**ध्रुवं यतस्ततोऽकर्मकत्वमस्य कथं भवेत् ? ॥ २३ ॥ ३९७ ॥**

**व्यवस्थिताविति**, अत्र "**व्यवस्थितौ च तत्त्वस्य**" इति स्थाने "व्यवस्थितौ च तत् तस्य" इति हरिभद्रसूरिसम्मतः पाठः, तट्टीकायां–"व्यवस्थितौ च विज्ञानात् तत्तथातायाः" इति, 'तत्-विज्ञानं व्यवस्थापकम्' इति, "तस्य–व्यवस्थाप्यज्ञानस्य" इति पाठोपलब्धेः, अत्र "**व्यवस्थितौ च**" इति मूलस्य व्याख्याने "**व्यवस्थितौ च विज्ञानात् तत्तथातायाः**" इत्यत्र तत्तथाताया

विज्ञानाद् व्यवस्थितौ चेत्यन्वयः, अन्यत् सुगमम्। उपाध्यायटीकायां–"व्यवस्थितौ तत्त्वस्य–तत्तथाभावस्य' "तद्–विज्ञानम्" इति पाठोपलब्धेः "व्यवस्थितौ तत् तत्त्वस्य" इत्युपाध्यायसम्मतः पाठः प्रतिभाति, तथा च तत्तथाताया अकर्मकप्रकाशमात्रस्वरूपताया विज्ञानगताया विज्ञानाद् व्यवस्थितौ चेत्यर्थः, **तत्** व्यवस्थापकं विज्ञानम्, **तस्य** प्रकाशमात्रस्वभावत्वेन व्यवस्थाप्यस्य ज्ञानस्य, **तथाभावप्रकाशकम्** अकर्मकप्रकाशमात्रस्वरूपद्योतकम्, **ध्रुवं** निश्चितं, **यतः** यस्मात्, **ततः** तस्मात्, अकर्मकप्रकाशमात्रस्वरूपविषयकत्वात्, ज्ञानस्य विषय एव कर्म भवति यदि विज्ञानमकर्मकमात्रस्वरूपविषयकं तदा तत्कर्मकत्वं तस्य सिद्धमेव, एवं च **अकर्मकत्वं** कर्मरहितत्वम्, **अस्य** तत्तथाभावव्यवस्थापकज्ञानस्य, **कथं भवेत्**? कथं स्यात्? न कथञ्चित्स्यादिति हारिभद्रव्याख्यानुसारिणी व्याख्या, उपाध्यायव्याख्यायां तु–"सविषयकत्वस्यैव सकर्मकत्वात्, न हि शाब्दं सकर्मकत्वमत्र विचार्यते" इति विशेष उक्तः, तस्यायमाशयः-विज्ञानं तथाभावप्रकाशकं तदैव स्याद् यदि तथाभावविषयकं भवेत्, एवं च ज्ञानस्य विषय एव कर्मेति सकर्मकं तदुपगतं भवति, सकर्मकतया ज्ञानोल्लेखाभावे शब्दतो मा प्रतीयतां तत्र सकर्मकत्वं, तेन का नो हानिः?, न हि शब्दतः प्रतीयमानं सकर्मकत्वं तस्य विचारणीयं, किन्तु तद् वस्तुगत्या सकर्मकमकर्मकं वेत्येव विचारः प्रस्तुतः, तत्रोक्तयुक्त्या सकर्मकत्वं तस्य सिद्धमेव, अकर्मकप्रकाशमात्रस्वरूपस्य विज्ञानेनाग्रहणे तु प्रमाणाभावादेव तत् तथा न सिध्यतीति ॥ २३ ॥ ३९७ ॥

पराभिप्रायमाशङ्क्य परिहरति—

**व्यवस्थापकमस्यैवं, भ्रान्तं चैतत् तु भावतः।**
**तथेत्यभ्रान्तमत्रापि, ननु मानं न विद्यते ॥ २४ ॥ ३९८ ॥**

व्यवस्थापकमिति, **अस्य** प्रकाशमात्रस्वभावतया व्यवस्थाप्यस्य ज्ञानस्य, **एवं व्यवस्थापकम्** एवम्–उक्तदिशा, व्यवस्थापकं–प्रकाशमात्रत्वद्योतकं यज्ज्ञानान्तरम्, **एतत् तु** एतज्ज्ञानं पुनः, **भावतः** परमार्थतः, **तथेति**–सविषयकमिति, **भ्रान्तं** भ्रमात्मकं, तस्य परमार्थतः सविषयकत्वाभाववति ज्ञाने सविषयकत्वावगाहनाद् भ्रान्तत्वम्; नन्वेवं प्रमाणाभावात् स्वप्रकाशमात्रस्वरूपतया व्यवस्थाप्यं ज्ञानं न सिध्येदिति वाच्यं, व्यवस्थाप्यस्यैव ज्ञानस्य स्वतः स्फुरद्रूपत्वाद् ग्राह्यग्राहकभावविनिर्मुक्तत्वाच्च तत्र प्रामाण्यात्, स्वाविषयकत्वेऽपि परानपेक्षस्फूर्तिकत्वेन स्वसंविदितत्वाव्याहतेः; ज्ञानसामान्याकारं वा तत्,

नीलाद्याकारं वेति चेत् ?, ज्ञानसामान्याकारत्वे सर्वविज्ञानानामविशेषप्रसङ्ग इति नीलादिस्वलक्षणाकारमेव तदिति; इत्थं पराभिप्राये ग्रन्थकार उत्तरमाह–**नन्विति**–समाधाने, यदेतत् स्फुरद्रूपत्वं ग्राह्यग्राहकभावविनिर्मुक्तत्वं च व्यवस्थाप्य ज्ञानस्याकर्मकप्रकाशमात्रत्वे प्रामाण्यनिबन्धनमभिप्रेतम्, **अत्रापि** अस्मिन्नपि, **अभ्रान्तं मानं** भ्रमभिन्नं प्रमाणं, **न विद्यते** नैव समस्ति, स्वतः स्फुरद्रूपत्वाद् ग्राह्यग्राहकभावविनिर्मुक्तत्वादकर्मकप्रकाशमात्रं तद्विज्ञानस्यापि सविषयकत्वेनाप्रमाणत्वादित्याशयः ॥ २४ ॥ ३९८ ॥

भवतु ज्ञानस्याकर्मकप्रकाशमात्रत्वे मानं भ्रान्तं ततः किमित्यपेक्षायामाह—

**भ्रान्ताच्चाभ्रान्तिरूपा न, युक्तियुक्ता व्यवस्थितिः ।**
**दृष्टा तैमिरिकादीनामक्षादाविति चेन्न तत् ॥ २५ ॥ ३९९ ॥**

**भ्रान्ताच्चेति**–भ्रान्ताद् व्यवस्थापकज्ञानाच्चेत्यर्थः, **अभ्रान्तिरूपा** यथार्था, **व्यवस्थितिः** अकर्मकप्रकाशमात्रं ज्ञानमिति व्यवस्थितिः, व्यवस्थापकस्यापीदं भ्रान्तमित्यादिरूपा व्यवस्थितिः; सर्वाऽपि यथार्था व्यवस्था प्रमाणादेव न्याय्या नाप्रमाणादित्याह—**न युक्तियुक्तेति**–न न्यायोपपन्नेत्यर्थः, अत्र परस्य नायं नियमो यदुत–भ्रान्तादभ्रान्तव्यवस्थितिर्न, यतस्तथापि दृष्टत्वादित्यभिप्रायकमुत्तरं प्रतिक्षेप्तुमुपदर्शयति—**दृष्टेति, तैमिरिकादीनां** तिमिरादिदोषवताम्, **अक्षादौ** तिमिराद्यक्षदोषादौ, भ्रान्तादभ्रान्तरूपा व्यवस्थितिरनुषज्यते, तत्र दृष्टेत्यस्य सम्बन्धः, तिमिरादिदोषजनितद्विचन्द्रादिभ्रमात्मकज्ञानात् कार्यरूपात् कारणीभूतेऽक्षगततिमिरादिदोषादौ यथार्था व्यवस्थितिर्दृष्टा, **इति चेत्** ? एवं परो मन्यते यदि, **न तत्** एतदेवं न ॥ २५ ॥ ३९९ ॥

कथं नेत्यपेक्षायामाह—

**नाक्षादिदोषविज्ञानं, तदन्यभ्रान्तिवद् यतः ।**
**भ्रान्तं तस्य तथाभावे, भ्रान्तस्याभ्रान्तता भवेत् ॥२६॥४००॥**

**नाक्षादीति, यतः** यस्मात्, **अक्षादिदोषविज्ञानम्** अक्षादिगततिमिरादिदोषज्ञानम्, **तदन्यभ्रान्तिवत्** द्विचन्द्रादिज्ञानं यथा भ्रान्तं तथा, **भ्रान्तं** नभोऽत्रान्वयात् भ्रान्तं न, कार्यलिङ्गकानुमितिरूपत्वेनापि त्वभ्रान्तमेव, यथा धूमलिङ्गकानुमितिरूपत्वेन पर्वते वह्निज्ञानमभ्रान्तं तथेदमपि, विपक्षे बाधकमाह—**तस्येति**–अक्षादिगततिमिरादिदोषविज्ञानस्येत्यर्थः, **तथाभावे** भ्रान्तत्वे, **अक्षादौ**

यदि तिमिरादिदोषो न भवेत् तदैव तिमिरादिदोषाभाववत्यक्षादौ तिमिरादिदोषप्रकारकत्वादक्षादौ तिमिरादिदोषज्ञानस्य भ्रान्तता स्यात्, एवं च दोषरहिताक्षादिकरणजन्यत्वेन **भ्रान्तस्य** भ्रान्तत्वेनाभिमतस्य द्विचन्द्रादिज्ञानस्य, **अभ्रान्तता** यथार्थता, **भवेत्** स्यात्, तद्भयादक्षादिदोषविज्ञानमभ्रान्तमेवाभ्युपेयं, तदेव चाक्षादौ दोषव्यवस्थापकमित्यभ्रान्तादेव दोषज्ञानाद् दोषव्यवस्थितिर्यथार्थेति ॥ २६ ॥ ४०० ॥

दोषान्तरमाह—

**न च प्रकाशमात्रं तु, लोके क्वचिदकर्मकम् ।**
**दीपादौ युज्यते न्यायादतश्चैतदपार्थकम् ॥ २७ ॥ ४०१ ॥**

**न चेति**-अस्य 'युज्यते' इत्यनेन सम्बन्धः, **प्रकाशमात्रं तु** सर्वथा प्रकाशैकस्वभावमेव, **लोके** जगति, **क्वचित्** कस्मिंश्चिदपि, **अकर्मकम्** अनवलम्बनम्, **दीपादौ** दीपादिलक्षणप्रकाशके वस्तुनि, **युज्यते** घटते, **न्यायात्** युक्तितः, दीपादीनां किञ्चित् प्रकाशकत्वेनैवोपलब्धेः केवलनिरालम्बनप्रकाशरूपत्वेनानुपलब्धेः, **अतश्च** अस्मात् कारणाच्च, **एतत्** विज्ञानाकर्मकत्वकल्पनम्, **अपार्थकम्** निष्प्रयोजनम् ॥ २७ ॥ ४०१ ॥

यथा 'आस्ते, शेते' इत्यादिप्रयोगे कर्म विनैवासनादिक्रियोपरक्तो देवदत्तादिः प्रतीयते, तथा ज्ञानमप्यकर्मकमेवेति यदुक्तं प्राक् तत्राह—

**दृष्टान्तमात्रतः सिद्धिस्तदत्यन्तविधर्मिणः ।**
**न च साध्यस्य यत् तेन, शब्दमात्रमसावपि ॥ २८ ॥ ४०२ ॥**

**दृष्टान्तमात्रत** इति-परपरिभाषिताद् 'आस्ते, शेते' इत्यादिदृष्टान्तमात्रादित्यर्थः, **तदत्यन्तविधर्मिणः** आसन-शयनादिक्रियाकर्तुर्नानाधर्मानुविद्धात्, **साध्यस्य** बोधमात्रस्य, **न च** नैव, **सिद्धिः** निश्चयः, **यत्** यस्मादेवं, **तेन** तेन कारणेन, **असावपि** उक्तदृष्टान्तोऽपि, **शब्दमात्रं** वचनमात्रम्, न तु दृष्टान्तस्य यल्लक्षणं दार्ष्टान्तिकेन सह समानधर्मवत्त्वं तद्युक्तम्, विज्ञानस्य विज्ञानत्वादेव किञ्चिद्विषयकत्वं स्यादेव, निर्विषयकत्वे विज्ञानत्वमेव न स्यात्, यच्च तस्य विषयस्तदेव तस्य कर्मेति, आसनशयनादेश्चाकर्मकत्वेऽप्यासनत्व-शयनत्वादिकं नानुपपन्नमिति दार्ष्टान्तिकवैधर्म्यान्न तस्य वस्तुतो दृष्टान्ततेत्याशयः ॥ २८ ॥ ४०२ ॥

अत्रैव प्रधानदोषमुपदर्शयति—

**किञ्च विज्ञानमात्रत्वे, न संसारा-ऽपवर्गयोः ।**
**विशेषो विद्यते कश्चित्, तथा चैतद् वृथोदितम् ॥२९॥४०३॥**

**किञ्चे**ति, **विज्ञानमात्रत्वे** जगतो ज्ञानैकरूपत्वे, स्वीक्रियमाणे, **संसारा-ऽपवर्गयोर्विशेषः** अन्योन्यवैलक्षण्यम्, **कश्चित्** किमपि, **न विद्यते** नैव समस्ति, ज्ञानमात्रस्य संसारदशायां मोक्षदशायां चाविशेषात्, प्रज्ञानव्यतिरिक्तं च किञ्चिन्नोपपद्यत एव, येन संसारदशायामप्राप्यस्य तस्य मोक्षदशायां प्राप्यत्वाद् विशेषो भवेत्, संसारदशायामप्राप्यस्य विज्ञानव्यतिरिक्तस्य कस्यचिन्मुक्तिदशायां प्राप्यस्य स्वीकारे वा विज्ञानाद्वैतवादव्याहतेः, **तथा च** संसारा-ऽपवर्गयोर्विशेषा-भावे च, **एतत्** अनन्तरमेव वक्ष्यमाणम्, **वृथोदितम्** भवतामागमे निरर्थकमेव प्रलपितम् ॥ २९ ॥ ४०३ ॥

यत् तदागमे उदितं तदुपदर्शयति—

**चित्तमेव हि संसारो, रागादिक्लेशवासितम् ।**
**तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥ ३० ॥ ४०४ ॥**

**चित्तमेवे**ति–विज्ञानमेवेत्यर्थः, **संसारः** विज्ञानमात्रस्य संसारत्वे मुक्ति-दशायामपि संसारप्रसङ्ग इति तद् विशिनष्टि—**रागादिक्लेशवासितमिति**—रागादिलक्षणा ये क्लेशास्तैर्वासितं युक्तमित्यर्थः, **तदेव** चित्तमेव, **तैः** रागादिक्लेशैः, **विमुक्तं** रहितं सत्, **भवान्तः** मोक्षः, **इति कथ्यते** इत्युपदिश्यते ॥३०॥४०४

यथैतद्वचनं वृथा तथोपदर्शयति—

**रागादिक्लेशवर्गो यन्न विज्ञानात् पृथग् मतः ।**
**एकान्तैकस्वभावे च, तस्मिन् किं केन वासितम्? ॥३१॥४०५॥**

**रागादी**ति, **यत्** यस्मात्, **रागादिक्लेशवर्गो** रागादिक्लेशसमुदायः, **विज्ञा-नात् पृथक्** भिन्नः, **न मतः** न विज्ञानमात्रवादिनोऽभिमतः, विज्ञानभिन्नानां तेषामुपगमे द्वैतापत्तेः, किन्तु विज्ञानमात्रम्, तत एव **एकान्तैकस्वभावे** सर्व-थैकस्वरूपे, **तस्मिन्** विज्ञाने, **च** पुनः, **किं केन वासितं** वास्य-वासकयोर्भेदे सति वास्य-वासकभावो भवति, अभिन्नैकरूपं च वासकाभावाद् वासितं न भवतीत्यर्थः ॥ ३१ ॥ ४०५ ॥

पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**क्लिष्टं विज्ञानमेवासौ, क्लिष्टता तत्र यद्वशात् ।**
**नील्यादिवदसौ वस्तु, तद्वदेव प्रसज्यते ॥ ३२ ॥ ४०६ ॥**

**क्लिष्टमिति, असौ** रागादिक्लेशवर्गः, **क्लिष्टम्** मलिनं, **विज्ञानमेव** एवकारेण विज्ञानभिन्नत्वस्य व्यवच्छेदः, एवं च भेदस्याधिकरणस्वरूपस्यैवोपगमात् क्लिष्टभिन्नत्वं विज्ञानमेव न तु तद् विज्ञानभिन्नं क्लेशादिराहित्यमिति, अक्लिष्टविज्ञानस्वरूपस्य प्राप्यस्य मोक्षदशायां सत्त्वादपवर्गार्थप्रवृत्तिः सफलैवेति पराभिप्रायः, अत्रोत्तरं—**क्लिष्टतेति, तत्र** संसारिचित्ते, तत्रेति स्थाने 'तस्य' इति मूलकर्तृसम्मतः पाठः, तस्य—विज्ञानस्येति व्याख्यानात्, **यद्वशात्** यत्सामर्थ्यात्, **क्लिष्टता** मलिनता, **नील्यादिवत्** यथा नीलीद्रव्यादिसम्बन्धात् पटादौ नीलवत्त्वादिलक्षणमलिनतात्मकक्लिष्टता, तथा ज्ञानेऽपि स्वव्यतिरिक्तकिञ्चिद्वस्तुसम्बन्धात् क्लिष्टता, **असौ** विज्ञानक्लिष्टताऽऽपादको रागादिक्लेशवर्गः, **तद्वदेव** विज्ञानात्मकबोधो यथा वस्तु तथा **वस्तु** अपरिकल्पितः पदार्थः, **प्रसज्यते** विज्ञानभिन्न आपाद्यते, सम्बन्धिद्वयजनितत्वात् सम्बन्धलक्षणक्लिष्टताया इत्युत्तराभिप्रायः ॥ ३२ ॥ ४०६ ॥

प्रसङ्गान्तरदोषमुपदर्शयति—

**मुक्तौ च तस्य भेदेन, भावः स्यात् पटशुद्धिवत् ।**
**ततो बाह्यार्थतासिद्धिरनिष्टा संप्रसज्यते ॥ ३३ ॥ ४०७ ॥**

**मुक्तौ चेति**—मुक्त्यवस्थायां चेत्यर्थः, **तस्य** संसारिचित्तक्लिष्टतापादकस्य रागादिक्लेशवर्गस्य, **भेदेन** विज्ञानात् पृथग्भावेन, **भावः स्यात्** सत्ता भवेत्, एवं सति विज्ञानस्य निर्मलस्वरूपाविर्भावलक्षणा शुद्धिरुपपद्यते, **पटशुद्धिवत्** यथा पटादेर्नील्यादिद्रव्यसंसर्गापगमे पटात् पृथग्भावेन नील्यादिद्रव्यमवतिष्ठते प्राक्तनशुद्धशुक्लपटादिस्वरूपाविर्भावस्तद्वत्, यत एवं **ततः** तस्मात्, **बाह्यार्थतासिद्धिः** बाह्यार्थताऽवस्थितिः, **अनिष्टा** विज्ञानाद्वैतवादानभिमता, **संप्रसज्यते** आपद्यते । अत्र विशेष उपाध्यायैरित्थमुपदर्शितः—"तेन अक्लिष्टं—क्लेशराहित्यं क्लिष्टभिन्नत्वं वोच्यताम्, नोभयथाऽपि विशेषः, प्रतियोगिनस्तदवच्छेदकस्य वा पृथग्भावावश्यकत्वेऽद्वैतासाम्राज्यत्वात्, 'बाह्यार्थता' इत्यत्र तलः, 'तत्स्वभावत्वम्' इत्यादाविव प्रकृत्यर्थमात्रे निरूढलक्षणायामपि तस्याः प्रयोगविशेषनियन्त्रित-

त्वादत्रासंभवत्प्रसरत्वेऽपि "सत्पदप्ररूपता" इत्यादाविवार्षत्वान्न दोषः; वस्तुतो यथाश्रुतार्थेऽपि नानुपपत्तिः, बाह्यत्वसमानाधिकरणार्थताऽऽपादनेऽर्थताया बाह्यत्वसामानाधिकरण्यमात्रस्य फलत आपादनादिति ध्येयम्" इति ॥ ३३ ॥ ४०७ ॥

ननु यथा पटादेः क्लिष्टता नीलीद्रव्यादिसंश्लेषनिमित्तप्रभवा न तथा चित्तक्लिष्टताऽन्यसम्पर्कप्रभवा, येन तज्जनकबाह्यार्थसिद्धिः स्यात्, किन्तु सा स्वभावादेवेति पराभिप्रायमाशङ्क्य परिहरति—

**प्रकृत्यैव तथाभूतं, तदेव क्लिष्टतेति चेत्? ।**
**तदन्यूनातिरिक्तत्वे, केन मुक्तिर्विचिन्त्यताम् ॥३४॥४०८॥**

**प्रकृत्यैवेति**–स्वभावेनैवेत्यर्थः, **तथाभूतं** क्लिष्टं चित्तम्, **तदेव क्लिष्टता** क्लिष्टं चित्तमेव क्लिष्टता, न तु सा क्लिष्टचित्तव्यतिरिक्तेति न ज्ञानाद्वैतताहानिः, **इति चेत्?** एवं यदि परो मन्यते, अत्रोत्तरं-**तदन्यूनानतिरिक्तत्व** इति–बोधान्न्यूनस्याधिकस्य वाऽभावे चित्तमात्राच्चित्तमात्रस्य भावे सतीत्यर्थः, **केन मुक्तिः** क्लिष्टस्य चेतसः स्वभावत एव तथाभूतादुत्तरोत्तरमुपजायमानत्वेन तत्प्रवाहाविच्छेदादन्यस्य कस्यचिदभावेन न केनापि मुक्तिः, **विचिन्त्यताम्** एतद्विचार्यताम् ॥ ३४ ॥ ४०८ ॥

ननु पूर्वपूर्वचित्तमुत्तरोत्तरचित्तं प्रति कारणमित्येतावन्मात्रेण चित्तप्रवाहः संसार-मुक्तिसाधारण एकोऽनुवर्तते, तत्र स्वभावादपि संसारिचित्तमेव नील्यादिवत् क्लिष्टं, मुक्तिचित्तमेव च प्रदीपादिवदक्लिष्टचित्तं भविष्यतीति पराभिप्रायमाशङ्कते—

**असत्यपि च या बाह्ये, ग्राह्ये ग्राहकलक्षणे ।**
**द्विचन्द्रभ्रान्तिवद्भ्रान्तिरियं नः क्लिष्टतेति चेत्? ॥३५॥४०९॥**

**असत्यपीति, बाह्ये** बाह्यवस्तुनि, **असत्यपि** असद्भूतेऽपि, **'ग्राह्यग्राहकलक्षणे'** इति स्थाने "ग्राह्यग्राहकलक्षणा" इति पाठो युक्तः, 'परस्परापेक्षाप्रकल्पिता ग्राह्यग्राहकभावावगाहिनी' इत्येवं तस्योपाध्यायैर्व्याख्यानात्, "ग्राह्यग्राहकलक्षणा" इति धृत्वा 'एतद्रूपा' इति हरिभद्रसूरिभिर्व्याख्यानात्, तस्य **भ्रान्तिरि**त्यनेनान्वयः, **या** इत्यस्यापि तत्रान्वयः, भ्रान्तिश्च तथाभूता 'नीलमहं वेद्मि' इत्याद्याकारा **द्विचन्द्रभ्रान्तिवदियं** द्विचन्द्रभ्रान्तिर्यथाऽनुभवसिद्धा तथाऽनुभवसिद्धा, **नः** अस्माकं 'मते' इति शेषः, **क्लिष्टता** न तूक्तभ्रान्तिव्यतिरिक्ता क्लिष्टता, **इति चेत्?** एवं यदि परो मन्यते ॥ ३५ ॥ ४०९ ॥

अत्रोत्तरमाह—

**अस्त्वेतत् किन्तु तद्धेतुभिन्नहेत्वन्तरोद्भवा ।**
**इयं स्यात् तिमिराभावे, न हीन्दुद्वयदर्शनम् ॥ ३६ ॥ ४१० ॥**

**अस्त्वेतदि**ति-आपातत एतद् भवत्वित्यर्थः, अतः परं किं वक्तव्यं भवत इति पृच्छति-**किन्त्वि**ति, उत्तरयति-**तद्धेतुभिन्नहेत्वन्तरोद्भवे**ति-क्लिष्टचित्तहेत्वतिरिक्तहेत्वपेक्षेत्यर्थः, **इयं** निरुक्तभ्रान्तिलक्षणा क्लिष्टता, **स्यात्** भवेत्, **तिमिराभावे** तिमिररोगाभावे, **इन्दुद्वयदर्शनम्** चन्द्रद्वयदर्शनं भ्रमस्वरूपम्, **न दृष्टं** न दर्शनविषयः, एतच्चोपलक्षणं शङ्खपीतिमादिभ्रमहेतुकामलादेरपि, इत्थं च यथा तिमिरादिकमेकचन्द्रकारणाक्षादिभ्योऽधिकं तथा सत्यबोधहेतोर्बोधमात्रादधिकेन केनचिद्धेतुना भवितव्यं क्लिष्टबोधजननमित्याशयः ॥ ३६ ॥ ४१० ॥

ननु द्विचन्द्रादिज्ञाने यथोपप्लववासना हेतुः, तथा ग्राह्यग्राहकभावावलम्बनज्ञानलक्षणभ्रान्तावप्यनादिवासना हेतुरिति चेत् ?, सा सती, उतासती ?, आद्ये-विज्ञानव्यतिरिक्तवासनासद्भावाद् द्वैतापत्तिः, द्वितीये त्वाह—

**न चासदेव तद्धेतुर्बोधमात्रं न चापि तत् ।**
**सदैव क्लिष्टतापत्तेरिति मुक्तिर्न युज्यते ॥ ३७ ॥ ४११ ॥**

**न चे**ति, **असदेव** तुच्छमेव, **तद्धेतुः** निरुक्तभ्रान्तिलक्षणक्लिष्टताकारणं **न च** नैव, तुच्छस्य कारणत्वे शशशृङ्गादेरपि किञ्चित् कार्यं प्रति कारणत्वं स्यात्, न च सत्त्वाविशेषेऽपि किञ्चिदेव सत् कस्यचित् सतो जनकं, न तु सर्वं सर्वस्य, तथाऽसदपि किञ्चिदेव कस्यचिज्जनकम्, तथा चानाद्यविद्यालक्षणवासनैव क्लिष्टचित्तजननी, निवर्तते च साऽद्वयतत्त्वज्ञानात्, असतो ज्ञाननिवर्त्यत्वनियमात्, असत्यरजताकारे शुक्तितत्त्वज्ञाननिवर्त्यत्वदर्शनात्, अत एव प्रकाशमात्रमपि संसारदशायामविद्याशक्तिप्राबल्यादन्यथा प्रकाशते, तदाह-धर्मोत्तरः-"तस्मादविद्याशक्तियुक्तं ज्ञानमसत्यरूपमादर्शयति, इत्यविद्यावशात् प्रकाशत इत्युच्यते" इत्यनवद्यमिति चेत् ?, न-यथा अविद्याऽसती तथाऽविद्यानिवृत्तिरप्यसतीति तया मुक्तस्य पुनः संसारापत्तेः, यदि चाविद्याया असत्यत्वेऽपि तन्निवृत्तिः सत्येवोपेयते तदा ज्ञानभिन्नायाः सत्याया अविद्यानिवृत्तेः सद्भावाद् द्वैतापत्तेः, यदि चाविद्यानिवृत्तिर्ज्ञानरूपैवेति न द्वैतापत्तिः, तदा ज्ञानमात्रस्य संसारदशायामपि सद्भावात् सर्वदा मुक्त्यापत्तेः, अस्तु तर्हि पूर्वपूर्वक्लिष्टचित्तक्षण एवोत्तरोत्तरक्लिष्टचित्तक्षणहेतुरित्यत्राह-**बोधमात्रमि**ति-ज्ञानमात्रमित्यर्थः, **न चापि** नैव च, **तत्** क्लिष्टताहेतुः **सदैव क्लिष्टतापत्तेः** मुक्तिप्राच्यक्षणस्यापि क्लिष्टत्वेनोत्तरक्लिष्ट-

जननस्वभावत्वात्, इति एतस्मात् कारणात्, मुक्तिः मोक्षः, न युज्यते विज्ञानाद्वैतवादिमते मोक्षो न सद्युक्तितो घटते। अथ संसारोपान्त्यक्षणेनोत्तरक्लिष्टचित्तक्षणजननासमर्थस्यैवान्त्यक्लिष्टचित्तक्षणस्य जननान्न मुक्तिदशायां क्लिष्टचित्तक्षणजननमिति चेत् ?, कुत एतत् ?, स्वभावादिति चेत् ?, न-मुक्तेः स्वभावत उपपत्तौ तदर्थं प्रवृत्त्यनुपपत्तेः, भ्रमात् प्रवृत्तौ च तदर्थं शास्त्रप्रणयनानुपपत्तेः, तस्मात् काल्पनिकीयं मुक्तिः, न तु परमानन्दादिकमपीति ॥ ३७ ॥ ४११ ॥

परमानन्दात्मकमुक्त्यभावे च यत् स्यात् तदाह—

**मुक्त्यभावे च सर्वैव, ननु चिन्ता निरर्थिका ।**
**भावेऽपि सर्वदा तस्याः, सम्यगेतद् विचिन्त्यताम् ॥३८॥४१२॥**

**मुक्त्यभावे** चेति-परमानन्दादिलक्षणमुक्त्यभावे च सतीत्यर्थः, न तु निश्चितम्, **सर्वैव** निखिलैव, **चिन्ता** तपस्विनां विचारणा, **निरर्थिका** निष्प्रयोजना स्यात्, तपस्विनां सर्वस्या अपि विचारणायाः परमपुरुषार्थमुक्त्यैकफलकत्वात्, **तस्या** बोधरूपाया मुक्तेः, **सर्वदा भावेऽपि** सर्वकालं विद्यमानत्वेऽपि, 'चिन्ता निरर्थिका' इत्यत्रापि सम्बध्यते, अप्राप्तस्य प्राप्तये प्रयत्नः सफलो भवति, बोधमात्ररूपा मुक्तिश्च सर्वदा सिद्धेति तदर्थं प्रयत्नस्य वैफल्यात्, **एतत्** अनन्तरमुपदर्शितम्, **सम्यक्** याथार्थ्येन, **विचिन्त्यताम्** विचार्यताम् ॥ ३८ ॥ ४१२ ॥

विज्ञानवादखण्डनमुपसंहरति—

**विज्ञानमात्रवादोऽयं, नेत्थं युक्त्योपपद्यते ।**
**प्राज्ञस्यापि निवेशो न तस्मादत्रापि युज्यते ॥ ३९ ॥ ४१३ ॥**

**विज्ञानमात्रवादोऽयमिति**-अत्र "विज्ञानमात्रवादो यद्" इति पाठः सम्यग्, यत् यस्मात्, **इत्थं** उक्तरीत्या, **युक्त्या** न्यायेन विचार्यमाणः, **विज्ञानमात्रवादः** योगाचारपरिकल्पितो विज्ञानाद्वैतवादः, **नोपपद्यते** नोपपत्तिपद्धतिमेति, "**प्राज्ञस्यापि**" इत्युपाध्यायसम्मतः, एतत्स्थाने "**प्राज्ञस्याभि**" इति पाठो हरिभद्रसूरिसम्मतः, **तस्मात्** युक्त्याऽनुपपद्यमानत्वात्, **अत्रापि** विज्ञानवादमात्रेऽपि, **प्राज्ञस्यापि** कल्पनानिपुणस्यापि पुंसः, **निवेशः** कदाग्रहः, पाठान्तरेऽप्ययमेवार्थः, **न युज्यते** न घटते ॥ ३९ ॥ ४१३ ॥

एतत्प्रकरणपरिसमाप्तौ श्रीमद्यशोविजयोपाध्यायस्य पद्यमिदम्—

"हंसः किं सद्मपद्मं श्रयति परिगलत्पर्णमर्णः पिबेद् वा,
चाण्डालानां पिपासाकुलितमतिरपि श्रोत्रियः किं कदाचित् ।
दुष्टानां हन्त ! गोष्ठीमनुसरति रसात् सज्जनः किं गतार्थां,
त्याज्यस्तज्जैनतर्कैरयमिह निहतो विज्ञ ! विज्ञप्तिवादः ॥ १ ॥"

अस्यायमर्थः—हंसः-मरालः, परिगलत्पर्णं—परिशटत्पत्रं विगलितदलमिति यावत्, एवम्भूतं सद्मपद्मं—स्वगृहं कमलं, किं श्रयति ?—नैव तत्र निवसति, वा—अथवा, चाण्डालानाम्—अन्त्यावसायिजातिविशेषाणाम्, अर्णः-जलं, पिपासाकुलितमतिरपि—पिपासाऽभिभूतान्तःकरणोऽपि, श्रोत्रियः—ब्राह्मणप्रवरः, किं कदाचित् पिबति ?—कदापि न पिबति, 'हन्त !' इति कोमलामन्त्रणे, दुष्टानां—परवञ्चनपैशुन्यादिदोषालयानां जनानां, गतार्थां—प्रयोजनविकलां, गोष्ठीं—सभां, रसात्—प्रयोजनेच्छातः, सज्जनः—परोपकारादिगुणालयः पुमान्, अनुसरति किम् ?—नैवानुगच्छति, तत्—तस्मात्, हे विज्ञ !—युक्तायुक्तविवेकशालिन् !, इह—सम्यक् तत्त्वविचारे, जैनतर्कैः—स्याद्वादोपदर्शिततर्कैः, निहतः—खण्डितः, विज्ञप्तिवादः—योगाचाराकलितविज्ञानमात्रतत्त्ववादः, त्याज्यः—सर्वथाऽनाश्रयणीयः, प्रमाणासिद्धत्वात् ॥

स्याद्वादे ज्ञप्तिवादोऽप्यवितथपदवीं यात्यनेकान्ततत्त्वे,
सर्वं ज्ञेयस्वभावं भवति मतिगतं नो विवादस्तु तत्र ।
सम्बन्धस्तेन मान्यः स्वमतिविषययोः सोऽप्यभेदः कथञ्चित्,
एकान्तत्वं तु दोषाकलितमपनयत्वत्र युक्त्या बुधेन्द्रः ॥ १ ॥
जैनी तर्कप्रवृत्तिः श्लथयति नितरां बन्धमेकान्ततायाः,
सर्वस्मिन्नेव वादे स्वयमपि न च सैकान्ततो लब्धरूपा ।
दोषा सर्वे कृतार्था जिनमतविधिना योजिता वादमात्रे,
तेनानेकान्तचर्चां प्रगुणयतु कृती सर्ववादप्रचारे ॥ २ ॥
भक्तिर्या नेमिसूरीश्वरगुरुचरणे सेह कर्त्री विचारे,
लावण्योऽत्राश्रयत्वात् स्वपरमतभिदाऽभ्यासमात्रावधानः ।
शुद्धां विज्ञप्तिवार्तां परमतकुहनोन्मूलनात् ते भजन्ते,
येषां स्याद्वादविज्ञैर्भवति परिचयो निर्ममत्वोपरक्तः ॥ ३ ॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरु-श्रीविजयनेमिसूरीश्वर-पट्टालङ्कारेण 'व्याकरण-वाचस्पति-शास्त्रविशारद-कविरत्न' इति पदालङ्कृतेन विजयलावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चय-टीकायां पञ्चमः स्तबकः समाप्तः ॥

॥ अर्हँ ॥

## अथ षष्ठः स्तबकः ।

यज्ज्ञानं स्तोतुमिष्टं सुरगुरुरपि नो स्यात् समर्थो यथावत्,
वाणी यस्याऽनवद्या नयमननरतैरेव वेद्यार्थभावाः ।
रागद्वेषाद्यरीणामपगमनभिदाऽनागमा यत्र तेषां,
लावण्याभीष्टसिद्ध्यै स भवतु भगवान् पूज्यपूज्यो जिनेन्द्रः ॥ १ ॥

सर्वमेतेनेति चतुर्थस्तबकान्तिमकारिकयाऽतिदिष्टमभिधित्सुराह—

**यच्चोक्तं पूर्वमत्रैव, क्षणिकत्वप्रसाधकम् ।**
**नाशहेतोरयोगादि, तदिदानीं परीक्ष्यते ॥ १ ॥ ४१४ ॥**

**यच्चोक्त**मिति–यदभिहितमित्यर्थः, **पूर्वमत्रैव** सुगतसुतवार्त्तायामेव, **क्षणिकत्वप्रसाधकं** क्षणिकत्वसिद्धिनिबन्धनम्, किं तदित्यपेक्षायामाह– **नाशहेतोरयोगादी**ति–"तदाहुः क्षणिकं सर्वम्" इत्यादिकारिकया सौगतेन क्षणिकत्वसाध्यसाधनाय नाशहेत्वयोगादिस्वरूपं लिङ्गमभिहितमित्यर्थः, **तत्** लिङ्गम्, **इदानीं** प्रसङ्गागतान्यविचारपरिसमाप्त्यनन्तरमवसरप्राप्ततया **परीक्ष्यते** विचार्यते ॥ १ ॥ ४१४ ॥

तत्र नाशहेत्वयोगलक्षणं प्रथमहेतुं परीक्षितुं बौद्धाभिप्रायं प्रकटयति—

**हेतोः स्यान्नश्वरो भावोऽनश्वरो वा विकल्प्य यत् ।**
**नाशहेतोरयोगित्वमुच्यते तन्न युक्तिमत् ॥ २ ॥ ४१५ ॥**

**हेतो**रिति–स्वकारणात् सकाशादित्यर्थः, **नश्वरो भावः** विनश्वरस्वभावो भावः, **स्यात्** भवेत्, **वा** अथवा, **अनश्वरः** अविनाशिस्वभावो भावो भवेत्, **विकल्प्य** इत्येवं विकल्पद्वयं कृत्वा, यदित्यस्य 'उच्यते' इत्यनेन सम्बन्धः, यत् परेण कथ्यत इत्यर्थः, उक्तिकर्मोल्लिखति–**नाशहेतोरयोगित्व**मिति–क्षणिकत्व-प्रसाधकं नाशहेतोरयोगित्वमित्यर्थः, स्वकारणतः नश्वरो भावो जन्यत इति प्रथम-कल्पे–स्वतो नश्वरभावस्य नाशहेतूनामन्तरेणैव स्वस्वभावबलान्नाशसम्भवेन नाश-हेतूनामकिञ्चित्करत्वान्नाशहेतुत्वेनायोगित्वम्; स्वकारणादनश्वरो भावो जायत इति

द्वितीयकल्पेऽपि-स्वभावस्यान्यथा कर्तुमशक्यत्वेन स्वतोऽनश्वरस्वभावे भावे नाशहेतूनामकिञ्चित्करत्वेन नाशहेतुत्वायोगित्वम्; न चोत्पादेऽप्ययं पर्यनुयोगः- स्वभावतो ह्युत्पत्तिस्वभावे भावे उत्पत्तिहेतुव्यापारवैयर्थ्यात्, अनुत्पत्तिस्वभावस्य च वक्तुमशक्यत्वादिति वाच्यम्, उत्पत्तिस्वभाव इत्यस्याभूत्वा भवनलक्षणोत्पत्तिरेव स्वभावो यस्येत्यर्थेऽभूतस्य भवनायोगेनोक्तदोषानिवृत्तावपि, उत्पत्तौ सत्तायां स्वभाव आभिमुख्यलक्षणो यस्य नियतहेत्वन्तरभाविन इत्यर्थे दोषाभावात्, तथैव तद्व्यपदेशोपपत्तेः; स्वभावतोऽनुत्पत्तिस्वभावो भाव उत्पत्तिहेतुभिरुत्पाद्यत इति द्वितीयविकल्पस्यानभ्युपगमात्, अनुत्पत्तिस्वभावस्य सर्वसामर्थ्याभावलक्षणस्यानुत्पाद्यत्वादेव, न ह्युत्पत्तिहेतवोऽभावं भावीकुर्वन्तीत्यभ्युपगम्यते, 'असदुत्पद्यते' इत्यस्य 'उत्पद्यमानं प्राग् नास्ति' इत्येवार्थात्, प्राग् नास्तितायां च न भावाश्रयाणां विकल्पानां शशविषाण इव तीक्ष्णतादिगोचराणां सम्भवः; न च भावधर्मत्वाविशेषान्नाशवदुत्पत्तेरपि किं न निर्हेतुकत्वमिति शङ्कनीयम्, उदया-ऽपवर्गिणो भावाद् व्यतिरिक्तस्य नाशस्याभावात्, तस्य च भावस्य स्वकारणादेवोदयापवर्गिण उत्पन्नत्वेन तद्धर्मस्यानिमित्तत्वाभावात्, केवलं भावस्य तं स्वभावं न विवेचयति मन्दधीः, दर्शनपाटवाभावात्, विसदृशकपालादिक्षणोत्पत्तावेव भ्रान्तिकरणविगमेन प्रत्यक्षनिबन्धनतन्निश्चयोत्पादात्, विषयरूपदर्शनेऽप्यतत्कारिपदार्थसाधर्म्यविप्रलब्धस्य प्राक्कारणशक्त्यविवेचनेऽपि विकारदर्शनानन्तरं तन्निश्चयवदितीत्थमुपाध्यायः पूर्वपक्ष्यभिप्रायं वर्णयति । अत्र प्रतिविधानं-**तदिति**-एतत् परोक्तमित्यर्थः, **न युक्तिमत्** न युक्त्या घटमानकम् ॥ २ ॥ ४१५ ॥

कथं क्षणिकत्वप्रसाधकं नाशहेत्वयोगादि न युक्तमित्यत आह—

**हेतुं प्रतीत्य यदसौ, तथाऽनश्वर इष्यते ।**
**यथैव भवतो हेतुर्विशिष्टफलसाधकः ॥ ३ ॥ ४१६ ॥**

**हेतुमिति**-नाशकारणमुद्गरादिकमित्यर्थः, **प्रतीत्य** अपेक्ष्य, **यत्** यस्मात्, **असौ** भावः, **तथाऽनश्वरः** प्रायोगिकादिनाशापेक्षया नश्वरस्वभावः, **इष्यते** स्वीक्रियते, मुद्गरादिकारणमपेक्ष्य नश्वरस्वभावस्य कारणत एव भावात्; अत्र निदर्शनं-**यथैवेति**, **भवतः** सौगतस्य, **हेतुः** घटादिः, **विशिष्टफलसाधकः** मुद्गरादिकं कारणं प्रतीत्य विजातीयकपालादिलक्षणकार्यजननस्वभावोऽभिमतः । एतेन—

"स्वभावोऽपि स तस्येत्थं, येनापेक्ष्य निवर्त्तते।
विरोधिनं यथाऽन्येषां, प्रवाहो मुद्गरादिकम्" ॥ १ ॥

इति सहेतुकविनाशवादिनः समाधानं न युक्तम्, यतो नास्माभिः सुगततनयैर्विशरारुक्षणव्यतिरिक्तोऽपरः प्रवाहोऽभ्युपगम्यते, यः स्वनिवृत्तावकिञ्चित्करं मुद्गरादिकमपेक्षते, किन्तु परस्परव्यतिरिक्ताः पूर्वापरक्षणा एव, ते च स्वरसत एव निरुध्यन्त इति न क्वचिदकिञ्चित्कारापेक्षानिवृत्तिः" इति बौद्धोक्तावपि न क्षतिः, विलक्षणहेतुं प्रतीत्य नश्वरस्य भावस्य तस्य तं प्रतीत्य विलक्षणजननस्वभावत्वाभ्युपगमसमसमाधानत्वादित्युपाध्यायाः ॥ ३ ॥ ४१६ ॥

एतदेव भावयति—

**तथास्वभाव एवासौ, स्वहेतोरेव जायते।**
**सहकारिणमासाद्य, यस्तथाविधकार्यकृत् ॥ ४ ॥ ४१७ ॥**

**तथे**ति, **असौ** घटादिः कारणं, **स्वहेतोरेव** स्वकारणादेव सकाशात्, **तथास्वभाव एव जायते** सहकारिकारणं प्रतीत्य स्वकार्यकारिस्वभाव एवोत्पद्यते, कीदृशः स ? इत्याह—**सहकारिण**मिति—सहकारिकारणं मुद्गरादिकमित्यर्थः, **आसाद्य** अवलम्ब्य, **यः** घटादिः, **तथाविधकार्यकृत्** विजातीयकपालादिकार्यकारी, मुद्गरादिसहकारिकारणापेक्षस्यैव हि घटक्षणस्य समानक्षणान्तरोत्पादनाऽसमर्था-ऽसमर्थतरा-ऽसमर्थतमादिक्षणोत्पादनक्रमेण घटसन्ततिनिवृत्तौ कपालादिविसदृशक्षणोत्पत्तेः स्वीकारात् ॥ ४ ॥ ४१७ ॥

अत्रोपचयमाह—

**न पुनः क्रियते किञ्चित् तेनास्य सहकारिणा।**
**समानकालभावित्वात् तथा चोक्तमिदं तव ॥ ५ ॥ ४१८ ॥**

**न पुनरि**ति, **तेन सहकारिणा** मुद्गरादिना सहकारिकारणेन, **अस्य** घटस्य, **किञ्चित्** किञ्चिदतिशयाधानम्, **न** नैव, **क्रियते** निर्वर्त्यते, कुतः ? इत्याह—**समानकालभावित्वा**दिति - मुद्गरादिसहकारिकारण-सहकार्यघटात्मककारणयोरेककालोत्पत्तिकत्वादित्यर्थः, पौर्वापर्यनियतस्य कार्यकारणभावस्य सहकार्यघटगतघटस्वरूपातिशयं प्रति तत्कालोत्पत्तिकसहकारिमुद्गरादेरसम्भवादित्याशयः; एककालोत्पत्तिकयोरुपकार्योपकारकभावासम्भवे बौद्धस्य स्वशास्त्रोक्तमेव वचनं संवादकतयोपदर्शयति—**तथा चे**ति, **उक्तं** कथितम्, **इदम्** अनन्तरमेवाभिधीयमानम्, **तव** बौद्धस्य स्वशास्त्रे ॥ ५ ॥ ४१८ ॥

तद्वचनमुल्लिखति—

**उपकारी विरोधी च, सहकारी च यो मतः ।**
**प्रबन्धापेक्षया सर्वो, नैककाले कथञ्चन ॥ ६ ॥ ४१९ ॥**

**उपकारी**ति–क्षीरादिर्बालादेरुपकारीत्यर्थः, **विरोधी** नकुलादिः सर्पादे-र्विरोधी, **सहकारी** घटस्य सहकारिविधया मुद्गरादिः कपालादेः कारणम्, **यो मतः** इष्टः, **स सर्वः** निरवशेषः, **प्रबन्धापेक्षया** सन्तानापेक्षया, मत इति सम्बध्यते, **नैककाले कथञ्चन** एककाले कथमपि न भवति, बालादिसत्ताया एव बालाद्युपकारित्वात्, बालस्य स्वसमानक्षणोत्पत्तिर्हि क्षीरादिना क्रियमाणा बालस्योपकारः, नकुलादिना सर्पादेः विसभागक्षणोत्पत्तिः क्रियमाणा सर्पादेः नकुलादिना विरोधः, कपालादेः स्वोत्पत्तिरेव मुद्गरादिना क्रियमाणा कपालादे-र्मुद्गरादिना सहकार इति ॥ ६ ॥ ४१९ ॥

तथैव चोक्तमन्यदपि बौद्धस्य स्वशास्त्र इत्याह—

**सहकारिकृतो हेतोर्विशेषो नास्ति यद्यपि ।**
**फलस्य तु विशेषोऽस्ति, तत्कृतातिशयाप्तितः ॥ ७ ॥ ४२० ॥**

**सहकारिकृत** इति–सहकारिमुद्गरादिकारणकृत इत्यर्थः, **हेतोः** सहकार्य-कारणस्य घटादेः, **विशेषो**ऽतिशयलक्षणः, **यद्यपि**, **नास्ति** न विद्यते, समानका-लयोः सहकारि-सहकार्ययोरुपकार्योपकारकभावस्यातिशयाधानप्रयुक्तस्यासम्भवात्, **फलस्य तु** तथाऽपि कपालादिलक्षणकार्यस्य पुनः, **तत्कृतातिशयाप्तितः** सहकारिकृतविलक्षणक्षणाभिन्नातिशयाप्तेः, **विशेषो** वैलक्षण्यम्, **अस्ति** विद्यत एव, कपालादिविसभागक्षणोत्पत्त्यपेक्षयैव घटक्षण-मुद्गरक्षणयोः सहकार्य-सहकारि-भावादिव्यवहारात् ॥ ७ ॥ ४२० ॥

इदं च परोक्तं घटादेर्मुद्गरादिसहकारिकारणं प्रतीत्य कपालादिजननस्वभाव-त्वाभ्युपगममन्तरेण नोपपद्यत इत्याह—

**न चास्यातत्स्वभावत्वे, स फलस्यापि युज्यते ।**
**सभागक्षणजन्माप्तेस्तथाविधतदन्यवत् ॥ ८ ॥ ४२१ ॥**

**न चे**ति–अस्य 'युज्यते' इत्यनेनान्वयः, **अस्य** हेतोर्घटादेः, **अतत्स्वभावत्वे** मुद्गरादिकमपेक्ष्य कपालादिजननास्वभावत्वे, **स** विलक्षणक्षणस्वरूपो विशेषः, **फलस्यापि** कपालादिलक्षणकार्यस्यापि, **न च** नैव, **युज्यते** घटते, कुतो न

युज्यते ? इत्याकाङ्क्षायामाह–**सभागक्षणजन्माप्तेरिति**–घटादेर्घटादिस्वरूपसभागक्षणोत्पत्त्यापत्तेः, तत्र दृष्टान्तावष्टम्भमाह–**तथाविधतदन्यवदिति**–घटादिसभागक्षणजननस्वभावाद् घटादितो घटादिसभागक्षणजननवदित्यर्थः, यद्यपि पटादौ व्यभिचारेण कपालादिजननस्वभावत्वं न घटक्षणजनकत्वेनापाद्येन व्याप्तमिति अन्त्यघटक्षणो यदि कपालादिजननास्वभावः स्याद् घटक्षणजनकः स्यात्' इत्यापादनं न सम्भवति, तथापि विसदृशक्षणजननहेत्वभावात् पूर्वपूर्वघटक्षणस्योत्तरोत्तरघटक्षणजननस्वभावस्यान्त्यघटक्षणभिन्नघटक्षणे क्लृप्तत्वात् तद्बलादन्त्यघटक्षणे घटक्षणजनकत्वापत्तिः स्यात्, असमर्थत्वादन्त्यघटक्षणो नाग्रिमसमानक्षणारम्भक इति मुद्गराद्यसन्निधाने समानक्षणान्तरोत्पादकापरसमर्थजननं, तत्समवधाने तु समानक्षणासमर्थक्षणान्तरजननमिति व्यवस्थाया मुद्गरादिना घटादेः समानक्षणान्तरसामर्थ्यविघातं विना वक्तुमशक्यत्वात्, मुद्गरादिना घटादेः समानक्षणजननसामर्थ्यविघातस्यानभ्युपगमे बौद्धमतेऽपि मुद्गरादिसन्निधानेऽपि घटादेः समानक्षणजननसमर्थक्षणान्तरजननस्वभावस्य कारणपरम्परायातस्यानपायात् समानक्षणजननसमर्थक्षणान्तरोत्पत्तौ ततः समानक्षणोत्पत्तिरापद्येत, स्वहेतुतः समानक्षणजननासमर्थजननस्वभावस्यैव घटादेरुत्पत्तौ च प्रथमत एव घटसन्तत्युच्छेदापत्तेः; अथ स्वत एव घटादौ निवर्तमाना घटक्षणजननी शक्तिः, प्रवर्त्तमाना वा विसदृशकपालक्षणजननी शक्तिः, अवर्जनीयसन्निधिकं मुद्गरादिकं नापेक्षत इति चेत् ?, बुद्धसुतेन भवता सम्यगवबुद्धं बुद्धदर्शनम्, येनैवं मुद्गरादिसत्त्वे घटादितः कपालादिभावः, मुद्गराद्यभावे घटादितो न कपालादिभाव इत्येवं नियतान्वय-व्यतिरेकदर्शनस्य कपालादिकं प्रति मुद्गरादेः कारणताग्राहकस्यावगणनादग्न्यादिभावे पाकादिभावोऽग्न्याद्यभावे पाकाद्यभाव इत्यन्वय-व्यतिरेकदर्शनेऽपि तदवगणनया पाकादिकं प्रत्यग्न्यादेः कारणत्वाभावादिष्टसाधनताज्ञानस्य प्रवृत्तिकारणस्याभावेनाग्न्यादौ पाकाद्यर्थिनामपि नियमतः प्रवृत्तिमपोहितुं व्यवसितः, तस्मात्, मुद्गरादिना घटस्य समानक्षणजननसामर्थ्यस्याव्याहतात्वयं तर्कः–अन्त्यघटक्षणो यद्यव्याहतघटजननस्वभावः स्यात् समानक्षणोपहितः स्यादिति; अथ अन्त्यघटक्षणो घटकुर्वद्रूपत्वाभावादेव घटं न करोति, कपालकुर्वद्रूपत्वात् तु कपालं करोति, अस्मद्दर्शने तत्तत्कार्यं प्रति तत्तत्कारणस्य तत्तत्कुर्वद्रूपत्वेनैव कारणत्वमिति चेत् ? तथापि मुद्गरादिसन्निधावेव घटः कपालकुर्वद्रूपात्मको नान्यथेति "तद्धेतु" इति न्यायात् स्थिरोऽपि मुद्गरादिसन्निहित एव कपालादिजननस्वभावो नश्वरस्वभावो वा घटोऽस्त्विति किमनुपपन्नमित्युपाध्याया आमनन्ति ॥ ८ ॥ ४२१ ॥

एवं च परिहारान्तरमपि परस्यासमीक्षिताभिधानमिति दर्शयति—

**अस्थानपक्षपातश्च, हेतोरनुपकारिणि ।**
**अपेक्षायां नियुङ्क्ते यत् कार्यमेतद् वृथोदितम् ॥ ९ ॥ ४२२ ॥**

**अस्थानपक्षपातश्चेति**-अस्थाने पक्षपातोऽयं, यदुत-घटादिः कपालादिजनने मुद्गरादिकमपेक्षत इतीत्यर्थः, कस्यायमस्थानपक्षपात इत्यत आह-**हेतोरिति**-घटाद्यात्मकजनकस्येत्यर्थः, कोऽयमस्थानपक्षपात इत्यत आह-**अनुपकारिण** इत्यादि, **यत्** यस्मात्, अनुपकारिणो मुद्गरादेः, **अपेक्षायां नियुङ्क्ते** नियोजयति, **कार्यं** कपालादिकं घटादि, मुद्गराद्यपेक्षस्यैव घटादेर्नश्वरत्वाभ्युपगमात्, तदुक्तम्—

"हेतवश्चानुपकार्यपेक्षायां नियुञ्जानाः स्वकार्यम् ।
आत्मनोऽस्थानपक्षपातित्वमाविष्कुर्युः ॥" इति,

यथोक्तदूषणपरिहाराय **एतत्** अस्थानपक्षपातश्चेत्यादिवचनं बौद्धेन शुभगुप्तादिना, **वृथोदितं** निरर्थकमभिहितम्, "**अनुपकारिणः**" इत्यस्य स्थाने "**अनुपकारिणि**" इति पाठो हरिभद्रसूरिसम्मतः, किम्भूते इत्याह-'**अनुपकारिणि** मुद्गरादौ' इत्येवं तद्व्याख्यानात् ॥ ९ ॥ ४२२ ॥

कथं वृथोदितमित्यत आह—

**यस्मात् तस्याप्यदस्तुल्यं, विशिष्टफलसाधकम् ।**
**भावहेतुं समाश्रित्य, ननु न्यायान्निदर्शितम् ॥ १० ॥ ४२३ ॥**

**यस्मादिति**-यस्मात्कारणादित्यर्थः, **तस्यापि** सौगतस्यापि, **अदः** एतत्, अस्थानपक्षपातापादनमिति यावत्, **तुल्यं** समानम्, **विशिष्टफलसाधकं** विसदृशकपालादिक्षणजननस्वभावं, **भावहेतुं** विशिष्टघटादिलक्षणं भावकारणं, **समाश्रित्य** अपेक्ष्य, **ननु** निश्चितम्, **न्यायान्निदर्शितं** तुल्ययोगक्षेमतयोपदर्शितम्; एतदभिप्रायश्चेत्थं यशोविजयोपाध्यायेनाविष्कृतो यथा-"एतदुक्तं भवति-अस्थानपक्षपातित्वं यदि दण्डादिनाऽनश्वरस्वभावस्यैव घटस्योत्पादितत्वान्नश्वरस्वभावस्य तस्य मुद्गरादिनैव जनितत्वाद् घटमात्रे दण्डादीनां व्यभिचारित्वं, तदा तवापि तस्य दण्डादिनाऽसमानक्षणजननास्वभावस्यैवोत्पादितत्वादतादृशस्य तस्यान्यत एवोत्पत्तेस्तुल्यम्; अथ तत्रान्येन तज्जननस्वभावतैव कृतेत्यदोषः, तदा ममापि तन्निवृत्तिस्वभावतैव कृतेत्यदोष इति, एवं स्वकार्यकारित्वमेव मुद्गरादेर्नतु स्वकारित्वम्; इत्ययमपि परिहारस्तुल्य इत्यादि सूक्ष्मधियाऽभ्यूहनीयम्" इति ॥ १० ॥ ४२३ ॥

अन्यदप्यत्र परोक्तदूषणं न युक्तमित्याह—

**एवं च व्यर्थमेवेह, व्यतिरिक्तादिचिन्तनम् ।**
**नाश्यमाश्रित्य नाशस्य, क्रियते यद् विचक्षणैः ॥११॥४२४॥**

**एवं चेति**, **नाश्यं** नाशप्रतियोगिनं घटादिकम्, **आश्रित्य** अवलम्ब्य, **विचक्षणैः** पण्डितैः, **नाशस्य** ध्वंसस्य, **व्यतिरिक्तादिचिन्तनं** भेदाभेदादिविकल्पनं, यत् क्रियते **तदपि** तद्विकल्पनमपि, **इह** नाशविचारे, **व्यर्थमेव** निरर्थकमेव, यतो भावो यथा यादृशस्वभावस्तादृशस्वभावः स्वकारणादेवोत्पन्नः, तथाऽभावोऽपि विनाशो यादृशस्वभावस्तादृशस्वभावः स्वकारणादेव भवतीति ।

अत्रोपाध्यायैरावेदितो विवेकः सोपस्कार आवेद्यते—"तथाहि-परेषां बौद्धानामिदमाकूतं यद्-नाशो नाश्यादतिरिच्यते, न वा ?, 'नाशो नाश्यान्नातिरिच्यते' इति द्वितीयकल्पे नाश्यभावस्य सहेतुकत्वात् तत्स्वरूपस्य नाशस्य सहेतुकत्वमिति सिद्धावपि स्थैर्यवादिनां नेष्टसिद्धिः, सा तु तदा भवेद् यदि कालान्तरे स्वकारणान्नाशो भवेत्, तथाभावे यावत्कालं न ध्वंसकारणसमवधानं तावत्कालं ध्वंसानुत्पत्त्या भावस्य सद्भावतः स्थैर्यमिति, विनाश्यभावस्वरूपनाशस्य सहेतुकत्वे भावोत्पत्तिसमकालमेव भावनाशोत्पत्तिरिति कुतः स्थैर्यम् ?; 'नाशो नाश्यादतिरिच्यते' इति प्रथमकल्पे तु—अग्न्यादिरूपकारणादवस्तुरूपध्वंसोपगमेऽपि काष्ठादेस्तदवस्थत्वात् पुनरुपलब्धिप्रसङ्गः, नाश्याद्व्यतिरिक्तोऽपि ध्वंसो वस्तुस्वरूप एव नावस्तुस्वरूप इत्युपगमेऽपि 'काष्ठादेरङ्गारादिकमेव ध्वंसो नापरः' इत्यत्र किं निबन्धनम् ?; अङ्गारादिभावे काष्ठादिनिवृत्तिरतोऽङ्गारादिकं काष्ठादेर्ध्वंस इति चेत् ?, न—अन्यनिवृत्तेरनभ्युपगमेन तस्मिन् सति तन्निवृत्तिरिति वचनार्थस्यैवाभावात्; किञ्च वस्तुरूपध्वंसाभ्युपगमे काष्ठादिभावनिवृत्तावभिधेयायां कस्यचिद्भावान्तरस्य विधानमभिहित इति पृष्टातिरिक्तस्याप्रस्तुतस्याभिधानम्; किञ्च भावान्तरस्य प्रध्वंसत्वे तद्विनाशाद् घटाद्युन्मज्जनप्रसङ्गः, घटादिध्वंसध्वंसस्य घटाद्यत्यन्ताभावाभावस्येव घटादिरूपत्वात्; न च कपालादेर्भावरूपतैव ध्वस्ता न त्वभावरूपतेति नायं दोष इति वाच्यम्, कपालादिरूपस्य घटादिध्वंसस्य कपालादेरभावरूपताया अभावे घटादिध्वंसरूपताया अप्यभावाद् घटादिध्वंसस्य प्रच्युतत्वात्; किञ्च, अभावस्तुच्छरूपतयैवानुभूयते, न तु भावरूपानुविद्धः, तस्य च कार्यत्वे हेत्वन्तरं भवितृत्वेन भावत्वं स्यात्, अभावात्मकतयैवासौ भवतीति व्याहतमेतत्, अभावात्मकत्व-भवितृत्वयोर्विरोधात् ।

अपि च, यदि हेतुमान् विनाशस्तदा तद्भेदादात्मभेदं किं नानुभवेत्? दृष्टो हि घटादीनां कार्यरूपाणां कारणभेदाद् भेदः, ध्वंसस्य त्वग्न्यभिघातादिहेतुभेदेऽपि न भेदोऽनुभूयते, सर्वत्र विकल्पात्मकध्वंसज्ञाने तुल्यरूपस्यैवाभावस्यावभासनात्; किञ्च, अस्य हेतुमत्त्वे विनाशप्रसङ्गो दुरुद्धरः, ध्वंसविनाशहेत्वदर्शनाद् ध्वंसस्याविनाशे बुद्ध्यादीनां विनाशहेत्वदर्शनात् तेषामप्यनाशप्रसङ्गः; प्रतियोगितासम्बन्धेन ध्वंसत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन कार्यत्वावच्छिन्नस्य हेतुत्वाद् बुद्ध्यादीनां विनाशः कल्प्यत इति चेत्?, ध्वंसकारणतावच्छेदकस्य कार्यत्वस्य ध्वंसेऽपि सत्त्वात् तेन ध्वंसेऽपि प्रतियोगितया ध्वंसकल्पना स्यात्; प्रतियोगितया ध्वंसं प्रति तादात्म्येन भावकार्यत्वेनैव कारणत्वमिति कारणतावच्छेदकधर्मानाक्रान्तत्वान्न ध्वंसे प्रतियोगितया ध्वंसापत्तिरिति चेत्? न–कार्यत्वापेक्षया भावकार्यत्वस्य गुरुत्वेन कारणतानवच्छेदकत्वात्, प्रतियोगितया ध्वंसः प्रागभावेऽप्युत्पद्यते तत्र भावत्वे सति कार्यत्वस्याभावेन न्यूनवृत्तितया प्रतियोगित्वसम्बन्धावच्छिन्नध्वंसत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताया अनवच्छेदकत्वाच्च, अन्यथा प्रागभावध्वंसानापत्तेः; यस्तु घटनाशनाशादिधारायामेव घटप्रतियोगिकत्वमुररीकृत्य विरोधिन्यास्तस्या भावेन घटोन्मज्जनप्रसङ्ग इत्यङ्गीकुरुते, तन्मते घटनाशो नष्ट इत्यपि धीर्दुर्निवारा; तस्माद् मुद्गरादेः कपालाद्युत्पत्तावन्तरा कस्यचिद् ध्वंसस्यादर्शनादकिञ्चिद्रूपतयाऽनुभूयमानोऽसन्नेवायं, न तु स सहेतुकः, अनन्ततद्धेत्वादिकल्पने गौरवाच्चेति ।

अत्र ब्रूमः–अङ्गारादिसदंशानुविद्धासदंशरूपायाः काष्ठादिनिवृत्तेरभ्युपगमे किं दूषणम्? 'काष्ठादेरङ्गारादिकमेव ध्वंसो नापरः' इत्यत्र किं निबन्धनम्? इत्यत्र 'अङ्गारादिरूपध्वंसे काष्ठादिनिरूपितत्वे किं प्रमाणम्?' इति प्रश्ने प्रतियोगिकत्वेनानुभवस्यैवोत्तरत्वात्, 'अङ्गारादेस्तद्ध्वंसत्वे किं मानम्?' इति प्रश्ने च 'तस्मिन् सति तन्निवृत्तिः' इत्येवोत्तरम्, 'अङ्गारादिकं काष्ठध्वंसः काष्ठानुपलब्धिनियतोत्पत्तिककाष्ठपरिणामत्वात्, काष्ठचूर्णवत्' इत्यनुमानात्, 'अङ्गारादिव्यतिरिक्तस्य काष्ठध्वंसत्वं किं न भवति?' इत्यत्र च स्वभाव एव नियामकः; कपालस्वरूपानुभवे घटनिवृत्त्यननुभवान्न कपालस्वरूपा घटनिवृत्तिरिति चेत्? न–कपालस्वरूपानुभवे कपालोत्पादस्याप्यननुभवात् कपालोत्पादस्यापि कपालरूपत्वानापत्तेः; यथा च कपालाद्यभिन्नायां कपालाद्युत्पत्तौ न घटीयत्वं तथा कपालाद्यभिन्नायां निवृत्तौ घटीयत्वं न स्यादिति चेत्? न–'घटादुत्पन्नः,' इत्युत्पत्तौ घटानधिकत्ववद् 'घटस्य नाशः' इत्यत्र निवृत्त्यंशेऽपि घटप्रतियोगि-

कत्वेऽविरोधात् यदि घटनिवृत्तिरेकान्तेनाभिन्ना कपालात् स्यात् तदा कपालस्वरूपवत् तस्या घटनिरूपितत्वं न भवेत्, न चैवम्; एवं च प्रस्तुताभिधानमपि निरस्तम्, निवृत्त्यंशस्याधिकत्वात्; एतेन भावान्तररूपत्वे ध्वंसस्य तन्नाशे प्रतियोग्युन्मज्जनमपि निरस्तम्, कपालद्रव्यस्य भावात्मकरूपान्तरपरिग्रहेऽपि निवृत्त्यात्मकरूपान्तरापरिग्रहात्; कपालात्मना भङ्गुरं कपालं घटनिवृत्त्यात्मनाऽपि किं न भङ्गुरम्? इति चेत्?, भवन्मते कपालैक्योपलम्भजनकदोषात्मना निवर्तमाना कपालक्षणसन्ततिर्मृदैक्योपलम्भजनकदोषात्मनाऽपि किं न निवर्तते? इति वक्तव्यम्; सा सन्ततिः प्रदीर्घेति चेत्? निवृत्तिसन्ततिरपि प्रदीर्घा, इयांस्तु विशेषः—यदियं निवृत्त्यात्मना प्रत्यभिज्ञाविशेषात्मकमृद्द्रव्याखण्डैकतां प्रति कपालादिविशेषं च भावात्मना सखण्डैकतामनुभवतीति; कपालात् पृथक्कृत्य 'घटनाशं कपालं नष्टम्' इतिवद् 'घटनाशो नष्टः, इति किं न प्रयोगः? इति चेत्?, यथा मृद्द्रव्यस्य कपालरूपत्वेऽपि 'कपालं नष्टम्' इति प्रयोगो भवति 'मृद्द्रव्यं नष्टम्' इति प्रयोगो न भवति तथा 'नाशो नष्टः' इति प्रयोगो न भवतीति विवक्षाभेदेन तत्र योग्यायोग्यत्वमिति चेत्?, तुल्यमेतदन्यत्र।

यत्तु 'तुच्छैकरूपतयाऽनुभूयतेऽभावः' इत्युक्तम्, तदनभ्युपगमोपहतम्, भावाभावोभयरूपस्यैव नाशस्यानुभवात्; अभावांशानुभवकाले भावत्वेनानुभूयमानत्वं तुच्छत्वमिति चेत्?, भावांशानुभवकालेऽभावत्वेनानुभूयमानत्वमपि किं न तुच्छत्वम्?, तथा चाभाववद् भावोऽपि तुच्छः स्यात्; शशविषाणादिवन्निःस्वभावतयाऽनुभूयमानत्वं तुच्छत्वमिति चेत्?, न—असिद्धेः, विनाशस्य निःस्वभावत्वेन शशविषाणतुल्यत्वे उत्पादादियोगितयाऽननुभवप्रसङ्गात्; किञ्च विनाशः शशविषाणतुल्यः सन् कथं मुद्गरादिव्यापारानन्तरमेवोपलभ्यते, नान्यदेति; असतोऽपि शुक्तौ रजतादेः शुक्तिभ्रमदशायामेव दर्शनवदसन्नपि घटध्वंसः परैस्तद्धेतुत्वाभिमतानां समवधान एवोपलभ्यत इति चेत्?, नन्वेवमनन्यथासिद्धान्वयव्यतिरेकप्रतियोगिमुद्गरादिजन्यत्वस्य घटध्वंसेऽपलापे घटादेरप्यसत एव दण्डादिसमाजे भानोपपत्तावपलापप्रसङ्गः; न चेष्टापत्तिरत्र योगाचारस्येति वाच्यम्, ज्ञानाकारस्यापि घटादेरसत एव तदा स्फुरणापत्तेः, घटाद्यर्थिप्रवृत्त्यन्यथानुपपत्त्या घटादेः सत्त्वोपगमे घटध्वंसाद्यर्थिप्रवृत्त्यन्यथानुपपत्त्या घटध्वंसादेरपि सत्त्वं किं नेष्यते?।

यदपि 'भवितृत्वेऽभावस्य भावत्वं स्यात्' इति, तदप्यवद्यम्—अभावप्रत्यय-

विषयत्वेन भवितृत्वेऽप्यभावरूपत्वात्, यथा भवितृत्वेनाविशेषेऽपि घट-पटयोः 'घटोऽयम्, पटोऽयम्' इति भिन्नधीविषयत्वाद् विशेषः, तथा भवितृत्वेनाविशेषेऽपि भावा-ऽभावयोः 'अस्ति, नास्ति' इति धीविषयत्वेन विशेषसम्भवात्।

यदपि, अभावात्मकतयैव चासौ भवतीति च व्याहतमेतत्' इति, तदपि तुच्छम्—अभावपदस्याभवनरूपक्रियार्थत्वाभावात्, यथा भावत्वस्य भावपदप्रवृत्तिनिमित्तत्वं तथाऽभावत्वस्यैवाभावपदप्रवृत्तिनिमित्तत्वात्, अन्यथा 'भावो भवति' इति 'भवनं भवति' इतिवन्निराकाङ्क्षं स्यात्। अथ यथा 'शशविषाणं नास्ति' इत्येवं 'नास्ति' इति धीविषयत्वाच्छशविषाणादिकं न कार्यं तथा नास्ति' इति धीविषयत्वान्नाशोऽपि न कार्य इति चेत्? एवं सति 'आकाशोऽस्ति' इत्येवम् 'अस्ति' इति धीविषयत्वादाकाशो न कार्यस्तथा 'घटोऽस्ति, पटोऽस्ति' इत्येवम् 'अस्ति' इति धीविषयत्वाद् घटादिकमपि न कार्यं स्यात्, 'अस्ति' इति धीविषयत्वाविशेषेऽप्याकाशस्य न केनचिद्धेतुना सममन्वय-व्यतिरेकानुविधानमिति न तस्य कार्यत्वं, घटादेस्तु दण्डाद्यात्मकहेतुना सममन्वय-व्यतिरेकानुविधानं समस्तीति तस्य कार्यत्वमिति यदि, तदा 'नास्ति' इति धीविषयत्वाविशेषेऽपि शशविषाणादेर्न केनचिद्धेतुना समन्वय-व्यतिरेकानुविधानमस्तीति न तस्य कार्यत्वं, घटध्वंसादेस्तु मुद्गरादिना सममन्वयव्यतिरेकानुविधानं समस्तीति तस्य कार्यत्वमिति तुल्यम्।

अथ मुद्गराद्यन्वय-व्यतिरेकानुविधानं कपालजनने उपक्षीणम्, यथा नैयायिकादीनां भूतले घटानयनं भूतलघटसंयोगजनने, तस्य प्राग्वर्तिघटात्यन्ताभावानाशकत्वात्, घटानुपलम्भस्तु तदा स एव स्वरसतो न भवतीति हेतोरिति चेत्? न—'स न' इत्यत्र नञ्छब्दवाच्यस्यैवाभावस्याभ्युपगमात्; किञ्च तदा 'घटो न भवति' इत्येतावन्मात्रं न प्रतीयते, किन्तु 'घटो नष्टः' इति यदपि 'यदि हेतुमान् विनाशस्तदा तद्भेदादात्मभेदं किं नानुभवेत्?' इत्याद्युक्तम्, तदप्ययुक्तम्—उत्पादेऽप्यस्य पर्यनुयोगस्य 'यदि हेतुमानुत्पादस्तदा तद्भेदादात्मभेदं किं नानुभवेत्?' इत्येवंरूपस्य समानत्वात्; उत्पत्त्याश्रयविशेषादुत्पादविशेष इष्ट एवेति चेत्? नाशाश्रयविशेषान्नाशविशेषोऽपीष्यताम्; उत्पादाद्यन्वितधर्मिण एव स्वहेतुजन्यत्वादुत्पादस्य स्वातन्त्र्येणाजन्यत्वान्न विशेष इति चेत्?, नाशाद्यन्वितकपालादिधर्मिण एव मुद्गरादिजन्यत्वान्नाशस्याऽपि स्वातन्त्र्येणाजन्यत्वान्न विशेष इतितुल्यम्।

किञ्च हेतुभेदकृतो व्यक्तिविशेषो नाशेऽभ्युपगम्यत एव, जातिरूपविशेषस्तु

भावधर्मत्वादेवाभावरूपे विनाशे नास्तीति किमपरमापद्यते? नहि विजातीयहेतुजन्यत्वं कार्यवैजात्यप्रयोजकम्, एकत्रापि घटे दण्डादिनानाजातीयहेतुजन्यत्वेन नानाजातीयत्वप्रसङ्गात्, किन्तु तज्जातीयसामग्रीजन्यत्वं तज्जातीयत्वप्रयोजकमिति, तथा च घट-पटादीनां विजातीयानां स्वस्वसामग्रीप्रयोज्यवैजात्यसम्भवेऽपि नाशानां सर्वेषामेकरूपाणां स्वस्वसामग्रीभेदजन्यत्वेऽप्येकत्वं न विहन्यत इति। एतेन 'प्रतिपुरुषं कर्मणां विशेषात् तत्क्षयस्यापि जन्यस्य सतो विशेषसम्भवात् प्रतिपुरुषं मुक्तिवैचित्र्यं स्यात्' इति निरस्तम्, अविशिष्टस्वभावस्य हेतुसहस्रेणापि विशेषयितुमशक्यत्वात्, विभिन्नसामग्रीजन्यतायां च प्रतियोगिभेदस्यैव निवेशनीयत्वादिति विपञ्चितमन्यत्र। एतेन "तद्रूपावच्छिन्नजन्यतारूपं स्वातन्त्र्यं नोत्पादे, दण्डादीनां घटत्वावच्छिन्नं प्रति कारणत्वेन घटोत्पादत्वस्य कस्यचिज्जन्यतानवच्छेदकत्वेन घटोत्पादत्वाद्यवच्छिन्नजन्यताऽभावात्, नाशे च तद्रूपावच्छिन्नजन्यतारूपं स्वातन्त्र्यमव्याहतम्, घटध्वंसार्थितया प्रवृत्तेर्दर्शनेन घटध्वंसत्वाद्यवच्छिन्नं प्रति मुद्गरत्वादिना मुद्गरादेः कारणत्वे सत्येव प्रवृत्तिकारणेष्टसाधनताज्ञानसम्पत्तिरिति घटध्वंसत्वाद्यवच्छिन्नजन्यतासम्भवात्" इत्युक्तावपि न क्षतिः।

यदपि "किञ्च अस्य हेतुमत्त्वेऽपि नाशप्रसङ्गो दुरुद्धरः' इत्याद्यभाणि, तदपि न निरवद्यम्—समुदयकृतादिनाशविशेषस्य नष्ट इति व्यवहारहेतोर्विशेषसामग्र्यभावादेवाभावात्, उत्पाद-व्यय-ध्रौव्यात्मकत्रैलक्षण्यरूपवस्तुलक्षणघटकस्य तु कस्यचिन्नाशस्य तत्राभ्युपगमादेव; न च कपालादिनाश एव तदाश्रितघटादिनाशहेतुरिति वाच्यम्, अस्माकमाश्रयनाशस्याश्रितनाशाहेतुत्वात्, घठ-तद्रूपादीनामेकदैव नाशात्, तत्तन्नाशविशेषे तत्तच्छक्तिविशेषस्यैव नियामकत्वात्; किञ्च कार्यत्वेन नाशहेतुत्वमप्याकाशादीनां नाशानुपपत्त्यैव कल्प्यते, अन्यथा सत्त्वेनैव नाशहेतुत्वं स्यात्, तथा च नाशस्यापि नाशानुपपत्त्या नाशेतरत्वमपि नाशकारणतावच्छेदककोटौ निवेश्यताम्, कार्यत्वापेक्षया नाशेतरत्वे सति कार्यत्वस्य नाशकारणतावच्छेदकत्वे गौरवस्य प्रामाणिकत्वादिति। यदपि मुद्गरादेः कपालाद्युत्पत्तावन्तरा ध्वंसादर्शनमुक्तम्, तदनुक्तोपालम्भमात्रम्, तस्मान्नाकिञ्चिद्रूपो नाश इति सिद्धः सहेतुकोऽयम्" इति ॥ ११ ॥ ४२४ ॥

नाशस्य निर्हेतुकत्वाभ्युपगम एव दोषान्तरमुपदर्शयति—

**किञ्च निर्हेतुके नाशे, हिंसकत्वं न युज्यते ।**
**व्यापाद्यते सदा यस्मान्न कश्चित् केनचित् क्वचित् ॥ १२॥४२५॥**

**किञ्चे**ति, **निर्हेतुके** निष्कारणके, **नाशे** ध्वंसेऽभ्युपगम्यमाने, **हिंसकत्वं** व्यापादकत्वं, **न युज्यते** क्वचिदपि देशे कस्यचिदपि प्राणिनो न घटते, कथं न युज्यत इत्यपेक्षायामाह–**व्यापाद्यत** इति, **यस्मात्** यस्मात् कारणात्, **सदा** सर्वदा, **कश्चित्** कोऽपि शूकरादिः, **केनचित्** हिंसकेन लुब्धकादिना, **क्वचित्** अरण्यादिप्रदेशे, **न** नैव, **व्यापाद्यते** घात्यते, यथाऽहिंसादशायां क्षणभङ्गुरस्वभावादेव प्राणी स्वत एव नश्यति, तथा हिंसादशायामपि स्वत एव नश्यति, पूर्वपूर्वप्राणिक्षणानामेवोत्तरोत्तरप्राणिक्षणरूपस्वनाशं प्रति कारणत्वात्, उत्तरोत्तरक्षणव्यतिरिक्तस्य सांवृतनाशस्य च गगनकुसुमादेरिवानुत्पाद्यत्वादित्याशयः ॥ १२ ॥ ४२५ ॥

हिंसकत्वोपपदकं पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**कारणत्वात् स संतानविशेषप्रभवस्य चेत् ?।**
**हिंसकस्तन्न संतानसमुत्पत्तेरसंभवात् ॥ १३ ॥ ४२६ ॥**

**कारणत्वादि**ति–जनकत्वादित्यर्थः, **स** हिंसको लुब्धकादिः, **सन्तानविशेषप्रभवस्य** शूकरक्षणपरम्परालक्षणसभागसन्तानविलक्षणक्षणपरम्परालक्षणविसभागसन्तानोत्पादस्य, तथा च विसभागसन्तानकारणत्वाल्लुब्धकादेर्हिंसकत्वमुपपद्यते, **हिंसकः** शूकरादिव्यापादकः, **चेत्** यद्येवं त्वं मन्यसे, **तन्न** तन्न समीचीनम्, **सन्तानसमुत्पत्तेः** स्थिरस्यैकस्य सन्तानस्याभावात् क्षणपरम्परालक्षणसन्तानस्योत्पत्तेः, **असम्भवात्** त्वदभिप्रायेणासम्भवात् ॥ १३ ॥ ४२६ ॥

असम्भवमेवोपपादयति—

**सांवृतत्वाद् व्ययोत्पादौ, संतानस्य खपुष्पवत् ।**
**न स्तस्तद्धर्मत्वाच्च, हेतुस्तत्संभवे कुतः ? ॥ १४ ॥ ४२७ ॥**

**सांवृतत्वादि**ति–'अपरमार्थसत्त्वादित्यर्थः, **व्ययोत्पादौ** नाशोत्पत्ती, **सन्तानस्य खपुष्पवत्** यथा गगनकुसुमस्य निस्स्वभावस्य नाशोत्पादौ न सम्भवतस्तथा, **न स्तः** न सम्भवतः, नाशोत्पादयोर्वस्तुधर्मत्वेनावस्तुनि सन्तानेऽसम्भवात्, तदधर्मत्वाच्च उत्पादस्य सन्तानाधर्मत्वाच्च, **तत्संभवे** विसभागसन्तानोत्पादे, **हेतुः** कारणं, **कुतः** न कुतश्चित्, कार्यस्य हि कारणं भवति, यच्च कार्यमेव न, तस्य कारणं न किमपीति ॥ १४ ॥ ४२७ ॥

पुनः पराभिप्रायमाशङ्क्य प्रतिक्षिपति—

**विसभागक्षणस्याथ, जनको हिंसको न तत् ।**
**स्वतोऽपि तस्य तत्प्राप्तेर्जनकत्वाविशेषतः ॥ १५ ॥ ४२८ ॥**

**विसभागक्षणस्येति** शूकरक्षणाच्छशादिक्षणस्येत्यर्थः, **जनकः** उत्पादकः, **हिंसकः** लुब्धकक्षणः, अत्र "चरमशूकरक्षणात् शशक्षणसमानकालभावी तज्जनितकर्मवासनया चाग्रिमलुब्धकक्षणेषु तत्कर्मविपाकफलोपभोग इति भावः" इति पराभिप्रायमुपाध्याय आह, **न तत्** एतदेवं न सम्भवति, तत्र हेतुः **स्वतोऽपीति**-स्वात्मनोऽपीत्यर्थः, **तस्य** हिंस्यस्य शूकरक्षणादेः, **तत्प्राप्तेः** हिंसकत्वप्राप्तेः, तत्र हेतुः-**जनकत्वाविशेषत** इति-'शशक्षणजनकत्वं यथा लुब्धकक्षणस्य तथा चरमशूकरादेरपि' इत्येवं जनकत्वमात्रेऽविशेषात्; विसभागलक्षणनिमित्तकारणत्वं हिंसकत्वम्, अन्त्यशूकरक्षणस्तु विसभागशशक्षणस्योपादानतया' कारणं, न तु निमित्ततयेति विसभागक्षणनिमित्तकारणत्वलक्षणहिंसकत्वं लुब्धकस्यैवेति चेत्? न-उद्बन्धनादिनाऽऽत्मघातकस्यात्महिंसकत्वानुरोधेन हिंसकत्वलक्षणे उपादाननिमित्तसाधारणकारणत्वमात्रस्यैवोपादातुमुचितत्वात्; सामान्यतो हिंसकत्वलक्षणे निमित्तकारणत्वस्योपादातुमयुक्तत्वेऽपि परहिंसकत्वलक्षणे निमित्तकारणत्वमेवोपादीयत इति चेत्?, नहि शूकरस्य परहिंसकत्वमापाद्यते, किन्त्वात्महिंसकत्वमेव, तच्च विसभागशशक्षणकारणत्वात् स्यादेवेत्यात्महिंसकताकृतदोषापत्तेर्वज्रलेपायमानत्वादिति समाधातुरभिप्रायः ॥ १५ ॥ ४२८ ॥

अत्रैवाक्षेप-परिहारावाह—

**हन्म्येनमिति संक्लेशाद्धिंसकश्चेत् प्रकल्प्यते ।**
**नैवं त्वन्नीतितो यस्मादयमेव न युज्यते ॥ १६ ॥ ४२९ ॥**

**हन्म्येनमितीति**-"एनं हन्मि' इत्याकारकादित्यर्थः, **संक्लेशात्** क्लिष्टाध्यवसायात् कारणात्; **हिंसकः प्रकल्प्यते** लुब्धकादिक्षणो व्यापादकः कल्पनाविषयो भवति, क्लिष्टाध्यवसायक्षणस्यैव क्लिष्टकर्मक्षणकारणत्वात्, मृगादिमारणेऽव्याप्रियमाणोऽपि 'मृगं हन्मि' इत्यादिसंक्लेशाध्यवसायपरिणतः पापेन बध्यते, यतमानश्च विचरन्ननाभोगाद् घ्नन्नपि कथञ्चिल्लघुप्राणिनं न पापेन बध्यते त्वसंक्लिष्ट इत्येवं पापबन्धनस्य संक्लिष्टाध्यवसायेन सहान्वयव्यतिरेकदर्शनात्; न चैवं व्यापादिताऽव्यापादितमृगयोर्व्याधक्षणयोः संक्लिष्टचित्तक्षणरूपयोरविशिष्ट-

कर्मार्जनप्रसङ्गः, तत्सामर्थ्यविशेषेण कार्यविशेषात्, 'मृगहिंसकोऽयं लुब्धकः' इत्येवं विकल्परूपो हिंसकत्वव्यवहारस्तु सांवृतं नाशमादायैवेति शूकरक्षणादेः 'शूकरं हन्मि' इति संक्लिष्टाध्यवसायाभावान्न शूकरहिंसकत्वं, तथाविधविकल्पाभावाद् हिंसकत्वव्यवहारोऽपि नेति चेत् ? अत्रोत्तरं—**नैवेति**-एतदेवं नेत्यर्थः, **यस्मात् त्वन्नीतितः** यस्मात् कारणात् त्वदभ्युपगतन्यायात्, **अयमेव** संक्लेश एव, **न युज्यते** न घटते ॥ १६ ॥ ४२९ ॥

संक्लेशासम्भवमेवोपदर्शयति—

**संक्लेशो यद् गुणोत्पादः, स चाक्लिष्टान्न केवलात् ।**
**न चान्यसचिवस्यापि, तस्यानतिशयात् ततः ॥ १७ ॥ ४३० ॥**

**संक्लेश** इति-**यत्** यस्मात्, संक्लेशः, **गुणोत्पादः** क्लिष्टचित्तोत्पादः, **स च** क्लिष्टचित्तोत्पादश्च, **केवलात्** अन्यसहकारिविकलात्, **अक्लिष्टात्** अक्लिष्टचित्तलक्षणोपादानकारणात्, **न** न सम्भवति, असंक्लिष्टचित्तलक्षणोपादानाद् संक्लिष्टचित्तस्यैवोपादेयस्योत्पादात्, **न च** नैव, **अन्यसचिवस्यापि** हिंस्यादिसहकारिसहितस्यापि, **तस्य** उपादानस्य, **अनतिशयात्** संक्लेशलक्षणातिशयरहितात्, **ततः** अन्यसहकारिणः सकाशात्, संक्लेश इति सम्बध्यते, हिंस्यादिसहकारिसमवहितस्याप्युपादानचित्तस्य संक्लिष्टतादिलक्षणातिशयरहिताद्न्यसहकारिणः सकाशात् संक्लेशो न च सम्भवति, यथा चोपादानकारणमनतिशयितं न समानासमानकार्यकारणायालं तथा सहकार्यप्यनतिशयितं न समानासमानकार्यकारणायालमिति, अत्र "अनतिशयस्य समानासमानकालकारणायोगात्" इत्युपाध्यायव्याख्यापाठस्थाने "अनतिशयस्य समानासमानकार्यकारणायोगात्" इति पाठो युक्तः, हरिभद्रव्याख्यायां "अनतिशयश्च समानोऽसमानकालकारणायोगात्" इति पाठः, तत्र "अनतिशयश्च समानोऽसमानकार्यकारणायोगात्" इति पाठो युक्तः, सहकारिसहितोऽप्युपादानहेतुः, अनतिशयः-अनतिशयेन सहकारिणाऽनाधेयातिशयः, समानः-सहकारिरहितोपादानहेतुना तुल्यः, तत्र हेतुः-असमानकार्यकारणायोगादिति, यथा सहकारिरहित उपादानहेतुः, असमानं-विजातीयं कार्यं न करोति, तथा सहकारिसहितोऽप्यनतिशय उपादानहेतुर्न विजातीयं कार्यं करोतीत्येवमसमानकार्यकारणायोगस्योभयत्र सद्भावादित्यर्थः ॥ १७ ॥ ४३० ॥

पराकूतमाशङ्क्य प्रतिक्षिपति—

**तं प्राप्य तत्स्वभावत्वात्, ततः स इति चेन्ननु ।**
**नाशहेतुमवाप्यैवं, नाशपक्षेऽपि न क्षतिः ॥ १८ ॥ ४३१ ॥**

**तमिति**–हिंस्यादिकमित्यर्थः, **प्राप्य** आसाद्य, **तत्स्वभावत्वात्** तदुपादानस्य संक्लेशजननस्वभावत्वात्, **ततः** सहकारिणः, **सः** संक्लेशः, **इति चेत्?** इति त्वं मन्यसे यदि, अत्रोत्तरं– **ननु** नन्वेवम्, **नाशहेतुं** घटादिनाशकारणं, मुद्गरादिकम्, **अवाप्य** आसाद्य, **एवं** नाशजननस्वभावत्वकल्पनायां, **नाशपक्षेऽपि** सहेतुकनाशाभ्युपगमपक्षेऽपि, **न क्षतिः** न विरोधः, नाश्यस्य घटादेरपि नाशकारणं मुद्गरादिकं प्राप्य स्वनिवृत्तिस्वभावत्वात्; न च घट-पटादिवस्तुक्षणमात्रजनका एव तन्नाशजनका इति न नाशजनने सहकार्यनुप्रवेशापेक्षा, असंक्लेशमात्रजनका एव च न संक्लेशजनका इति संक्लेशे जननीये तदुपादानक्षणानां सहकार्यनुप्रवेशापेक्षा, यथा चलशिंशपायां जननीयायां शिंशपाक्षणानां नोदनाद्यपेक्षेति वाच्यम्, लुब्धक-शिंशपामात्रजनकानामेवासंक्लेशाचलशिंशपाजनकत्वाभावेन तत्रापि सहकार्यन्तरापेक्षावश्यकत्वात्, आर्थिकत्वस्यापि विनिगमनात्, सहकारिप्रसूतविशेषस्यापि क्षणपरम्परासंक्रान्तस्यापरित्यागे विशेषान्तरानुपादानप्रसङ्गात्, तत्परित्यागश्चान्यत एवेति सिद्धं नाशहेतुतेत्याम्रेडिततत्त्वमेतदित्युपाध्यायाः ॥ १८ ॥ ४३१ ॥

यदि विकल्पमात्रेण नाशकस्य नाशकत्वमुच्छिद्येत तदा जनकत्वेऽपि विकल्पसम्भवेन तस्याप्युच्छेदः स्यादिति प्रतिबन्द्या समादधतां केषाञ्चिन्मतमुपदर्शयति—

**अन्ये तु जन्यमाश्रित्य, सत्स्वभावाद्यपेक्षया ।**
**एवमाहुरहेतुत्वं, जनकस्यापि सर्वथा ॥ १९ ॥ ४३२ ॥**

**अन्ये त्विति**–अन्ये आचार्याः पुनरित्यर्थः, अस्य 'आहुः' इत्यनेन सम्बन्धः, **एवं** यथा नाशहेतुर्नश्वरस्वभावं विनाशयति? उत अनश्वरस्वभावं विनाशयति? अथवा उभयस्वभावं विनाशयति? आहोस्विदनुभयस्वभावं विनाशयति? इत्येवं विकल्पचतुष्टयतो नाशहेतोर्नाशकत्वमपाक्रियते, तथा, **जन्यं** कार्यम्, **आश्रित्य** अवलम्ब्य, **सत्स्वभावाद्यपेक्षया** हेतुत्वेनाभिमतः किं सत्स्वभावजन्यजनकस्वभावः? उत असत्स्वभावजन्यजनकस्वभावः? आहोस्वित् सदसदुभयस्वभावजन्यजनकस्वभावः? उताहो सदसदनुभयस्वभावजन्यजनकस्वभावः? इति

विकल्पचतुष्टयरूपया, **जनकस्यापि** उत्पादकस्यापि, अपिना नाशहेतोरेव केवलमनाशहेतुत्वं नेत्यर्थसूचनम्, **अहेतुत्वम्** अजनकत्वम्, **आहुः** आपादयामासुः ॥ १९ ॥ ४३२ ॥

एतदेव स्पष्टयन् क्रमेणाद्यविकल्पे द्वितीयविकल्पे च दोषमुपदर्शयति—

**न सत्स्वभावजनकस्तद्वैफल्यप्रसङ्गतः ।**
**जन्मायोगादिदोषाच्च, नेतरस्यापि युज्यते ॥ २० ॥ ४३३ ॥**

**न सत्स्वभावजनक** इति–उत्पादहेतुः सत्स्वभावजन्यजनकस्वभावो नेत्यर्थः, तत्र हेतुः–**तद्वैफल्यप्रसङ्गत** इति–हेतुव्यापारमन्तरेणैव सत्स्वभावत्वेनैव सतो जन्यस्य जनकव्यापारवैफल्यप्रसङ्गात्, सत एव च करणे सदा सत्त्वाविशेषात् तत्करणधाराऽविश्रामापत्तेरित्यर्थः, यदि च स्वकारणादुत्पत्तिरात्मलाभो यस्य स स्वोत्पत्तिधर्मा, तं यदि स्वहेतुर्नोत्पादयेत्, तदा स्वोत्पत्तिधर्माणं स्वहेतुर्नोत्पादयतीति विरुद्धमभिधानं स्यात्, तथोत्पादेऽपि च नोत्पादानवस्थाप्रसङ्गः, उत्पत्त्यनन्तरं तस्य स्वत एव नाशात् कस्य पुनरुत्पत्तिरापाद्येतेत्युच्यते, तदा विनाशकारणाद् विनाश आत्मप्रच्युतिलक्षणो धर्मो यस्य स विनाशधर्मा, तं यदि विनाशहेतुर्न विनाशयेत् तदा विनाशधर्मा हेतुतो न विनश्यतीति विरुद्धाभिधानं स्यादित्याद्यपि तुल्यम्; हेतुत्वेनाभिमतोऽसत्स्वभावजन्यजनकस्वभाव इति द्वितीयकल्पे दोषमुपदर्शयति–**जन्मायोगादिदोषाच्चे**ति–असत्स्वभावस्य जन्यस्य शशशृङ्गादेरिव जन्म न सम्भवति, असति शशशृङ्गादाविव कारणव्यापारस्य वैफल्यमित्यादिदोषाच्चेत्यर्थः, **इतरस्यापि** असत्स्वभावस्य जन्यस्यापि, असत्स्वभावजन्यजनकस्वभाव इत्यत्र असत्स्वभावजन्येत्यतो जनकेत्यंशः पृथक्कृत्य सम्बन्धनीयः, तथा च–असत्स्वभावस्य जन्यस्य **न युज्यते**, किं न युज्यत इत्याकाङ्क्षानिवृत्तये जननस्वभाव इति शेषः, असतो जन्मायोगश्च जन्मनः सत्तारूपत्वेन प्रकृत्यन्यथात्वानुपपत्तेः, उत्पत्तौ वोत्पादहेतुनाऽसतः सत्करणवन्नाशहेतुनाऽपि सतोऽसत्करणसम्भवात्, असत्कार्यपक्षे सत्कार्यवादिना—

"असत्करणादुपादानग्रहणात् सर्वसम्भवाभावाच्च ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥"

इत्यादिना दत्तस्य सकलदोषस्य प्रसङ्गाच्च ॥ २० ॥ ४३३ ॥

सदसदुभयस्वभावस्वभावजन्यजनकस्वभावो हेतुरिति तृतीयविकल्पे सदसदुभयस्वभावजन्यजनकस्वभावो हेतुरिति तुरीयविकल्पे च दोषमाह—

**न चोभयादिभावस्य, विरोधासंभवादितः ।**
**स्वनिवृत्त्यादिभावादौ, कार्याभावादितोऽपरे ॥ २१ ॥ ४३४ ॥**

**न चोभयादिभावस्ये**ति-जनक इत्यनुवर्त्तते, तथा च सदसदुभयस्वभावस्य सदसदनुभयस्वभावस्य वा जन्यस्य जनकस्वभावो जनको न चेत्यर्थः, कुत इत्याकाङ्क्षायामाह-**विरोधासंभवादित** इति-अनेकान्तवादे वस्तुमात्रस्य सदसदुभयात्मकत्वेनोभयस्वभावजन्यजनकत्वे वस्त्वविरोधेऽप्येकान्तवादिबौद्धस्य स्वमतविरोधात्, अनुभयस्वभावजन्यजनकत्वे चासम्भवात्, अनुभयस्वभावस्य जन्यस्य निस्स्वभावत्वेनानुपलब्धेः, 'विरोधासम्भवादितः' इत्यत्रादिना जन्यस्योभयस्वभावत्वे वस्तुन एव स्थिरास्थिरोभयस्वभावत्वे निर्भरमवलम्ब्यावतिष्ठतस्ते किमीदृशप्रयासेन? इत्यादि द्रष्टव्यमित्यर्थः, परेषां पुनरिह प्रकारान्तरेणानिष्टापादने मतान्तरमाह-**स्वनिवृत्त्यादिभावादावि**ति-जनकस्य स्वनिवृत्त्यादिस्वभावत्वे इत्यर्थः, **कार्याभावादितः** कार्यानुत्पत्त्यादिदोषप्रसङ्गादिकारणात्, **अपरे** अन्ये आचार्याः, जनकस्याहेतुत्वमाहुरित्यनुवर्तते, एतदुक्त्यभिप्रायमित्थमुपाध्याया उपदर्शितवन्तः-"इदमुक्तं भवति-स जनकः स्वनिवृत्तिस्वभावः स्यात्, कार्यजननस्वभावो वा, उभयस्वभावो वा, अनुभयस्वभावो वा, आद्ये-स्वयं निवर्त्तेतैव, न कार्यं जनयेत्, द्वितीये-कार्यमेव जनयेत्, न निवर्त्तेत, तृतीयचतुर्थयोस्तु-विरोधासंभवौ । अथ स्वनिवृत्तिरेव कार्यजननमिति न विरोध इति चेत्?, तर्हि जननं कार्याव्यतिरिक्तमिति कार्यमेव, तच्च स्वनिवृत्तिः, सा च स्वात्मिकेत्यनिवारितोऽन्वयः, कार्याभावो वा, क्रमिकनिवृत्तिकार्यजननस्वभावं च नैकं क्षणिकमित्यादि स्वधियाऽभ्यूहनीयम्" इति । अत्रैव हरिभद्रसूरिरप्यमुमेवाभिप्रायमित्थमेव दर्शितवान् ॥ २१ ॥ ४३४ ॥

ननूक्तदिशा जनकस्य जनकत्वापाकरणे हेतुफलभावनिषेधः कृतः स्यात्, स च कार्यकारणभावग्राहिप्रत्यक्षबाधित इत्याशङ्कापनोदायाह —

**न चाध्यक्षविरुद्धत्वं, जनकत्वस्य मानतः ।**
**असिद्धेरत्र नीत्या तद् व्यवहारनिषेधतः ॥ २२ ॥ ४३५ ॥**

**न चे**ति । **अध्यक्षविरुद्धत्वं** बाधकमुद्भावनीयमिति शेषः, तथा च प्रत्यक्षप्रमाणविरुद्धत्वमत्र बाधकं न चोद्भावनीयमित्यर्थः, **जनकत्वस्य** प्रस्तुतस्य कारणत्वस्य, **मानतः** प्रमाणात्, **असिद्धेः**, **अत्र** अस्मिन् प्रक्रमे, **नीत्या**

न्यायेन, **तद्व्यवहारनिषेधतः** जनकत्वव्यवहारनिषेधात्, 'जनकत्वं न सद्व्यवहारविषयः प्रमाणाविषयत्वात्, शशशृङ्गादिवत्, इत्यनुमानस्य सद्भावात्; न च जनकत्वाभ्युपगन्ता जनकत्वं निषेद्धुं न शक्नोतीति साम्प्रतम्, जनकत्वाभ्युपगन्तुः तत्र प्रकारान्तरेण प्रमाणसद्भावेऽप्युपदर्शितविकल्पचतुष्टयापेक्षयोक्तदिशाऽत्रार्थे प्रमाणाभावाद्व्याघातेन जनकत्वव्यवहारप्रतिक्षयसम्भवात् ॥ २२ ॥ ४३५ ॥

प्रमाणाभावे सद्व्यवहारनिषेधलक्षणो न्यायो बौद्धेनाप्याश्रित एवेत्याह—

**मानाभावे परेणापि, व्यवहारो निषिध्यते ।**
**सज्ज्ञानशब्दविषयस्तद्वदत्रापि दृश्यताम् ॥ २३ ॥ ४३६ ॥**

**मानाभाव** इति-प्रमाणाभाव इत्यर्थः, **परेणापि** सौगतेनापि, क्वचिद् वस्तुनि प्रधानेश्वरादौ **सज्ज्ञानशब्दविषयो व्यवहारो निषिध्यते** प्रधानेश्वरादिकं सदिति न ज्ञेयम्, सदिति नाभिधेयं वा, प्रमाणेनानुपलभ्यमानत्वात्, इत्येवं प्रधानेश्वरादौ सज्ज्ञानशब्दविषयो व्यवहारो निषिध्यते, **तद्वत्** तथा, **अत्रापि** जनकत्वेऽपि, **दृश्यतां** प्रमाणाभावेन सद्व्यवहारनिषेधो भाव्यताम्, मानाभावे सद्व्यवहारविषयत्वाभाव इति न्यायस्य समानत्वात्, एतावता प्रबन्धेन चतुर्थस्तबके द्वितीयकारिकायां क्षणिकत्वसाधनायोक्तस्य 'नाशहेतोरयोगतः' इति प्रथमहेतोरपाकरणम् ॥ २३ ॥ ४३६ ॥

अथ 'अर्थक्रियासमर्थत्वात्, इति क्षणिकत्वसाधकं द्वितीयं हेतुं दूषयति—

**अर्थक्रियासमर्थत्वं, क्षणिके यच्च गीयते ।**
**उत्पत्त्यनन्तरं नाशाद्, विज्ञेयं तदयुक्तिमत् ॥ २४ ॥ ४३७ ॥**

**अर्थक्रियासमर्थत्वमिति**-**क्षणिके** निरन्वयनश्वरे वस्तुनि, **यच्च**, यत्पुनः, अर्थक्रियासमर्थत्वम्, **गीयते** क्षणिकवादिभिः सौगतैरुद्घुष्यते, **तत्** उद्घोषणम्, **उत्पत्त्यनन्तरम्** उत्पादाव्यवहितोत्तरक्षणे, **नाशात्** विनाशात् कारणात्, **अयुक्तिमत्** युक्तिरहितम्, **विज्ञेयं** ज्ञातव्यम् ॥ २४ ॥ ४३७ ॥

अयुक्तिमत्त्वमेव दर्शयति—

**अर्थक्रिया यतोऽसौ वा तदन्यो वा द्वयी गतिः ।**
**तत्त्वे न तत्र सामर्थ्यमन्यतस्तत्समुद्भवात् ॥ २५ ॥ ४३८ ॥**

**अर्थक्रियेति**-**यतः** यस्मात् कारणादर्थक्रिया भवति, **असौ वा** जनकत्वा-

भिमतः पदार्थ एव वाऽर्थक्रिया स्यात्, **वा** अथवा, **तदन्यः** जनकत्वाभिमत-पदार्थभिन्नस्तदनन्तरभाविपदार्थ एवार्थक्रिया, **द्वयी गतिः** द्वाविमावत्र प्रकारौ, तत्र जनकत्वाभिमतपदार्थस्वरूपार्थक्रियेति प्रथमपक्षे दूषणमाह-**तत्त्व** इति-अर्थक्रियाया जनकत्वाभिमतपदार्थात्मकत्व इत्यर्थः, **न** नैव, **तत्र** स्वात्मिकाया-मर्थक्रियायाम्, **सामर्थ्यं** जनकत्वाभिमतस्य स्वस्य सामर्थ्यं, कुत इत्याकाङ्क्षाया-माह-**अन्यत** इति-स्वभिन्नात् स्वजनकादित्यर्थः, **तत्समुद्भवात्** तस्याखिल-स्वधर्मान्वितस्य जनकस्योत्पादात्, स्वस्य स्वं प्रति जनकत्वं च दृष्टेष्टाभ्यां विरुद्धम्, पूर्वापरभावनियतस्य कार्यकारणभावस्यैकस्मिन्नसम्भवात्, न हि तदेव तस्मात् पूर्वमुत्तरं च क्वचिद् दृष्टम्, नहि परस्यापि तदिष्टम्, तस्मान्नार्थक्रियाया जनक-त्वाभिमतपदार्थादभेदे जनकत्वाभिमतपदार्थस्यार्थक्रियाया उत्पादे सामर्थ्यमिति ॥ २५ ॥ ४३८ ॥

यथा चार्थक्रियाया उत्पादे जनकत्वाभिमतपदार्थस्य तदभिन्नत्वान्न सामर्थ्यं तथाऽर्थक्रियाया धारणे तन्नाशे च तदभिन्नस्य जनकत्वाभिमतस्य न सामर्थ्यमित्याह–

**न स्वसंधारणे न्यायाज्जन्मानन्तरनाशतः ।**
**न च नाशेऽपि सद्युक्त्या, तद्धेतोस्तत्समुद्भवात् ॥२६॥४३९॥**

**नेति**-नैवेत्यर्थः, **स्वसंधारणे** अर्थक्रियासंस्थापने, **न्यायात्** सद्युक्तितः, अस्य सामर्थ्यमिति योगः, तत्र हेतुः-**जन्मान्तरनाशत** इति-उत्पत्त्यनन्तरं स्वाखिलधर्मसहितस्यैव तस्य नाशादित्यर्थः, **न च नाशेऽपि** अर्थक्रियाया नाशेऽपि जनकत्वाभिमतस्य न सामर्थ्यम्, **सद्युक्त्या** सन्न्यायेन युज्यते, कुत इत्यत आह-**तद्धेतोस्तत्समुद्भवादिति**-स्वहेतोरेव नश्वरस्वभावस्य तस्योत्पत्तेः ॥ २६ ॥ ४३९ ॥

अर्थक्रियाजनकत्वाभिमतपदार्थभिन्नपदार्थरूपेति द्वितीयपक्षे दूषणमाह—

**अन्यत्वेऽन्यस्य सामर्थ्यमन्यत्रेति न सङ्गतम् ।**
**ततोऽन्यभाव एवैतन्नासौ न्याय्यो दलं विना ॥ २७ ॥ ४४० ॥**

**अन्यत्वे** इति-अर्थक्रियाया जनकत्वाभिमतपदार्थभिन्नत्वेऽभ्युपगम्यमाने इत्यर्थः, **अन्यस्य** अर्थक्रियातो भिन्नस्य जनकत्वाभिमतपदार्थस्य, **अन्यत्र** हेतुतो भिन्नायामर्थक्रियायाम्, **सामर्थ्यं** जननानुकूलशक्तिमत्त्वम्, **इति न सङ्गतम्** एवमभ्युपगमनं न युक्तम्, सामर्थ्य-सामर्थ्यवतोरभेदाद्धेतुगतसामर्थ्यस्य

हेत्वात्मकस्य हेतुभिन्नायामर्थक्रियायां भेदे सम्बन्धायोगतो हेतोरभावेऽभावात्, स्यादेतत्–**ततः** दण्डादेः कारणात्, अन्यभाव एव घटाद्युत्पाद एव, **एतत्** सामर्थ्यं, न तु घटाद्युत्पादादतिरिक्तं सामर्थ्यम्, अत्राह–**नासाविति**–**असौ** घटाद्युत्पादः, **न न्याय्यः** न न्यायसङ्गतः, **दलं विना** घटादिरूपेण परिणममान-मुपादानकारणमनुगमनशीलमन्तरेण ॥ २७ ॥ ४४० ॥

अनुगामिनमुपादानमन्तरेण घटाद्युत्पादो न सम्भवतीत्येतदेव स्पष्टयति—

**नासत् सञ्जायते यस्मादन्यसत्त्वस्थितावपि ।**
**तस्यैव तु तथाभावे, नन्वसिद्धोऽन्वयः कथम्? ॥ २८ ॥ ४४१ ॥**

**नासदिति**–**यस्मात्** कारणात्, **अन्यसत्त्वस्थितावपि** अनुगाम्यु-पादानव्यतिरिक्तस्य कारणस्य सत्त्वसद्भावेऽपि, किमुत तन्निवृत्तौ **असत्** उत्पत्तितः प्राक् सर्वथाऽसत्, **सन्न जायते** सन्न भवति, असन्निरूपितशक्ते-रुपगमे शशशृङ्गादिनिरूपितशक्तितः शशशृङ्गादिभवनलक्षणातिप्रसङ्गभयादसच्छ-त्त्यभावस्यैवाभ्युपगमार्हत्वात्, **तस्यैव तु** पूर्वकारणक्षणस्यैव पुनः, **तथाभावे** उत्तरकार्यक्षणरूपतया भवनेऽङ्गीक्रियमाणे, **ननु** निश्चितम्, **अन्वयः** पूर्वक्षणो-त्तरक्षणानुगामिरूपः, **कथमसिद्धः** अपि त्वन्वयः सिद्ध एव, भावाविच्छेदस्यै-वान्वयत्वात् ॥ २८ ॥ ४४१ ॥

दोषान्तरमाह —

**भूतिर्येषां क्रिया सोक्ता, न चासौ युज्यते क्वचित् ।**
**कर्तृभोक्तृस्वभावत्वविरोधादिति चिन्त्यताम् ॥ २९ ॥ ४४२ ॥**

**भूतिरिति** । या एषां भावानाम्, **भूतिः** भवनम्, **सा क्रिया** करणम्, **उक्ता** भवता प्रतिपादिता, "भूतिर्येषां क्रिया सैव कारणं सैव चोच्यते" इति वचनात्, **असौ** भूतिः, **क्वचित्** क्वापि वस्तुनि, **न च** नैव, **युज्यते** न्यायतो घटते, कथं न युज्यत इत्यपेक्षायामाह–**कर्तृ-भोक्तृस्वभावत्वविरोधादिति**–सा हि भूतिः कर्तृस्वभावा भोक्तृस्वभावा वा?, कर्तृस्वभावत्वे न भोक्तृत्वं, भोक्तृ-स्वभावत्वे न कर्तृत्वं स्यात्, न च कर्तृस्वभावत्वमेव भोक्तृत्वं, घट-कलशादि-पदानामिव कर्तृ-भोक्तृपदयोरभिन्नप्रवृत्तिनिमित्तकत्वेन पर्यायत्वापातात्, यच्च प्राक्कृतं कतिपयकालानन्तरं भुज्यते तत्र भोगसमये कृताभावात् तद्भोक्तृत्वाभावे तत्कर्तृत्वं न स्यादिति प्राक्कृतापनयनं भोगसमय एव च कृतस्योत्पादे तद्भोक्तृत्वं तदेव च कर्तृत्वमित्येवं प्राक्कृतापनयनेतरोत्पादयोरभेदप्रसङ्गात्, यदनन्तरं भोगो

न भवति तस्य चरमस्य भोक्तृत्वाभावे कर्तृत्वाभावाच्च, चरमस्य भोक्तृस्वभावस्य कर्तृत्वे तदनन्तरं भोगोऽवश्यमेव 'कृतमुपभुज्यते' इति वचनात्, तथा च चरमत्वं न स्यात्; न च भूतिरादौ कर्तृस्वभावैव, तत्र कर्तृत्वं न भोक्तृत्वं ततो न कृतस्यापनयनम्, अन्ते च भूतिर्भोक्तृस्वभावैव, अतस्तस्य कर्तृत्वाभावेऽपि भोक्तृत्वं चरमत्वं चोपपद्यते, मध्ये च या भूतिः सा कृतस्य पूर्वस्य भोक्तृस्वभावा भाविनो भोगस्य कर्तृस्वभावेत्येवमन्तरा तूभयस्वभावेति वाच्यम्; एकस्य द्वैरूप्यविरोधादित्येवं कर्तृ-भोक्तृस्वभावत्वविरोधादित्यर्थः, इति चिन्त्यतां सूक्ष्मधियेत्थं विचार्यताम् ॥ २९ ॥ ४४२ ॥

प्रस्तुतमुपसंहरति —

**न चातीतस्य सामर्थ्यं, तस्यामिति निदर्शितम् ।**
**न चान्यो लौकिकः कश्चिच्छब्दार्थोऽत्रेत्ययुक्तिमत् ॥३०॥४४३॥**

**न चेति**—**अतीतस्य** द्वितीयक्षणवृत्तिध्वंसप्रतियोगिनः, कारणक्षणरूपवस्तुनः, **सामर्थ्यं** सामर्थ्य-सामर्थ्यवतोरभेदात् सामर्थ्यवत्तद्वस्त्वव्यतिरिक्तं सामर्थ्यम्, **तस्यां** द्वितीयक्षणरूपायामर्थक्रियायाम्, **न च** नैव, **इति** एतत्, **निदर्शितम्** "अन्यस्य सामर्थ्यमन्यत्रेति न सङ्गतम्" इत्यनेन प्रतिपादितम्, **न च** नापि, **अन्यः** उपदर्शितार्थभिन्नः, **लौकिकः** लोकप्रसिद्धः, **कश्चित्** कोऽपि, **शब्दार्थः** शब्दाभिधेयः, **अत्र** अर्थक्रियायां सामर्थ्यमिति वाक्ये, **इति** एवम्, **अयुक्तिमत्** अर्थक्रियासमर्थत्वं क्षणिकत्वे यत् परेण गीयते तदयुक्तिमत्।

अत्र क्षणिकवादिपूर्वपक्ष-स्थिरवादिसमाधानगतिरुपाध्यायोपवर्णिता चेत्थम्—

"यच्च क्रम-यौगपद्याभ्यामर्थक्रिया स्थिराद् व्यावर्तमाना क्षणिकतायामेवावतिष्ठते, अर्थात् स्थिरे पदार्थे क्रमेणार्थक्रियाकारित्वं युगपच्चार्थक्रियाकारित्वं न सम्भवतः, न चार्थक्रियाकरणे क्रम-यौगपद्यव्यतिरिक्तः प्रकारः सम्भवतीति क्रमकारित्व-युगपत्कारित्वान्यतरस्यार्थक्रियाकारित्वव्यापकस्य स्थिरेऽभावाद् व्याप्यस्यार्थक्रियाकारित्वस्याप्यभावः, ततश्च क्षणिकत्वे सत्येव क्रमकारित्व—युगपत्कारित्वान्यतरव्याप्यार्थक्रियाकारित्वव्यवस्थितिः, वस्तुनि स्थिरत्व—क्षणिकत्वाभ्यामन्यस्य कालवृत्तित्वप्रकारस्याभावादित्युच्यते, तत् कदाशामात्रम्, स्वभिन्नक्रमिकार्थक्रियाभेदेऽपि हेतोरभेदात्, स्थिरोऽपि भावः क्रमेणैवार्थक्रियां करोति, सा चार्थक्रिया क्रमिकाऽपि हेतोर्भिन्नेति तद्भेदाद्धेतुभेदो न सम्भवतीति; न च

हेतोः प्रतिक्षणमभिन्नरूपत्वेऽर्थक्रियाऽपि युगपद् भवेदिति वाच्यम्, नियमाभावात्, यथादर्शनं हेतोरभेदस्यार्थक्रियाभेदस्य च सम्भवात्; न च प्रतिक्षणविशरारुताऽविनाभूतः क्रमवदर्थक्रियोत्पादः क्वचिदुपलब्धः, येन तदुदयक्रमात् तद्धेतोः प्रतिक्षणभेदः सिद्धिमासादयेत्; न चार्थक्रियाऽपि प्रतिक्षणं भेदवती सिद्धा, तत् कथं स्वयमसिद्धा हेतोः प्रतिक्षणभेदमवगमयेत्?; न च सौगतानां कालाभावादर्थक्रियाक्रमोऽपि युक्तः, कार्यपरम्पराव्यतिरिक्तस्य कालस्य तैरनभ्युपगमात्; न च फलभेदमात्राद्धेतुभेदव्यवस्था, एकेनापि प्रदीपादिनाऽनेककार्याणामेकदा करणात्, परपरिकल्पितकालाभ्युपगमेन कार्यक्रमश्च प्रमाणाभावे दुर्घटः; न च तदभ्युपगमेन कारणक्रमोपपत्तावपि स्थैर्यभङ्गः; जनकत्वा–ऽजनकत्वस्वभावभेदादसौ स्यादिति चेत्?, क्रमोपेतकार्योपलम्भात् कल्पनाध्यवसितेन जनकाजनकत्वस्वभावभेदेनाऽपि भावाभेदात्, अन्यथा भावानामेकत्वमध्यवस्यन्ती कल्पना तव स्थैर्यमपि किं न दर्शयेत्, तस्मादुदितफलापेक्षया कल्पना भावानां जनकत्वमध्यवस्यति, अनुदितफलापेक्षया तु तत्रैव जनकत्वमध्यारोपयतीति न भेदः; न चेदेवम्, एकस्यापि क्षणस्य परोपजनितकार्यापेक्षयाऽजनकत्वं, स्वोत्पाद्यकार्यापेक्षया जनकत्वमिति भेदः स्यात्, कल्पनाप्रदर्शितभेदबाधकोऽभेदनिर्भासस्तूभयत्र तुल्य इति ध्येयम्। समर्थो यदि हेतुस्तदोत्पन्नमात्र एव कार्यं किं न जनयेदिति चेत्? तव कुर्वद्रूपः क्षणस्तदा किं न भवेत्?, सहकार्यभावादिति चेत्? तुल्यमिदमन्यत्र।

स्यादेतत्—मम कुर्वद्रूपाणां दण्ड-घटादिक्षणानामेकेन घटकुर्वद्रूपत्वेनैव घटव्याप्यत्वं, परेषां त्वितरसहकारिसमवहितदण्डत्वादिना घटादिव्याप्यत्वम्, तत्रावच्छेद्यावच्छेदकभावेऽविनिगमश्चेत्यतिगौरवम्; न च घटसामग्रीत्वेन घटव्याप्यता, सामग्र्या एवानिरुक्तेः, तथाहि—न तावद् यावन्ति कारणानि सामग्री, क्रमिककारणसमुदायेऽतिव्याप्तेः, नाप्येकक्षणावच्छिन्नानि यावन्ति कारणानि सामग्री, यागादेश्चिरातीतत्वेन स्वर्गादिसामग्र्यामव्याप्तेः, न च तादृशयावत्कारणसमवधानं सा, अस्ति च चिरातीतस्यापि हेतोर्व्यापाररूपसमवधानम्, अर्थाच्चिरातीतकारणमपि स्वजन्यव्यापारवत्त्वसम्बन्धेन स्वर्गादिकार्याव्यवहितपूर्वक्षणे विद्यत इति वाच्यम्, विशकलिततावत्कारणसमवधानाभावात्; न चेतरकारणविशिष्टचरमकारणमेव सा, न च विनिगमनाविरहः, कार्यैकदेशताया विनिगमकत्वादिति वाच्यम्, इतरेषामपि कयाचित् प्रत्यासत्त्या कार्यैकदेशत्वात्, अन्यथा चरमकारणे तद्वैशिष्ट्यानिरुक्तेः; न च चरमकारणमेव सा, तस्य संयोगत्वादिना-

ऽसामग्रीत्वात्, चरमत्वेन तत्त्वे वाऽव्यवहितपूर्ववर्त्तिना सम्बन्धेन फलविशिष्टोत्पत्तिकत्वं चरमत्वमिति लाघवात् तेन सम्बन्धेन फलवत्त्वस्यैव सामग्रीत्वौचित्यात्; एवं च 'सामग्र्यभावात् कार्याभावः' इत्यत्र फलतः 'स्वाभावादेव स्वाभावः' इति, सामग्रीभेदात् कार्यभेद इत्यत्र च स्वभेदादेव स्वभेद इत्यापतितमिति न किञ्चिदेतत्। एतेन "प्रागभावेतरकादाचित्कयावत्कारणप्रागभावानाधारः कार्यप्रागभावाधारः क्षण एव सामग्री, नेयं कार्यजनिका, किन्तु तद्व्याप्या, कार्याधिकरणीभूतस्य क्षणस्य कार्यप्रागभावानधिकरणत्वात्, कार्यप्रागभावाधिकरणीभूतस्य च कार्यानधिकरणत्वात्, अधिकरणीभूतानामेव च कालोपाधीनां हेतुत्वात्" इत्यपि निरस्तम्, एतस्यास्तत्र तदुत्पत्तिनियामकत्वादिति;

मैवम्-सामग्र्याः समग्रव्यतिरिक्ता-ऽव्यतिरिक्तपरिणामविशेषरूपत्वात्, घनस्य विविच्यमानस्य भूतादाविव विविच्यमानायास्तस्या दण्डादौ विश्रामेऽप्यविविच्यमानायास्तद्वदेकत्वात्, सर्वेषां कारणानां योऽभिन्नकालः सम्मेलनक्षणरूपस्तत्कृतो योऽनर्थान्तरभावः–एकता तेन सा परिणामविशेषलक्षणा सामग्री 'अविभिन्नव्यवहारस्यैका सामग्री' इति व्यवहारस्य 'सम्मिलितकारणसमयरूपैव सामग्री इति व्यवहारस्य वा निबन्धनम्, प्रत्येकं कारणानि विभिन्नकालानि न तदानीं सामग्रीति प्रत्येकं कारणकालतो यः सामग्र्याः परिणामविशेषलक्षणाया भिन्नः कालस्तत्कृतो योऽर्थान्तरभावः–कारणतो भिन्नता तेन च प्रत्येकं कारणानां कार्यानुपधायकत्वेऽपि सा कार्योपधायिका, तद्बलात् 'सामग्री जनिका' इति व्यवहार इति तत्त्वम्; नैयायिकादिनाऽपि हि मानसादौ चाक्षुषसामग्र्यादिप्रतिबन्धकतादिकल्पनापेक्षया लाघवान्मानससामग्र्या अर्थान्तरभूतायाः कल्पयितुं युक्तत्वात्, सा च मानससामग्री चाक्षुषादिप्रत्यक्षसामग्रीकाले नास्तीत्येतावतैव न चाक्षुषसामग्र्याद्यनन्तरं मानसमिति न तस्या मानसं प्रति प्रतिबन्धकतेति; इति नैकान्ते दोषेऽप्यनेकान्ते किमपि दूषणं पश्यामः; तत्र तत्कार्योत्पत्तौ तदवच्छिन्नयावत्कारणसमवधानरूपायाः सामग्र्या नियामकत्वमित्यपरेषां शब्दान्तरम्, अधिकं स्वधियाऽभ्यूह्यम्" इति ॥ ३० ॥ ४४३ ॥

'क्षणिकत्वसाधनाय परिणामात्' इत्युक्तं तृतीयहेतुं दूषयितुमाह—

**परिणामोऽपि नो हेतुः, क्षणिकत्वप्रसाधने।**
**सर्वदैवान्यथात्वेऽपि, तथाभावोपलब्धितः ॥ ३१ ॥ ४४४ ॥**

**परिणामोऽपीति**–अतादवस्थ्यलक्षणः परिणामोऽपीत्यर्थः, क्षणिकत्व-

**प्रसाधने** निरन्वयनाशसाधने, **हेतुः** समर्थः, **नो** नैव, 'अ-मा-नो ना प्रतिषेध-वचनाः' इति वचनान्नोशब्दस्य निषेधवाचित्वात्, कथं न हेतुरित्याकाङ्क्षायामाह–**सर्वदैवेति**–सर्वकालमेवेत्यर्थः, **अन्यथात्वेऽपि** बाल-कुमारादिभावेन देहस्य घट-शरावादिभावेन च मृदो विभिन्नरूपत्वेऽपि, **तथाभावोपलब्धितः** देह-मृदादिभावोपलब्धेः; इदमत्र हृदयम्-यथा बौद्धमते चित्रज्ञाने नानाकारोप-लम्भेऽप्येकरूपोपलम्भाच्चित्रैकरूपता न विरुद्ध्यते तथा परिणामपरिणामिनो-र्भेदेऽपि 'सोऽयं देहः, सैवेयं मृत्' इत्याद्यभेदोपलम्भान्न स्थैर्यबाधः, अनुभव-सिद्धयोर्भेदा-ऽभेदयोरेकत्र समावेशसम्भवादिति ॥ ३१ ॥ ४४४ ॥

इत्थं चैतदङ्गीकर्तव्यमित्युपदर्शयति—

**नार्थान्तरगमो यस्मात्, सर्वथैव न चागमः ।**
**परिणामः प्रमासिद्ध, इष्टश्च खलु पण्डितैः ॥ ३२ ॥ ४४५ ॥**

**नार्थान्तरगम** इति–**यस्मात्** कारणात्, **नार्थान्तरगमः** सर्वथाऽर्था-न्तरगमनं न पूर्वद्रव्यस्य, **सर्वथैव** एकान्तेनैव, **न च** नैव, **अगमः** अर्थान्तर-स्यागमनम्, परिणामः, **प्रमासिद्धः** प्रमाणप्रसिद्धः, **इष्टश्च** अभ्युपगतश्च, **खलु** निश्चितम्, **पण्डितैः** परिमाणस्वस्वरूपाभिज्ञैः, पण्डितैः सर्वथाऽर्थान्तरगमनं सर्वथार्थान्तरागमनं न परिणामोऽभ्युपगतः "तद्भावः परिणामो यत् तत् तेन तथा भूयते" इति वचनात्, एतद्युक्तमेव, यतः सुवर्णं कुण्डलतया परिणममानं यदि सर्वथैव कुण्डलं भावं भजेत तदा सुवर्णरूपं परित्यजेत, यदि च तत् सर्वथा कुण्डलभावं न भजेत तदाऽकुण्डलत्वं तस्य प्रसज्येत, येन च रूपेण यत्र स्वकालीनस्वाभिन्नोत्पादप्रतियोगित्वं तेन रूपेण तत्र तत्परिणामत्वव्यवहारः, यथा कुण्डलत्वेन रूपेण सुवर्णे सुवर्णकालीनसुवर्णाभिन्नोत्पादप्रतियोगित्वं समस्तीत्यतः कुण्डलत्वेन रूपेण सुवर्णे सुवर्णपरिणामत्वव्यवहारः, सुवर्णत्वेन रूपेण च सुवर्णे सुवर्णकालीनसुवर्णाभिन्नोत्पादप्रतियोगित्वं नास्तीति सुवर्णं परिणाम इति व्यवहारो न भवतीति ॥ ३२ ॥ ४४५ ॥

अत्र परोक्तानित्यतामपाकरोति—

**यच्चेदमुच्यते ब्रूमोऽतादवस्थ्यमनित्यताम् ।**
**एतत् तदेव न भवत्यतोऽन्यत्वे ध्रुवोऽन्वयः ॥ ३३ ॥ ४४६ ॥**

**यच्चेदमुच्यत** इति–निरन्वयविनाशवादिभिः सौगतैर्यत् पुन इदमनन्तर-मेवाभिधीयमानं कथ्यत इत्यर्थः, तदुक्तिमुल्लिखति-**ब्रूमोऽतादवस्थ्यमनि-**

स्यतामिति-परिणामित्वं यदताद्वस्थ्यस्वरूपं परिणामवादिभिरिष्यते तदेवानित्यतां भावानामिति वयं सौगता ब्रूमः कथयाम इत्यर्थः, तथा च परिणामित्वेऽस्माकं बौद्धानामिष्टसिद्धिरिति तदुत्तयभिप्रायः, अत्रोत्तरम्, एतदित्यादि-एतत् अताद्वस्थ्यं, सौगतस्य तदेव न भवतीत्येवंरूपमभिमतम्, "न तत्र किञ्चिद् भवति न भवत्येव केवलम्" इति तदुक्तेः, तथा चाभवनलक्षणमनित्यत्वं तुच्छस्वरूपं न वस्तुलक्षणं सम्भवतीति, अतः अस्माद्भावनात्, अन्यत्वे अताद्वस्थ्यस्य भिन्नत्वे, ध्रुवोऽन्वयः निश्चितं पूर्वापरपर्यायानुगामिवस्तुसद्भावः, पूर्वावस्थावतो द्रव्यस्यैवोत्तरावस्थारूपेण भवनादिति ॥ ३३ ॥ ४४६ ॥

अताद्वस्थ्यस्य तदेव न भवतीत्येवंरूपत्वे दोषमाह—

**तदेव न भवत्येतत् तच्चेन्न भवतीति च ।**
**विरुद्धं हन्त ! किञ्चान्यदादिमत् तत् प्रसज्यते ॥३४॥४४७॥**

तदेवेति-'तदेव'इत्यनेन भवनस्वभावं वस्तूच्यते, न भवतीति चाभवनमुच्यते, एवं च तदेव न भवतीत्येतत् वाक्यं, तच्चेन्न भवतीति च वाक्यं विरुद्धं भवनस्वभावस्याभवनत्वायोगात्, यथा 'घटोऽघटः' इति वाक्यं घटस्वभावस्याघटस्वरूपत्वप्रत्यायकत्वाद् विरुद्धम्, तथा त्वन्नीत्या 'तदेव न भवति'इत्यादि वाक्यं भवनस्वभावस्याभवनस्वभावत्वप्रत्यायकत्वाद् विरुद्धम्, हन्तेत्युपदर्शने, किञ्च अपि च, अन्यत् दोषान्तरम्, तत् इदमभवनम्, आदिमत् प्रसज्यते उत्तरक्षणेऽभवनस्य भवनात् ॥ ३४ ॥ ४४७ ॥

प्रकृतमेव समर्थयति—

**क्षीरनाशश्च दध्येव, यद् दृष्टं गोरसान्वितम् ।**
**न तु तैलाद्यतः सिद्धः, परिणामोऽन्वयावहः ॥ ३५ ॥ ४४८ ॥**

क्षीरनाशश्चेति-दध्येव चोत्पद्यमानं, क्षीरनाशः क्षीरनाशाभिन्नम्, तत् पुनः गोरसान्वितं गोरसस्थितियुक्तम्, न तु तैलादि दध्यत्यन्तभिन्नस्वभावं क्षीरनाशभिन्नं तैलादिगोरसस्थितियुक्तं न भवति, यत् यस्मादेवं, दृष्टं प्रत्यक्षप्रमाणविषयीकृतम्, अतः अस्मात् कारणात्, परिणामः अन्वयावहः अन्वयप्रापकः, सिद्धः निश्चितः । आद्यक्षणसम्बन्धरूपो दध्न उत्पादो भावरूपः क्षीरनाशश्चाभावरूप इति कथं तयोरैक्यमिति नैयायिकादिवचनं न रमणीयम्, तैः स्वयमेव प्रागभावध्वंसस्य प्रतियोगिरूपस्य स्वीकारात्; यदपि तेऽभ्युपगच्छन्ति-दुग्ध-दध्नोर्गोरसान्वयस्तैलादिव्यावृत्तो नैकद्रव्यानुगमनरूपः, किन्तु गोरसत्व-

लक्षणजात्यविच्छेदरूप इति, तदपि दुग्धात्मकगोरस एव दध्यात्मकः संवृत्त इति प्रत्यभिज्ञाप्रतिहतम्, दुग्धात्मकगोरसद्रव्यस्य सर्वथा नाशे निराश्रयस्य दध्न उत्पादानुपपत्तेश्च, य एव परमाणवो दुग्धारम्भकत्वाद् दुग्धोपादानानि त एव दध्यारम्भकत्वाद् दध्युपादानानीति तदाश्रयस्य दध्न उत्पादः सम्भवतीत्युक्त्या च नामान्तरेण गोरसान्वय एवाभिहितो भवति, कथञ्चिदभेदे सत्येवोपादानोपादेयभाव इति त्यक्तोपात्तोभयरूपस्योभयोपादानस्य कथञ्चिदुभयापृथग्भूतत्वादिति ॥ ३५ ॥ ४४८ ॥

एतदेव समर्थयति—

**नासत् सञ्जायते जातु सच्चासत् सर्वथैव हि ।**
**शक्त्यभावादतिव्याप्तेः सत्स्वभावत्वहानितः ॥ ३६ ॥ ४४९ ॥**

**नासदिति-असत्** एकान्ततुच्छं, **सत्** अतुच्छम्, **न जायते** नोत्पद्यते, **जातु** कदाचित्, अत्र हेतुः-**शक्त्यभावादतिव्याप्तेरिति**-तुच्छस्य प्रतिनियतातुच्छजननशक्त्यभावेनाभिमतातुच्छोत्पत्तिवदनभिता (?) तुच्छोत्पत्त्यापत्तेरित्यर्थः, तथा **सर्वथैव हि** एकान्तेनैव हि, **सच्च** सत् पुनः, **असत्** तुच्छं, न जायत इति संटङ्कः, अत्र युक्तिः-**सत्स्वभावत्वहानित** इति-असद्भवनस्वभावस्य सद्भवनस्वभावस्य विरोधात्, सतोऽसद्भवने सत्स्वभावत्वाभावापत्तेरित्यर्थः ॥३६॥४४९॥

प्रस्तुतमुपसंहरति—

**नित्येतरदतो न्यायात्, तत्तथाभावतो हि तत् ।**
**प्रतीतिसचिवात् सम्यक् परिणामेन गम्यते ॥ ३७ ॥ ४५० ॥**

**नित्येतरदिति**-नित्यानित्यमित्यर्थः, **अतः** असतः सत्तानापत्तेः सतश्चासत्तानापत्तेश्च, **न्यायात्** विचारात्, **तत्तथाभावतः** तस्यैव तथाभवनेन, **हि** निश्चितम्, **तत्** वस्तु, **प्रतीतिसचिवात्** अनुभवसध्रीचीनात्, अस्य सम्यगित्यस्य च न्यायादित्यनेन पूर्वेणान्वयः, **परिणामेन** परिणमनस्वभावेन, **गम्यते** ज्ञायते, अनुभवसध्रीचीनसम्यग्विचारेण परिणामेन वस्तु नित्यानित्यं प्रतीयते, वस्तुनो नित्यानित्यस्वरूपत्वे सत्येव परिणामोपपत्तिर्नान्यथेति मुकुलितोऽर्थः ।

एकस्य वस्तुनो नित्यानित्योभयरूपत्वमसहमानानां वैशेषिकादीनां मतमुपदर्श्य तत्खण्डनपूर्वकमनेकान्तवादव्यवस्थापनं यत् कृतं श्रीमद्भिर्यशोविजयोपाध्यायैस्तत् क्वचिदुपस्काराकलितं शिष्यबुद्धिनैर्मल्यनिबन्धनं स्याद्वादाकुण्ठ-रुच्याधायकमुल्लिख्यते, तथाहि—

"अत्र वैशेषिकादयः-प्रत्यभिज्ञया 'सोऽयम्' इत्याकारिकया तत्तेदन्ताविशिष्टयोरभेदलक्षणे स्थैर्यसिद्धेऽपि कथमेकस्य नित्या-ऽनित्यरूपस्य वस्तुनः सिद्धिः ?, तथा च प्रत्यभिज्ञया स्थैर्यसाधनं क्षणिकैकान्तवादिसौगतमतखण्डनप्रवणमपि नैकान्तानित्यघटपटाद्यभ्युपगन्तृमतोन्मूलनसमर्थं नवानेकान्ततत्त्वाभ्युपगमदोहदपूरणप्रगल्भम्, 'कपाले घटो नश्यति' इत्यनुभवे घटस्य प्रतियोगित्वं नाशे तस्य वैशिष्ट्यं कपाले भासत इति घटप्रतियोगिकत्वेन ध्वंसावगाहिनि तत्र समानसंवित्संवेद्यतया घटे ध्वंसप्रतियोगित्वस्यावगाहनतो घटे ध्वंसप्रतियोगित्वलक्षणानित्यत्वानुभवेऽपि नित्यत्वाननुभवान्नानुभवबलान्नित्यानित्यरूपस्य वस्तुनः सिद्धिः, ध्वंसप्रतियोगित्व-तदप्रतियोगित्वलक्षणयोर्नित्या-ऽनित्यत्वयोर्विरोधाच्च, नानित्ये घटे नित्यत्वस्य सम्भवः । अथ प्रतियोगिसत्त्वमात्रेण नात्यन्ताभावविरोधः, किन्तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वेन, प्रतियोगिसत्त्वमात्रेणाभावस्य विरोधाभावादेव घटात्मकैकप्रतियोगिवत्यपि भूतले घट-पटगतद्वित्वात्मकप्रतियोगितावच्छेदकावच्छिन्नघटपटोभयरूपप्रतियोगिसत्त्वात्मकविरोधिनोः सत्त्वाद् 'भूतले घटपटौ न स्तः' इत्याकारको घट-पटगतद्वित्वावच्छिन्नप्रतियोगिताकाभावो विद्यत इति; न च 'घट-पटौ न स्तः' इति धीर्घटवति पटाभावावगाहिनी, पटवति घटाभावावगाहिनी, यत्र च घटोऽपि नास्ति पटोऽपि च नास्ति तत्र घटाभावपटाभावोभयावगाहिनीत्येतावतैवोपपत्तौ द्वित्वावच्छिन्नप्रतियोगिताकेऽतिरिक्ताभावे मानाभावः, न चैकैकाभावधियो 'द्वौ न स्तः' इति धियोऽवैलक्षण्ये शब्दादिना 'द्वौ न स्तः' इति निश्चयेऽप्येकैकाभावनिश्चयसद्भावादेकैकाभावसंशयानापत्तिः, विषयाऽनुगमं विनाऽनुगताकारप्रत्ययायोगश्च; द्वित्वाधिकरणप्रतियोगिकत्वमात्रावगाहित्वे च यत्र यत्किञ्चिद् घटो नास्ति घटान्तरं पटश्च विद्यते तत्रापि घट-पटगतद्वित्वाधिकरणतद्देशाविद्यमानघटव्यक्तिप्रतियोगिकाभावस्य सत्त्वेन तदवगाहिन्या 'घट-पटौ न स्तः' इति प्रतीतेरापत्तिः, सामानाधिकरण्याद्यभानेऽपि 'द्वौ न स्तः' इति प्रतीतेरनुगताकारत्वाच्च न तस्या द्वित्वसमानाधिकरणधर्मस्य द्वित्वविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंसर्गेण विशिष्टो योऽभावस्तदवगाहित्वं, द्वित्वसमानाधिकरणघटत्व-पटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयकत्वं वा द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात् स्वपर्याप्त्यधिकरणवत्त्वसम्बन्धावच्छिन्नद्वित्वनिष्ठप्रतियोगिताकाभावविषयकत्वमपि न युक्तमिति वाच्यम्, द्वित्वावच्छिन्नप्रतियोगिताकत्वेन घटादिमति पटत्वावच्छिन्नप्रतियोगिताकाभावादिविषयकत्वेन तत्तद्घटादिमति च तत्तद्घटान्यघटत्वावच्छिन्नप्रतियोगिताकाभावादिविषयकत्वेनोप-

पत्तेरिति वाच्यम्; अनन्ताभावे द्वित्वावच्छिन्नप्रतियोगिताकत्वकल्पने गौरवादेकाभावसिद्धेः; अभावस्य प्रतियोगिसत्त्वमात्रेण न विरोधित्वं किन्तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वेनेति व्यवस्थितौ च घटस्य घटत्वावच्छिन्नध्वंसप्रतियोगित्वेऽपि द्रव्यत्वावच्छिन्नध्वंसाप्रतियोगित्वमुपपत्तिमत्, तत्प्रतियोगितावच्छेदकद्रव्यत्वावच्छिन्नध्वंसप्रतियोगितात्वावच्छिन्नप्रतियोगिनो द्रव्यत्वावच्छिन्नध्वंसप्रतियोगित्वस्य घटेऽभावात्, तदुक्तम्–"तद्भावाव्ययं नित्यम्" [ तत्त्वार्थसूत्रे–५,३० ] इति इति चेत्? न–तद्भावेन व्ययस्याप्रसिद्धौ तदभावस्य वक्तुमशक्यत्वात्, असतो निषेधात्, स्वीकृतं चैतदन्यैरपि–"असओ नत्थि निसेहो" [ विशेषावश्यकभाष्ये प्रथमगणधरवादे गाथा–२ ] इत्यादिना, "असतो नास्ति निषेधः" इति संस्कृतम्।

किञ्च 'घटो नास्ति' इति प्रतीत्याऽत्यन्ताभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेऽपि ध्वंसस्य न सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वम्, अत्यन्ताभावे सामान्यधर्मावाच्छिन्नप्रतियोगिताकत्वानभ्युपगमे संयोगेन भूतले घटवत्ताबुद्धिं प्रति संयोगेन 'भूतले घटो नास्ति' इति निश्चयस्य यत् प्रतिबन्धकत्वं तत्र संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितसंयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नप्रतिबन्धकताऽभ्युपेया, सा च न सम्भवति, तथा सति भूतले संयोगेन 'तद्घटो नास्ति' इति निश्चयस्यापि प्रतिबन्धकत्वापत्तेः, अतः संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नप्रतिबन्धकतैवोपेयेत्यवश्यं प्रतिबध्यप्रतिबन्धकभावानुरोधेनात्यन्ताभावीयप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वं स्वीकरणीयम्, तथैकसम्बन्धेन प्रतियोगिमत्यपि तदन्यसम्बन्धेन तदभावसत्त्वात् तन्निश्चयस्य प्रतिबन्धकत्वापत्तिपरिहाराय सम्बन्धविशेषावच्छिन्नत्वमप्यत्यन्ताभावीयप्रतियोगितायामुपेयते, एकस्य घटस्य नाशेऽपि घटान्तरस्य विद्यमानत्वात् तत्तद्घटप्रतियोगिकत्वमेव तत्तद्ध्वंसस्य, न चैकेन सम्बन्धेन घटस्य ध्वंसेऽप्यन्यसम्बन्धेन तस्य विद्यमानत्वं येन सम्बन्धविशेषावच्छिन्नत्वमपि ध्वंसीयप्रतियोगितायामुपेयं स्यात्, 'कपाले घटध्वंसः' इत्यत्र प्रतियोगितामात्रेणैव घटस्य ध्वंसेऽन्वयात्, 'अन्तरा श्यामे घटे रक्तं नास्ति' इति प्रतीतौ च सामयिकरक्ता-

त्यन्ताभावस्यैव विषयत्वात्, रक्तध्वंसस्य रक्तप्रागभावस्य वा 'तत्र रक्तं नास्ति' इति प्रतीतिविषयत्वे तु यत्र पूर्वं रक्तरूपं मध्ये रक्ततररूपं पश्चाद्रक्ततमरूपं तत्र मध्ये रक्ततादशायामपि पूर्वरक्तध्वंसस्य भाविरक्तप्रागभावस्य वा सत्त्वाद् 'रक्तं रूपं नास्ति' इति प्रत्ययापत्तेः; न च ध्वंस-प्रागभावयो रक्तरूपप्रतियोगिकयो रक्तरूप-सामानाधिकरण्यानवच्छेदककालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं रक्त-रूपसामानाधिकरण्यावच्छेदककालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वाभाव इत्येवमव्याप्यवृत्तिरक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनाद् रक्ततादशायां ध्वंसादे रक्तत्वावच्छिन्नप्रतियोगिताकत्वाभावान्न रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसावगाहि 'रक्तं रूपं नास्ति' इति प्रत्यय इति वाच्यम्, अनन्तध्वंसप्रागभावेषु रक्तत्वा-वच्छिन्नप्रतियोगिताकत्व-सदव्याप्यवृत्तित्वयोः 'रक्तं नास्ति' इत्यादिप्रतीता-वनन्तध्वंसादिविषयकत्वस्य च कल्पनामपेक्ष्य सर्वदा रक्तरूपशून्यघटादौ क्लृप्तस्य रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्यैवान्तरा श्यामादौ सामयिकसम्बन्धस्य युक्तत्वात्। इत्थं च ध्वंसीयप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वाभावव्यवस्थितौ "तद्भावाऽव्ययं नित्यम्' [तत्त्वार्थसूत्रे ५-३०] इत्यस्य ध्वंसप्रतियोगितानवच्छेदक-रूपवन्नित्यमित्यर्थः। ध्वंसप्रतियोगितावच्छेदकरूपवच्चानित्यमिति नोभयासमावेशः, न चाप्रसिद्धिः; इत्यपि न सुष्ठु समाधानम्। अथ वृक्षे शाखा-मूलाद्यवच्छेदेन कपिसंयोग-तदभाववदेकत्रापि द्रव्यतया पर्यायतया च नित्यानित्यत्वमुपपत्स्यते, गुञ्जाफलादौ श्यामता-रक्ततयोर्विभिन्नदेशावच्छेदरूपायाः खण्डशो व्याप्ते-र्वैलक्षण्येनैव नित्यत्वा-ऽनित्यत्वान्योन्यव्याप्तिव्यवस्थितेर्विभिन्नदेशानवच्छिन्नापृथ-ग्भावस्यैवान्योन्यव्याप्तिपदार्थत्वादिति चेत् ?, न-आश्रयन्यूनवृत्तेरेवावच्छेदकत्वेन घटत्वस्य यावद् घटवर्तिनोऽनित्यत्वाश्रयघटन्यूनवृत्तित्वाभावेन यावद्द्रव्यवर्तिनो द्रव्यत्वस्य नित्यत्वाश्रयद्रव्यन्यूनवृत्तित्वाभावेन च घटत्वेन घटेऽनित्यताया द्रव्य-त्वेन च नित्यताया असम्भवात्, न हि भवति शाखायां शाखात्वावच्छेदेन कपि-संयोगाभावः, वृक्षत्वावच्छेदेन च कपिसंयोग इति। किञ्च नित्यत्वा-ऽनित्यत्वयो-रेकत्रावच्छेदकभेदेन स्वीकारे एकावच्छेदेन यत्र नित्यत्वज्ञानं तत्रैवान्यावच्छेदेन तदानीमेव तस्यैव पुंसोऽनित्यत्वज्ञानमपि भवतीति तद्धर्मिकानित्यत्वादिज्ञानं प्रति अव्याप्यवृत्तित्वज्ञानानास्कन्दिततद्धर्मिकनित्यत्वादिज्ञानस्य प्रतिबन्धकत्वं वाच्य-मिति गौरवमिति।

अत्र स्याद्वादनिष्णाता वयं ब्रूमः—'प्रत्यभिज्ञैव वस्तुनो नित्यत्वा-ऽनित्यत्वे

मानम्, पूर्वोत्तरतत्तेदन्तास्वभावभेदानुविद्धस्यैवोर्ध्वतासामान्याख्याभेदस्य तया विषयीकरणात्; न च तत्तेदन्तोभयनिरूपितैकस्वभावमेव तत्, भिन्नकाले तत्तेदन्तोभयनिरूपितैकस्वभावाभावादेव च तदननुभव इति साम्प्रतम्, 'इदानीं तत्तास्वभावमिदम्' इति व्यवहारप्रामाण्यप्रसङ्गात्; किञ्च विशिष्टात्यन्ताभाववद् विशिष्टध्वंसोऽपि परेणाकामेनापि स्वीकर्तव्यः, 'शिखी विनष्टः' इति प्रतीतेः शिखाविशिष्टपुरुषध्वंसावगाहिन्या विशिष्टध्वंसाभ्युपगममन्तरेणानुपपत्तेः; न च विशेष्यस्य पुरुषस्य नाशसामग्र्यभावाच्छिखाविशिष्टपुरुषनाशानुपपत्तिः, यथा दण्डसत्त्वे पुरुषात्यन्ताभावकृतो दण्डविशिष्टपुरुषात्यन्ताभावो विशेष्यात्यन्ताभावप्रयुक्तविशिष्टात्यन्ताभावः, पुरुषसत्त्वेऽपि दण्डात्यन्ताभावप्रयुक्तो दण्डविशिष्टपुरुषात्यन्ताभावो विशिष्टात्यन्ताभावः, यत्र च दण्डोऽपि नास्ति पुरुषोऽपि नास्ति तत्र दण्डाभाव-पुरुषाभावोभयप्रयुक्तो दण्डविशिष्टपुरुषात्यन्ताभावो विशेषणाभाव-विशेष्याभावोभयप्रयुक्तो विशिष्टात्यन्ताभावः, तथा विशिष्टनाशोऽपि त्रिधेति विशेषणनाशकृतस्य विशेष्यनाशकृतस्य विशेषणनाश-विशेष्यनाशोभयकृतस्य च विशिष्टनाशस्य सम्भवात्, विशेषणनाशादेव परम्परासम्बन्धेन तत्प्रतीत्युपपत्त्या विशिष्टनाशासिद्धौ च स्वपर्याप्त्यधिकरणवत्त्वसम्बन्धावच्छिन्नद्वित्वनिष्ठप्रतियोगिताकाभावादिनैव 'द्वौ न स्तः' इत्यादिप्रतीत्युपपत्तौ द्वित्वावच्छिन्नाभावादेरप्युच्छेदप्रसङ्गः; विशिष्टध्वंससिद्धौ च क्षणविशिष्टध्वंसात् क्षणनाशप्रयुक्तादस्थैर्यसम्वलितं स्थैर्यं सिद्धम्, विशिष्टसत्तात्वावच्छिन्ननिरूपता निरूपिताधिकरणताऽतिरिक्ता, तस्या गुण-कर्मान्यत्वविशिष्टसत्तावानिति प्रतीतिविषयीभूताया गुणेऽभावान्न गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रमात्मिका प्रतीतिरिति, विशिष्टसत्त्व-शुद्धसत्त्वयोरैक्यमभ्युपगच्छतो मते यद्यपि नोक्तदिशाऽस्थैर्यसम्वलितं स्थैर्यं, तथापि विशिष्टसत्तायाः शुद्धसत्तातो व्यतिरिक्तत्वमभ्युपगच्छतः सार्वभौमस्य मते सुतरामेतत् प्रसिध्यति; न च तन्मते विशिष्टसत्तानिश्चयेऽपि सत्तासन्देहापत्तिः, विशिष्टशुद्धानतिरिक्तत्ववादिनोऽपि विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वे सति विशिष्टसत्तात्वावच्छिन्नप्रकारताकज्ञानलक्षणस्य विशिष्टसत्तानिश्चयस्य सत्तात्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वे सत्तात्वावच्छिन्नप्रकारताकज्ञानत्वलक्षणसत्तानिश्चयत्वशून्यतया सत्तानिश्चयत्वेन रूपेण तस्य सत्तासंदेहं प्रति प्रतिबन्धकत्वासम्भवे विशिष्टसत्तानिश्चयत्वेन पृथक् प्रतिबन्धकताया आवश्यकत्वात्; न चानन्तविशिष्टपदार्थकल्पनापत्तिः, परस्यापि विशिष्टधर्मावच्छिन्ननिरूपतानिरूपिताधिकरणता-

नन्त्यकल्पनस्यावश्यकत्वात्, विना च विशिष्टातिरेकं शिखरविशिष्टे पर्वते न वह्निरिति धीर्न सुघटा । वस्तुतः क्षणानामिदानीमिति धीव्यपदेशनियामकः सम्बन्धविशेषः क्षणेषु क्षणपरिणतेषु च द्वेधा परेण वक्तव्यः, स्वस्मिन्नपि तथा धीव्यपदेशप्रवृत्तेः, तथा चान्तरङ्गत्वात् तादात्म्यनियत एवेदानीमिति धीव्यपदेशनियामकः सम्बन्धविशेष उचितः, इति सिद्धं क्षणरूपतया जगतः पर्यायतया क्षरभङ्गुरत्वम्, तदुक्तं ग्रन्थकृतैव धर्मसंग्रहण्याम्–"जं वत्तणादिरूवो कालो दव्वस्स चेव पज्जाओ" इति, "यद् वर्तनादिरूपः कालो द्रव्यस्यैव पर्यायः" इति संस्कृतम्, "किमेव भन्ते ! कालो त्ति पवुज्जइ ? गोमया ! जीवा चेव, अजीवा चेव" इति, "क एष भगवन् ! काल इति प्रोच्यते ?, गौतम ! जीवश्चैव, अजीवश्चैव" इति संस्कृतम्, इति पारमर्षमप्येतदर्थानुयाति; यस्मिन्नेव क्षणे घटस्तस्मिन्नेव पट इति शब्दमात्रमिति न साधारणातिरिक्तक्षणसाधकम् ।

प्रतियन्ति च लोका अपि नित्यानित्यत्वं वस्तुनः–"घटरूपेण मृद् द्रव्यं नष्टं, मृद्रूपेण न नष्टम्' इति, 'घटरूपेण घटो नष्टः, न तु मृद्रूपेण' इत्यादि, अत्र च यथा 'दण्डत्वेन दण्डस्य घटहेतुत्वं न तु द्रव्यत्वेन' इत्यत्रावच्छिन्नत्वस्य तृतीयार्थत्वमाश्रित्य दण्डनिष्ठं घटहेतुत्वं दण्डत्वावच्छिन्नं, न तु द्रव्यत्वावच्छिन्नमिति बोधः, तथा घटरूपावच्छिन्ननाशप्रतियोगितावान् घटः, न तु मृद्रूपावच्छिन्ननाशप्रतियोगितावान्, अर्थाद् घटनिष्ठं नाशप्रतियोगित्वं घटरूपावच्छिन्नं, न तु मृद्रूपावच्छिन्नम्, दण्डनिष्ठघटहेतुत्वाश्रयदण्डन्यूनवृत्तित्वाभावेऽपि दण्डत्वस्य दण्डनिष्ठघटहेतुत्वावच्छेदकत्वं दण्डनिष्ठघटहेतुत्वाभावाश्रयदण्डन्यूनवृत्तित्वाभावेऽपि द्रव्यत्वस्य दण्डनिष्ठहेतुत्वाभावावच्छेदकत्वमिति स्वाश्रयन्यूनवृत्तेरेवावच्छेदकत्वमिति नियमाभावेन घटनिष्ठनाशप्रतियोगित्वाश्रयघटन्यूनवृत्तित्वाभावेऽपि घटरूपस्य घटत्वात्मकस्य घटनिष्ठनाशप्रतियोगितावच्छेदकत्वम्, घटनिष्ठनाशप्रतियोगित्वाभावाश्रयघटन्यूनवृत्तित्वाभावेऽपि मृद्रूपस्य घटनिष्ठनाशप्रतियोगित्वाभावावच्छेदकत्वं च सम्भवत्येवेति । अथ अन्यथा सिद्धिनिरूपकतानवच्छेदकनियतपूर्ववृत्तितावच्छेदकरूपवत्वं हेतुत्वं नाव्याप्यवृत्ति, इति दण्डस्य घटहेतुत्वमिति दण्डवृत्तिनिरुक्तघटहेतुत्वं, दण्डत्वेनेति च दण्डत्वाभिन्नम्, न तु द्रव्यत्वेनेति द्रव्यत्वाभेदाभावो भासत इति चेत् ?, न–विशिष्टरूपेऽविशिष्टरूपाभेदान्वयस्य निराकाङ्क्षत्वेन दण्डवृत्तित्वविशिष्टान्यथासिद्धिनिरूपकतानवच्छेदक-घटनियतपूर्ववर्तितावच्छेदकदण्डत्वे दण्डत्वाभेदान्वयासम्भवात्, विशिष्टरूपेऽविशिष्ट-

रूपाभेदान्वयस्य साकाङ्क्षत्वे तु दण्डत्वं घटहेतुत्वमित्यस्यापि प्रसङ्गात्; अथाव-च्छिन्नत्वस्य तृतीयार्थत्वेऽप्येकवाक्यजन्यबोधस्य वाक्यभेदापत्तिभियैकविशेष्यकत्व-मिति तदनुरोधान्न द्रव्यत्वेनेत्यत्र द्रव्यत्वावच्छिन्नत्वाभाव एवार्थः, न हि दण्ड-त्वेन दण्डो घटहेतुर्न द्रव्यत्वेनेत्यत्र दण्डवृत्तिघटहेतुत्वं दण्डत्वावच्छिन्नम्, दण्ड-वृत्तिर्घटहेतुत्वाभावश्च द्रव्यत्वावच्छिन्न इति भिन्नाश्रयो बोधोऽनुभूयते, किन्तु दण्डवृत्तिघटहेतुत्वं दण्डत्वावच्छिन्नं द्रव्यत्वानवच्छिन्नं चेत्येकाश्रय एवेति चेत्?, सत्यम्–तात्पर्यभेदेनोभयथाऽपि बोधदर्शनात्, मृद्रूपेण घटो न नष्ट इत्यत्रापि कदाचित् मृद्रूपानवच्छिन्ननष्टत्वबोधवद् मृद्रूपावच्छिन्ननष्टत्वाभावबोधात्, नाना-पर्यायत्वाद् वस्तुनः, यदि च तत्र तदभावावच्छेदकत्वालम्बनः प्रत्ययस्तत्र तदव-च्छेदकत्वाभावावलम्बनतयैवान्यथासिद्धः क्रियते, तदा संयोगाभावोऽव्याप्यवृत्तिर्न स्यात्, 'मूले वृक्षे न कपिसंयोगः' इत्यस्यापि मूले वृक्षनिष्ठकपिसंयोगावच्छेदक-त्वाभावविषयतयैवोपपत्तेः । अथ 'कपिसंयोगाभावो न वृक्षवृत्तिः' इति बाधका-भावाद् मूलस्य वृक्षवृत्तिकपिसंयोगाभावावच्छेदकत्वं, 'नष्टत्वाभावो न घटवृत्तिः' इति बाधकसत्त्वाच्च न घटवृत्तिनष्टत्वाभावावच्छेदकत्वं मृद्रूपस्येति चेत्?, न–नष्टत्वाभावे घटवृत्तित्वाभावस्याप्यव्याप्यवृत्तित्वेन 'नष्टत्वाभावो न घटवृत्तिः' इति धियो 'नष्टत्वाभावो घटवृत्तिः' इति बुद्धेरप्रतिबन्धकत्वात्, यत्तु–"वृत्ति-त्वस्य नाव्याप्यवृत्तित्वम्, 'अग्रे वृक्षे न कपिसंयोगः' इत्यत्राग्रावच्छिन्नकपिसंयो-गाभावे वृक्षवृत्तित्वस्य, 'गुणान्यत्वविशिष्टसत्ता न गुणवृत्तिः' इत्यत्र गुणान्यत्व-विशिष्टसत्ताभावे गुणवृत्तित्वस्य, 'घट-पटत्वोभयं न घटवृत्तिः' इत्यत्र च घटत्व-पटत्वोभयाभावे घटवृत्तित्वस्य विषयत्वात्" इति, तत्तु 'मूले वृक्षे कपिसंयोगो न शाखायां' 'द्रव्ये गुणान्यत्वविशिष्टसत्ता न गुणे' इत्यादिधियामेकविशेष्यकत्वानु-रोधान्न शोभते, यतो मूलावच्छिन्नकपिसंयोगे वृक्षवृत्तित्वस्य शाखावच्छिन्नकपि-संयोगाभावे वृक्षवृत्तित्वस्य प्रतीतौ कपिसंयोगविशेष्यकत्व-कपिसंयोगाभावविशे-ष्यकत्वत एकविशेष्यकत्वपरित्यागः, गुणान्यत्वविशिष्टसत्तायां द्रव्यवृत्तित्वस्य गुणान्यत्वविशिष्टसत्ताभावे गुणवृत्तित्वस्य च प्रतीतौ विशिष्टसत्ताविशेष्यकत्व-विशिष्टसत्ताभावविशेष्यकत्वत एकविशेष्यकत्वपरित्यागश्चेति, नन्वेवं 'वृक्षे पटे न कपिसंयोगः' इत्यपि स्यादिति चेत्?, न–देशनिष्ठावच्छेदकत्वस्य पटेऽभावात्, इतरावच्छेदकत्वविवक्षायां वृक्षवृत्तिकपिसंयोगाभावावच्छेदकत्वस्य पटे सत्त्वेनेष्ट-त्वादिति दिक् । यत्तु–'एवं नित्यत्वादिज्ञानस्यानित्यत्वादिधीप्रतिबन्धकतायामव्या-

प्यवृत्तित्वज्ञानाद्युत्तेजकत्वं वाच्यमिति गौरवम्' इत्युक्तम्, तदपि नित्यत्वानित्यत्वयोर्वास्तवेऽवच्छिन्नत्वे न दोषायेति । एवमनुभवसिद्धं नित्यानित्यैकरूपं वस्तु प्रतिक्षिपन् विरोधभीतो वैशेषिकश्चित्रपटे चित्रैकरूपमपि कथमभ्युपेयात्?, इति सम्प्रदायः, तदाहुः–

"चित्रमेकमनेकं च, रूपं प्रामाणिकं वदन् ।
यौगो वैशेषिको वाऽपि, नानेकान्तं प्रतिक्षिपेत् ॥ १ ॥" इति,
[ हेमचन्द्राचार्यविरचिते वीतरागस्तोत्रेऽष्टमप्रकाशे श्लो० ९ ]

अत्र नव्याः–चित्रपटेऽव्याप्यवृत्तीत्येव नील-पीतादीनि नानारूपाणि, 'एकं रूपम्' इति प्रतीतेः 'एको धान्यराशिः' इतिवत् समूहैकत्वविषयकत्वात्, स विषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वविरोधस्त्वप्रामाणिक एव, अत एव—

"लोहितो यस्तु वर्णेन, मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां, स नीलो वृष उच्यते ॥ १ ॥"

इत्यादिकमुपपद्यते । तत्र चित्रैकरूपकल्पने तु गौरवम्, तथाहि–चित्रत्वावच्छिन्नं प्रति न नीलत्वादिना हेतुत्वम्, नीलाद्यभावेऽपि पीतरक्तावयवादिना चित्रावयव्युत्पादेन व्यभिचारात्, नापि रूपत्वेन नीलमात्रावयवारब्धेऽप्यवयविनि चित्ररूपोत्पत्त्यापत्तेः, अथ चित्रत्वावच्छिन्नं प्रति यथा रूपत्वेन हेतुत्वं तथा नीलेतररूपत्व-पीतेतररूपत्वादिनापि हेतुत्वं, तथा च नीलमात्रारब्धेऽवयविनि तदवयवे नीलेतररूपाभावान्न चित्ररूपापत्तिः, यत्रैकावयवे नीलम्, अपरत्र चावयवे पीतजनकाग्निसंयोगः, ताभ्यामवयविनि यदि चित्ररूपोत्पत्तिः स्वीक्रियेत, तदाऽवयवे नीलेतररूपाभावाद् व्यभिचारः स्यात्, न च तथा स्वीक्रियते, किन्तु पीतजनकाग्निसंयोगेनापरत्रावयवे पीतरूपोत्पत्त्यनन्तरमेवावयविनि नील-पीताभ्यां चित्ररूपोत्पत्तिस्वीकारान्न व्यभिचारः; न च नीलेतररूपत्वादिभिर्नीलेतररूपादीनां षण्णां चित्रत्वावच्छिन्नं प्रति कारणत्वापेक्षया नीलाभावादिषट्कस्यैव समवायेन विजातीयचित्रं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन हेतुत्वमस्त्विति वाच्यम्, नील-पीतोभयकपालारब्धे घटे पाकनाशितावयवपीतस्वचित्रेऽवयवे व्याप्यवृत्तिनीलोत्पत्तिकाले चित्रोत्पत्त्यापत्तेः, तत्र घटे पाकनाशितपीतं नीलोत्पत्त्यव्यवहितपूर्वक्षणे नीरूपं कपालमुपादाय स्वाश्रयसमवेतत्वसम्बन्धेन नीलाभावादिषट्कस्य सत्वात्, पाकनाशितस्वचित्रत्वाच्च समवायसम्बन्धेन रूपत्वावच्छिन्नं प्रति समवायसम्बन्धाव-

च्छिन्नरूपत्वावच्छिन्नप्रतियोगिताकाभावस्य प्रतिबन्धकाभावविधया क्लृप्तकारणताकस्यापि सत्त्वात्, नीलेतररूपादेः कारणत्वे तु तस्य तत्राभावाच्चित्रोत्पत्त्यापत्त्यसम्भवात्; न च कार्यसहभावेन नीलाभावादीनां तद्धेतुत्वादवयवे व्याप्यवृत्तिनीलोत्पत्तिकाले कपालद्वयेऽपि नीलरूपस्य सद्भावेन तदानीं स्वाश्रयसमवेतत्वसम्बन्धेन घटे नीलाभावस्याभावान्न चित्रोत्पत्त्यापत्तिरिति वाच्यम्, नील-पीत-श्वेतत्रितयारब्धे घटे पाकेन पीत-श्वेतयोः क्रमेण नाशे श्वेतनाशकाले चित्रोत्पत्त्यापत्तेः, नील-नीलजनकतेजस्संयोगान्यतरत्वावच्छिन्नाभावत्वादिना हेतुत्वे तु गौरवम्, संयोगस्याव्याप्यवृत्तित्वेन प्रतियोगिव्यधिकरणत्वनिवेशे च सुतराम्। न चानवच्छिन्नविशेषणतया प्रतियोगिव्यधिकरणत्वविशेषितोक्ताभावहेतुत्वसम्भवः, प्रतियोगिकोटावुदासीनप्रवेशाप्रवेशाभ्यामविनिगमादिति चेत्?, न—पाकमात्रादपि चित्रोत्पत्त्या तत्र नीलेतररूपादीनामभावेन व्यभिचारेण चित्रत्वावच्छिन्नं प्रति नीलेतररूपत्वादिना कारणत्वासम्भवात्। अथ रूपजन्यतावच्छेदकं विजातीयचित्रत्वं, अग्निसंयोगजन्यतावच्छेदकं चापरम्, अग्निसंयोगजचित्रं प्रत्यवच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताका नीलजनकाग्निसंयोगादेरभावा उक्तप्रत्यासत्त्या हेतवः, रूपजनकविजातीयाग्निसंयोगोऽपि, इति न वाय्वादौ तदापत्तिः, वाय्वादाववच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकनीलजनकाग्निसंयोगाद्यभावानां सत्त्वेऽपि रूपजनकविजातीयाग्निसंयोगस्याभावात्; अस्तु वा तेजस्संयोगमात्रजन्ये विजातीयचित्रे विजातीयतेजःसंयोगस्य पाक-रूपोभयजन्ये विजातीयचित्रे चोभयोरेव हेतुत्वम्, रूपमात्रजातिरिक्त एव वा विजातीयतेजस्संयोगो हेतुः, फलबलेन वैजात्यकल्पनात्, अग्निसंयोगमात्रजातिरिक्ते रूपहेतुताया वक्तुमशक्यत्वात्, नीलेतरादिसमाजाभावात्, नीलाभावादि हेतुतावादिन एवात्र वैयग्र्यात्, पाकजचित्रस्वीकारे तस्यापि चित्रत्वरूपकार्यतावच्छेदकाक्रान्तस्य रूपाभावेऽपि भावेन व्यभिचारेण चित्रत्वावच्छिन्नं प्रति रूपत्वादिना करणत्वं न सम्भवतीति चित्रत्वावान्तरजात्यवच्छिन्नं प्रति विजातीयतेजःसंयोगत्वादिना कारणत्वमित्यादिप्रक्रियाऽऽश्रयणीया स्यात्, किन्तु पाकजचित्रे मानाभावः, तथा च रूपत्वादिना चित्रत्वावच्छिन्नं प्रति कारणत्वेऽपि न कश्चिद् दोषः, पाकस्थले पाकादवयवे नानारूपोत्पत्त्यनन्तरमेवावयविनि चित्रस्वीकारे लाघवात्; न चावयविनि चित्रजनकत्वाभिमतस्य पाकस्यावयवनीलपीतादिजनकत्वे नील-पीतादिजनकतावच्छेदकजातिसाङ्कर्यम्, नीलजनकतावच्छेदकजात्यभाववति पीतजनकपाके पीतजनकतावच्छेदक-

जातेः पीतजनकतावच्छेदकजात्यभाववर्ति नीलजनकपाके नीलजनकतावच्छेदक-जातेश्च भावेन परस्परात्यन्ताभावसामानाधिकरण्यस्य नील-पीतोभयजनकपाके तयोः सामानाधिकरण्यादिति वाच्यम्, पाकनानात्वस्वीकारेणावयवयोर्नील-पीतोभयोत्पादस्थले नीलजनकपाकेन नीलस्य तदन्यपीतजनकपाकेन पीतस्योत्पादेन साङ्कर्याभावादिति चेत् ?, न–चित्रस्थले नीलादिसामग्रीसत्त्वान्नीलाद्यापत्तिवारणाय नीलादौ नीलेतररूपादेः प्रतिबन्धकत्वकल्पने गौरवात्' इत्याहुः;

तन्नेति सम्प्रदायानुसारिणः, अव्याप्यवृत्तिनीलादिकल्पन एव गौरवात्, तथाहि–अवच्छेदकतासम्बन्धेन नीलादिकं प्रति समवायसम्बन्धेन नीलेतररूपादीनां प्रतिबन्धकत्वं वाच्यम्, अन्यथा पीतावयवावच्छेदेन नीलोत्पत्तिप्रसङ्गात्; न च नीलस्य स्वाश्रयावच्छेदेन नीलजनकत्वस्वाभाव्यादेव न तदापत्तिरिति वाच्यम्, विनैतादृशप्रतिबध्य-प्रतिबन्धकभावं तथा स्वाभाव्यानिर्वाहात्। ननु समवायेन नीलं जायत एव पीतावयवावच्छेदेनेत्यत्र चापादकाभाव इति चेत्? न– समवायस्येवावच्छेदकताया अपि कारणनियम्यत्वात्, एवं च नीलादौ नीलेतररूपादीनां पीतेतररूपादौ वा नीलादीनां प्रतिबन्धकत्वे विनिगमकाभावः, मम तु नीलेतररूपादौ नीलादीनां न प्रतिबन्धकत्वम्, नील-पीतारब्धे नीरूपत्वप्रसङ्गस्य बाधकत्वात्, अथ ममापि नीलत्वादिकमेव प्रतिबध्यतावच्छेदकं न तु पीतेतररूपत्वादिकम्, गौरवात्; न च नीलत्वेन प्रतिबन्धकत्वं न तु नीलेतरत्वेन, गौरवात्, इत्येव किं न स्यादिति वाच्यम्, प्रतिबन्धकतावच्छेदकगौरवस्यादोषत्वात्; अस्तु वाऽवच्छेदकतया नीलादौ समवायेन नीलादीनामेव हेतुत्वम्; न च नानारूपवत्कपालारब्धघटनीलस्य तत्कपालावच्छेदेनोत्पत्तिप्रसङ्गः, तत्कपाले समवायेन नीलस्य सत्त्वादिति वाच्यम्, समवायेन केवलनीलत्वादिनैवावच्छेदकतया नीलादिकं प्रति हेतुत्वात्, समवायेन नीलादौ च स्वसमवायिसमवेतत्वसम्बन्धेन नीलादीनां हेतुत्वम्, व्याप्यवृत्तिनीलस्थलेऽव्याप्यवृत्तित्ववारणाय चावच्छेदकतया नीलादौ स्वसमवायिसमवेतद्रव्यसमवायित्वसम्बन्धेन नीलेतररूपादीनां हेतुत्वम्, यत्रावयवद्वये नीलमेव रूपं तत्र नीलेतररूपं निरुक्तसम्बन्धेन नास्त्येव, यत्र तु एकस्मिन्नवयवे नीलमन्यस्मिन्नवयवे पीतं तत्र नीलेतररूपस्य पीतस्य स्वसमवायी पीतावयवस्तत्समवेतमवयविद्रव्यं तत्समवायित्वं नीलावयवे समस्तीति तेन सम्बन्धेन नीलेतररूपस्य नीलावयवे सत्त्वात् तत्रावच्छेदकतयाऽवयविनीलस्योत्पत्तिरित्यव्याप्यवृत्तित्वमित्यव्याप्यवृत्तिनीलादिनानारूपाणामवयविन्यभ्युपगन्तुर्मम न-

व्यनैयायिकस्य मते समवायेन नीलादिकं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलादीनां कारणत्वमिति षट् कार्यकारणभावाः, अवच्छेदकतासम्बन्धेन नीलादिकं प्रति समवायेन प्रतिबन्धकीभूतानां नीलेतररूपादीनामभावाः कारणानीति षट् कार्यकारणभावाः, अवच्छेदकतया नीलादौ स्वसमवायिसमवेतद्रव्यसमवायित्वसम्बन्धेन नीलेतररूपादीनां हेतुत्वमिति षट् कार्यकारणभावाः, तेषां सङ्कलनेऽष्टादशकार्यकारणभावा भवन्ति, चित्ररूपवादिनस्तव मतेऽपि चित्ररूपेऽप्येतावन्त एव, चित्ररूपे नीलेतररूपादिषट्कस्य नीलादौ नीलादिषट्कस्य हेतुत्वात्, नीलादौ नीलेतरादिषट्कस्य प्रतिबन्धकत्वाच्चेति नाधिक्यम् । वस्तुतोऽव्याप्यवृत्तिनीलाद्यभ्युपगन्तुर्मम मतेऽवच्छेदकतया नीलादावुक्तसम्बन्धेन नीलेतररूपविशिष्टनीलत्वादिनैव हेतुत्वम्; न च नीलेतररूपत्वाद्यवच्छिन्नं प्रति नीलविशिष्टनीलेतररूपत्वादिना हेतुत्वे विनिगमकाभावः, नीलत्वापेक्षया नीलेतररूपत्वस्य गुरुत्वात् । एतेन स्वसमवायिसमवेतद्रव्यसमवायित्वसम्बन्धेन नीलेतररूपादेरवच्छेदकतया नीलादिकं प्रति हेतुत्वं, नीलादीनां नीलेतररूपादिकं प्रति वा, इति विनिगमनाविरहाद् द्वादश कार्यकारणभावापत्तिः, इत्यपास्तम्, इत्थं चातिनिष्कर्षादस्माकमव्याप्यवृत्तिरूपवादिनां द्वादशैव कार्यकारणभावाः, चित्ररूपवादिनस्तत्र त्वष्टादशेति चेत्? न–ममापि नीलादौ नीलेतररूपादिप्रतिबन्धकत्वेनैव शुक्लावयवमात्रारब्धे नीलाद्यनुत्पत्तिनिर्वाहात्, नीलादौ नीलादिहेतुत्वाकल्पनात्, समवायसम्बन्धेन रूपं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन रूपं कारणमिति सामान्यकार्यकारणभावबलादवयवशुक्लरूपादवयविनि जायमानं रूपं नीलेतररूपादिप्रतिबन्धकसद्भावान्न नीलादिस्वरूपं, किन्तु शुक्लमेवेति रूपप्रतिनियमसम्भवात्, इति चित्ररूपवादिमतेऽपि द्वादशैव कार्यकारणभावा इति कार्यकारणभावसंख्यासाम्यात्, मम त्ववयविनि नानारूपवदवयवारब्धे एकमेव चित्ररूपमिति तदेकप्रागभावध्वंसावेव, तदपेक्षया तत्राव्याप्यवृत्तिनानारूप-तत्प्रागभाव-ध्वंसादिकल्पनागौरवस्य च तवाधिक्यात् ।

किञ्च, अव्याप्यवृत्तिरूपपक्षेऽवच्छेदकतासम्बन्धेन रूपे उत्पन्ने पुनस्तेनैव सम्बन्धेनावयवे रूपोत्पत्तिवारणायावच्छेदकतासम्बन्धेन रूपं प्रत्यवच्छेदकतासम्बन्धेन रूपं प्रतिबन्धकं कल्पनीयमिति गौरवम्; न चावयविनि समवायेनोत्पद्यमानमेवावयवेऽवच्छेदकतयोत्पत्तुमर्हतीत्यवयविनि रूपस्य प्रतिबन्धकस्य सत्त्वेन रूपसामग्र्यभावादेव नावयवेऽवच्छेदकतया तदा रूपोत्पत्त्यापत्तिरिति वाच्यम्, एवं

ह्यवयविनिष्ठरूपाभावोऽवच्छेदकतासम्बन्धेन रूपं प्रति हेतुर्वाच्यः, तथा च नानारूपवत् कपालरब्धघटस्य नीलरूपादेर्नीलकपालिकावच्छेदेनानुत्पत्तिप्रसङ्गात्, तदवयविनि कपाले रूपसत्त्वात्, अपि च नीलपीतवत्यग्निसंयोगात् कपालनील-नाशात् तदवच्छेदेन रक्तं न स्यात्, समवायेन रूपं प्रति समवायेन रूपस्य प्रति-बन्धकत्वात्, तदवच्छिन्नरूपे तदवच्छिन्नरूपस्य प्रतिबन्धकत्वकल्पने चातिगौरवम्, अथावच्छिन्ननीलादौ नीलाभावादिषट्कमवयवगतमवयविगतं च हेतुः, रक्त-नीला-रब्धे रक्तनाशकपाकेन व्याप्यवृत्तिनीलोत्पत्तिदशायां चावयविनि न नीलाभाव इति न तत्रावच्छिन्ननीलोत्पत्तिः, नीलमात्रारब्धे पाकेन क्वचिद् रक्तरूपोत्पत्तौ च प्राक्तननीलनाशादेवावच्छिन्ननीलोत्पत्तिरिति चेत्?, न—नील-श्वेताद्यारब्धे श्वेता-द्यवच्छेदेन नीलजनकपाके सति प्राक्तननीलनाशेन तत्तदवच्छिन्ननानानीलकल्प-नापेक्षयैकचित्रकल्पनाया एव लघुत्वात् ।

अथ व्याप्यवृत्तिरूपस्याप्यवच्छेदकस्वीकारादवच्छेदकतया नीलादिकं प्रत्येव समवायेन नीलादेर्हेतुत्वम्, न च समवायेन नीलं घटेऽपि वर्तत इति तद्रूपकारण-बलाद् घटेऽप्यवच्छेदकतया नीलाद्यापत्तिः, अवच्छेदकतासम्बन्धेन नीलादिकं प्रत्यवयवनीलत्वादिना द्रव्यविशिष्टनीलत्वादिना वा समवायेन हेतुत्वात्, द्रव्य-वैशिष्ट्यं च स्वसमवायिसमवेतत्वसम्बन्धेन, घटश्च न कस्याप्यवयवो न वा कस्यापि द्रव्यस्य समवायीति तन्नीलादेर्निरुक्तकारणतावच्छेदकधर्मानाक्रान्तत्वान्न ततोऽव-च्छेदकतया नीलाद्यापत्तिः; न च नीलमात्र-पीतमात्रकपालिकाद्वयारब्धनीलपीत-कपालेऽवच्छेदकतया नीलाद्यापत्तिः, कपालस्य घटावयवत्वेन घटात्मकद्रव्यसम-वायित्वेन तन्नीलादेर्निरुक्तकारणतावच्छेदकधर्माक्रान्तत्वादिति वाच्यम्, नीलकपा-लिकावच्छिन्नकपालावच्छेदेन नीलस्य पीतकपालिकावच्छिन्नकपालावच्छेदेन पीतस्य चोत्पत्तेरिष्टत्वात्; अस्तु वाऽवच्छेदकतया नीलादौ समवायेन नीलेतररूपादेरेव विरोधित्वं, कपाले चैकस्मिन् नील-पीतरूपद्वयवति समवायेन नीलेतररूपस्य प्रति-बन्धकस्य सत्त्वान्नावच्छेदकतया नीलोत्पत्त्यापत्तिरिति चेत्?; न—नीलादौ नीले-तररूपादिप्रतिबन्धकतयैवोपपत्तौ तत्र नीलादिहेतुतायां मानाभावेन नानारूपवदव-यवारब्धे चित्ररूपस्यैव प्रामाणिकत्वात्, व्याप्यवृत्तेरवच्छेदकायोगात्, नीलेतर-रूपादौ नीलादेः प्रतिबन्धकत्वेऽविनिगमाच्च; यदि च स्वाश्रयसम्बन्धेन नीलं प्रति स्वव्यापकसमवायेन नीलरूपं हेतुरुपेयते, तथा च नीलकपालिकामात्रारब्धकपाले उत्पद्यमानं नीलं स्वाश्रयसम्बन्धेन नीलकपालिकायामप्युत्पद्यते, तत्र स्वव्यापक-

समवायेन नीलकपालिकागतं नीलरूपं हेतुरस्तीति नील-पीताद्यारब्धघटस्थले घटे यदि नीलमुत्पद्यते तर्हि तत् स्वाश्रयसम्बन्धेन पीतकपालेऽप्युत्पद्येत, न च तत्र स्वव्यापकसमवायेन नीलरूपं समस्ति व्यभिचारादिति निरुक्तसम्बन्धेन हेत्वभावादेव न तत्र नीलोत्पत्तिरिति विभाव्यते, तदा नीलं प्रति नीलेतररूपादेः प्रतिबन्धकत्वं चित्ररूपवादिना न कल्पनीयमिति लाघवम्; एवं च 'सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताको नीलेतररूपाभावोऽवच्छेदकतासम्बन्धेन नीलं प्रत्यवच्छेदकतासम्बन्धेन हेतुः, नीलमात्र-पीतमात्रकपालिकाद्वयारब्धनील-पीतकपाले सामानाधिकरण्यसम्बन्धेन नीलेतररूपस्य पीतस्य पीतकपालिकावच्छेदेन सत्त्वेऽपि नीलकपालिकावच्छेदेन तदभावसत्त्वान्नीलकपालिकावच्छेदेनावच्छेदकतया नीलोत्पत्तिः सम्भवति' इत्यपि निरस्तम्, सामानाधिकरण्यसम्बन्धस्य व्याप्यवृत्तित्वेन तेन सम्बन्धेन नीलेतररूपस्य सत्त्वे तत्सम्बन्धावच्छिन्ननीलेतररूपनिष्ठप्रतियोगिताकाभावस्यावच्छेदकतया तत्र सत्त्वासम्भवाच्च" इत्याहुः।

केचित्तु– "विजातीयचित्रं प्रति स्वविजातीयत्व-स्वसंवलितत्वोभयसम्बन्धेन रूपविशिष्टरूपत्वेनैव हेतुत्वं, स्ववैजात्यं च चित्रत्वातिरिक्तं यत् स्ववृत्ति तद्भिन्नधर्मसमवायित्वम्, स्वसंवलितत्वं च स्वसमवायिसमवेतद्रव्यसमवायिवृत्तित्वम्, कार्यतावच्छेदकतया चित्रत्वावान्तरवैजात्यस्य रूपजन्यचित्रमात्रवर्तिन उपादानात् पाकजचित्रस्य निरुक्तकार्यतावच्छेदकाक्रान्तत्वाभावान्न तत्र व्यभिचारः, रूपवैशिष्ट्यस्य कारणतावच्छेदकतयोपादानाच्च न नीलमात्रावयवाभ्यामारब्धेऽवयविनि चित्ररूपोत्पादः, वैशिष्ट्यनियामकसम्बन्धमध्ये स्वविजातीयत्वसम्बन्धस्यानुपादाने एकावयववर्तिनो नीलरूपस्य स्वसंवलितत्वसम्बन्धेनापरावयववर्तिनीलरूपविशिष्टतया कारणतावच्छेदकधर्माक्रान्तत्वेन ततो विजातीयचित्रोत्पत्तिः प्रसज्यत इति तदुपादानम्, स्ववैजात्यशरीरे चित्रत्वातिरिक्तमित्यस्यानुपादाने चित्राभ्यामवयवरूपाभ्यामवयविनि चित्ररूपानुत्पत्तिः स्यात्, एकस्यावयवचित्रस्यापरावयवचित्ररूपविजातीयत्वाभावेन तेन सम्बन्धेन रूपविशिष्टत्वाभावात्, तदुपादाने च चित्रत्वातिरिक्तं चित्ररूपवृत्तिरूपत्वादिकं तद्भिन्नधर्मश्चित्रत्वं तत्समवायित्वं चित्ररूपे समस्तीति निरुक्तस्वविजातीयत्वं चित्ररूपस्य चित्ररूपे संभवतीत्येकावयवचित्ररूपस्यापरावयवचित्ररूपविशिष्टतया कारणतावच्छेदकधर्माक्रान्तत्वेन ततोऽवयविनि चित्ररूपोत्पत्तिर्निर्वहतीति, स्वसंवलितत्वं यदि स्वसमवायिसमवेतत्वं स्यात् तदैकावयवरूपस्यापरावयवरूपे स्वसमवायिसमवेतत्वाभावात् तदात्मकस्वसंवलितत्वं न

स्यादतः स्वसंवलितत्वं स्वसमवायिसमवेतद्रव्यसमवायिवृत्तित्वरूपं तदुक्तं, तथा च स्वमेकावयवसमवेतरूपं तत्समवायी तदाश्रयोऽवयवस्तत्समवेतमवयविद्रव्यं तत्समवायि–अवयवान्तरं तद्वृत्तित्वं तद्रूपे समस्तीति, न च स्वत्वाननुगमः, सम्बन्धमध्ये तत्प्रवेशात्, सम्बन्धघटकस्य तस्याननुगतत्वेऽप्यनुगतकार्यकारित्वात्, इत्याहुः ।

परे तु–"नीलपीतोभयाभाव-पीतरक्तोभयाभावादीनां स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नप्रतियोगिताकानां, समवायसम्बन्धावच्छिन्नप्रतियोगिताकानां च विजातीय-विजातीयपाकोभयाभावादीनां यावत्त्वावच्छिन्नप्रतियोगिताक एकोऽभावश्चित्रत्वावच्छिन्नं प्रति हेतुः, यत्रावयवद्वये नीलमेव रूपं पीतमेव वा रूपं रक्तरूपादिकं वैकजातीयं पाको वैकजातीयस्तत्र स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नप्रतियोगिताकानां नीलपीतोभयाभावादीनां, समवायसम्बन्धावच्छिन्नप्रतियोगिताकानां विजातीय-विजातीयपाकोभयाभावादीनां च यावतामेव सत्त्वात् तादृशयावत्त्वावच्छिन्नप्रतियोगिताकाभावरूपकारणाभावान्न चित्ररूपोत्पत्तिः, यत्र च विजातीय-नीलपीतोभयादीनां मध्यादेकमपि विजातीयं, कश्चिदपि विजातीयपाकोभयः, तत्र यावदन्तर्गततदुभयाभावस्याभावान्निरुक्तयावत्त्वावच्छिन्नप्रतियोगिताकाभावसत्त्वात् चित्ररूपोत्पत्तिः संभवति" इत्याहुः । 'रूपत्वेनैव चित्रं प्रति हेतुत्वं, कार्यसहभावेन चित्रेतररूपाभावस्य हेतुत्वेनानतिप्रसङ्गात्' इत्यन्ये ।

परे तु–"चित्रत्वावच्छिन्ने रूपत्वेनैव हेतुत्वं, नील-पीतोभयारब्धवृत्तिचित्रत्वावान्तरवैलक्षण्यावच्छिन्ने च नीलत्वेन पीतत्वेन च हेतुता, एवं त्रितयारब्धे तत्त्रितयत्वेन, नीलपीतोभयादिमात्रारब्धे च नील-पीतान्यतरादीतररूपत्वेन प्रतिबन्धकत्वान्न त्रितयारब्धचित्रवति द्वितयारब्धचित्रप्रसङ्गः, न चैवं गौरवं, प्रामाणिकत्वात्; वस्तुतः समवायेन द्वितयजचित्रादौ स्वाधिकरणपर्याप्तवृत्तिकत्वसम्बन्धेन द्वितयादीनां हेतुत्वम्, नीलपीतरक्तावयव-त्रितयाद्यारब्धावयविनि च त्रितयावयवादिपर्याप्तवृत्तिके स्वाधिकरणपर्याप्तिवृत्तिकत्वसम्बन्धेन द्वितयादीनामसत्त्वादेव न तदारब्धचित्रप्रसङ्ग इति नील-पीतोभयादिमात्रारब्धे नीलपीतान्यतरादीतररूपत्वेन प्रतिबन्धकत्वं न कल्पनीयमिति न तत्कल्पनागौरवम्" इत्याहुः । उच्छृङ्खलास्तु–"नील-पीतरक्ताद्यारब्धघटादौ नील-पीत-रक्तादिभ्य एव नीलपीतोभय-पीतरक्तोभयजतत्त्रितयजादिचित्राणामुत्पत्तिः, सर्वेषां सामग्रीसत्त्वात्; न चैक-

मेव तदास्त्विति वाच्यम्, तत्तदवयवद्वयमात्रावच्छेदेनेन्द्रियसन्निकर्षे विलक्षणचित्रोपलम्भात्, जातेरव्याप्यवृत्तित्वे पुनरस्त्वेकमेव तत्, किञ्चिदवच्छेदेन तत्र नीलत्व-पीतत्व-रक्तत्वविलक्षणचित्रत्वादिसंभवात्'' इत्याहुः ।

परे तु-"तत्र व्याप्यवृत्तीन्येव नील-पीतादीन्युत्पद्यन्ते, नीलादिकं प्रति नीलेतरादिप्रतिबन्धकत्व-नीलाभावादिकारणत्वकल्पनापेक्षया व्याप्यवृत्तिनील-पीतादिकल्पनाया एव न्याय्यत्वात्'' इत्याहुः, तन्नेत्यन्ये, नीलकपालावच्छेदेन चक्षुःसन्निकर्षे पीतादेरुपलम्भापत्तेः, नीलाद्यवयवावच्छेदेन सन्निकर्षस्य नीलादिग्राहकत्वकल्पने गौरवात् । यत् तु-"एतत्कपालावच्छिन्नसंयोगादिप्रत्यक्षानुरोधेनैतत्कपालानवच्छिन्नवृत्तिकत्वे सति यत् तन्नीलान्यत् तद्भिन्नं यदेतद् घटसमवेतं तस्यैतत्कपालविषयकसाक्षात्कारं प्रत्येतत्कपालावच्छेदेनैतद्घटचक्षुःसन्निकर्षस्य हेतुत्वान्न पीतावयवावच्छेदेन सन्निकर्षे नीलादिचाक्षुषापत्तिः'' इति, तन्न-तथा हेतुतायामतिगौरवात्, तत्कपालावच्छिन्नप्रत्यक्ष एव तत्कपालावच्छिन्नसन्निकर्षस्य हेतुत्वात्, केचित् तु-"नानारूपवदवयवारब्धो नीरूप एव घटः, स्वाश्रयसमवेतवृत्तित्वसम्बन्धेनैव रूपस्य द्रव्यतत्समवेतचाक्षुषसाधारण्येन हेतुत्वादेतच्चाक्षुषात्'' इत्याहुः, तन्नेत्यपरे-चित्रकपालिकास्थले-चित्रकपालिकासमवेतकपालसमवेतघटस्य चाक्षुषानापत्तेः, तत्र कपालिकाया अपि नानारूपवदवयवारब्धाया नीरूपत्वेन तदवयवगतरूपस्य स्वाश्रयसमवेतवृत्तिकत्वसम्बन्धेन कपाले सत्त्वेन कपालप्रत्यक्षसम्भवेऽपि घटे तस्यासत्त्वेन ततो घटचाक्षुषासम्भवात् । अन्ये तु-"उद्भूतैकत्वस्यायोग्यव्यावृत्तधर्मविशेषस्यैव वा द्रव्यचाक्षुषहेतुत्वेन रूपं विनाऽपि तादृशघटचाक्षुषत्वोपपत्तिः, घटाकाशसंयोगादीनां गुरुत्वादिवदयोग्यत्वादेव संयोगादिचाक्षुषे स्वाश्रयसमवेतत्वसम्बन्धेन रूपाभावस्य प्रतिबन्धकत्वाकल्पनात्, तद्वृत्तिसंयोगादिप्रत्यक्षानुपपत्तेरभावात्'' इत्याहुः ।

अत्र स्वसिद्धान्तरहस्यमाविर्भावयाञ्चक्रुरित्थमुपाध्यायाः, तथाहि—

"इत्येवमस्मिन् बत चित्ररूपे मिथ्यादृशां दृक् तिमिरावृतेति ।
परोपकृत्यै सुधियोऽत्र चैतज्ज्योतिर्मयं तत्त्वमुदीरयन्ति ॥ १ ॥

तथाहि-चित्रावयविनो नीरूपत्वं तावदनुभवबाधितम्, तत्र रूपवत्ताधियः सार्वजनीनत्वात्; न च सम्बन्धविशेषेणावयवरूपमेव तत्र प्रतीयत इति वाच्यम्, अन्यत्राप्यवयवरूपस्यैवैकत्वपरिणामाख्यसम्बन्धेनावयविगततया प्रतीतावसन्मत-

प्रवेशात्; न चान्यत्रावयवगतेभ्योऽनेकरूपेभ्य एकस्यावयविगतस्य विलक्षणस्यैव रूपस्यानुभवादयमदोष इति वाच्यम्, अत्रैव तत्रापि घटवृत्तित्वावच्छेदेनैकत्वस्य, तदवयववृत्तित्वावच्छेदेन च नानात्वस्याविरुद्धत्वात्; एतेन—"सर्वैश्च नीलैरारब्धेऽवयविनि नीलान्नीलं स्वस्वावच्छेदेनोत्पद्यमानं रूपमविरोधाद् व्यापकमेवोत्पद्यते, सजातीय-विजातीयेषु नानापदार्थेषु जायमानं समूहालम्बनमिवैकं ज्ञानम्" इति दीधितिकृदुक्तं निरस्तम्, समूहालम्बनेऽप्येकत्वस्य संख्यारूपस्य त्वयाऽनभ्युपगमात्, आश्रयगतैकत्वस्य चातिप्रसङ्गात्, एकमेकमित्यनुगतधिया सकलैकवृत्त्यतिरिक्तैकत्वस्वीकारे च द्वित्वादेरपि तादृशस्य स्वीकर्तुमुचितत्वेनैकत्व-द्वित्वाद्यविरोधात्, एवमेव घटज्ञान-पटज्ञानयोरैक्यमित्यत्र द्विवचनस्य सुघटत्वात्, भिन्नभिन्नावच्छेदेन तत्रैकत्व-द्वित्वोभयसमावेशसंभवात्, प्रयोगस्य च विवक्षाधीनत्वात्; उवाच च वाचकमुख्यः—"अर्पिता-ऽनर्पितसिद्धेः" [ तत्त्वार्थसूत्रे—५, ३१. ] इति, एकत्व-द्वित्वयोर्वृत्तावच्छेदकौ च तद्व्यक्ति-तदंशौ; तथाऽप्येतद्व्यक्त्यवच्छेदेन 'इदमेकं ज्ञानम्' इत्येकत्वभानवद् घटे 'इदमेकं रूपम्' इत्युपपत्तावपि नानावयवरूपेऽपि 'इदमेकं रूपम्' इति धीः स्यादिति चेत्?, न—अभेदविवक्षायामिष्टत्वात्, भेदविवक्षायां च 'इदमुभयं नैकम्' इत्यत्रोभयत्वेनापृथक्कृतैतद्व्यक्तेः पृथक्कृतैकत्वानवच्छेदकत्ववत् पृथक्कृतैतद्व्यक्तेरपृथक्कृतैकत्वानवच्छेदकत्ववत् पृथक्कृतैतद्व्यक्तेरपृथक्कृतैकत्वानवच्छेदकत्वात्; 'इदमुभयात्मकम्' इत्युभयत्वविशिष्टेदन्त्वस्यैकत्वपर्याप्त्यनवच्छेदकत्वेन न स्यात्, 'इदमेकं रूपम्' इति तु शुद्धेदन्त्वस्यैकत्वपर्याप्त्यवच्छेदकत्वेन स्यादिति चेत्?, स्यादेव यदि प्रदीर्घाध्यवसायिना तेनेदन्त्वमेकत्वं च विविच्य न पर्यालोच्येतेति दिक्।

व्याप्यवृत्तिशुक्लादिनानारूपवदवयव्यभ्युपगमे च शुक्लाद्युपलम्भे नीलाद्युपलम्भापत्तिरेव दोषः, तदाह सम्मतिटीकाकारः— "आश्रयव्यापित्वेऽप्येकावयवसहितेऽप्यवयविन्युपलभ्यमानेऽपरावयवानुपलब्धावप्यनेकरूपप्रतिपत्तिः स्यात्, सर्वरूपाणामाश्रयव्यापित्वात्" इति चित्रैकरूपप्रतिपत्तिरप्यनुभवविरुद्धा, शुक्लादिरूपाणामपि तत्र निर्विगानं तत्र प्रतीतेः, यदाहुः— 'न च चित्रपटादावपास्तशुक्लादिविशेषं रूपमात्रं तदुपलम्भान्यथाऽनुपपत्त्याऽस्तीत्यभ्युपगन्तव्यम्, कथं? 'चित्ररूपः पटः' इति प्रतिभासाभावप्रसक्तेः'' इति। किञ्च, एवं शुक्लावयवावच्छेदेनाऽपि चित्रोपलम्भः स्यात्; न च चित्रत्वग्रहे परम्परयाऽवयवगतनीलेतररूप-पीतेतररूपादिमत्त्वग्रहो हेतुः, अत एव 'त्र्यणुकचित्रं चक्षुषा न गृह्यते' इत्याचार्याः; न

च नीलेतररूपत्वाद्यवच्छिन्नप्रकारताकग्रहो न हेतुः, नीलत्व-पीतत्वादिनाऽवयवगतानील-पीतादिग्रहेऽप्यवयविचित्रप्रत्यक्षादिति वाच्यम्, विलक्षणचित्रप्रत्यक्षे तेन तेन रूपेण तद्ग्रहस्यापि हेतुत्वात्; वस्तुतो नीलेतररूपत्वादिव्याप्यत्वेन नीलेतररूपत्व-पीतत्वाद्यनुगमान्न क्षतिरिति चेत्?, न–त्र्यणुकचित्ररूपाग्रहे चतुरणुकचित्रप्रत्यक्षानुपपत्तेः, नीलेतररूप-पीतेतररूपादिमदवयवावच्छेदेनेन्द्रियसन्निकर्षस्यावयवनीलादिगतनीलत्वादिग्रहविरोधिदोषाभावानां च हेतुत्वे गौरवात्, अवयविनि साक्षान्नीलपीतादिग्रहस्य तद्ग्रहहेतुत्वे च तत्र नीलादिसिद्धिः, तद्ग्रहस्य भ्रमत्वायोगात्।

स्यादेतत्–अव्याप्यवृत्तिनीलादिकल्पे तादृग्नीलादिप्रत्यक्षे द्रव्यतत्समवेतप्रत्यक्षत्वावच्छिन्नं प्रति अव्याप्यवृत्तिद्रव्यसमवेतप्रत्यक्षत्वावच्छिन्नं प्रति वा चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसम्बन्धावच्छिन्नाधारतासन्निकर्षो निरूपकतया विषयनिष्ठो हेतुः, संयोगादिप्रत्यक्षस्थस्थले क्लृप्त एव; न च नीलकपालिकावच्छेदेन चक्षुःसन्निकर्षस्य तत्समवेतनील-पीतोभयकपालावच्छिन्नत्वनियमात् तदवच्छेदेन सन्निकर्षे पीतादिग्रहापत्तिः, संयोगव्यक्तिर्यद्देशव्यपिनी तत्र परम्परया तद्देश एवावच्छेदको, न तु सम्पूर्णोऽवयव इत्यभ्युपगमान्न दोषः, नीलविशिष्टपीतादिना नील-पीतोभयादिना वाऽवान्तरचित्रधीसंभवान्नावान्तरचित्रसिद्धिः, चित्रत्वेन समनवान्तरचित्रत्वसामानाधिकरण्यप्रत्ययस्याऽपि नील-पीतविशिष्टचित्रत्वसामानाधिकरण्यावगाहित्वात्, नीलाद्यविशेषितनीलादिभेदाश्रयरूपसमुदायेनानुगतचित्रप्रतीतिसम्भवाच्चित्रत्वसामान्यमप्यसिद्धमेवेति;

मैवम्–अनुभवसिद्धस्य चित्रत्वस्योक्तरीत्यापलापे नीलादिप्रतीतेरपि भेदविशेषावगाहित्वेन नीलत्वादेरप्यपलापप्रसङ्गात्। अस्तु तर्हि तत्र तत्रावयविनि नीलत्वादितत्तच्चित्रत्वाश्रयमेकमेव व्याप्यवृत्तिरूपादिकं लाघवात्, नीलत्वादिकमेव तत्राव्याप्यवृत्ति, गुणविशेषाणामिव जातिविशेषाणामव्याप्यवृत्तित्वेऽविरोधात्, परस्परव्यभिचारिजात्योः सामानाधिकरण्यस्य बाधकविरहसत्तर्कप्रमाणसिद्धस्यानभ्युपगममात्रेण निराकरणायोगात्; अत एव ककारादिषु सर्वेषु ताराद्याकारानुगतमतिरूपपद्यते, एकस्यैव तारत्वादेः ककारादिवृत्तित्वात्, उपपद्यते च मार्त-पाषाण-सौवर्णघटादावनुगताऽनुगतमतिरिति स्वतन्त्र एव पन्था इति चेत्?, सत्यम्-एवमप्येकानेकवस्तुरूपाव्याहतावपि सत्यामपि चित्रत्वग्राहकसामग्र्यां नीलभागवच्छेदेन 'इह न चित्रम्' इति प्रतीतेस्तत्तदवच्छेदेन पर्याप्तापर्याप्ततया स्वरूपतोऽपि

तस्यैकानेकात्मकस्य युक्तत्वात्, एवं हि चित्रप्रतिभासे नील-पीतादिमत्त्वग्रहहेतुत्वमपि न कल्पनीयम्, पनसमात्रदेशावच्छेदेन 'वनम्' इति बुद्ध्यभावस्येव नीलभागमात्रावच्छेदेन चित्रप्रतिभासाभावस्य विषयाभावादेवोपपत्तेः, तद्देशेनाचित्रादिधियश्च नयाधिनत्वात्; तदिदमाह सम्मतिटीकाकारः-"अत एवैकानेकरूपत्वाच्चित्ररूपस्यैकावयवसहितेऽवयविन्युपलभ्यमाने शेषावयवावरणे चित्रप्रतिभासाभाव उपपत्तिमान्, सर्वथा त्वेकरूपत्वे तत्रापि चित्रप्रतिभासः स्यात्, अवयविनि व्याप्त्या तद्रूपस्य वृत्तेः; न चावयवनानारूपोपलम्भसहकारीन्द्रियमवयविनि चित्रप्रतिभासं जनयति, इति तत्र सहकार्यभावाच्चित्रप्रतिभासानुत्पत्तिरिति वाच्यम्, अवयविनोऽप्यनुपलब्धिप्रसङ्गात्, न हि चाक्षुषप्रतीत्याऽगृह्यमाणस्यावयविनो वायोरिव ग्रहणं दृष्टम्; न च चित्ररूपव्यतिरेकेणापरं तत्र रूपमात्रमस्ति, यतस्तत्प्रतिपत्त्या घटग्रहणं भवेत्" इत्यादि, तदेवं चित्ररूपवत् सिद्धं नित्यानित्यत्वादिरूपेणैकानेकं वस्त्विति परिभावनीयं सुधीभिः" इति ॥ ३७ ॥ ४५ ॥

अन्ते क्षये क्षणात् प्रथमक्षणेऽपि क्षयः इति यत् तुर्यं क्षणक्षयित्वप्रसाधनं सौगतस्य तद् दूषयति-

**अन्ते क्षयेक्षणं चाद्यक्षणक्षयप्रसाधनम् ।**
**तस्यैव तत्स्वभावत्वात्, युज्यते न कदाचन ॥ ३८ ॥ ४५१ ॥**

**अन्त** इति-सदृशसन्तत्यन्त्यक्षणे इत्यर्थः, **क्षयेक्षणं च** क्षयस्य-नाशस्य, ईक्षणं-दर्शनं पुनः, **आद्यक्षणक्षयप्रसाधनं** वस्तुनः प्रथमक्षणे सर्वथा नाशस्यानुमापकम्, 'वस्तु, प्रथमक्षणे नश्यति दृष्टान्त्यक्षणनाशकत्वात्, इत्याद्यनुमानस्वरूपम्, इति यदुक्तं बौद्धेन, तन्न **कदाचन** कथमपि, **युज्यते** घटते, तत्र हेतुः-**तस्यैवे**त्यादि, **तस्यैव** प्रथमक्षणे उत्पन्नस्यैव वस्तुनः, **तत्स्वभावत्वात्**-अन्त्यक्षणे क्षयस्वभावत्वात्, तद् यदि प्रथमक्षणे नश्येत्, तदोपान्त्यक्षणे तस्याभावादन्त्यक्षणक्षयस्वभावत्वाभावापत्तेः, आद्यक्षणक्षयस्वभावत्वा-ऽन्त्यक्षणक्षयस्वभावत्वयोर्विरोधात्, न हि यद् यत् पूर्वक्षणे तत्तदुत्तरक्षणे नश्यतीति संभवति, असतो नाशायोगात् ॥ ३८ ॥ ४५१ ॥"

एतदेव समर्थयति-

**आदौ क्षयस्वभावे च, तत्रान्ते दर्शनं कथम्? ।**
**तुल्यापरापरोत्पत्तिविप्रलम्भाद् यथोदितम् ॥ ३९ ॥ ४५२ ॥**

आदावित्यादि, **आदौ** प्रथमक्षण एव, **क्षयस्वभावे च** नाशस्वभावे च, **तत्र** इत्थं स्वभावतयाऽभ्युपगते वस्तुनि, **अन्ते** अन्त्यक्षणे, **दर्शनं** नाशस्योपलम्भः, **कथं** न कथञ्चिदपि संभवति, यो यदा वर्तते तस्य तदैव दर्शनं युक्तं प्रथमक्षणारब्धवस्तुनः प्रथमक्षणनाशस्य प्रथमक्षण एव कथं न दर्शनं न्यायप्राप्तं स्यादित्याशयः, एतत्प्रतिविधानाय पराभिप्रायमाह–**तुल्यापरापरोत्पत्तिविप्रलम्भादिति**–सदृशोत्तरोत्तरोत्पत्तिलक्षणप्रतिबन्धकसद्भावादादौ न तद्दर्शनं, किन्त्वन्त एव, अत्राभियुक्तसम्मतिमुपदर्शयति–**यथोदितमिति**–पूर्वसूरिभिर्यथा कथितमित्यर्थः ॥ ३९ ॥ ४५२ ॥

किमुदितमित्याकाङ्क्षायां तदुक्तिमुल्लिखति–

**अन्ते क्षयेक्षणादादौ क्षयोऽदृष्टोऽनुमीयते ।**
**सदृशेनावरुद्धत्वात्, तद्ग्रहाद्धि तदग्रहः ॥ ४० ॥ ४५३ ॥**

**अन्ते क्षयेक्षणा**दित्यादि, **अन्ते क्षयेक्षणात्** अन्ते नाशदर्शनात्, **आदौ** उत्पत्तिसमये, **क्षयः** नाशः, **अदृष्टः** अप्रत्यक्षोऽपि, **अनुमीयते** अनुमितिविषयो भवति, यदीदं वस्त्वनश्वरस्वभावं स्यादन्तेऽपि न नश्येत्, न नश्यतीत्यनुभवविरोधाद् वक्तुमशक्यमिति, नश्वरस्वभावं तदिति प्रथमक्षणेऽपि नश्यतीति, यदि प्रथमक्षणे नश्यति कथं न पूर्वं नाशग्रह ?ः, तदग्रहात् पूर्वं नाशो न जात इत्येव किं न स्यात्, अतो नाशस्य भावेऽपि तत्प्रत्यक्षप्रतिबन्धकसदृशोत्तरोत्तरक्षणग्रहादेव नाशाग्रह इत्याह–**सदृशेनेति**–तुल्यक्षणेनेत्यर्थः, **अवरुद्धत्वात्** प्रतिबद्धत्वात् स्वरूपसत उत्तरोत्तरसदृशक्षणसन्ततेर्न नाशग्रहप्रतिबन्धकत्वमित्यत आह–**तद्ग्रहाद्धीति**–हिरेवकारार्थे, सदृशक्षणग्रहादेवेत्यर्थः, **तद्ग्रहः** आद्यक्षणक्षयाग्रहः ॥ ४० ॥ ४५३ ॥

यद्यपि 'घटोत्पत्तिक्षणो घटध्वंसाधिकरणो घटध्वंसाधिकरणक्षणपूर्वक्षणत्वात् इत्यनुमानं परस्य न सम्भवति, घटध्वंसाधिकरणक्षणपूर्वक्षणत्वस्य घटोत्पत्तिपूर्वक्षणेऽपि सत्त्वेन तत्र घटध्वंसाधिकरणत्वस्याभावेन व्यभिचारात्, घटोत्पत्तिप्रागभावानधिकरणत्वे सति घटध्वंसाधिकरणपूर्वक्षणत्वस्य हेतूकरणे च द्वितीयादिघटोत्पत्तिप्रागभावाधिकरणत्वस्यैव सत्त्वेन सन्तानं समाश्रित्य पक्षे हेत्वसिद्धिरेवेति दूषणं तथाऽप्यस्य स्फुटत्वात् तदग्रहहेतुं प्रकारान्तरेण दूषयति ग्रन्थकारः–

**एतदप्यसदेवेति, सदृशो भिन्न एव यत् ।**
**भेदाग्रहे कथं तस्य तत्स्वभावत्वतो ग्रहः ? ॥ ४१ ॥ ४५४ ॥**

**एतदपीति**–अनन्तरोपदर्शितं पराभिहितमपीत्यर्थः, **असदेव** अनुपपद्यमानार्थकमेव, **यत्** यस्मात्, **सदृशो भिन्न एव** भेदघटितमूर्तिक एव सदृशपदार्थः, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपस्य सादृश्यस्य भेदघटितत्वात्, भवतु भेदघटितमूर्तिकः सदृशपदार्थः, ततः किमित्यत आह–**भेदाग्रहे** इति–सदृशपदार्थस्वरूपसन्निविष्टस्य भेदस्याग्रहे सतीत्यर्थः, **कथं** न कथञ्चिदपि, **तस्य** सदृशस्य, **ग्रहः** ग्रहणं, तत्र हेतुः–**तत्स्वभावत्वत** इति भेदघटितस्वभावत्वादित्यर्थः, नहि नीलघटो नीलघटितस्वभावो नीलाग्रहे गृह्यते ॥ ४१ ॥ ४५४ ॥

अत्र पराभिप्रायमाशङ्कते–

**तदर्थनियतोऽसौ यद् भेदमन्याग्रहाद्धि तत् ।**
**न गृह्णातीति चेत् तुल्यः, सोऽपरेण कुतो गतिः? ॥४२॥४५५॥**

**तदर्थनियत** इति–विवक्षितैकक्षणार्थविषय इत्यर्थः, **असौ** सदृशपरिच्छेदलक्षणो ग्रहः, **यत्** यस्मात्, **भेदं** नानात्वस्वरूपम्, **तत्** तस्मात्, **अन्याग्रहात्** तदानीं–प्रतियोगिनोऽग्रहणात्, **हि** एवकारार्थे, तेनैतत् कथितं भवति–वस्तुतस्तदा भेदोऽस्त्येव, किन्तु भेदग्रहे प्रतियोगिज्ञानं कारणमिति तदभावादेव, **न गृह्णाति** न परिच्छिनत्ति, एवं हि तन्नाशग्रहप्रतिबन्धको दोषः, न तु सदृशत्वग्रहोऽप्यपेक्षितः, येन प्रतिबन्धकस्य सदृशत्वग्रहस्याभावान्नाशग्रहः स्यादेवेति, न हि शुक्तौ रजतसारूप्यग्रहाऽप्युल्लिखितरजतभेद एव रजतत्वभ्रमजनकः, रजतभेदग्रहे रजतत्वभ्रमस्यैवाभावात्, किन्तु स्वरूप सत एव रजतसादृश्यस्य रजतत्वभ्रमजनकत्वं, तथा स्वरूपसत एव सदृशलक्षणस्य स्थैर्यभ्रमजनकत्वेन नाशग्रहप्रतिबन्धकत्वमित्यैदम्पर्यम् । अत्र शुक्तौ रजतत्वसहचरितचाकचक्यादिधर्मवत्त्वग्रहादेव रजतत्वभ्रमः, न तु स्वरूपसतो रजतसादृश्यात्, तथा सति शुक्तौ शुक्तित्वग्रहजनकसामग्रीकालेऽपि रजतसादृश्यस्य भावाद्रजतत्वभ्रमः स्यात्, तथा प्रकृतेऽपि सदृशक्षणदर्शनमेव नाशग्रहविरोधिवाच्यं, तच्च न युक्तं, सविकल्पकानुमेयस्य निर्विकल्पकस्य सदृशक्षणविकल्पाभावेन प्रकृतेऽप्रामाणिकस्य तस्यासत्कल्पस्यातिप्रसङ्गतो नाशग्रहविरोधित्वासंभवात्; अस्तु वा यथाकथञ्चिदेतत्, तथापि सादृशस्य दुर्ग्रहत्वात् तदुक्तेरेवानुपपत्तिरित्यभिप्रायवान् ग्रन्थकार उत्तरयति–**इति चेदिति**–यद्युक्ताभिप्रायो भवतस्तदेत्यर्थः **सः** गृह्यमाणः क्षणः, **अपरेण** प्राग्गृहीतेन क्षणेन, **तुल्यः** सदृशः, **इतीति** शेषः इत्याकारिकेति तदर्थः, **गतिः** परिच्छित्तिः, **कुतः** उपायाभावान्न कथञ्चिदित्यर्थः ॥ ४२ ॥ ४५५ ॥

तदागतौ को दोष इत्याकाङ्क्षायामाह—

**तथागतेरभावे च, वचस्तुच्छमिदं ननु ।**
**सदृशेनावरुद्धत्वात्, तद्ग्रहाद्धि तदग्रहः ॥ ४३ ॥ ४५६ ॥**

**तथागतेरिति**—भेदपरिच्छित्तेरित्यर्थः, **अभावे च** सति सप्तमी, **इदं** 'प्रागुक्तं, **वचः** भवतो वचनं, **'ननु'** इत्याक्षेपे, **तुच्छम्** असारम्, वचनस्य तुच्छत्वमनन्वितार्थप्रतिपादकत्वम्, किं तद्वचनमित्याकाङ्क्षोपशमार्थं तदुल्लिखति—**'सदृशेनावरुद्धत्वात् तद्ग्रहाद्धि तदग्रहः'** इति ॥ ४३ ॥ ४५६ ॥

भेदोल्लेखिनो दर्शनस्याभावेऽपि भेदोल्लेखिनो विकल्पस्य सम्भवात् सादृश्यावगाहिविकल्पतः कथमुक्तवचसोऽनुपपत्तिरित्याकाङ्क्षायामाह—

**भावे चाऽस्या बलादेकमनेकग्रहणात्मकम् ।**
**अन्वयिज्ञानमेष्टव्यं, सर्वं तत् क्षणिकं कुतः ? ॥ ४४ ॥ ४५७ ॥**

**भावे चाऽस्या** इति—विकल्पात्मकपूर्वापरक्षणभेदपरिच्छित्तेर्भावे चेत्यर्थः, **बलात्** स्वस्वारस्याभावादपि, **अनेकग्रहणात्मकं** पूर्वक्षणग्रहणोत्तरक्षणग्रहणस्वरूपम्, **एकम्** अभिन्नम्, **अन्वयिज्ञानं** पूर्वक्षणग्रहणोत्तरक्षणग्रहणानुगतं ज्ञानम्, **एष्टव्यम्** अभ्युपगन्तव्यम्, पूर्वापरक्षणज्ञानान्वय्येकज्ञानाभावे प्रतियोग्यनुयोगिस्वरूपावगाह्येव भेदज्ञानमिति भेदग्रहणवेलायां प्राक्क्षणरूपप्रतियोगिग्रहणस्याभावाद् भेदग्रहानुपपत्तेः, प्रदीर्घपर्यालोचनानुपपत्तेश्च प्रदीर्घपर्यालोचनस्य पूर्वक्षणोत्तरक्षणग्राहकत्वत एव भावात्, यत एवं **तत्** तस्मात्, अनेकग्रहणात्मकैकज्ञानस्य स्थिरस्य भावात्, **सर्वं क्षणिकं कुतः** न कुतश्चित्, सर्वान्तर्गतस्योक्तज्ञानस्यैवान्वय्येकत्वात् ॥ ४४ ॥ ४५७ ॥

प्रसङ्गात् क्षणिकत्वे दोषान्तरमुपदर्शयति—

**ज्ञानेन गृह्यते चार्थो, न चापि परदर्शने ।**
**तदभावे तु तद्भावात्, कदाचिदपि तत्त्वतः ॥ ४५ ॥ ४५८ ॥**

**ज्ञानेनेति** । **परदर्शने** सर्वपदार्थक्षणिकत्वाभ्युपगन्तृबौद्धमते, 'न चापि' इत्यपिः 'अर्थः' इत्यनन्तरं योज्यः, **अर्थोऽपि** नीलादिरपि, **न च** नैव, **गृह्यते** ग्रहीतुं शक्यते, **तत्त्वतः** परमार्थतः, **कदाचिदपि** क्वचिदपि काले, तत्र हेतुः—**तदभावे तु तद्भावादिति**—नीलाद्यर्थाभावे ज्ञानभावात्, अर्थ-ज्ञानयोः पौर्वा-

पर्यनियतस्य कार्यकारणभावस्याभ्युपगमेनार्थोत्पत्त्यनन्तरक्षण एव ज्ञानस्य भावात् तदानीं च नीलाद्यर्थस्य क्षणिकस्याभावात् । एवं च नीलाद्यर्थस्य वर्तमानकाल-सम्बन्धित्वावगमः क्षणद्वयावस्थायित्वं विना न संभवति । न च जनकोऽर्थो वर्तमानकालतया नेन्द्रियजन्यज्ञाने प्रतिभाति, किन्तु तत्र तत्समानकालभावि-ज्ञानगतनीलाद्यर्थाकारः प्रतिभासते, तदाकारस्य च वर्तमानकालतयाऽवभासान्नी-लाद्यर्थस्य वर्तमानताऽवगमोक्तिरिति वाच्यम्, ज्ञानकाले बहिरवभासमानस्य नीलादेर्ज्ञानाकारत्वासिद्धेः, बहिरवभासमानस्यापि नीलादेर्ज्ञानाकारत्वाभ्युपगमेऽन्त-रवभासमानस्य सुखादेरप्यर्थाकारताप्रसक्तिरिति ज्ञानसत्तैवोत्सीदेत्; न च गृह्य-माणस्य ज्ञानसमानसमयस्य जनकता, जनकस्य च नीलादेरर्थस्य ज्ञानक्षणपूर्व-वर्तिनः क्षणिकत्वेन ज्ञानक्षणेऽतीतस्य वर्तमानतया न प्रतिभास इति समारोपिता-कारावगाहि सर्वमेव ज्ञानमिति साम्प्रतम्, द्विचन्द्रज्ञानस्येव नीलादिज्ञानस्य समा-रोपिताकारावगाहित्वाविशेषाद् विशेषान्तरस्याभावात् तयोरविशेषापत्तेः; न च बाह्यार्थवादिना तयोरविशेषोऽभ्युपगन्तव्यः, प्रमाणाप्रमाणविभागविलयप्रसक्तेः; न च ज्ञानार्थयोरेकसामग्रीजन्ययोः सहभावित्वेन वर्तमानग्रहणं क्षणिकत्वेऽपि वैभाषिकमताश्रयणेनाभ्युपगन्तव्यम्, क्रियानियमस्य कर्मशक्तिनिमित्तत्वेन व्यव-स्थापित्वादीतीत्थमुपाध्याया व्यावर्णयाञ्चक्रुरिति ॥ ४५ ॥ ४५८ ॥

ज्ञानेनार्थग्रहणमभ्युपगम्यापि दोषान्तरमुपदर्शयति—

**ग्रहणेऽपि यदा ज्ञानमपैत्युत्पत्त्यनन्तरम् ।**
**तदा तत् तस्य जानाति, क्षणिकत्वं कथं ननु ? ॥ ४६ ॥ ४५९ ॥**

**ग्रहणेऽपीति**–ज्ञानेनार्थस्य ग्रहणेऽपीत्यर्थः, **यदा ज्ञानं** यदा ज्ञानमुत्पद्यते तदा तद् ग्राह्यं भवति, **उत्पत्त्यनन्तरम्** उत्पत्तिनाशकाले, **अपैति** ज्ञानं नश्यति, अर्थोऽपि नश्यति, **तदा** तत्काले ज्ञानस्य नाशात्, **तत्** ज्ञानं, **तस्य** वस्तुनः, **क्षणिकत्वम्** उत्पत्त्यनन्तरापवर्गित्वम्, **ननु** इत्यक्षमायां, **कथं जानाति ?** नैव जानाति, क्षणिकत्वस्यावस्तुत्वाज्ज्ञानस्य च वस्तुग्राहकत्वात् ॥ ४६ ॥ ४५९ ॥

वस्तुदर्शनं यथा वस्तु गृह्णाति तथा तस्य क्षणिकत्वमपि गृह्णात्येव, स्वरूपतोऽविकल्पस्वभावत्वाद् विकल्पयति तु नेति पराशयमाशङ्क्य परिहरति—

**तस्यैव तत्स्वभावत्वात् स्वात्मनैव तदुद्भवात् ।**
**यथा नीलादितादूप्यान्नैतन्मिथ्यात्वसंशयात् ॥ ४७॥४६०॥**

**तस्यैवे**ति-अर्थस्यैवेत्यर्थः, **तत्स्वभावत्वात्** क्षणिकत्वस्वभावत्वात्, **स्वात्मनैव** ज्ञानात्मनैव, जानाति, क्षणिकत्वमित्यनुवर्तते, तत्र हेतुः-**तदुद्भवा**दिति क्षणिकत्वस्वभावादुत्पत्तेरित्यर्थः, निदर्शनमाह-**यथा नीलादी**ति-यथा ज्ञानं ज्ञानात्मनैव नीलादि जानातीत्यर्थः, तत्र हेतुः-**तादूप्या**दिति-विषयसारूप्यादित्यर्थः, नीलादिदर्शनं नीलादिविषयसारूप्यान्नीलादि जानाति, न तु विकल्पविधया, अविकल्पत्वात् तथा क्षणिकत्वसारूप्यात् क्षणिकत्वं जानाति, न तु विकल्पविधयेति भावः, अत्रोत्तरं-**नैत**दिति-यदुक्तं परेण तन्न युक्तमित्यर्थः, तन्नीत्यैव **मिथ्यात्वसंशयात्** क्षणिकत्वबोधे मिथ्यात्वसंशयात्, यथा सांख्यानामालोचने, शुक्ले शङ्खे पीतबोधदर्शनात्, उत्तरकाले तत्र पीतानिश्चयात् प्राक् पीतानालोचनमनुमीयते चेत्?; क्षणिकत्वदर्शनेऽप्युत्तरकालं क्षणिकत्वानिश्चयात प्राक् क्षणिकत्वालोचनमनुमीयत इति तुल्यमिति ॥ ४७ ॥ ४६० ॥

यथा च नेन्द्रियजदर्शनतो भवति क्षणिकत्वबोधः, तथा स्वानुमानतोऽपि न क्षणिकत्वबोध इत्याह—

**न चापि स्वानुमानेन, धर्मभेदस्य संभवात् ।**
**लिङ्गधर्मातिपाताच्च, तत्स्वभावाद्ययोगतः ॥ ४८ ॥ ४६१ ॥**

**न चापी**ति-क्षणिकत्वं जानातीत्यनुवर्तते, न चापीत्यपिः स्वानुमानेनेत्यनन्तरं योज्यः, **न च** नैव, **स्वानुमानेनापि** यथा मद्रूपमनित्यं तथाऽयमपीत्याकारकानुमानेनापि क्षणिकत्वं जानाति, कुत इत्याकाङ्क्षायामाह-**धर्मभेदस्य सम्भवा**दिति-चेतनेतररूपधर्मभेदोपपत्तेरित्यर्थः, किंचित्-तादूप्येऽपि तथा तादूप्याभावेन साधारण्याद्व्याप्तेरविकल्पनात्, तथा चानुमितिकारणस्य साध्यहेत्वोरविनाभावनिर्णयस्याभावान्न क्षणिकत्वानुमितिसम्भवः, दोषान्तरमाह-**लिङ्गधर्मातिपाताच्चे**ति-लिङ्गरूपातिलङ्घनाच्च, तदात्मन एव स्वानुमानपक्ष इत्यर्थः, कुत इत्याकाङ्क्षायामाह-**तत्स्वभावाद्ययोगत** इति-तस्यार्थस्य तज्ज्ञानं न स्वभावः, नापि कार्यम्, विधिसाधकं च स्वभाव-कार्यभेदेन द्विविधमेव लिङ्गमिष्यते बौद्धेन, तथा च स्वभाव-कार्यलक्षणलिङ्गरूपविशेषाभावात् तत्सामान्यस्याप्यभावात्, न चार्थक्रियाकारित्वलक्षणसत्त्वहेतुना क्षणिकत्वानुमानमपि युक्तम्, ततः क्षणाव-

स्थितिलक्षणस्य क्षणिकत्वस्य साधने क्षणावस्थितिनिबन्धनत्वाद् बहुक्षणस्थितेः, स्थिरं च वस्तु बहुक्षणस्थितिकमेकक्षणस्थितिकं भवत्येवेति, क्षणादूर्ध्वमभावलक्षणस्य च क्षणिकत्वस्य चार्थक्रियाकारित्वलक्षणहेतुना सममविनाभावाग्रहेण साधयितुमशक्यत्वादित्याशयः ॥ ४८ ॥ ४६१ ॥

अथ क्रम-यौगपद्याभ्यां नित्यस्यार्थक्रियाकारित्वासम्भवात् पारिशेष्यात् क्षणिकत्वं सेत्स्यतीत्याशङ्क्याह—

**नित्यस्यार्थक्रियाऽयोगोऽप्येवं युक्त्या न गम्यते ।**
**सर्वमेवाविशेषेण, विज्ञानं क्षणिकं यतः ॥ ४९ ॥ ४६२ ॥**

**नित्यस्येति** । एवम् एवं सति, **नित्यस्य** स्थिरस्यार्थस्य, **अर्थक्रियाऽयोगोऽपि** अर्थक्रियाकारित्वाभावेऽपि, **युक्त्या** सम्यग् नीत्या, **न गम्यते** न ज्ञायते, नित्यस्यैव ज्ञानासंभवेन तद्गततयाऽर्थक्रियाकारित्वाभावज्ञानासंभवात्, अत्र हेतुमेवाह–**सर्वमेवेत्यादि**, **यतः** यस्मात्, **सर्वमेव विज्ञानं** सकलमेव सविकल्पकाऽविकल्पप्रभेदं विज्ञानं, न तु किञ्चिद् विज्ञानम्, **अविशेषेण** साधारण्येन, **क्षणिकं** क्षणमात्रस्थायि, तथा च क्षणिकेन विज्ञानेन क्षणस्थायित्वमेव वस्तुनो ग्रहीतुं शक्यं, न तु बहुक्षणाग्रहे बहुक्षणस्थायित्वरूपं नित्यत्वमित्याशयः ॥ ४९ ॥ ४६२ ॥

अक्षणिकस्याप्यर्थक्रियाकारित्वं संभवत्येवेत्यभिधातुमाह—

**तथा चित्रस्वभावत्वान्न चार्थस्य न युज्यते ।**
**अर्थक्रिया ननु न्यायात् क्रमाक्रमविभाविनी ॥ ५० ॥ ४६३ ॥**

**तथा चित्रस्वभावत्वादिति**–क्रमवत्परिणामानुस्यूताक्रमवद्द्रव्यरूपत्वादित्यर्थः, **अर्थस्य** वस्तुनः, **अर्थक्रिया** अर्थक्रियाकारित्वम्, **न युज्यते** न घटते, इति **न च** नैव, निषेधद्वयस्य विध्यवधारणार्थकत्वाद् युज्यत एवेत्यर्थः, **ननु** निश्चितम्, **न्यायात्** अनुभवसध्रीचीनतर्कात्, कीदृशी अर्थक्रिया यत्कारित्वं क्रमाक्रमरूपस्यार्थस्य घटत इत्यपेक्षायामर्थक्रियां विशिनष्टि–**क्रमाक्रमविभाविनीति**–युगपदयुगपदुत्पत्तिकसुखदुःखज्ञानजननजलाद्यानयनादिरूपेत्यर्थः, क्रमाक्रमभाव्यर्थक्रियासु मध्ये काचिदर्थक्रियाऽस्मदादिसंवेद्या, काचित् पुनरस्मदाद्यसंवेद्याऽपि, तेनास्मदादिसंवेद्यजलानयनादिकं येन घटेन न कृतं तस्य घटस्यार्थक्रियाकारित्वाभावादसत्त्वं नाशङ्कनीयम्, अन्ततस्तथासिद्धज्ञानज्ञेयत्वादिपर्यायरूपाया अस्मदाद्यवेद्याया अपि तेन घटेन करणादिति ।

अत्रैकान्तक्षणिकत्वपक्षस्य युक्तिपथातीतत्वं कथञ्चिन्नित्यानित्यवस्त्वभ्युपगमलक्षणस्याद्वादविद्यावलम्बनस्य हितविधायकत्वेन युक्तत्वं चेत्यावेदयितुं स्याद्वादविद्याऽद्वितीयनिपुणा उपाध्याया इदं पद्यद्वयं शिष्याणां स्याद्वादविद्याऽभ्यासानवरतप्रयत्नायोपदिष्टवन्तः—

"इतस्ततो नोड्डयनं विधातुं पक्षी समर्थः सुगतात्मजोऽयम् ।
विसृत्वरस्तार्किकतर्कशस्त्र्या यतो विलूनः क्षणिकत्वपक्षः ॥ १ ॥
निरीक्ष्य साक्षादवलम्ब्यमानं परैर्विशीर्णं क्षणिकत्वपक्षम् ।
स्याद्वादविद्यामवलम्बनं भोः ! श्रयन्तु विज्ञाः ! सुदृढं हिताय ॥ २ ॥

अनयोः पद्ययोरित्थमन्वयः–अयं सुगतात्मजः पक्षी यतस्तार्किकतर्कशस्त्र्या विलूनो विसृत्वरः क्षणिकत्वपक्षः, तत इतस्तत उड्डयनं विधातुं न समर्थः, अवलम्ब्यमानं क्षणिकत्वपक्षं परैर्विशीर्णं साक्षान्निरीक्ष्य भो विज्ञाः! सुदृढं स्याद्वादविद्यामवलम्बनं हिताय श्रयन्तु, इति, अर्थस्त्वनयोः सुव्यक्त एवेति ॥ ५० ॥ ४६३ ॥

क्षणिकत्ववादतात्पर्यप्रतिपादनप्रवणमध्यस्थवार्त्तामभिधत्ते—

**अन्ये त्वभिदधत्येवमेतदास्थानिवृत्तये ।**
**क्षणिकं सर्वमेवेति बुद्धेनोक्तं न तत्त्वतः ॥ ५१ ॥ ४६४ ॥**

**अन्ये त्विति**–मध्यस्था वादिन इत्यर्थः, **एवमभिदधति** एवं कथयन्ति, तद्वक्तव्यमुपदर्शयति–**एतदास्थानिवृत्तये** इति—

सुखी भवेयं दुःखी च, मा भूवमिति तृष्यतः ।
यैवाहमिति धीः सैव, सहजं सत्त्वदर्शनम् ॥ १ ॥

इति वचनाद् भोक्तरि या नित्यत्ववासना पुत्रकलत्रधनादिविषयगता च या नित्यत्ववासना रागादिनिबन्धना तस्या निवृत्तये इत्यर्थः, **क्षणिकं सर्वमिति बुद्धेनोक्तं न तत्त्वतः** नैव वस्तुमात्रस्य क्षणिकत्वबोधनाभिप्रायेण 'क्षणिकं सर्वम्' इति बुद्धेनोक्तम्, स्याद्वादवादिभिरप्यनित्यत्वभावनादार्ढ्यायेदमुच्यते, तदुक्तम्—

"यत् प्रातस्तन्न मध्याह्ने यन्मध्याह्ने न तन्निशि ।
निरीक्ष्यते भवेऽस्मिन् हि पदार्थानामनित्यता ॥ १ ॥" इति ॥ ५१ ॥ ४६४ ॥

क्षणिकत्ववादतात्पर्यविषयमुपदर्श्य योगाचाराभिमतविज्ञानमात्रवादतात्पर्यविषयमुपदर्शयति—

**विज्ञानमात्रमप्येवं, बाह्यसङ्गनिवृत्तये।**
**विनेयान् कांश्चिदाश्रित्य यद्वा तद्देशनाऽर्हतः॥ ५२॥ ४६५॥**

**विज्ञानमात्रमपी**ति, **एवं** सौत्रान्तिकाभिमतसर्वक्षणिकत्ववत् 'सर्वं विज्ञानम्' इति योगाचाराभिमतमपीत्यर्थः, **बाह्यसङ्गनिवृत्तये** ज्ञानातिरिक्तस्यालीकत्वज्ञाने सति तन्मात्रप्रतिबन्धेन धन-धान्यादिबाह्यविषयपरिष्वङ्गव्यावृत्तये, सामान्यतः कांश्चिद् विनेयानाश्रित्य सर्वं विज्ञानमित्युक्तं, **यद्वा** अथवा, **अर्हतः** ज्ञाननयावधारणयोग्यान् अतिनिपुणान् कांश्चिद् विनेयानाश्रित्य, **तद्देशना** करुणयैव ज्ञानवाददेशना॥ ५२॥ ४६'१॥

अनन्तराभिहितं बुद्धतात्पर्यं युक्तमेवेत्याह—

**न चैतदपि न न्याय्यं, यतो बुद्धो महामुनिः।**
**सुवैद्यवद् विना कार्यं, द्रव्यासत्यं न भाषते॥ ५३॥ ४६६॥**

**न चैतदपी**ति, **एतदपि** अनन्तरमभिहितं बुद्धतात्पर्यमपि, **न न्याय्यं** न न्यायानपेतम्, अपि तु न्यायापेतमेवेति, **न च** वाच्यम्, **यतः** यस्मात् कारणात्, **महामुनिः** विदिततत्त्वो निरुपधिपरदुःखप्रहाणेच्छामूलकदेशनाप्रवृत्तिशाली, **बुद्धः** सुगतः, परैरिष्यत इति शेषः, यत एवमतः **सुवैद्यवत्** सुभिषग्वत्, **विना कार्यं** परहितानुबन्धिप्रयोजनमन्तरेण, **द्रव्यासत्यम्** अनुपकारकारकं वितथं, **न भाषते** न ब्रूते, कारणाभावात्, यथा हि-भिषग्वरः कटुकमप्यौषधं कटुकौषधपानभीतस्यातुरस्य प्रवृत्त्यर्थमकटुकमिदमिति वदन्नपि नानाप्तो भवति, तथा बुद्धोऽप्यक्षणिकैकरूपं ज्ञानमात्रास्वभावं न वस्तु विनेयमतिपरिष्काराय सर्वं क्षणिकं सर्वं विज्ञानैकस्वभावमिति वदन्नपि नानाप्तः स्यात्, यथा श्रुततत्त्वबोधनाभिप्रायेण वदंश्च स्यादेवानाप्तः, तथा च तदाप्तत्वेऽङ्गीक्रियमाणे तद्देशनाया अनन्ताभिहितार्थे तात्पर्यमङ्गीकरणीयम्, अन्यथा तु तस्यानाप्तत्वमिति हृदयम्॥ ५३॥ ४६६॥

माध्यमिकस्य शून्यमात्रतत्त्ववादिनो बौद्धविशेषस्य वार्तान्तरमुपदर्शयति—

**ब्रुवते शून्यमन्ये तु, सर्वमेव विचक्षणाः।**
**न नित्यं नाप्यनित्यं यद् वस्तु युक्त्योपपद्यते॥ ५४॥ ४६७॥**

**ब्रुवत** इति। **अन्ये तु** बौद्धविशेषाः पुनः, **विचक्षणाः** वितण्डकथालम्पटा

माध्यमिकाः, **सर्वमेव** निखिलमेव वस्तु, **शून्यं ब्रुवते** सर्वं शून्यमिति कथयन्ति कथं सर्वमेव शून्यमित्याकाङ्क्षायामाह—**न नित्यमित्यादि, यत्** यस्मात्, **वस्तु** निखिलमेव प्रमेयम्, **युक्त्या** सन्न्यायेन, विचार्यमाणमिति शेषः, **न नित्यम्** अर्थक्रियायोगात्, **नाप्यनित्यम्** उत्पादाद्ययोगात्, इत्येवं विचार्यमाणम्, **नोपपद्यते** न घटते ॥ ५४ ॥ ४६७ ॥

एतदेव प्रकटयति—

**नित्यमर्थक्रियाऽभावात् क्रमाक्रमविरोधतः ।**
**अनित्यमपि चोत्पाद-व्ययाभावान्न जातुचित् ॥ ५५ ॥ ४६८ ॥**

**नित्यमिति**—न जातुचिदिति सम्बन्धः, नित्यं वस्तु नोपपद्यत इति तदर्थः, तत्र हेतुः—**अर्थक्रियाभावादिति**—अर्थक्रियाकारित्वाभावादित्यर्थः, तदभावश्च **क्रमाक्रमविरोधतः** क्रमवद्विज्ञानादिकार्यकारित्वे भेदप्रसङ्गात्, अक्रमवत्कार्यकारित्वे चैकदा सर्वकार्यापत्तेः, **अनित्यमपीति**—अस्यापि न जातुचिदित्यनेनान्वयः, **च** पुनः, अनित्यमपि वस्तु न युक्तमित्यर्थः, अत्र हेतुः—**उत्पाद-व्ययाभावादिति**—न ह्युत्पाद-व्ययौ स्वतः, कारणापेक्षाभावेन देशादिप्रतिनियमाभावः प्रसङ्गात्, नापि परत उत्पाद-व्ययौ स्तः, सत्त्वे कारणवदुत्पत्तिविरोधात्, नहि सदुत्पद्यते इति, असत्त्वे खरविषाणवदुत्पत्ति-विनाशायोगात्, न ह्यसदुत्पद्यत इति, सदसत्त्वे च विरोधान्न संभवतः, नापि स्वपराभ्यामुत्पाद-व्ययौ भवतः, उभयदोषप्रसङ्गात्, "प्रत्येकं यो भवेद् दोषो द्वयोर्भावे कथं न सः ?" इति वचनात्, अनिमित्तावुत्पाद-व्ययौ भवत इत्यपि न युक्तम्, अनभ्युपगमात्, उत्पाद-व्यययोः किञ्चिन्निमित्तकत्वस्यैवाभ्युपगमात्, तदुक्तम्—

"न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन" ॥ १ ॥

[नागार्जुनविरचिते माध्यमिककारिकाग्रन्थे प्रत्ययपरीक्षाप्रकरणे श्लो० १] इति ॥ ५५ ॥ ४६८ ॥ ]

ननु पुत्रोत्पादज्ञाने सुखं भवति, पुत्रध्वंसज्ञाने च दुःखं भवति, इत्येवं सुखदुःखकारणोत्पादव्ययबुद्धी कथमुत्पादव्यययोरभावे इत्यत आह—

**उत्पाद-व्ययबुद्धिश्च, भ्रान्ताऽऽनन्दादिकारणम् ।**
**कुमार्याः स्वप्नवज्ज्ञेया, पुत्रजन्मादिबुद्धिवत् ॥ ५६ ॥ ४६९ ॥**

**उत्पाद-व्ययबुद्धिश्चे**ति–लौकिक्युत्पादव्ययबुद्धिश्चेत्यर्थः, **भ्रान्ता** परमार्थेन भ्रान्ता, न वस्तु सती, अत्र **कुमार्याः स्वप्नवदि**ति–स्वापदशायां कन्याया अकृतसंभोगायाः सम्भोगानुभवो यथा भ्रम इत्यर्थः, भ्रान्ताऽपि स्वप्नबुद्धिः, **आनन्दादिकारणम्** आदिपदाच्छोकपरिग्रहः, अत्र निदर्शनमाह–**पुत्रजन्मादिबुद्धिवदि**ति–कुमार्याः स्वप्ने पुत्रजन्म-पुत्रमरणबुद्धिर्भ्रान्ता यथा सुखदुःखकारणमिति ।

अत्र शून्यवाद्यभिमतयुक्तिनिकरावबोधविकलानां विनेयानां बुद्धिपरिकर्मणा निमित्तमुपाध्यायोपदर्शिता माध्यमिकमतमीमांसोल्लिख्यते–

"अत्रायममीषां संप्रदायः–नीलादयो न परमार्थसद्व्यवहारानुपातिनः, विशददर्शनावभासित्वात्, तिमिरपरिकलितदृगवभासीन्दुद्वयवत्; न च चन्द्रद्वयज्ञानं बाध्यत्वाद् भ्रान्तं नीलादिज्ञानं त्वबाध्यत्वान्न तथेति साम्प्रतम्, बाध्यत्वानुपपत्तेः, तथाहि–बाधकेन न विज्ञानस्य तत्कालभावि स्वरूपं बाध्यते, तदानीं तस्य स्वरूपेण प्रतिभासनात्, नाप्युत्तरकालं, क्षणिकत्वेन तस्य स्वयमेवोत्तरकालेऽभावात्; नापि प्रमेयं प्रतिभासमानेम रूपेण बाध्यते, तस्य विशदप्रतिभासादेवाभावासिद्धेः, अप्रतिभासमानेन तु रूपेण स्वत एव बाधः, नापि प्रवृत्तिरुत्पन्ना बाध्यते, उत्पन्नत्वादेवासत्त्वायोगात्, अनुत्पन्नायास्तु स्वत एव बाधः । किञ्च बाधकं न बाध्यापेक्षया भिन्नसन्तानम्, अतिप्रसङ्गात्, एकसन्तानमपि न तदेक कालम्; असम्भवात्; नापि भिन्नकालमेकार्थम्, उत्तरघटज्ञानस्य पूर्वघटज्ञानबाधकतापत्तेः; नापि भिन्नार्थम्, उत्तरपटज्ञानस्य तथात्वापत्तेः; नाप्यनुपलब्धिर्बाध्यज्ञानसमानकाला तद्बाधिका, तस्या असिद्धेः; नाप्युत्तरकालभाविनी बाध्यज्ञानैकार्थविषया, एकविषयकस्य तदर्थसाधकत्वेनाबाधकत्वात्; नापि विभिन्नविषया, तस्यास्तदानीं स्वविषयसाधकत्वेन बाध्यज्ञानविषयाभावासाधकत्वात्; न च दुष्टकारणप्रभवत्वेनेन्दुद्वयधियोऽसत्यार्थविषयत्वावगमो बाध्यत्वम्, असिद्धेः, इन्द्रियेण दोषाग्रहणात्; न च समानसामग्रीकस्य नरान्तरस्य तदग्रहणादितरत्र दुष्टकारणानुमानम्, तिमिराभावान्नरान्तरे सामग्रीसाम्यासिद्धेः; न च मिथ्यारूपत्वेन तत्र दुष्टकारणजन्यत्वानुमानम्, इतरेतराश्रयात्; न चेन्दुद्वयज्ञानस्य विसंवादित्वादसत्यत्वम्, समानजातीयतद्विज्ञानानुत्पत्तिरूपविसंवादस्य यावत्तिमिरमसिद्धेः, विजातीयज्ञानोत्पत्तेर्विसंवादत्वे च स्तम्भादिप्रतिभासेऽतिप्रसङ्गात्, ततो न नील-द्विचन्द्रज्ञानयोः कश्चिद् विशेषः, द्विचन्द्रवन्नीलस्य विचार्यमाणस्यानुप-

पन्नत्वात्; न चैवं नीलादेर्भिन्नस्यानुपपत्तेरभेदस्य न्यायप्राप्तत्वाज्ज्ञानाद्वैतापत्तिर्न शून्यतेति वाच्यम्, नीलादेर्विचित्रस्य प्रतिभासे जगतोऽपि चित्रताप्राप्तेः तदुक्तम्–"किं स्यात् सा चित्रतैकस्याम्" इत्यादि।

न च नीलाद्यनुपरक्तं प्रकृतिपरिशुद्धज्योतिर्मात्रमेव तत्त्वमस्तु, न शून्यतेति वाच्यम्; तथा भूतज्योतिर्मात्रस्य कदाचनाऽप्यप्रतिपत्तेः; नीलादेरवभासशून्यताऽपि न प्रतीयत इति चेत्?, किं ततः? न हि वयं प्रतिभासविरतिलक्षणां शून्यतां ब्रूमः, किन्तु प्रतिभासोपमत्वं सर्वधर्माणाम्, उक्तं च–"प्रतिभासोपमाः सर्वे धर्माः" इति, प्रतिभासश्च सर्वो भेदाभेदशून्यः, न हि नीलस्वरूपं सुखाद्यात्मना भिन्नमभिन्नं वाऽनुभूयते, अन्यापेक्षत्वात् तथानुभवस्य; न च भेदवेदनमेवैकत्वावेदनम्, एकत्वावेदनस्यैव भेदवेदनत्वप्रसङ्गात्; एतेन "प्रतिभासे सति कथं शून्यता" इत्यपास्तम्। "तस्यैकानेकस्वभावायोगतः शून्यता" इति प्रतिपादनात्, तदुक्तमाचार्येण—

"भावा ये न निरूप्यन्ते, तद्रूपं नास्ति तत्त्वतः।
यस्मादेकमनेकं वा, रूपं तेषां न विद्यते" ॥ १ ॥ इति।

ततो बाह्यमाध्यात्मिकं वा रूपं न तत्त्वम्, स्थूल–परमाण्वादिरूपानुपपत्तेः, किन्तु सांवृतमेव, संवृत्तिश्च त्रिधा एका लोकसंवृत्तिर्मरीचिकादिषु जलभ्रान्तिरूपा, अपरा तत्त्वसंवृत्तिः सत्त्वनीलादिप्रतीतिरूपा, अन्या चाभिसमयसंवृत्तिर्योगिप्रतिपत्तिरूपा, योगिप्रतिपत्तेरपि ग्राह्य-ग्राहकाकारतया प्रवृत्तेः, उक्तं च भगवद्भिः–"कतमत् संवृत्तिसत्त्वं यावल्लोकव्यवहारः?" इति, ततो मध्यमक्षणरूपा संविदेव सर्वधर्मरहिता परमार्थसतीति सिद्धम्; आह च–

"मध्यमाप्रतिपत् सैव, सैव धर्मनिरात्मता॥
भूतकोटिश्च सैवेयं, तथ्यता सैव शून्यता॥ १ ॥ इति,

सा चाविभागरूपाप्यविद्यावशाद् विभक्तरूपेव भासते, तदुक्तं–

"अविभागोऽपि बुद्ध्यात्मा, विपर्यासितदर्शनैः।
ग्राह्य–ग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ १ ॥" इति,

समस्ताविद्याविलये तु स्वच्छसंविन्मात्रमाभासते, तदुक्तं–

"नान्योऽनुभावो बुद्ध्याऽस्ति, तस्य नानुभवोऽपरः।
ग्राह्य-ग्राहकवैधुर्यात्, स्वयं सैव प्रकाशते ॥ १ ॥" इति ॥ ५६ ॥ ४६९ ॥

शून्यतावादवार्ताप्रतिक्षेपवार्तामाह—

**अत्राप्यभिदधत्यन्ये, किमित्थं तत्त्वसाधनम् ।**
**प्रमाणं विद्यते किञ्चिदाहोश्विच्छून्यमेव हि ? ॥ ५७॥४७० ॥**

**अत्रापीति**–शून्यतावादेऽपीत्यर्थः, **अन्ये** सूरयः, **अभिदधति** कथयन्ति, किमभिदधतीत्यपेक्षायामाह–**किमित्थमित्यादि**, किममुना प्रकारेण **तत्त्वसाधनं** शून्यतातत्त्वसिद्धिनिबन्धनं, **प्रमाणं किञ्चित्** प्रत्यक्षादिप्रमाणानाम्मध्ये किमपि प्रमाणं **विद्यते** वस्तुसत् समस्ति, **आहोस्वित्** अथवा, **शून्यमेव हि** शून्यतासिद्धिप्रवणं प्रमाणं न विद्यत एव ॥ ५७ ॥ ४७० ॥

पक्षद्वयस्यापि दुष्टत्वमावेदयति—

**शून्यं चेत् सुस्थितं तत्त्वमस्ति चेच्छून्यता कथम् ? ।**
**तस्यैव ननु सद्भावादिति सम्यग् विचिन्त्यताम् ॥५८॥४७१॥**

**शून्यं चेदिति**–शून्यतासिद्धिनिबन्धनं प्रमाणं न विद्यते यदीत्यर्थः, **सुस्थितं तत्त्वं** शून्यतालक्षणं तत्त्वं सुव्यवस्थितम्, अवस्तुसता प्रमाणेन शून्यतालक्षणप्रमेयव्यवस्थितेरित्युपहासः शून्यतातत्त्ववादिनो गम्यते, **अस्ति चेत् ?** शून्यतासिद्धिप्रमाणं यदि वस्तुसद् विद्यते; तदा **शून्यता कथं** सर्वं शून्यमित्येवं शून्यता तत्त्वं कथं सिद्ध्येत्; तत्र हेतुः–**तस्यैव ननु सद्भावात्** निश्चितं शून्यतासाधकस्य प्रमाणस्यैव सर्वान्तर्गतस्य सद्भावात् सकलपदार्थाभावासिद्धेः, **इति** एवम्, **सम्यग्** याथार्थ्येन, माध्यस्थ्यमवलम्ब्य **विचिन्त्यतां** परिभाव्यताम् ॥ ५२ ॥ ४७१ ॥

अथ, अतिरिक्ता काचित् नामशून्यता न प्रतिभासत एवेति न तत्र प्रमाणान्वेषणं तत्र सफलं, किन्तु सर्वधर्माणां प्रतिभासोपमत्वमेव शून्यत्वमित्याशङ्कयाह–

**प्रमाणमन्तरेणापि, स्यादेवं तत्त्वसंस्थितिः ।**
**अन्यथा नेति सुव्यक्तमिदमीश्वरचेष्टितम् ॥ ५९ ॥ ४७२ ॥**

**प्रमाणमन्तरेणापीति** तत्त्वव्यवस्थापकप्रमाणं विनापीत्यर्थः, **एवम्** अमुना प्रकारेण, **तत्त्वव्यवस्थितिः** सर्वधर्माणां मायोपमत्वव्यवस्थितिः, **स्यात्** भवेत्, **अन्यथा** अनुभूयमानानन्तधर्मात्मकत्वे च, **न** व्यवस्थितिर्न भवेत्, **इति** एवंप्रकारम्, **इदम्** अनन्तराभिहितम्, **सुव्यक्तं** स्पष्टम्, **ईश्वरचेष्टितम्**, स्वतन्त्रराजाज्ञामात्रम्, प्रमाणमन्तरेण सर्वधर्मराहित्यमपि न स्वीकर्तुमित्यभिसन्धिः ॥ ५९ ॥ ४७२ ॥

पराशयमाशङ्क्यापहस्तयति—

**उक्तं विहाय मानं चेच्छून्यताऽन्यस्य वस्तुनः ।**
**शून्यत्वे प्रतिपाद्यस्य, ननु व्यर्थः परिश्रमः ॥ ६० ॥ ४७३ ॥**

**उक्तमिति । उक्तं मानं** शून्यतासाधकं मानम्, **विहाय** त्यक्त्वा, **अन्यस्य वस्तुनः** शून्यतासाधकप्रमाणव्यतिरिक्तस्य पदार्थस्य, **शून्यता चेत्** यद्यभ्युपेयते, शून्यतासाधकं मानं पुनरशून्यमेवेति पराभिसन्धिः, तदा **प्रतिपाद्यस्य** यं वादिनमन्तेवासिनं वोद्दिश्य शून्यतासाधकं मानं प्रयुज्यते तस्य, **शून्यत्वे** अभावे सति, **व्यर्थः परिश्रमः** शून्यतासाधकमानप्रयोगप्रयत्नो निष्प्रयोजन एव, निष्प्रयोजनस्यापि प्रयोगस्यादरे शशशृङ्गादिकमुद्दिश्यापि शून्यतासाधकप्रमाणप्रयोगं किं न कुरुषे ? तथा च सुष्ठूक्तं कुमारिलभट्टेन—

"सर्वदा सदुपायानां, वादमार्गः प्रवर्तते ।
अधिकारोऽनुपायत्वात् न वादेः शून्यवादिनः ॥१॥" इति ॥६०॥४७३॥

प्रतिपाद्यस्याशून्यतोपगमे दोषमुपदर्शयति—

**तस्याप्यशून्यतायां च, प्राश्निकानां बहुत्वतः ।**
**प्रभूताऽशून्यतापत्तिरनिष्टा संप्रसज्यते ॥ ६१ ॥ ४७४ ॥**

**तस्यापीति**–प्रतिपाद्यस्यापीत्यर्थः, अपिना शून्यतासाधकप्रमाणस्याम्रेडनम्, **अशून्यतायां** स्वीक्रियमाणायां, **प्राश्निकानां** पर्यनुयोगकर्तॄणां, प्रतिपाद्यानां, **बहुत्वतः** बहुसंख्यकत्वात्, **प्रभूताऽशून्यतापत्तिः** बहूनां पारमार्थिकसत्यतापत्तिः, **अनिष्टा** सर्वशून्यतावादिनस्तवानभिलषिता, **संप्रसज्यते** बलादापद्यते ॥ ६१ ॥ ४७४ ॥

इदमेव स्पष्टयन्नाह—

**यावतामस्ति तन्मानं, प्रतिपाद्यास्तथा च ये ।**
**सन्ति ते सर्व एवेति, प्रभूतानामशून्यता ॥ ६२ ॥ ४७५ ॥**

**यावतामिति**–यावतां प्रमातॄणामित्यर्थः, **अस्ति तन्मानं** शून्यतासाधकं प्रमाणं विद्यते, **च** पुनः, **तथा** प्रमातृपुरुषवत्, **ये प्रतिपाद्याः ते सर्वे एव सन्ति** परमार्थतः सत्त्ववन्तः, न तु शून्याः, **इति** एतस्मात् कारणात्, **प्रभू-**

तानां बहूनां पदार्थानाम्, अशून्यता वास्तविकता, अत्रान्तेवासिबुद्धिवैशद्याय प्रश्नोत्तराभ्यां शून्यतामताप्रामाण्यप्रसिद्धये विचार आकलित उपाध्यायैः, सोऽत्रोपदर्श्यते—

"ननु य एव परिशीलितसुगतश्रुतोपनिषद्दलितनिखिलाविद्याकलङ्कः स एवाशून्यः, तस्यैव च निर्धर्मिकसंविन्मात्रं मानमशून्यं, परमार्थसत्त्वात्, इतरेषां तु वादिप्रतिवादिप्राश्निकानां व्यवहारत एव सत्त्वम्, तत एव च साध्य-साधन-दृष्टान्तादिभेदेनोक्तप्रपञ्चासत्यतानुमानसंभवः, तदुक्तमाचार्येण—"सर्व एवायमनुमानानुमेयव्यवहारः सांवृतः" इत्यादीति चेत्?, न—तव तत्त्वज्ञानिनः शून्यतानुभवस्य त्वयैव श्रद्धाविषयत्वात्, अनुमानेन च प्रागुक्तेन न नीलादिज्ञाने द्विचन्द्रादिज्ञानतुल्यमसत्यत्वं साधयितुं शक्यम्, बाध्यत्वाबाध्यत्वाभ्यामुभयवैलक्षण्यात्, न च बाध्यबाधकभावो निराकृत एवेति वाच्यम्, व्यवहारसिद्धस्य तस्य निराकर्तुमशक्यत्वात्, बाधकेन ज्ञानेन स्वरूपस्य विषयस्य फलस्य वाऽबाधेऽपि बाध्यज्ञानेऽप्रामाण्यज्ञापनात्, तदुक्तं सूरिणा—"किन्तु ज्ञानस्यासद्विषयत्वम्, अर्थस्य चासत्प्रतिभासनं तेन ज्ञाप्यते" इति, अत्र ज्ञानस्यासद्विषयत्वं तदभाववति तत्प्रकारकत्वम्, अर्थस्यासत्प्रतिभासनं च स्वाभाववद्विशेष्यकज्ञानप्रकारत्वम्, तद्भाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकज्ञानत्वं ज्ञानस्यासद्विषयत्वम्, स्वाभाववन्निष्ठविशेष्यतानिरूपितज्ञानीयप्रकारतावत्त्वमर्थस्यासत्प्रतिभासनमिति यावत्, तथाभानं च तदभावस्फूर्त्या मानसाध्यक्षोहादिना दीर्घाध्यवसायिनेति तत्त्वम्; कथं च बाध्यबाधकभावानभ्युपगमे स्कन्ध-सन्तानादिविकल्पानां निर्विषयत्वोपवर्णनं युक्तिमत् स्यात्, कथं वा बाध्यबाधकभावप्रतिषेधविधायियुक्त्युपन्यासो न व्यर्थः स्यात्, समारोपव्यवच्छेदार्थं तदुपन्यासे तद्व्यवच्छेदस्य स्वरूपापहाररूपत्वे बाध्यबाधकभावोपगमप्रसङ्गात्, उदयकाल एव तदपहारे तदर्थं शास्त्रप्रणयनानुपपत्तेश्च।

अथ शास्त्रादेः प्राक्तनसमारोपक्षणादुत्तरसमारोपक्षणजननासमर्थः क्षणः समुपजायत इति तन्निवृत्तिः, तर्हि बाधकाद् बाध्यनिवृत्तिरपि तथैव सम्पत्स्यत इति न तन्निराकरणं युक्तम्, ईदृशं बाध्यत्वमेव फलतो नीलादिज्ञाने साध्यत इति चेत्? न, प्रत्यक्षबाधात्, न हि द्विचन्द्रादिज्ञान इव सत्यनीलादिज्ञानेऽवतरति कस्यापि बाध इति; अथ द्विचन्द्रादौ बाधोऽपि लोकाभिमत एव, तत्र लोकसंवृतिसिद्धं

सत्त्वमिति लोकानां सत्त्वाभिमान इति परमार्थतोऽसत्त्वं तत्र शास्त्रेण ज्ञाप्यते; एवं च नीलादौ परमार्थासत्त्वसाधने लोकबाध्यत्वाभावेऽपि न दोषः, "प्रकाशस्य प्रकाशता" इत्यत्र लोकसिद्धस्यापि भेदस्य "नीलादीनां स्वभावः" इत्यत्र चाभेदस्य विचारासहत्वेन परमार्थतोऽसत्त्वादिति चेत् ?, न-लोकसिद्धस्य साध्यस्य साधने लोकसिद्धस्य बाधस्य दोषत्वात्, अलौकिकस्य च साध्यस्याप्रसिद्धेः, परमार्थसत्त्वज्ञानं नीलादौ नास्त्येव लोकानां, सत्त्वमात्रमेव हि तैस्तत्रानुभूयते, तच्च न प्रकृतिबाधकम्, घटज्ञानेऽपि नीलघटाभावज्ञानवत् सत्त्वज्ञानेऽपि परमार्थसत्त्वाभावज्ञानोपपत्तेरिति चेत् ?, तर्हि द्विचन्द्रादावप्यसत्त्वमात्रमनुभूयते, न तु परमार्थतोऽसत्त्वम्, इति क्व साध्यसिद्धिः ? ।

किञ्च, सकलशून्यतापक्षस्य यथा स्वप्नेऽप्यप्रत्ययेन निरासः, तथा स्वच्छसंविदतिरिक्तशून्यतापक्षस्य द्रष्टव्यः, मध्यमक्षणस्थायिनः संविन्मात्रस्य कदाऽप्यनुपलम्भात्, स्वपरव्यवसायिन एव ज्ञानस्य स्फुटमुपलम्भात्; न चानुपलब्धप्रत्ययेनोपलब्धप्रत्ययबाधा सुघटा, अतिप्रसङ्गात्; न चासतां नीलाद्याकाराणां परिस्फुरणं, न तु तुरङ्गशृङ्गादिनामित्यत बीजमस्ति; न च निर्धर्मकसंविन्मात्रे क्षणिकत्वादिधर्मोऽपि घटते; इति वासनामात्रमेतत्परेषाम्, तस्माद् यथानुभवमेकानेकस्वरूपमेव वस्तु श्रद्धेयम्, तत्र विरोधस्य निरस्तत्वात्, निरसिष्यमाणत्वाच्चेत्यवसेयम्" इति शून्यवादिनो माध्यमिकस्यातिविमूढत्वख्यापनाय ।

"सौगत ! प्रणयिनीव नितान्तं शून्यता तव न मुञ्चति चित्तम् ।
प्राज्ञपर्षदि न कश्चन हर्षस्तेन शून्यहृदयस्य तवास्ति ॥ १ ॥
मुग्धमाध्यमिक ! मध्यमसंवित् किं सता बत समाश्रयणीया ।
उत्तमां सुविदितामिह चित्रां तामनाप्य न हताश ! हतः किम् ॥ २ ॥

इति पद्यद्वयमभिनवमावेदितवन्त उपाध्यायाः ॥ ६३ ॥ ४७५ ॥

अस्य विषयविभागाभिधित्सयाऽऽह—

**एवं च शून्यवादोऽपि, तद्विनेयानुगुण्यतः ।**
**अभिप्रायत इत्युक्तो, लक्ष्यते तत्त्ववेदिना ॥ ६३ ॥ ४७६ ॥**

**एवं चेति**–उक्तरीत्या शून्यवादस्याघटमानत्वे चेत्यर्थः, **शून्यवादोऽपी**त्यपिना क्षणिकवाद-विज्ञानवादयोर्विषयविभागस्य पूर्वाभिहितस्याम्रेडनम्, **तद्विने**-

**यानुगुण्यतः** शून्यताविषयविभागावधारणप्रवणशिष्यहितानुरोधात्, **तत्त्ववेदिना** तत्त्वाभिज्ञेन बुद्धेन, **अभिप्रायतः** तत्प्रयोजनाभिप्रायात्, उक्त इत्यत्र शून्यवादोऽपीति सम्बध्यते, न तु तत्त्वाभिधित्सया शून्यवाद उक्तः, **इति लक्ष्यते** एवं सम्भाव्यते, उक्तप्रकारककारणमन्तरेण द्रव्यमृषावादित्वे बुद्धस्यानाप्तत्वप्रसङ्गादिति ॥ ६३ ॥ ४७६ ॥

येषां शास्त्रविचारणाऽतिविमला तत्तन्नयालम्बिनी,
सिद्धान्तोदधिमन्थनैकप्रवणा बुद्धिर्निसर्गोज्ज्वला ।
ते श्रीवाचकपुङ्गवा मितपथव्याख्यानतो मन्मते-
र्व्याख्याकौशलमादधन्ति कृतिनोऽनेकान्तविद्याचणाः ॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरु-श्रीविजयनेमिसूरीश्वर-पट्टालङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न' इति पदालङ्कृतेन श्रीविजयलावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चयटीकायां षष्ठः स्तबकः समाप्तः ॥

॥ अर्हम् ॥

॥ राजनगरमण्डनश्रीमुलेवापार्श्वनाथाय नमः ॥

ચૌદશો ને ચુમ્માલીશ ગ્રંથના પ્રણેતા—યાકિનીમહત્તરાધર્મ-
સૂનુ—સૂરિપુરન્દર—ભગવાન્ શ્રી હરિભદ્રસૂરીશ્વરવિરચિત
'શાસ્ત્રવાર્તાસમુચ્ચય'ના ચતુર્થ સ્તબકનો

# સંક્ષિપ્ત ભાવાર્થ:—

ભાવાર્થકાર:—પૂજ્યપન્યાસજી મહારાજશ્રી સુશીલવિજયજી
ગણિવર્ય.

卐

અસત્કાર્યવાદી બૌદ્ધની માન્યતા—

**मन्यन्तेऽन्ये जगत् सर्वं, क्लेशकर्मनिबन्धनम् ।**
**क्षणक्षयि महाप्राज्ञा, ज्ञानमात्रं तथा परे ॥१॥ २३८ ॥**

રાગાદિ અને કર્મ જેનું કારણ છે એવું અખિલ ચરાચર જે જગત તેને સૌત્રાન્તિક નામના બુદ્ધાનુયાયીઓ ક્ષણિક માને છે. અને તેથી વિશેષ દીર્ઘ વિચારણા કરનારા બુદ્ધાનુયાયી યોગાચાર ઉપરોક્ત જગતને જ્ઞાનસ્વરૂપ જ માને છે. ( ૧ )

તેમાં સૌત્રાન્તિકની માન્યતા—

**तथाहुः क्षणिकं सर्वं, नाशहेतोरयोगतः ।**
**अर्थक्रियासमर्थत्वात्, परिणामात् क्षये क्षणात् ॥२॥ २३९॥**

સૌત્રાન્તિક કહે છે કે—

(૧) અખિલ ચરાચર જગત ક્ષણિક છે, કારણ કે નાશ હેતુનો સમ્બન્ધ નહિં ઘટી શક્તો હોવાથી.
(૨) „ વસ્તુમાત્રને અર્થક્રિયામાં સમર્થપણું હોવાથી.
(૩) „ વસ્તુનું રૂપાન્તર થતું હોવાથી.
(૪) „ અંતે ક્ષય દેખાતો હોવાથી.

તેમાં પ્રથમહેતુનો આશય એ છે કે—

સ્થિરવાદી ત્રણ જાતની વસ્તુ માને છે. (૧) નિત્ય (૨) કિંચિત્ કાલસ્થાયી અને (૩) ક્ષણિક.

આમાં કિંચિત્ કાલસ્થાયીપણું શાથી છે કે કિંચિત્ કાલસ્થાયી વસ્તુને નાશકહેતુનો પ્રયોગ મળે ત્યારે તે નાશ પામે છે.

આ બાબતમાં સૌગાન્તિકનું કહેવું એ છે કે નાશહેતુનો યોગ જ ઘટી શક્તો નથી, માટે તેનો ક્ષણિકમાં જ સમાવેશ કરવો પડશે, કારણ કે તેને નિત્ય તો માનતા જ નથી.

બીજા હેતુનો આશય એ છે કે—

જે જે વસ્તુ હોય તે તે અવશ્ય અર્થક્રિયામાં સમર્થ હોય અર્થાત્ કાર્યને અવશ્ય કરે.

ઘટ ( ઘડો ) જ્યારે જલાહરણ કરે છે ત્યારે ઘૃતાહરણની શક્તિ છે કે નહિં ?

જો છે તો પછી તે વખતે ઘટથી ઘૃતાહરણ પણ થવું જોઇએ, અને જો નથી તો જે વખતે ઘટ ઘૃતાહરણ કરે છે તે વખતે તે ઘટ જુદો જ છે, માટે તેને ક્ષણિક પ્રવાહગત માનવો જોઇએ. તેથી વસ્તુ ક્ષણિક છે એમ સિદ્ધ થાય છે.

ત્રીજા હેતુનો આશય એ છે કે—

વિવક્ષિત સમયે જે જાતની હોય છે તે જાતની ક્ષણાન્તરે રહેતી

નથી, માટે તે વસ્તુ ક્ષણભર રહીને નાશ પામતી હોવાથી ક્ષણિક છે.

ચોથા હેતુનો આશય એ છે કે—

જે સમયે ઘટને નાશ પામતો જોયો તેના પૂર્વ સમયે ઘટમાં નાશ પામવાનો સ્વભાવ હતો, માટે નષ્ટ થયો.

એ સ્વભાવ નથી એમ જો માનીએ તો કદાપિ નાશ ન થાય. આ રીતે પૂર્વ પૂર્વ સમયમાં નાશ પામવાનો સ્વભાવ હોવાથી ક્ષણિકત્વ સિદ્ધ થાય છે.

આનો વિશેષ અર્થ '**સ્યાદ્વાદવાટિકા**' ટીકાથી જોઈ લેવો (૨)

યોગાચારની માન્યતા—

**ज्ञानमात्रं च यल्लोके, ज्ञानमेवानुभूयते।**
**नार्थस्तद्व्यतिरेकेण, ततोऽसौ नैव विद्यते ॥३॥ २४० ॥**

જ્ઞાનરૂપ જ જગત છે. અર્થાત્ જગતમાં જે કાંઈ પણ દેખાય છે તે સર્વ જ્ઞાનસ્વરૂપ જ છે, કારણ કે જ્ઞાન જ અનુભવમાં આવે છે.

**શંકા**—ઘટપટાદિ પણ અનુભવમાં આવે છે, તેનું શું ?

**સમાધાન**—જ્યાં જ્યાં જ્ઞાન વિષયતા હોય ત્યાં ત્યાં જ્ઞાનનું તાદાત્મ્ય ( અભેદ ) છે, માટે ઘટાદિ જે અનુભવાય છે તે પણ જ્ઞાન જ છે.

લોકમાં ઘટ જોયો એવો જે વ્યવહાર થાય છે તે કાલ્પનિક છે પણ વાસ્તવિક નથી. (૩)

સૌત્રાન્તિક અને યોગાચારની માન્યતાના વિષયમાં સ્યાદ્વાદીનું કથન—

**अत्राप्यभिदधत्यन्ये, स्मरणादेरसम्भवात्।**
**बाह्यार्थवेदनाच्चैव, सर्वमेतदपार्थकम् ॥४॥ २४१ ॥**

આ બાબતમાં સ્યાદ્વાદી કહે છે કે—ઉપર જણાવેલ બૌદ્ધમતની પ્રક્રિયા નિરર્થક છે, કારણ કે સર્વ વસ્તુને ક્ષણિક જો માનવામાં આવે તો સ્મરણ વગેરે સંભવી શકશે નહિં. અને બાહ્ય ઘટપટાદિ પદાર્થનો જે અનુભવ થાય છે તેમાં બાધક કોઈ પણ પ્રમાણ નથી, માટે બાહ્ય અર્થ માનવો જોઇએ, પણ કેવલ જ્ઞાનમય જ જગત માની શકાય નહિં. (૪)

બૌદ્ધમતમાં અનુગામી કોઈ પણ એક વસ્તુ નહિં હોવાથી સ્મરણ, પ્રત્યભિજ્ઞા, દૃષ્ટકૌતુક, ઉદ્વેગ, પ્રવૃત્તિ, પ્રાપ્તિ અને કર્મફળનો ઉપભોગ, એ સર્વે ઘટી શકતાં નથી. આ વાત ક્રમશઃ નીચેના ત્રણ શ્લોકોથી જણાવે છે—

[ સ્મરણનો અસંભવ— ]

**अनुभूतार्थविषयं, स्मरणं लौकिकं यतः ।**
**कालान्तरे तथाऽनित्ये, मुख्यमेतन्न युज्यते ॥ ५ ॥ २४२ ॥**

આબાલગોપાલ પ્રસિદ્ધ વસ્તુ એ છે કે અનુભવેલી વસ્તુનું કાળાંતરે સ્મરણ થાય છે. હવે ક્ષણિક જો વસ્તુને માનવામાં આવે તો સ્મરણ કદી ઘટી શકશે નહિં, કારણ કે જેણે અનુભવ કર્યો હોય તેને જ સ્મરણ થાય, અન્યને નહિં. અને ક્ષણિકવાદમાં તો સ્મરણ વખતે અનુભવ કરનારી વ્યક્તિ જ નથી, તો પછી વાસ્તવિક સ્મરણ કોને થાય ? અર્થાત્ કોઇને પણ ન થઈ શકે. ( ૫ )

તથા ક્ષણિકવાદમાં પ્રત્યભિજ્ઞાનો અસંભવ—

**सोऽन्तेवासी गुरुः सोऽयं, प्रत्यभिज्ञाप्यसङ्गता ।**
**दृष्टकौतुकमुद्वेगः प्रवृत्तिः प्राप्तिरेव वा ॥ ६ ॥ २४३ ॥**

' તે આ શિષ્ય અને તે આ ગુરુ ' આવી ગુરુશિષ્યભાવની જે પ્રત્યભિજ્ઞા બુદ્ધિવિશેષ તે પણ ઘટી શકશે નહિં. અર્થાત્ ' પૂર્વે પરીક્ષા કરાયેલો આ શિષ્ય છે, અને તેને હું ભણાવું 'એવી બુદ્ધિની

વિચારણા અને ' આ મારા નક્કી કરેલા ગુરુ છે. તેની પાસે હું ભણું ' આવી જે બુદ્ધના શિષ્યની વિચારણા તે પણ ક્ષણિકત્વ માનવાથી ઘટી શકશે નહિં.

આ રીતે પ્રત્યેક વસ્તુની પ્રત્યભિજ્ઞા અસંગત થઈ જશે.

દૃષ્ટકૌતુક—આ તો મેં પૂર્વે જોયેલું કૌતુક છે, હવે એને જોવાની શી જરૂરત છે ? આ રીતે દૃષ્ટકૌતુક પણ ક્ષણિકત્વ માનવાથી ઘટી શકશે નહિં, કારણ કે વિચારણા સમયે દૃષ્ટ વસ્તુ જ નથી.

ઉદ્વેગ——તીવ્ર ઈચ્છા. જે વસ્તુ જોવાથી મને પૂર્વે આનંદ થયો હતો, તે વસ્તુને પુનઃ કયારે જોઉં ? આવી ઉત્કટ ઈચ્છા પણ ક્ષણિકત્વ માનવાથી ઘટી શકશે નહિં, કારણ કે દૃષ્ટ વસ્તુ તો પ્રથમથી જ નષ્ટ થયેલી છે.

**પ્રવૃત્તિ**—કોઈ પણ વસ્તુ વિષયક પ્રવૃત્તિ ક્ષણિકત્વ માનવાથી ઘટી શકશે નહિં, કારણ કે ઈષ્ટ સાધનના જ્ઞાનનો જે વિષય હોય તેમાં પ્રવૃત્તિ થાય છે. અને અહિં તો ઈષ્ટસાધનના જ્ઞાનનો વિષય પ્રવૃત્તિસમયે નષ્ટ થયેલો છે, માટે કોના પ્રત્યે પ્રવૃત્તિ થાય ?

**પ્રાપ્તિ**——પણ ક્ષણિકત્વ માનવાથી ઘટી શકશે નહિં, કારણ કે ઈચ્છાનો જે વિષય હોય તેની પ્રાપ્તિ કરવાની હોય છે. અને અહિં તો ક્ષણિકપણું હોવાથી તે તો પ્રાપ્તિસમયે નષ્ટ થઈ જાય છે, માટે કોની પ્રાપ્તિ થાય ?

તથા કર્મફળના ઉપભોગનો અસંભવ—

**स्वकृतस्योपभोगस्तु, दूरोत्सारित एव हि ।**
**शीलानुष्ठानहेतुर्थः, स नश्यति तत्रैव यत् ॥ ७ ॥ २४४ ॥**

સ્વકૃત જે શુભાશુભ કર્મ તેનો ઉપભોગ એટલે ફળાનુભવ તે પણ ઘટી શકશે નહિં, કારણ કે શીલાદિ અનુષ્ઠાનનો જે હેતુ હતો તે તો તે જ વખતે નાશ પામી ગયેલ છે. ( ૭ )

બુદ્ધનું કથન—

**संतानापेक्षयास्माकं, व्यवहारोऽखिलो मतः ।**
**स चैक एव तस्मिंश्च, सति कस्मान्न युज्यते ? ॥ ८ ॥ २४५ ॥**

અમારા બૌધ્ધમતમાં સંતાનની—પ્રવાહની અપેક્ષાએ સમસ્ત વ્યવહાર માનેલો છે. અને તે સંતાન અનુગામી એક જ છે, માટે સ્મરણાદિક ( એટલે સ્મરણ, પ્રત્યભિજ્ઞા, દૃષ્ટ કૌતુક, ઉદ્વેગ, પ્રવૃત્તિ, પ્રાપ્તિ અને કર્મફળનો ઉપભોગ ) કેમ ન ઘટી શકે ? અર્થાત્ અવશ્ય ઘટી શકે. ( ૮ )

**यस्मिन्नेव तु संताने, आहिता कर्मवासना ।**
**फलं तत्रैव संधत्ते, कर्पासे रक्तता यथा ॥ ९ ॥ २४६ ॥**

જે સંતાનને વિષે શુભાશુભ કર્મની વાસના છે, તેને વિષે જ ફળને ઉત્પન્ન કરે છે. જેમ કપાસને વિષે કરેલી રક્તતા તે કપાસને વિષે જ પોતાના ફળરૂપ રક્તબુધ્ધિને ઉત્પન્ન કરે છે. ( ૯ )

સ્યાદ્વાદીનો જવાબ—

**एतदप्युक्तिमात्रं यत्र हेतु-फलभावतः ।**
**संतानोऽन्यः स चायुक्त, एवासत्कार्यवादिनः ॥ १० ॥ २४७ ॥**

ઉપરોકત બુદ્ધનું કથન વચનમાત્ર છે. અર્થાત્ યુકિતવિકળ છે, કારણ કે બુધ્ધનો માનેલો સંતાન—પ્રવાહ જે છે તે પૂર્વ પૂર્વ-ક્ષણ ઉત્તરોત્તરક્ષણમાં હેતુ છે. આવા હેતુહેતુમદ્‌ભાવથી ભિન્ન કોઈ નથી. અને અસત્કાર્યવાદી માટે આ હેતુહેતુમદ્‌ભાવ અયુક્ત છે.

એ જ વાત નીચેના શ્લોકથી જણાવે છે. ( ૧૦ )

**नाभावो भावतां याति, शशशृङ्गे तथाऽगतेः ।**
**भावो नाभावमेतीह, तदुत्पत्त्यादिदोषतः ॥ ११ ॥ २४८ ॥**

અભાવ છે તે ભાવપણાને પામતો નથી, કારણ કે શશશૃંગમાં તે રીતે દેખાતું નથી. અર્થાત્ અભાવ ભાવપણાને જો પામે તો અભાવરૂપ જે શશશૃંગ તે ભાવપણાને પામવું જોઇએ. ભાવ છે તે પણ અભાવપણાને પામતો નથી, કારણ કે ભાવ છે એ અભાવપણાને પામે છે એમ જો માનીએ તો અભાવની ઉત્પત્તિ વગેરેનો દોષ આવશે.

આ જ વાત નીચેના શ્લોકથી સ્પષ્ટ કરે છે. ( ૧૧ )

**सतोऽसत्त्वे तदुत्पादस्ततो नाशोऽपि तस्य यत् ।**
**तन्नष्टस्य पुनर्भावः, सदा नाशे न तत् स्थितिः ॥ १२ ॥ २४९ ॥**

સત્‌નું અસત્‌પણું માને છતે અસત્‌ની ઉત્પત્તિ માનવી પડશે. અને જેની ઉત્પત્તિ તેનો વિનાશ એ નિયમથી તેનો વિનાશ પણ માનવો પડશે. આ રીતે અભાવનો વિનાશ માને છતે પાછી મૂળ વસ્તુ આવીને ઊભી રહેશે.

કદાચ એમ કહેવામાં આવે કે–અભાવનો વિનાશ થતો નથી, તે તો સનાતન છે તો, અભાવમાં સનાતનપણું હોવાથી પ્રથમ પણ તેનો અભાવ ન હોવો જોઈએ, તેથી કરીને ભાવની સ્થિતિ કદી પણ હોઈ શકશે નહિં. ( ૧૨ )

બૌદ્ધનું કથન અને તેનું નિરસન—

**स क्षणस्थितिधर्मा चेद्, द्वितीयादिक्षणास्थितौ ।**
**युज्यते ह्येतदप्यस्य, तथा चोक्तानतिक्रमः ॥ १३ ॥ २५० ॥**

ભાવનો વિનાશ ક્ષણિક છે એમ જો કહેતા હોય તો દ્વિતીયાદિ ક્ષણમાં એની સ્થિતિ ન હોય તો જ એ વાત ઘટી શકે. અને દ્વિતીયાદિ ક્ષણમાં જો અસ્થિતિ માનવામાં આવે તો પૂર્વોક્ત દોષ આવીને ઊભો રહેશે.

આ જ વાતને નીચેના શ્લોકથી સ્પષ્ટ કરે છે. ( ૧૩ )

**क्षणस्थितौ तदैवास्य, नास्थितिर्युक्त्यसङ्गतेः ।**
**न पश्चादपि सा नेति, सतोऽसत्त्वं व्यवस्थितम् ॥ १४ ॥ २५१ ॥**

ઘટાદિ પદાર્થને ક્ષણસ્થિતિરૂપ માનો તો દ્વિતીયાદિ ક્ષણ છે તે પણ ક્ષણ છે માટે તેની ( ઘટાદિ પદાર્થની ) અસ્થિતિ સંભવી શકશે નહિ; યુક્તિ વિકળ હોવાથી. અર્થાત્ દ્વિતીયક્ષણમાં અસ્થિતિ તો તમે કહો છો એટલે સ્થિતિ અને અસ્થિતિ આવા બન્ને વિરુદ્ધ ધર્મ માનવા પડશે. અને તે પરસ્પર વિરોધ હોવાથી એકમાં ઘટી શકે નહિ.

કદાચ એમ કહેવામાં આવે કે—

દ્વિતીયાદિ ક્ષણમાં ભાવની અસ્થિતિ નથી. અર્થાત્ સ્થિતિ છે એમ જો કહેશો તો તો તમારો માનેલો ક્ષણિકવાદ પણ નષ્ટ થઈ જશે, માટે દ્વિતીયાદિ ક્ષણમાં ભાવનું અસત્ત્વ માનવું પડશે. અને તે જો માનવામાં આવે તો બારમા શ્લોકમાં કહેલા દોષો તદવસ્થ રહેશે. ( ૧૪ )

શંકા અને સમાધાન—

**न तद् भवति चेत् किं न, सदा सत्त्वं तदेव यत् ।**
**न भवत्येतदेवास्य, भवनं सूरयो विदुः ॥ १५ ॥ २५२ ॥**

બૌધ્ધ—અસત્ત્વને તુચ્છપણું હોવાથી—સર્વધર્મથી વિકળપણું હોવાથી તેની ઉત્પત્તિ થતી નથી.

સ્યાદ્વાદી—જો ભાવનું અસત્ત્વ નથી થતું તો પછી સર્વદા ઘટપટાદિ ભાવ કેમ ન હોય ?

બૌધ્ધ—દ્વિતીયાદિ ક્ષણમાં સત્ત્વ નથી હોતું, માટે સર્વદા ઘટપટાદિભાવ હોતા નથી.

સ્યાદ્વાદી—ભાવનું દ્વિતીયાદિ ક્ષણમાં જે ન હોવું તેને જ પંડિતો અસત્ત્વની ઉત્પત્તિ કહે છે. ( ૧૫ )

ઉક્ત કથનનું સ્પષ્ટીકરણ—

**कादाचित्कमदो यस्मादुत्पादाद्यस्य तद् ध्रुवम् ।**
**तुच्छत्वान्नेत्यतुच्छस्याप्यतुच्छत्वात् कथं नु यत् ॥१६॥२५३॥**

[ સ્યાદ્વાદી— ] અસત્ત્વ છે તે ભાવકાળમાં નથી, માટે કાદાચિત્ક છે. અને જે જે કાદાચિત્ક હોય તે તે નિશ્ચય કરીને ઉત્પત્ત્યાદિવાળું હોય છે, માટે અસત્ત્વના ઉત્પાદાદિ માનવા જોઈએ.

બૌદ્ધ—અસત્ત્વને તુચ્છપણું હોવાથી અર્થાત્ સકલ ધર્મથી વિકળપણું હોવાથી તેના ઉત્પાદાદિ હોઈ શકતા નથી.

સ્યાદ્વાદી—વાસ્તવિક ભાવને પણ અતુચ્છપણું હોવાથી તેના પણ ઉત્પાદાદિ કઈ રીતે હોઈ શકે ? અર્થાત્ ન હોઈ શકે. ( ૧૬ )

**तदा भूतेरियं तुल्या, तन्निवृत्तेर्न तस्य किम् ? ।**
**तुच्छताप्ते भावोऽस्तु, नासत् सत् सदसत् कथम् ? ॥ १७ ॥२५४॥**

બૌદ્ધ—પ્રથમ ક્ષણમાં અતુચ્છ એવા ભાવની ઉત્પત્તિ દેખાતી હોવાથી તેના ઉત્પાદાદિ માનવા જોઈએ.

સ્યાદ્વાદી—ભાવના દ્વિતીય ક્ષણમાં અસત્ત્વ દેખાતું હોવાથી તુચ્છ એવા અસત્ત્વની પણ ઉત્પત્તિ વગેરે માનવી જોઈએ.

બૌદ્ધ—અતુચ્છ એવા ભાવની દ્વિતીય ક્ષણમાં નિવૃત્તિ હોવાથી તુચ્છ અસત્ત્વની ઉત્પત્તિ વગેરે સમાન છે, એમ જે કહો છો તે વ્યાજબી નથી.

અતુચ્છને પ્રથમ ક્ષણમાં ઉત્પત્તિ માનવામાં તે સમયે તેના ઉત્પાદનો અનુભવ પ્રમાણરૂપ છે. અને તુચ્છ એવા અસત્ત્વનો ઉત્પાદ જો માનવામાં આવે તો ઉત્પન્ન થયેલાની નિવૃત્તિ અવશ્ય માનવી જોઈએ. અને તુચ્છ એવા અસત્ત્વની નિવૃત્તિ સંભવી શકતી નથી. જો તુચ્છની નિવૃત્તિ માનવામાં આવે તો નાશનાં અનધિકરણ કાળમાં અને નાશની નિવૃત્તિકાળમાં પાછું સત્ત્વ આવી

જશે, માટે તુચ્છ અસત્ત્વને તો નિવૃત્તિની અનુત્પત્તિ હોવાથી તેની ઉત્પત્તિનો અનુભવ પ્રમાણભૂત થઇ શકતો નથી.

સ્યાદ્વાદી—તુચ્છ એવા અસત્ત્વની શાથી નિવૃત્તિ થતી નથી ?

બૌધ્ધ—તુચ્છની નિવૃત્તિથી તુચ્છપણું જ પ્રાપ્ત કરવાનું છે, અને તુચ્છને તો તુચ્છપણું પ્રાપ્ત જ છે, માટે પ્રાપ્તની પુનઃ પ્રાપ્તિ હોઇ શકતી નથી.

સ્યાદ્વાદી—તુચ્છની નિવૃત્તિ ભાવસ્વરૂપ માનો તો તેની નિવૃત્તિ ઘટી શકશે ?

બૌધ્ધ—અસત્ છે તે સત્ થઇ શકતું નથી, તો તુચ્છ છે તે ભાવસ્વરૂપ કઇ રીતે હોઇ શકે ?

સ્યાદ્વાદી—જો એમ જ છે તો પછી સત્ જે ભાવ છે તે દ્વિતીય ક્ષણમાં અસત્ કેમ થાય છે ? અને જો ન થાય તો દ્વિતીયાદિ ક્ષણમાં ભાવ રહેવાથી ક્ષણિકત્વ કઇ રીતે ઘટી શકશે ? ( १७ )

બૌધ્ધનું કથન અને તેનો જવાબ—

**स्वहेतोरेव तज्जातं, तत्स्वभावं यतो ननु ।**
**तद्नन्तरभावित्वादितरत्राप्ययं समम् ॥ १८ ॥ २५५ ॥**

બૌધ્ધનું કથન—પોતાના હેતુથી અસત્ થવાના સ્વભાવવાળો ભાવ ઉત્પન્ન થાય છે, માટે તે અસત્ થઇ શકે છે.

સ્યાદ્વાદીનો જવાબ—ભાવથી અવ્યવહિત ઉત્તર ક્ષણમાં અસત્ત્વ જે થાય છે તે સતભવન સ્વભાવવાળું થાય છે, એમ પણ કેમ ન માની શકાય ? અર્થાત્ સમાનતા હોવાથી માનવું જોઇએ. ( १८ )

બૌધ્ધનું કથન—

**नाहेतोरस्य भवनं, न तुच्छे तत् स्वभावता ।**
**ततः कथं नु तद् भाव इति युक्त्या कथं समम् ॥ १९ ॥ २५६ ॥**

જેનો કોઈ હેતુ નથી એવું જે અસત્ત્વ તેની ઉત્પત્તિ હોઈ શકે નહિં. તુચ્છમાં સતભવન સ્વભાવ ઘટી શકતો નથી. તેથી કરીને અસત્‌નો સત્‌ભાવ કઈ રીતે હોઈ શકે ?, માટે યુક્તિથી આ વસ્તુ સમાન નથી. ( ૧૯ )

સ્યાદ્વાદીનો જવાબ—

**स एव भावस्तद्धेतुस्तस्यैव हि तदाऽस्थितेः ।**
**स्वनिवृत्तिः स्वभावोऽस्य भावस्येव ततो न किम् ? ॥ २० ॥ २५७॥**

ભાવ છે તે જ અસત્ત્વનો હેતુ છે, કારણ કે—ભાવને જ પોતાના અનન્તર ક્ષણમાં સ્થિતિ નથી. તેથી કરીને ભાવની જેમ અભાવનો પણ સનિવૃત્તિ સ્વભાવ કેમ ન હોય ? અર્થાત્ તે માનવો જોઈએ. ( ૨૦ )

ઉક્ત વાતની પુષ્ટિ—

**ज्ञेयत्ववत् स्वभावोऽपि, न ह्यायुक्तोऽस्य तद्विधः ।**
**तदभावे न तज्ज्ञानं, तन्निवृत्तेर्गतिः कथम् ? ॥ २१ ॥ २५८ ॥**

જેમ ભાવનો જ્ઞેયત્વ સ્વભાવ છે તેમ અસત્ત્વનો પણ જ્ઞેયત્વ સ્વભાવ છે. તેવી રીતે અસત્ત્વનો સતભવન સ્વભાવ પણ હોઈ શકે છે. કદાચ અસત્ત્વમાં જ્ઞેયત્વ સ્વભાવ ન માનો તો પ્રથમ ક્ષણમાં ઉત્પન્ન થયેલો ભાવ દ્વિતીય ક્ષણમાં અસત્ થાય છે. આવું અસત્ત્વનું જ્ઞાન થઈ શકશે નહિં. અને તેથી કરીને અસત્ત્વની નિવૃત્તિનું જ્ઞાન પણ નહિ થઈ શકશે. આમ થવાથી ક્ષણવાદનો વિનાશ થશે. (૨૧)

**तत तद्विधस्वभावं यत्, प्रत्यक्षेण तथैव हि ।**
**गृह्यते तद्गतिस्तेन, नैतत् क्वचिदनिश्चयात् ॥ २२ ॥ २५९ ॥**

શંકા—ભાવ પદાર્થ છે તે નિવૃત્તિ સ્વભાવવાળો છે, અને પ્રત્યક્ષે કરીને પણ તે જ રીતે ગ્રહણ કરાય છે, તેથી સત્ત્વનિવૃત્તિનું જ્ઞાન થશે.

સમાધાન—ભાવ બીજા, ક્ષણમાં નાશ પામે છે, આવા પ્રકારની પ્રતિતિ કોઈ પણ ઠેકાણે થતી નહિં હોવાથી. અથવા સભાગસંતતિમાં આ વસ્તુ બીજા ક્ષણમાં નાશ પામે છે. એવી પ્રતિતિ થતી નહિં હોવાથી. ( ૨૨ )

બૌધ્ધની શંકા અને તેનું સમાધાન—

**समारोपाद्सौ नेति, गृहीतं तत्त्वतस्तु तत् ।**
**यथाभावग्रहात् तस्यातिप्रसङ्गाद्दोऽप्यसत् ॥ २३ ॥ २६० ॥**

સભાગસન્તતિમાં એટલે સમાનાકારક ક્ષણિક વસ્તુના પ્રવાહમાં આરોપથી દ્વિતીય ક્ષણમાં સત્ત્વની નિવૃત્તિનો નિર્ણય થતો નથી, પરંતુ ખરી રીતે તો તે ગ્રહિત જ થાય છે એટલે જણાય જ છે, કારણ કે—નિર્વિકલ્પક પ્રત્યક્ષને પ્રતિનિયત ધર્મવાળી વસ્તુનું ગ્રહણપણું હોવાથી.

આ વસ્તુ પણ બૌધ્ધની વ્યાંજબી નથી, કારણ કે અતિપ્રસંગ નામનો દોષ આવતો હોવાથી.

આ જ વાત નીચેના શ્લોકથી જણાવે છે. ( ૨૩ )

**गृहीतं सर्वमेतेन, तत्त्वतोऽनिश्चयः पुनः ।**
**मितग्रहसमारोपान्निति तत्त्वव्यवस्थितेः ॥ २४ ॥ २६१ ॥**

આ નિર્વિકલ્પક પ્રત્યક્ષથી અખિલ જગત ગ્રહણ કરાયું. એ વાત તો બૌધ્ધને પણ અભિમત નથી, માટે અતિપ્રસંગ દોષ છે.

એના જવાબમાં જણાવે છે કે—

જેટલું જે સ્થળે નિશ્ચિત થાય અર્થાત્ જ્યાં તેનું સવિકલ્પક જ્ઞાન થાય ત્યાં જ તેની કલ્પના કરવામાં આવે છે, અન્યત્ર નહીં.

આ જ વાતની પુષ્ટિમાં નીચેના શ્લોકથી બીજી યુકિત પણ બતાવે છે. ( ૨૪ )

**एकत्र निश्चयोऽन्यत्र, निरंशानुभवादपि ।**
**न तथा पाटवाभावादित्यपूर्वमिदं तमः ॥ २५ ॥ २६२ ॥**

નિરંશ એવો જે નિર્વિકલ્પ પ્રત્યક્ષાત્મક જે અનુભવ તેમાં પટુતા હોવાથી સત્ત્વમાં વિકલ્પાત્મક નિશ્ચય થાય છે, અને મન્દતાને લઇને અસત્ત્વમાં વિકલ્પાત્મક નિશ્ચય થતો નથી. આવી જે કલ્પના તે ખરેખર મહાન્ અજ્ઞાનને સૂચવનારી છે, કારણ કે—નિરંશ વસ્તુમાં પટુતા અને અપટુતા એમ બે અંશો માની શકાય નહિં. અને જો માનવામાં આવે તો બૌદ્ધનો સ્વમાન્ય જે નિરંશવાદ તેનો વિનાશ થાય છે. ( ૨૫ )

પ્રસ્તુત વાતનું સમર્થન—

**स्वभावक्षणतो ह्यूर्ध्वं, तुच्छता तन्निवृत्तितः ।**
**नासावेकक्षणग्राहि-ज्ञानात् सम्यग् विभाव्यते ॥ २६ ॥ २६३ ॥**

ભાવની જે ક્ષણમાં સત્તા છે તેના બીજા ક્ષણમાં ભાવની નિવૃત્તિ થતી હોવાથી અસત્ત્વરૂપ જે તુચ્છતા તે એક ક્ષણગ્રાહી જ્ઞાનથી એટલે સત્ત્વમાત્રને ગ્રહણ કરનારા જ્ઞાનથી યુક્તિપૂર્વક નિશ્ચિત થઇ શકતી નથી, કારણ કે ભાવની સત્તાના ક્ષણમાં તુચ્છતા વસ્તુ જ નથી, તો પછી તેનો નિશ્ચય તેનાથી કઇ રીતે થાય ? અર્થાત્ ન જ થાય.

અને તેથી કરીને શું થાય ? તે વાત નીચેના શ્લોકમાં જણાવે છે. ( ૨૬ )

**तस्यां च नागृहीतायां, तत् तथेति विनिश्चयः ।**
**न ह्यीन्द्रियमतीतादि ग्राहकं सद्भिरिष्यते ॥ २७ ॥ २६४ ॥**

તુચ્છતાનો જો નિર્ણય ન થાય તો પછી ક્ષણસ્થિતિ સ્વભાવવાળી વસ્તુ કઇ રીતે સિધ્ધ થઇ શકે ?

કદાચ એમ કહેવામાં આવે કે ચક્ષુ આદિ ઇન્દ્રિયથી અસ-

ત્વનો નિર્ણય થશે, તો તે વાત પણ વ્યાજબી નથી, કારણ કે ચક્ષુ આદિ ઇન્દ્રિય છે તે અતીત અને અનાગતનું જ્ઞાન કરાવી શકતી નથી. આ જ વાતને નીચેના શ્લોકથી સ્પષ્ટ કરે છે. ( ૨૭ )

**अन्तेऽपि दर्शनं नास्य, कपालादिगतेः क्वचित् ।**
**न तदेव घटाभावो, भावत्वेन प्रतीतितः ॥ २८ ॥ २६५ ॥**

અંતમાં પણ એટલે વિસભાગ સન્તતિની ઉત્પત્તિમાં પણ અર્થાત્ ઘટ મટીને કપાલ થાય ત્યારે પણ ઘટાભાવનું દર્શન કોઈ પણ સ્થળે થતું નથી, કારણ કે તે વખતે કપાલ વગેરે જોવામાં આવે છે. કદાચ એમ કહેવામાં આવે કે કપાલ વગેરે છે તે જ ઘટાભાવ માની લો, તો એના જવાબમાં જણાવે છે કે કપાલાદિ ઘટાભાવરૂપ હોઈ શકે નહિં, કારણ કે ભાવસ્વરૂપે તેની પ્રતીતિ થાય છે, પણ અભાવસ્વરૂપે નહિં. ( ૨૮ )

**न तद्गतेर्गतिस्तस्य, प्रतिबन्धविवेकतः ।**
**तस्यैवाभवनत्वे तु, भावाविच्छेदतोऽन्वयः ॥ २९ ॥ २६६ ॥**

કદાચ એમ કહેવામાં આવે કે કપાલાદિકના દર્શનથી ઘટાભાવનું અનુમાન કરશું તો તે વાત પણ વ્યાજબી નથી, કારણ કે ઘટાભાવને કપાલાદિકની સાથે વ્યાપ્તિગ્રહ નહિં હોવાથી.

